SARASVATI BHAVANA GRANTHAMALA

VOL. 86

Part I

GENERAL EDITOR —

Kshetresachandra Chattopadhyaya

Director, Research Institute,

Varanaseya Sanskrit Vishva Vidyalaya,

Varanasi

GARGA-SAMHITA

(*Volume I*)

VARANASI

1959

सरस्वतीभवन-ग्रन्थमाला

(८६)

गर्गसंहिता

श्रीविभूतिभूषणभट्टाचार्येण संशोधिता

(प्रथमो भागः)

वाराणस्याम्

१८८० तमे शकाब्दे

विज्ञप्तिः

भगवतः श्रीकृष्णचन्द्रस्य भक्तजनमनोहारिणीं कथामाश्रित्य ये पौराणिका ग्रन्था लिखितास्तन्मध्ये गर्गसंहिताऽप्येका । एषा संहिता १८३० तमे शके श्रीवेंकटेश्वर-यन्त्रालयान्मुद्रिता तथापि सरस्वतीभवनस्थमातृकाचतुष्टयस्याधारेण तस्याः संशोधितं संस्करणमस्माभिः प्रक्रान्तम् । ग्रन्थस्यास्य संशोधनं सरस्वतीभवन-पुस्तकालयस्य सहकार्यध्यक्षेण श्रीविभूतिभूषणभट्टाचार्येण वाराणसेयराजकीय-संस्कृतमहाविद्यालयस्याध्यक्षचरस्याधुना संस्कृतविश्वविद्यालयप्रस्तोतुः श्रीकुबेरनाथ-शुक्लस्य निरीक्षणेन कृतम् ।

अस्मिन् पुस्तके वासुदेवः श्रीकृष्णः पूर्णं ब्रह्मेति पक्षः स्वीकृतः । अत्र श्रीराधिका श्रीकृष्णस्य पत्नीति प्रतिपादितम् । सन्त्यन्येऽपि विशेषा अत्र ये श्रीकृष्णचरितानामैतिहासिकाध्ययने भृशमुपकुर्युः । एतत् सर्वं संशोधकस्य भूमिकाया प्रकाशयिष्यते । अधुना खण्डदशकमितस्यास्य ग्रन्थस्य खण्डषट्क-मयः प्रथमो भागः प्रकाश्यते । शिष्टो भागो द्वितीये भागे प्राकाश्यं लप्स्यते । तत्रैव भूमिकापि सन्निवेशयिष्यते ।

विद्वज्जनसेवी—

क्षेत्रेशचन्द्रचट्टोपाध्यायः

अनुसन्धान-संस्थान-सञ्चालकः ।

गर्गसंहिता

(प्रथमो भागः)

श्रीगणेशाय नमः ।

गर्गसंहिता

(गोलोक खण्डः)

ॐ नारायणं नमस्कृत्य नरञ्चैव नरोत्तमम् ।
देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥ १
शरद्विकचपङ्कजश्रियमतीवविद्वेषकम्
मिलिन्दमुनिलेढितं कुलिशकञ्जचिह्नावृतम् ।
स्फुरत्कनकनूपुरं दलितभक्ततापत्रयं
चलद्युतिपदद्वयं हृदि दधामि राधापतेः ॥ २
वदनकमलनिर्यद् यस्य पीयूषमाद्यं
पिबति जनवरोऽयं पातु सोऽयं गिरं मे ।
बदरवनविहारः सत्यवत्याः कुमारः
प्रणतदुरितहारः शार्ङ्गधन्वावतारः ॥ ३
कदाचिन्नैमिषारण्ये श्रीगर्गो ज्ञानिनां वरः ।
आययौ शौनकं द्रष्टुं तेजस्वी योगभास्करः ॥ ४
तं दृष्ट्वा सहसोत्थाय शौनको मुनिभिः सह ।
पूजयामास पाद्यार्घैरुपचारैर्विधानतः ॥ ५

शौनक उवाच

सतां पर्यटनं धन्यं गृहीणां शान्तये स्मृतम् ।
नृणामन्तस्तमोहारी साधुरेव न भास्करः ॥ ६
तस्मान्मे हृदि सम्भूतं सन्देहं नाशय प्रभो ।
कतिधा श्रीहरेर्विष्णोरवतारा भवन्त्यलम् ॥ ७

गर्ग उवाच

साधु पृष्टं त्वया ब्रह्मन् भगवद्गुणवर्णनम् ।
शृण्वतां गदतां यद्वै पृच्छतां वितनोति शम् ॥ ८
अत्रैवोदाहरन्तीममितिहासं पुरातनम् ।
यस्य स्मरणमात्रेण महादोषः प्रशाम्यति ॥ ९
मिथिलानगरे पूर्वं बहुलाश्वः प्रतापवान् ।
श्रीकृष्णभक्तः शान्तात्मा बभूव निरहङ्कृतिः ॥ १०
अम्बरादागतं दृष्ट्वा नारदं मुनिसत्तमम् ।
सम्पूज्य चासने स्थाप्य कृताञ्जलिरभाषत ॥ ११

जनक उवाच

अयोनिरात्मा पुरुषो भगवान् प्रकृतेः परः ।
कस्मात्तनुं समाधत्ते तन्मे ब्रूहि महामुने ॥ १२

नारद उवाच

गोसाधुदेवताविप्रवेदानां रक्षणाय वै ।
तनूर्धत्ते हरिः साक्षाद्भगवानात्मलीलया ॥ १३
यथा नटः स्वलीलायां मोहितो न परस्तथा ।
अन्ये दृष्ट्वा च तन्मायां मुमुहुस्ते मुहुर्मुहुः ॥ १४

जनक उवाच

कतिधा श्रीहरेर्विष्णोरवतारा भवन्त्यलम् ।
साधूनां रक्षणार्थाय कृपया वद मां प्रभो ॥ १५

नारद उवाच

अंशोंऽशांशस्तथावेशः कला पूर्णः प्रकथ्यते ।
व्यासाद्यैश्च स्मृतः षष्ठः परिपूर्णतमः स्वयम् ॥ १६
ब्रह्मादयः स्मृता अंशा अंशांशास्तु मरीच्यादिः ।
कलाः कपिलकूर्माद्या आवेशा भार्गवादयः ॥ १७

पूर्णो नृसिंहो रामश्च श्वेतद्वीपाधिपो हरिः ।
वैकुण्ठोऽपि तथा यज्ञो नरनारायणः स्मृतः ॥ १८
परिपूर्णतमः साक्षाच्छ्रीकृष्णो भगवान् स्वयम् ।
असंख्यब्रह्माण्डपतिर्गोलोके धाम्नि राजते ॥ १९
कार्याधिकारं कुर्वन्तस्तदंशास्ते प्रकीर्त्तिताः ।
तत्कार्यभारं कुर्वन्तस्तेऽशांशा विदिताः प्रभो ॥२०
येषामन्तर्गतो विष्णुः कार्यं कृत्वा विनिर्गतः ।
तान्वाऽऽवेशावतारांश्च विद्धि राजन् महामते ॥२१
धर्मं विधाय कृत्वा च पुनरन्तरधीयत ।
युगे युगे वर्तमानः सोऽवतारः कला हरेः ॥२२
चतुर्व्यूहो भवेद्यत्र दृश्यन्ते च रसा नव ।
अतःपरञ्च वीर्याणि स तु पूर्णः प्रकथ्यते ॥२३
यस्मिन् सर्वाणि तेजांसि विलीयन्ते स्वतेजसि ।
तं वदन्ति परं साक्षात् परिपूर्णतमं स्वयम् ॥२४
पूर्णस्य लक्षणं यत्र यं पश्यन्ति पृथक् पृथग् ।
भावेनापि जनाः सोऽपि परिपूर्णतमः स्वयम् ॥२५
परिपूर्णतमः साक्षाच्छ्रीकृष्णो नाऽन्य एव हि ।
एककार्यार्थमागत्य कोटिकार्यं चकार ह ॥२६

पूर्णः पुराणः पुरुषोत्तमोत्तमः
परात्परो यः पुरुषः परेश्वरः ।
स्वयं सदाऽऽनन्दमयः कृपावित्
स एव कृष्णः प्रणिगद्यते बुधैः ॥२७

गर्ग उवाच

तच्छ्रुत्वा हर्षितो राजा रोमाञ्चोद्गमविह्वलः ।
प्रमृज्य नेत्रेऽश्रुपूर्णे नारदं वाक्यमब्रवीत् ॥२८

बहुलाश्व उवाच

परिपूर्णतमः साक्षाच्छ्रीकृष्णः केन हेतुना ।
आगतो भारते खण्डे द्वारवत्यां विराजते ॥२९
तस्य गोलोकनाथस्य गोलोकं धाम सुन्दरम् ।
कर्माण्यपरिमेयाणि ब्रूहि मह्यं महामुने ॥३०
यदा तीर्थाटनं कुर्वञ्छ्रुतजन्मतपः परः ।
तदा सत्सङ्गमेत्याऽऽशु श्रीकृष्णं प्राप्नुयान्नरः ॥३१

श्रीकृष्णदासस्य च दासदासः
कदा भवेयं मनसार्द्रचित्तः ।
यो दुर्लभो देववरैः परात्मा
स मे कथं गोचर आदिदेवः ॥३२

नारद उवाच

धन्यस्त्वं राजशार्दूल श्रीकृष्णेष्टो हरिप्रियः ।
तुभ्यञ्च दर्शनं दातुं भक्तेशोऽत्रागमिष्यति ॥३३
त्वां नृपं श्रुतदेवञ्च द्विजदेवो जनार्दनः ।
स्मरत्यलं द्वारकायामहोभाग्यं सतामिह ॥३४

इति श्रीगर्गसंहितायां गोलोकखण्डे नारदबहुलाश्व-
संवादे श्रीकृष्णमाहात्म्यवर्णनं नाम
प्रथमोऽध्यायः ॥ १

नारद उवाच

जिह्वां लब्ध्वापि यः कृष्णं कीर्तनीयं न कीर्तयेत् ।
लब्ध्वापि मोक्षसोपानमनारोहति दुर्मतिः ॥ १

अथ ते सम्प्रवक्ष्यामि श्रीकृष्णागमनं भुवि ।
अस्मिन् वाराहकल्पे वै यद्भूतं तच्छृणु प्रभो ॥ २

पुरा दानवदैत्यानां नराणां खलभूभुजाम् ।
भूरिभारसमाक्रान्ता पृथ्वी गोरूपधारिणी ॥ ३

अनाथवद्रुदन्तीव वेदयन्ती निजव्यथाम् ।
कम्पयन्ती निजं गात्र ब्रह्माणं शरण गता ॥ ४

ब्रह्मा चाश्वास्य तां सद्यः सर्वैर्देवगणैर्वृतः ।
शङ्करेण समं प्रागाद् वैकुण्ठं मन्दिर हरेः ॥ ५

नत्वा चतुर्भुजं विष्णुं स्वाभिप्रायं जगाद ह ।
अथोद्विग्नं देवगणं श्रीनाथः प्राह तं विधिम् ॥ ६

भगवानुवाच

कृष्णं स्वयं विगणिताण्डपतिं परेशं
साक्षादखण्डमतिदेवमतीवलीलम् ।
कार्यं कदापि न भविष्यति यं विना हि
गच्छाशु तस्य विशदं पदमव्ययं त्वम् ॥ ७

ब्रह्मोवाच

त्वत्तः परं न जानामि परिपूर्णतमं स्वयम् ।
यद्यस्त्यन्यस्तस्य साक्षाल्लोकं दर्शय मे प्रभो ॥ ८

नारद उवाच

इत्युक्तोऽपि हरिः पूर्णः सर्वैर्देवगणैः सह ।
पदवीं दर्शयामास ब्रह्माण्डशिखरोपरि ॥ ९

वामपादाङ्गुष्ठनखभिन्नब्रह्माण्डमस्तके ।
श्रीवामनस्य विवरे ब्रह्मद्रवसमाकुले ॥१०

जलयानेन मार्गेण बहिस्ते निर्ययुः सुराः ।
कलिङ्गबिम्बवच्चेदं ब्रह्माण्डं ददृशुस्त्वधः ॥११

इन्द्रायणफलानीव लुठन्त्यन्यानि वै जले ।
विलोक्य विस्मिताः सर्वे बभूवुश्चकिता इव ॥१२

कोटिशो योजनान्ते वै पुराणामष्टकं गताः ।
दिव्यप्राकाररत्नादिद्रुमवृन्दमनोहरम् ॥१३

तदूर्ध्वं ददृशुर्देवा विरजायास्तटं शुभम् ।
तरङ्गितक्षीरशुभ्रं सोपानैर्भास्वरं परम् ॥१४

तं दृष्ट्वा प्रचलन्तस्ते तत्पारं जग्मुरुत्सुकाः ।
असंख्यकोटिमार्तण्डज्योतिषां मण्डलं महत् ॥१५

दृष्ट्वा प्रताडिताक्षास्ते तेजसा धर्षिताः स्थिताः ।
नमस्कृत्वाथ तत्तेजो दध्यौ विष्ण्वाज्ञयाविधिः ॥१६

तज्ज्योतिर्मण्डलेऽपश्यन् साकारं धाम शान्तिमत् ।
यस्मिन् महाद्भुतं दीर्घं मृणालधवलं परम् ।
सहस्रवदनं शेषं दृष्ट्वा नेमुः सुरास्ततः ॥१७

तस्योत्सङ्गे महालोको गोलोको लोकवन्दितः ।
यत्र कालः कलयतामीश्वरो धाममानिनाम् ॥१८

राजन् न प्रभवेन्माया मनश्चित्तं मतिह्यहम् ।
न विकारो विशत्येनं न महांश्च गुणाः कुतः ॥१९

तत्र कन्दर्पलावण्याः श्यामसुन्दरविग्रहाः ।
द्वारि गन्तुं चाभ्युदितान् न्यषेधन् कृष्णपार्षदाः ॥२०

देवा ऊचुः

लोकपाला वयं सर्वे ब्रह्मविष्णुमहेश्वराः ।
श्रीकृष्णदर्शनार्थाय शक्राद्या आगता इह ॥२१

नारद उवाच

तच्छ्रुत्वा तदभिप्रायं श्रीकृष्णाय सखीजनाः ।
ऊचुर्देवप्रतीहारा गत्वा चान्तःपुरं परम् ॥२२
तदा विनिर्गता काचिच्छतचन्द्रानना सखी ।
पीताम्बरा वेत्रहस्ता साऽपृच्छद्वाञ्छितं सुरान् ॥२३

चन्द्राननोवाच

कस्याण्डस्याधिपा देवा यूयं सर्वे समागताः ।
वदताशु गमिष्यामि तस्मै भगवते ह्यहम् ॥२४

देवा ऊचुः

अहो ह्यण्डान्युतान्यानि नास्माभिर्दर्शितानि च ।
एकमण्डं प्रजानीमोऽथेतरं नास्ति नः शुभे ॥२५

चन्द्राननोवाच

ब्रह्मद्रवे लुठन्तीह कोटिशो ह्यण्डराशयः ।
तेषु यूयं यथा देवास्तथाण्डेऽण्डे पृथक् पृथक् ॥२६
नामग्रामं न जानीथ कदा वात्र समागताः ।
जडबुद्ध्या प्रहृष्यध्वं गृहान्नापि विनिर्गताः ॥२७
ब्रह्माण्डमेकं जानन्ति यत्र जातास्तथा जनाः ।
मशकाश्च यथान्तःस्था औदुम्बरफलेषु वै ॥२८

नारद उवाच

उपहास्यं गता देवा इत्थं तूष्णीं स्थिताः पुनः ।
चकितानिव तान् दृष्ट्वा विष्णुर्वचनमब्रवीत् ॥२९

विष्णुरुवाच

यस्मिन्नण्डे पृश्निगर्भोऽवतारोऽभूत् सनातनः ।
त्रिविक्रमनखोद्भिन्ने तस्मिन्नण्डे स्थिता वयम् ॥३०

नारद उवाच

तच्छ्रुत्वा तञ्च संश्लाघ्य शीघ्रमन्तःपुरं गता ।
पुनरागत्य देवेभ्योऽथाज्ञां दत्वा गता पुरम् ॥३१

अथ देवगणाः सर्वे गोलोकं ददृशुः परम् ।
यत्र गोवर्द्धनो नाम गिरिराजो विराजते ॥३२

वसन्तमालिनीभिश्च गोपीभिर्गोगणावृतः ।
कल्पवृक्षलतासङ्घै रासमण्डलमण्डित. ॥३३

यत्र कृष्णानदी श्यामा तोलिकाकोटिमण्डिता ।
वैडूर्य्यकृतसोपाना स्वच्छन्दगतिरुत्तमा ॥३४

वृन्दावनं भ्राजमानं दिव्यद्रुमलताकुलम् ।
चित्रपक्षिमधुव्रातैर्वंशीवटविराजितम् ॥३५

पुलिने शीतले वायुर्मन्दगामी वहत्यलम् ।
सहस्रदलपद्मानां रजो विक्षेपयन् मुहुः ॥३६

मध्ये निजनिकुञ्जोऽस्ति द्वात्रिंशद्वनसंयुतः ।
प्राकारपरिखायुक्तोऽरुणाक्षयवटाजिरः ॥३७॥
सप्त द्वाः पद्मरागाढ्याजिरकुड्यविभूषिताः ।
कोटीन्दुमण्डलाकारैर्वितानैर्गुलिकाद्युभि. ॥३८
पतत्पताकैर्दिव्याभैः पुष्पमन्दिरवर्त्मभिः ।
मत्तभ्रमरसङ्गीतोन्मत्तबर्हि पिकस्वनः ॥३९
बालार्ककुण्डलधराः शतचन्द्रप्रभाः स्त्रियः ।
स्वच्छन्दगतयो रत्नैः पश्यन्त्यः सुन्दरं मुखम् ॥४०
रत्नाजिरेषु धावन्त्यो हारकेयूरभूषिताः ।
क्वणन्नूपुरकिङ्किण्यश्चूडामणिविराजिताः ॥४१
कोटिशः कोटिशो गावो द्वारि द्वारि मनोहराः ।
श्वेतपर्वतसङ्काशा दिव्यभूषणभूषिताः ॥४२

पयस्विन्यस्तरुण्यश्च शीलरूपगुणैर्युताः ।
सवत्साः पीतपुच्छाश्च व्रजन्त्यो भव्यमूर्तिकाः ॥४३
घण्टामञ्जीरसंरावाः किङ्किणीजालमण्डिताः ।
हेमशृङ्ग्यो हेमतुल्यहारमालाः स्फुरत्प्रभाः ॥४४
पाटला हरितास्ताम्राः पीताः श्यामा विचित्रिताः ।
धूम्राः कोकिलवर्णाश्च यत्र गावस्त्वनेकशः ॥४५
समुद्रवद्दुग्धदाश्च तरुणीकरचिह्निताः ।
कुरङ्गवद्विलङ्घद्भिर्गोवत्सैर्मण्डिताः शुभाः ॥४६
इतस्ततश्चलन्तश्च गोगणेषु महावृषाः ।
दीर्घकन्धरशृङ्गाढ्या यत्र धर्मधुरन्धराः ॥४७
गोपाला वेत्रहस्ताश्च श्यामा वंशीधराः पराः ।
कृष्णलीलां प्रगायन्तो रागैर्मदनमोहनैः ॥४८
इत्थं निजनिकुञ्जे तान्नत्वा मध्ये गताः सुराः ।
ज्योतिषां मण्डले पद्मं सहस्रदलशोभितम् ॥ ४९
तदूर्ध्वं षोडशदलं ततोऽष्टदलपङ्कजम् ।
तस्योपरि स्फुरद्दीर्घसोपानत्रयमण्डितम् ॥ ५०
सिंहासनं परं दिव्यं कौस्तुभैः खचितं शुभैः ।
ददृशुर्देवतास्तत्र श्रीकृष्णं राधयायुतम् ॥ ५१
दिव्यैरष्टसखीसङ्घैर्मोहिन्यादिभिरन्वितम् ।
श्रीदामाद्यैः सेव्यमानमष्टगोपालमण्डलैः ॥ ५२
हंसाभैर्व्यजनान्दोलचामरैर्वज्रमुष्टिभिः ।
कोटिचन्द्रप्रतीकाशैः सेवितं छत्रकोटिभिः ॥ ५३

श्रीराधिकालङ्कृतवामबाहुं
स्वच्छन्दवक्रीकृतदक्षिणाङ्घ्रिम् ।
वंशीधरं सुन्दरमन्दहासं
भ्रूमण्डलामोहितकामराशिम् ॥ ५४

घनप्रभं　पद्मदलायतेक्षणं
प्रलम्बबाहुं परिपीतवाससम्।
वृन्दावनोन्मत्तमिलिन्दशब्दया
विराजितं श्रीवनमालया हरिम्॥ ५५
काञ्चीकलाकङ्कणनूपुरद्युतिं
लसन्मनोहारि महोज्ज्वलस्मितम्।
श्रीवत्सरत्नोत्तमकुन्तलश्रियं
किरीटहाराङ्गदकुण्डलत्विषम्॥ ५
दृष्ट्वा तमानन्दसमुद्रमग्नव-
त्प्रहर्षिताह्यश्रुकलाकुलेक्षणाः।
ततः सुराः प्राञ्जलयो नतानना
नेमुर्मुरारिं पुरुषं परायणम्॥ ५७

इति श्रीगर्गसंहितायां गोलोकखण्डे नारदबहुलाश्व-
संवादे श्रीगोलोकधामवर्णनं नाम
द्वितीयोऽध्यायः॥२

बहुलाश्व उवाच

मुने देवा महात्मानं कृष्णं दृष्ट्वा परात्परम् ।
अग्रे किं चक्रिरे तत्र तन्मे ब्रूहि कृपां कुरु ॥ १

नारद उवाच

सर्वेषां पश्यतां तेषां वैकुण्ठः श्रीहरिस्ततः ।
उत्थायाष्टभुजः साक्षाल्लीनोऽभूत् कृष्णविग्रहे ॥ २

तदैव चागतः पूर्णो नृसिंहश्चण्डविक्रमः ।
कोटिसूर्यप्रतीकाशो लीनोऽभूत्कृष्णविग्रहे ॥ ३

रथे लक्षहये शुभ्रे स्थितश्चागतवांस्ततः ।
श्वेतद्वीपाधिपो भूमा सहस्रभुजमण्डितः ॥ ४

श्रिया युक्तः स्वायुधाढ्यः पार्षदैः परिसेवितः ।
स प्रलीनो बभूवाशु सोऽपि श्रीकृष्णविग्रहे ॥ ५

तदैव चागतः साक्षाद्रामो राजीवलोचनः ।
धनुर्बाणधरः सीताशोभितो भ्रातृभिर्वृतः ॥ ६

दशकोट्यर्कसङ्काशे चामरान्दोलिते रथे ।
असंख्यवानरेन्द्राढ्ये लक्षचक्रघनस्वने ॥ ७

लक्षध्वजे लक्षहये शातकौम्भे स्थितस्ततः ।
श्रीकृष्णविग्रहे पूर्णः सम्प्रलीनो बभूव ह ॥ ८

तदैव चागतः साक्षाद्यज्ञो नारायणो हरिः ।
प्रस्फुरत्प्रलयार्कोद्यज्ज्वलदग्निशिखोपमः ॥ ९

रथे ज्योतिर्मये दृश्यो दक्षिणाढ्यः सुरेश्वरः ।
सोऽपि लीनो बभूवाशु श्रीकृष्णे श्यामविग्रहे ॥ १०

तदा चागतवान् साक्षान्नरनारायणः प्रभुः।
चतुर्भुजो विशालाक्षो मुनिवेषो घनद्युतिः॥ ११

तडित्कोटिजटाजूटः प्रस्फुरद्दीप्तिमण्डलः।
मुनीन्द्रमण्डलैर्दिव्यैर्मण्डितोऽखण्डितव्रतः॥ १२

सर्वेषां पश्यतां तेषामाश्चर्यमनसां नृप।
सोऽपि लीनो बभूवाशु श्रीकृष्णे श्यामसुन्दरे॥ १३

परिपूर्णतमं साक्षाच्छ्रीकृष्णञ्च स्वयं प्रभुम्।
ज्ञात्वा देवाः स्तुतिं चक्रुः परं विस्मयमागताः॥१४

देवा ऊचुः

कृष्णाय पूर्णपुरुषाय परात्पराय
यज्ञेश्वराय परकारणकारणाय।
राधावराय परिपूर्णतमाय साक्षाद्-
गोलोकधामधिषणाय नमः परस्मै॥१५

योगेश्वराः किल वदन्ति महः परं त्वां
तत्रैव सात्वततमाः कृतविग्रहञ्च।
अस्माभिरद्य विदितं पदयोर्द्वयं ते
तस्मै नमोऽस्तु महसां पतये परस्मै॥१६

व्यङ्ग्येन वा न नहि लक्षणया कदापि
स्फोटेन यच्च कवयो न विशन्ति मुख्याः।
निर्देश्यभावरहितं प्रकृतेः परं तं
त्वां ब्रह्म निर्गुणमज शरणं व्रजामः॥१७

त्वां ब्रह्म केचिदवयन्ति परे च कालं
केचित् प्रसांख्यमपरे भुवि कर्मरूपम्।
पूर्वे च योगमपरे किल कर्तृभाव-
मन्योक्तिभिर्न विदितं शरणं गताः स्म॥१८

श्रेयस्करीं भगवतस्तव पादसेवां
हित्वाथ तीर्थयजनादितपश्चरन्ति ।
ज्ञाने नये च विदिता बहुविघ्नसङ्घैः
सन्ताडिताः किल भवन्ति न ते कृतार्थाः ।।१६
विज्ञाप्यमद्य किमु देव अशेषसाक्षी
यः सर्वभूतहृदयेषु विराजमानः ।
देवैर्नमद्भिरमलाशययुक्तदेहै-
स्तस्मै नमो भगवते पुरुषोत्तमाय ।।२०
यो राधिकाहृदयसुन्दरचन्द्रहारः
श्रीगोपिकानयनजीवनमूलरूपः ।
गोलोकधामधिषणध्वज आदिदेवः
स त्वं विपत्सु विबुधान् परिपाहि पाहि ।।२१
वृन्दावनेश गिरिराजपते व्रजेश
गोपालवेषकृतनित्यविहारलील ।
राधापते श्रुतिधराधिपतेऽध्वर त्वं
गोवर्द्धनोद्धरणदुर्द्धरधर्मधारिन् ।।२२

नारद उवाच

इत्युक्तो भगवान् साक्षाच्छ्रीकृष्णो गोकुलेश्वरः ।
प्रत्याह प्रणतान् देवान् मेघगम्भीरया गिरा ।।२३

भगवानुवाच

हे सुरज्येष्ठ हे शम्भो देवाः शृणुत मद्वचः ।
यादवेषूपजन्यध्वं स्वस्वस्त्रीभिर्मदाज्ञया ।।२४
अहञ्चावतरिष्यामि हरिष्यामि भुवो भरम् ।
करिष्यामि च वः कार्यं भविष्यामि यदोः कुले ।।२५
वेदा मे वचनं विप्रा मुखं गावस्तनुर्मम ।
अङ्गानि देवता यूयं साधवो ह्यसवो हृदि ।।२६

युगे युगे च बाध्येत यदा पाषण्डिभिर्जनैः ।
धर्म्मः क्रतुर्दया साक्षात्तदात्मानं सृजाम्यहम् ॥२७

नारद उवाच

इत्युक्तवन्तं जगदीश्वरं हरिं
राधा पतिं प्राह वियोगविह्वला ।
दावाग्निना दावलतेव मूर्च्छिता
सकम्परोमाञ्चितभावसंवृता ॥२८

राधोवाच

भुवो भरं हर्तुमलं भुवं व्रज
कृतं परं मे शपथं शृणुष्व तत् ।
गते त्वयि प्राणपतौ च विग्रहं
कदाचिदत्रैव न धारयाम्यहम् ॥२९
यदाथ मे त्वं शपथं न मन्यसे
द्वितीयवारं प्रवदामि वाक्यम् ।
प्राणश्च मे गन्तुमतीवविह्वलः
कर्पूरधूलीकणवद् गमिष्यति ॥३०

भगवानुवाच

त्वया सह गमिष्यामि मा शोकं कुरु राधिके ।
हरिष्यामि भुवो भारं करिष्यामि वचस्तव ॥३१

राधिकोवाच

यत्र वृन्दावनं नास्ति न यत्र यमुना नदी ।
यत्र गोवर्द्धनो नास्ति तत्र मे न मनः सुखम् ॥३२

नारद उवाच

वेदनागक्रोशभूमिं स्वधाम्नः श्रीहरिः स्वयम् ।
गोवर्द्धनञ्च यमुनां प्रेषयामास भूपरि ॥३३

तदा ब्रह्मा देवगणैर्नत्वा नत्वा पुनः पुनः ।
परिपूर्णतमं साक्षाच्छ्रीकृष्णं समुवाच ह ॥३४

ब्रह्मोवाच

अहं कुत्र भविष्यामि कुत्र त्वञ्च भविष्यसि ।
एते कुत्र भविष्यन्ति कैर्गृहैः कैश्चनामभिः ॥३५

भगवानुवाच

वसुदेवस्य देवक्यां भविष्यामि परः स्वयम् ।
रोहिण्यां मत्कला शेषो भविष्यति न संशयः ॥३६
श्रीः साक्षाद्रुक्मिणी भैष्मी शिवा जाम्बवती तथा ।
सत्या च तुलसी भूमौ सत्यभामा वसुन्धरा ॥३७
दक्षिणा लक्ष्मणा चैव कालिन्दी विरजा तथा ।
भद्रा ह्रीर्मित्रविन्दा च जाह्नवी पापनाशिनी ॥३८
रुक्मिण्यां कामदेवश्च प्रद्युम्न इति विश्रुतः ।
भविष्यति न सन्देहस्तस्य त्वञ्च भविष्यसि ॥३९
नन्दो द्रोणो वसुः साक्षाद् यशोदा सा धरा स्मृता ।
वृषभानुः सुचन्द्रश्च तस्य भार्या कलावती ॥४०
भूमौ कीर्तिरिति ख्याता तस्यां राधा भविष्यति ।
सदा रासं करिष्यामि गोपीभिर्व्रजमण्डले ॥४१

इति श्रीगर्गसंहितायां गोलोकखण्डे नारदबहुलाश्व-
संवादे आगमोद्योगवर्णनंनाम
तृतीयोऽध्यायः ॥३

भगवानुवाच

नन्दोपनन्दौ भुवने श्रीदामा सुबलः सखा।
स्तोकः कृष्णोऽर्जुनोंऽशुश्च नव नन्दगृहे विधे ॥ १
विशालर्षभतेजस्विदेवप्रस्थवरूथपाः।
भविष्यन्ति सखायो मे व्रजे षड् वृषभानुषु ॥ २

ब्रह्मोवाच

कस्य वै नन्दपदवी कस्य वै वृषभानुता।
वद देव पते साक्षादुपनन्दस्य लक्षणम् ॥ ३

भगवानुवाच

गाः पालयन्ति घोषेषु सदा गोवृत्तयोऽनिशम्।
ते गोपाला मया प्रोक्तास्त्वन्येषां लक्षणं शृणु ॥ ४
नन्दः प्रोक्तः स गोपालै र्नवलक्षगवां पतिः।
उपनन्दश्च कथितः पञ्चलक्षगवां पतिः ॥ ५
वृषभानुः स उक्तो यो दशलक्षगवां पतिः।
गवां कोटिर्गृहे यस्य नन्दराजः स एव हि ॥ ६
कोट्यर्धश्च गवां यस्य वृषभानुवरस्तु सः।
एतादृशौ व्रजे द्वौ तु सुचन्द्रो द्रोण एव हि।
सर्वलक्षणलक्षण्यौ गोपराजौ भविष्यतः ॥ ७
शतचन्द्राननानाञ्च सुन्दरीणां सुवाससाम्।
गोपीनां मद्व्रजे रम्ये शतं यूथो भविष्यति ॥ ८

ब्रह्मोवाच

हे दीनबन्धो हे देव जगत्कारणकारण।
यूथस्य लक्षणं सर्वं तन्मे ब्रूहि परेश्वर ॥ ९

भगवानुवाच

अर्बुदं दशकोटीनां मुनिभिः कथितं विधे।
दशार्बुदं यत्र भवेत् सोऽपि यूथः प्रकथ्यते॥ १०
गोलोकवासिन्यः काश्चित् काश्चिद्द्वै द्वारपालिकाः।
शृङ्गारप्रकराः काश्चित् काश्चिच्छय्योपकारकाः॥ ११
पार्षदाख्यास्तथा काश्चिच्छ्रीवृन्दावनपालिकाः।
गोवर्द्धननिवासिन्यः काश्चित्कुञ्जविधायकाः॥ १२
मे निकुञ्जनिवासिन्यो भविष्यन्ति व्रजे मम।
एवञ्च यमुनायूथो जाह्नवीयूथ एव च॥ १३
रमाया मधुमाधव्या विरजायास्तथैव च।
ललिताया विशाखाया मायायूथो भविष्यति॥ १४
एताह्यष्टसखीनाञ्च सखीनां किल षोडश।
द्वात्रिंशच्च सखीनान्तु यूथा भाव्या व्रजे विधे॥ १५
श्रुतिरूपा ऋषिरूपा मैथिलाः कौशलास्तथा।
अयोध्यापुरवासिन्यो यज्ञसीताः पुलिन्दकाः॥ १६
यासां मया वरो दत्तो पूर्वं पूर्वं युगे युगे।
तासां यूथा भविष्यन्ति गोपीनां मद्व्रजे शुभे॥ १७

ब्रह्मोवाच

एताः कथं व्रजे भाव्याः केन पुण्येन कैर्वरैः।
दुर्लभं हि पदं तद्धै योगिभिः पुरुषोत्तम॥ १८

भगवानुवाच

श्वेतद्वीपे च भूमानं श्रुतयस्तुष्टुवुः परम्।
उशतीभिर्गिराभिश्च प्रसन्नोऽभूत् सहस्रपात्॥ १९

हरिरुवाच

वरं वृणीत यूयं वै यन्मनोवाञ्छितं महत्।
येषां प्रसन्नोऽहं साक्षात्तेषां किं दुर्लभं भुवि॥ २०

श्रुतय ऊचुः

वाङ्मनोगोचरातीतं ततो न ज्ञायते तु तत् ।
आनन्दमात्रमितियद्वदन्तीह पुराविदः ।
तद्रूपं दर्शयास्माकं यदि देयो वरो हि नः ॥ २१

भगवानुवाच

श्रुत्वैतद्दर्शयामास स्वं लोकं प्रकृतेः परम् ।
केवलानुभवानन्दमात्रमक्षरमव्ययम् ॥ २२
यत्र वृन्दावनं नाम वनं कामदुघैर्द्रुमैः ।
मनोरमनिकुञ्जाढ्यं सर्वर्तुसुखसंयुतम् ॥ २३
यत्र गोवर्द्धनो नाम सुनिर्झरदरीयुतः ।
रत्नधातुमयः श्रीमान् सुपक्षिगृहसङ्कुल. ॥ २४
यत्र निर्मलपानीया कालिन्दी सरितां वरा ।
रत्नबद्धोभयतटी हंसपद्मादिसङ्कुला ॥ २५
नानारासरसोन्मत्तं यत्र गोपीकदम्बकम् ।
तत्कदम्बकमध्यस्थः किशोराकृतिरच्युतः ॥ २६
दर्शयित्वेति च प्राह ब्रूत किं करवाणि वः ।
दृष्टो मदीयो लोकोऽयं यतो नास्ति परं वरम् ॥ २७

श्रुतय ऊचुः

कन्दर्पकोटिलावण्ये त्वयि दृष्टे मनांसि नः ।
कामिनीभावमासाद्य स्मरक्षुब्धान्यसंशयम् ॥२८
यथा गोलोकवासिन्यः कामिनीत्वेन गोपिकाः ।
भजन्ति रमणं मत्वा चिकीर्षाऽजनि नस्तथा ॥ २९

हरिरुवाच

दुर्लभो दुर्घटश्चैव युष्माकं सुमनोरथः ।
मयानुमोदितः सम्यक् सत्यो भवितुमर्हति ॥ ३०

आगामिनि विरिञ्चौ तु जाते सृष्ट्यर्थमुद्यते ।
कल्पसारस्वतं प्राप्य व्रजे गोप्यो भविष्यथ ॥३१
पृथिव्यां भारते क्षेत्रे माथुरे मम मण्डले ।
वृन्दावने भविष्यामि प्रेयान् वो रासमण्डले ॥३२
जारधर्मेण सुस्नेहं सुदृढं सर्वतोऽधिकम् ।
मयि सम्प्राप्य सर्वा हि कृतकृत्या भविष्यथ ॥३३

भगवानुवाच

ताश्च गोप्यो भविष्यन्ति पूर्वकल्पवरान्मम ।
अन्यासाश्चैव गोपीनां लक्षणं शृणु तद्विधे ॥३४
सुराणां रक्षणार्थाय राक्षसानां वधाय च ।
त्रेतायां रामचन्द्रोऽभूद्वीरो दशरथात्मजः ॥३५
सीतास्वयंवरं गत्वा धनुर्भङ्गं चकार सः ।
उवाह जानकीं सीतां रामो राजीवलोचनः ॥३६
तं दृष्ट्वा मैथिलाः सर्वाः पुरन्ध्र्यो मुमुहुर्विधे ।
रहस्यूचुर्महात्मानं भर्ता नो भव हे रघो ॥३७
ता आह राघवेन्द्रश्च मा शोचं कुरुत स्त्रियः ।
द्वापरान्ते करिष्यामि भवतीनां मनोरथम् ॥३८
तीर्थं दानं तपः शौचं समाचरत तत्त्वतः ।
श्रद्धया परया भक्त्या व्रजे गोप्यो भविष्यथ ॥३९
इति ताभ्यो वरं दत्वा श्रीरामः करुणानिधिः ।
कोशलान् प्रययौ धन्वी तेजसा जितभार्गवः ॥४०
मार्गे च कौशला नार्यो रामं दृष्ट्वातिसुन्दरम् ।
मनसा वव्रिरे तं वै पतिं कन्दर्पमोहनम् ॥४१
मनसापि वरं रामो ददौ ताभ्यो ह्यशेषवित् ।
मनोरथं करिष्यामि व्रजे गोप्यो भविष्यथ ॥४२
आगतं सीतया सार्द्धं सैन्येन रघुनन्दनम् ।

अयोध्यापुरवासिन्यः श्रुत्वा द्रष्टुं समाययुः ॥४३
वीक्ष्य तं मोहमापन्ना मूर्च्छिताः प्रेमविह्वलाः ।
तेपुस्तपस्ताः सरयूतीरे रामधृतव्रताः ॥४४
आकाशवागभूत्तासां द्वापरान्ते मनोरथः ।
भविष्यति न सन्देहः कालिन्दीतीरजे वने ॥४५
पितुर्वाक्याद्यदा रामो दण्डकाख्यं वनं गतः ।
चचार सीतया सार्द्धं लक्ष्मणेन धनुष्मता ॥४६
गोपालोपासकाः सर्वे दण्डकारण्यवासिनः ।
ध्यायन्तः सततं मां वै रासार्थं ध्यानतत्पराः ॥४७
येषामाश्रममासाद्य धनुर्बाणधरो युवा ।
तेषां ध्याने गतो रामो जटामुकुटमण्डितः ॥४८
अन्याकृतिं ते तं वीक्ष्य परं विस्मितमानसाः ।
ध्यानादुत्थाय ददृशुः कोटिकन्दर्पसन्निभम् ॥४९
ऊचुस्तेऽयं नु गोपालो वंशीवेत्रं विना प्रभुः ।
इत्थं विचार्य मनसा नेमुश्चक्रुः स्तुतिं पराम् ॥५०
वरं वृणीत मुनयः श्रीरामस्तानुवाच ह ।
यथा सीता तथा सर्वे भूयाः स्म इति वादिनः ॥५१

राम उवाच

यथा हि लक्ष्मणो भ्राता तथा प्रार्थ्यो वरो यदि ।
अद्यैव सफलो भाव्यो भवद्भिर्मत्प्रसङ्गतः ॥५२
सीता यथेति वाक्येन दुर्घटो दुर्लभो वरः ।
एकपत्नीव्रतोऽहं वै मर्यादापुरुषोत्तमः ॥५३
तस्मात्तु मद्वरेणापि द्वापरान्ते भविष्यथ ।
मनोरथं करिष्यामि भवतां वाञ्छितं परम् ॥ ५४
इति दत्त्वा वरं रामस्ततः पञ्चवटीं गतः ।
पर्णशालां समासाद्य वनवासं चकार ह ॥ ५५

तद्दर्शनस्मररुजः पुलिन्द्यः प्रेमविह्वलाः ।
श्रीमत्पादरजो धृत्वा प्राणांस्त्यक्तुं समुद्यताः ॥ ५६
ब्रह्मचारिवपुर्भूत्वा रामस्तत्र समागतः ।
उवाच प्राणसन्त्यागं मा कुर्य्यात स्त्रियो वृथा ॥ ५७
वृन्दावने द्वापरान्ते भविता वो मनोरथः ।
इत्युक्त्वा ब्रह्मचारी तु तत्रैवान्तरधीयत ॥ ५८
अथ रामो वानरेन्द्रैः रावणादीन् निशाचरान् ।
जित्वा लङ्कामेत्य सीतां पुष्पकेण पुरं ययौ ॥ ५९
सीतां तत्याज राजेन्द्रो वने लोकापवादतः ।
अहो सतामपि भुवि भवनं भूरि दुःखदम् ॥ ६०
यदा यदाऽकरोद्यज्ञं रामो राजीवलोचनः ।
तदा तदा स्वर्णमयीं सीतां कृत्वा विधानतः ॥ ६१
यज्ञसीतासमूहोऽभून्मन्दिरे राघवस्य च ।
ताश्चैतन्यघना भूत्वा रन्तुं रामं समागताः ॥ ६२
ता आह रघुवंशेन्द्रो नाहं गृह्णामि हे प्रियाः ।
तदोचुस्ताः प्रेमपरा रामं दशरथात्मजम् ॥ ६३
कथञ्चास्मान्न गृह्णासि भजन्तीर्मैथिलीः सतीः ।
अर्धाङ्गीर्यज्ञकालेषु सततं कार्यसाधिनीः ॥ ६४
धर्मिष्ठस्त्वं श्रुतिधरोऽधर्मवद्भाषसे कथम् ।
करं गृहीत्वा त्यजसि ततः पापमवाप्स्यसि ॥ ६५

राम उवाच

समीचीनं वचः सत्यं युष्माभिर्गदितञ्च मे ।
एकपत्नीव्रतोऽहं हि राजर्षिः सीतयैकया ॥ ६६
तस्माद्यूयं द्वापरान्ते पुण्ये वृन्दावने वने ।
भविष्यथ करिष्यामि युष्माकन्तु मनोरथम् ॥ ६७

भगवानुवाच

ता व्रजेऽपि भविष्यन्ति यज्ञसीताश्च गोपिकाः।
अन्यासाञ्चैव गोपीनां लक्षणं शृणु तद्विधे ॥ ६८

इति श्रीगर्गसंहितायां गोलोकखण्डे भगवद्ब्रह्म-
संवादे उद्योगप्रश्नवर्णनं नाम
चतुर्थोऽध्यायः ॥ ४ ॥

भगवानुवाच

रमावैकुण्ठवासिन्यः श्वेतद्वीपसखीजनाः ।
ऊर्ध्ववैकुण्ठवासिन्यस्तथाऽजितपदाश्रिताः ॥ १
श्रीलोकाचलवासिन्यः श्रीसख्योऽपि समुद्रजाः ।
ता गोप्योऽपि भविष्यन्ति लक्ष्मीपतिवराद् व्रजे ॥ २
काश्चिद्दिव्या अदिव्याश्च तथा त्रिगुणवृत्तयः ।
भूमिगोप्यो भविष्यन्ति पुण्यैर्नानाविधैः कृतैः ॥ ३
यज्ञावतारं रुचिर रुचिपुत्रं दिवस्पतिम् ।
मोहिताः प्रीतिभावेन वीक्ष्य देवजनस्त्रिय ॥ ४
ताश्च देवलवाक्येन तपस्तेपुर्हिमाचले ।
भक्त्या परमया ता मे गोप्यो भाव्या व्रजे विधे ॥ ५
अन्तर्हिते भगवति देवे धन्वन्तरौ भुवि ।
औषध्यो दुःखमापन्ना निष्फला भारतेऽभवन् ॥ ६
सिद्ध्यर्थन्तास्तपस्तेपुः स्त्रियो भूत्वा मनोहराः ।
चतुर्युगे व्यतीते तु प्रसन्नोऽभूद्धरिः परम् ॥ ७
वरं वृणीत चेत्युक्तं श्रुत्वा नार्यो महावने ।
तं दृष्ट्वा मोहमापन्ना ऊचु र्भर्ता भवात्र नः ॥ ८

हरिरुवाच

वृन्दावने द्वापरान्ते लता भूत्वा मनोहराः ।
भविष्यथ स्त्रियो रासे करिष्यामि वचश्च वः ॥ ९

भगवानुवाच

भक्तिभावसमायुक्ता भूरिभाग्या वराङ्गनाः ।
लतागोप्यो भविष्यन्तिं वृन्दारण्ये पितामह ॥ १०

जालन्धर्यश्च या नार्यो वीक्ष्य वृन्दापतिं हरिम् ।
ऊचुर्वाऽयं हरिः साक्षादस्माकन्तु वरो भवेत् ॥ ११
आकाशवागभूत्तासां भजताशु रमापतिम् ।
यथा वृन्दा तथा यूयं वृन्दारण्ये भविष्यथ ॥ १२
समुद्रकन्याः श्रीमत्स्यं हरिं दृष्ट्वा च मोहिताः ।
ता हि गोप्यो भविष्यन्ति श्रीमत्स्यस्य वराद् व्रजे ॥ १३
आसीद्राजा पृथुः साक्षान्ममांशश्चण्डविक्रमः ।
जित्वा शत्रून्नृपश्रेष्ठो धरां कामान् दुदोह सः ॥ १४
बर्हिष्मतीभवास्तत्र पृथुं दृष्ट्वा पुरस्त्रियः ।
अत्रेः समीपमागत्य ता ऊचुर्मोहविह्वलाः ॥ १५
अयन्तु राजराजेन्द्रः पृथुः पृथुलविक्रमः ।
कथं वरो भवेन्नो वै तद्वद त्वं महामुने ॥ १६

अत्रिरुवाच

गोदोहं कुरुताश्वत्र पृथ्वीयं धारणामयी ।
सर्वं दास्यति वो दुर्गं मनोरथमहार्णवम् ॥ १७

[भगवानुवाच]

मनोरथं प्रदुदुहुर्मनःपात्रेण ताश्च गाम् ।
तस्माद्गोप्यो भविष्यन्ति वृन्दारण्ये पितामह ॥ १८
कामसेनामोहनार्थं दिव्या अप्सरसो वराः ।
नारायणस्य सहसा बभूवु र्गन्धमादने ॥ १९
भर्तृकामाश्च ता आह सिद्धो नारायणो मुनिः ।
मनोरथो वो भविता व्रजे गोप्यो भविष्यथ ॥ २०
स्त्रियः सुतलवासिन्यो वामनं वीक्ष्य मोहिताः ।
तपस्तप्त्वा भविष्यन्ति गोप्यो वृन्दावने विधे ॥ २१
नागेन्द्रकन्यकाः शेषं भेजुर्भक्त्या वरेच्छया ।
सङ्कर्षणस्य रासार्थं भविष्यन्ति व्रजे च ताः ॥ २२

कश्यपो वसुदेवश्च देवकी चादितिः परा ।
शूरः प्राणो ध्रुवः सोऽपि देवकोऽवतरिष्यति ॥ २३
वसुश्चैवोद्धव. साक्षाद्दक्षोऽक्रूरो दयापरः ।
हृदीको धनदश्चैव कृतवर्मा त्वपां पतिः ॥ २४
गद प्राचीनबर्हिश्च मरुतो ह्युग्रसेन उत् ।
तस्य रक्षां करिष्यामि राज्यं दत्वा विधानतः ॥ २५
युयुधानश्चाम्बरीष प्रह्लादः सात्यकिस्तथा ।
क्षीराब्धिः शन्तनुः साक्षाद्भीष्मो द्रोणो वसूत्तम. ॥ २६
शल्यश्चैव दिवोदासो धृतराष्ट्रो भगो रविः ।
पाण्डुः पूषा सतां श्रेष्ठो धर्मो राजा युधिष्ठिर. ॥ २७
भीमो वायुर्बलिष्ठश्च मनुः स्वायम्भुवोऽर्जुनः ।
शतरूपा सुभद्रा च सविता कर्ण एव हि ॥ २८
नकुलः सहदेवश्च स्मृतौ द्वावश्विनीसुतौ ।
धाता वाह्लीकवीरश्च वह्निर्द्रोणः प्रतापवान् ॥ २९
दुर्योधनः कलेरंशोऽभिमन्यु सोम एव च ।
द्रौणि साक्षाच्छिवस्यापि रूपं भूमौ भविष्यति ॥ ३०
इत्थं यदोः कौरवाणामन्येषां भूभुजां नृणाम् ।
कुले कुले भवन्तश्च स्वांशे. स्त्रीभिर्मदाज्ञया ॥३१
ये येऽवतारा मे पूर्वं तेषां राज्यो रमांशका ।
भविष्या राजराज्ञीषु सहस्राणि च षोडश ॥३२

नारद उवाच

इत्युक्त्वा श्रीहरिस्तत्र ब्रह्माणं कमलासनम् ।
दिव्यरूपां भगवतीं योगमायामुवाच ह ॥३३

भगवानुवाच

देवक्याः सप्तमं गर्भं संनिकृष्य महामते ।
वसुदेवस्य भार्यायां कंसत्रासभयात् पुनः ॥३४

नन्दव्रजे स्थितायाश्च रोहिण्यां सन्निवेशय।
नन्दपत्न्यां भव त्वं वै कृत्वेदं कर्म चाद्भुतम् ॥३५

नारद उवाच

श्रुत्वा ब्रह्मा देवगणै र्नत्वा कृष्णं परात्परम्।
भूमिमाश्वास्य वाणीभिः स्वधाम निजमाययौ ॥३६
परिपूर्णतमं साक्षाच्छ्रीकृष्णं विद्धि मैथिल।
कंसादीनां वधार्थाय प्राप्तोऽयं भूमिमण्डले ॥३७
रोममात्रं तनौ जिह्वा भवन्तीत्थं यदा नृप।
तदापि श्रीहरेस्तस्य वर्ण्यते न गुणो महान् ॥३८
नभः पतन्ति विहगा यथा ह्यात्मसमं नृप।
तथा कृष्णगतिं दिव्यां वदन्तीह विपश्चितः ॥३९

इति श्रीगर्गसंहितायां गोलोकखण्डे भगवद्ब्रह्मसंवादे
भगवदागमोद्योगपूरणं नाम
पञ्चमोऽध्यायः ॥५

बहुलाश्व उवाच

कः कंसोऽयं पुरा दैत्यो महाबलपराक्रमः।
तस्य जन्मानि कर्माणि ब्रूहि देवर्षिसत्तम ॥ १

नारद उवाच

समुद्रमथने पूर्वं कालनेमि र्महासुरः।
युयुधे विष्णुना सार्द्धं युद्धे तेन हतो बलात् ॥ २
शुक्रेण जीवितस्तत्र सञ्जीविन्या स्वविद्यया।
पुनर्विष्णुं योद्धुकाम उद्योगं मनसाऽकरोत् ॥ ३
तपस्तेपे तदा दैत्यो मन्दराचलसन्निधौ।
नित्यं दूर्वारसं पीत्वा भजन् देवं पितामहम् ॥ ४
दिव्येषु शतवर्षेषु व्यतीतेषु पितामहः।
अस्थिशेषं सवल्मीकं वरं ब्रूहीत्युवाच तम् ॥ ५

कालनेमिरुवाच

ब्रह्माण्डे ये स्थिता देवा विष्णुमूला महाबलाः।
तेषां हस्तैर्न मे मृत्युः पूर्णानामपि मा भवेत् ॥ ६

ब्रह्मोवाच

दुर्लभोऽय वरो दैत्य यस्त्वया प्रार्थितः परः।
कालान्तरे ते प्राप्तः स्यान्मद्वाक्यं न मृषा भवेत् ॥ ७

नारद उवाच

उग्रसेनस्य पत्न्यां कौ जन्म लेभेऽसुरः पुनः।
कौमारेऽपि महामल्लैः सततं स युयोध ह ॥ ८
जरासन्धो मागधेन्द्रो दिग्जयार्थी विनिर्गतः।
यमुनानिकटे तस्य शिबिरोऽभूदितस्ततः ॥ ९

द्विप कुवलयापीड. सहस्रद्विपसत्त्वभृत् ।
बभञ्ज श्रृङ्खलाबन्ध दुद्राव शिबिरान् महीम् ॥१०
निपातयन् स शिबिरान् मन्दिरान् भूजनांस्तटान् ।
रङ्गभूम्यामाजगाम यत्र कंसोऽपि युध्यति ॥११
पलायितेषु मल्लेषु कसस्तञ्च समागतम् ।
शुण्डादण्डे सङ्गृहीत्वा पातयामास भूतले ॥ १२
पुनर्गृहीत्वा हस्ताभ्यां भ्रामयित्वोग्रसेनज. ।
जरासन्धस्य सेनायां चिक्षेप दशयोजनम् ॥ १३
तदद्भुत बल दृष्ट्वा प्रसन्नो मागधेश्वर ।
अस्तिप्राप्ती ददौ कन्ये तस्मै कंसाय त द्विपम् ॥ १४
अश्वार्बुद हस्तिलक्ष रथानाञ्च त्रिलक्षकम् ।
अयुतञ्चैव दासीनां पारिबर्ह जरासुत. ॥ १५
द्वन्द्वयोधी तत कंसो भुजवीर्यमदोत्कट ।
माहिष्मतीं ययौ वीरोऽथैकाकी चण्डविक्रम ॥ १६
चाणूरो मुष्टिक कूट. शलस्तोशलकस्तथा ।
माहिष्मतीपतेः पुत्रा मल्ला युद्धजयैषिण ॥ १७
कंसस्तानाह साम्नापि दोर्युद्धं करवामहे ।
अह दासो भवेय वो भवन्तो जयिनो यदि ॥ १८
अहं जयी चेद्भवतो दासान् सर्वान् करोम्यलम् ।
सर्वेषां पश्यतां तेषां नागराणां महात्मनाम् ।
इति प्रतिज्ञां कृत्वाथ युयुधे तै र्जयैषिभिः ॥ १९
यदागत स चाणूरं गृहीत्वा यादवेश्वरः ।
भूपृष्ठे पोथयामास शब्दमुच्चैः समुच्चरन् ॥ २०
तदायान्तं मुष्टिकाख्यं मुष्टिभिर्युधि दुर्गमम् ।
एकेन मुष्टिना तं वै पातयामास भूतले ॥ २१

कूट समागत कंसो गृहीत्वा पादयोश्च तम्।
पातयित्वा भूमिमध्ये चिक्षेप गगने बलात्॥ २२
भुजमास्फोट्य धावन्त शलं नीत्वा भुजेन सः।
पातयित्वा पुनर्नीत्वा भूमौ त विचकर्ष ह॥ २३
अथ तोशलक कंसो गृहीत्वा भुजयो र्बलात्।
निपात्य भूमावुत्थाप्य चिक्षेप दशयोजनम्॥ २४
दासभावे च तान् कृत्वा तैः सार्द्ध यादवाधिप.।
मद्वास्येन, जगामाशु प्रवर्षणगिरि वरम्॥ २५
तस्मै निवेद्याभिप्रायं युयुधे वानरेण स ।
द्विविदेनापि विंशत्या दिनैः कंसो ह्यविश्रमम्॥ २६
द्विविदो गिरिमुत्पाट्य चिक्षेप तस्य मूर्द्धनि।
कंसो गिरिं गृहीत्वा च तस्योपरि समाक्षिपत्॥ २७
द्विविदो मुष्टिना कंसं घातयित्वा नभो गतः।
धावन् कंसश्च तं नीत्वा पातयामास भूतले॥ २८
मूर्च्छितस्तत्प्रहारेण परङ्कुश्मलतां ययौ।
क्षीणसत्त्वश्चूर्णितास्थिर्दासभावङ्गतस्तदा॥ २९
तेनैवाथ गतः कस ऋष्यमूकवन ततः।
तत्र केशी महादैत्यो हयरूपी घनस्वनः॥ ३०
मुष्टिभिर्घातयित्वा तं वशीकृत्वारुरोह तम्।
इत्थं कंसो महावीर्यो महेन्द्राख्यं गिरिं ययौ॥ ३१
शतवारञ्चोज्जहार गिरिमुत्पाट्य दैत्यराट्।
पुनस्तत्र स्थितं रामं क्रोधसंरक्तलोचनम्॥ ३२
प्रलयार्कप्रभं दृष्ट्वा ननाम शिरसा मुनिम्।
पुन. प्रदक्षिणीकृत्यो तदङ्घ्र्यो र्निपपातं ह॥ ३३
ततः शान्तो भार्गवोऽपि कंसं प्राह महोग्रदृक्।
हे कीट कर्कटीडिम्भ तुच्छोऽसि मशको यथा॥ ३४

अद्यैव त्वां हन्मि दुष्टं क्षत्रियं वीरमानिनम् ।
मत्समीपे धनुरिदं लक्षभारसमं महत् ॥ ३५
इदञ्च विष्णुना दत्तं शम्भवे त्रैपुरे युधि ।
शम्भोः करादिह प्राप्तं क्षत्त्रियाणां वधाय च ॥ ३६
यदि चेदं तनोषि त्वं तदा च कुशलं भवेत् ।
चेदस्य कर्षणं न स्याद्घातयिष्यामि ते बलम् ॥ ३७
श्रुत्वा वचस्तदा दैत्यः कोदण्डं सप्ततालकम् ।
गृहीत्वा पश्यतस्तस्य सज्यं कृत्वाथ लीलया ॥ ३८
आकृष्य कर्णपर्यन्त शतवारं ततान ह ।
प्रत्यञ्चास्फोटनेनैव टङ्कारोऽभूत्तडित्स्वनः ॥ ३९
ननाद तेन ब्रह्माण्डं सप्तलोकैर्बिलैः सह ।
विचेलुर्दिग्गजास्ताराऽपतन् भूखण्डमण्डलम् ॥ ४०
धनुः संस्थाप्य तत्कंसो नत्वा नत्वाह भार्गवम् ।
हे देव क्षत्त्रियो नास्मि दैत्योऽहं ते च किङ्करः ॥ ४१
तव दासस्य दासोऽहं पाहि मां पुरुषोत्तम ।
श्रुत्वा प्रसन्नः श्रीरामस्तस्मै प्रादाद्धनुश्च तत् ॥ ४२

जामदग्न्य उवाच

यत्कोदण्डं वैष्णवं तद्येन भङ्गीभविष्यति ।
परिपूर्णतमेनात्र सोऽपि त्वां घातयिष्यति ॥ ४३

नारद उवाच

अथ नत्वा मुनिं कंसो विचरन् स मदोत्कटः ।
न केऽपि युयुधुस्तेन राजानश्च बलिं ददुः ॥ ४४
समुद्रस्य तटे कंसो दैत्यं नाम्ना ह्यघासुरम् ।
सर्पाकारञ्च फूत्कारैर्लेलिहानं ददर्श ह ॥ ४५
आगच्छन्तं दशन्तञ्च गृहीत्वा तं निपात्य सः ।
चकार स्वगले हारं निर्भयो दैत्यराड् बली ॥ ४६

प्राच्यान्तु वङ्गदेशेषु दैत्योऽरिष्टो महावृषः।
तेन सार्द्धं स युयुधे गजेनापि गजो यथा॥ ४७
शृङ्गाभ्यां पर्वत नीत्वा चिक्षेप कंसमूर्द्धनि।
कंसो गिरिं सङ्गृहीत्वा प्राक्षिपत्तस्य मस्तके॥ ४८
जघान मुष्टिनारिष्टं कंसो वै दैत्यपुङ्गवः।
मूर्च्छितं तं विनिर्जित्य तेनोदीचीं दिशं गतः॥ ४९
प्राग्ज्योतिषेश्वर भौमं नरकाख्यं महाबलम्।
उवाच कंसो युद्धार्थी युद्धं मे देहि दैत्यराट्॥ ५०
अहं दासो भवेयं वो भवन्तो जयिनो यदि।
अहं जयी चेद्भवतो दासान् सर्वान् करोम्यहम्॥ ५१

नारद उवाच

पूर्वं प्रलम्बो युयुधे कंसेनापि महाबलः।
मृगेन्द्रेण मृगेन्द्रो वा उद्भटेन यथोद्भटः॥ ५२
मल्लयुद्धे गृहीत्वा तं कंसो भूमौ निपात्य च।
पुनर्गृहीत्वा चिक्षेप प्राग्ज्योतिषपुरोदरे॥ ५३
आगतो धेनुको नाम्ना कंसं जग्राह रोषतः।
नोदयामास दूरेण बलं कृत्वाथ दारुणम्॥ ५४
कंसस्तं नोदयामास धेनुकं शतयोजनम्।
निपात्य चूर्णयामास तदङ्ग मुष्टिभिर्दृढैः॥ ५५
तृणावर्त्तो भौमवाक्यात् कंसं नीत्वा नभो गतः।
तत्रैव युयुधे दैत्य ऊर्ध्वं वै लक्षयोजनम्॥ ५६
कंसोऽनन्तबलं कृत्वा दैत्यं नीत्वा तदाम्बरात्।
भूम्यां सम्पातयामास वमन्तं रुधिरं मुखात्॥ ५७
तुण्डेनाथ ग्रसन्तश्च बकं दैत्यं महाबलम्।
कंसो निपातयामास मुष्टिना वज्रघातिना॥ ५८
उत्थाय दैत्यो बलवान् सितपक्षो घनस्वनः।

क्रोधयुक्तः समुत्पत्य तीक्ष्णतुण्डोऽग्रसच्च तम् ॥ ५९
निगीर्णोऽपि स वज्राङ्गस्तद्गले रोधकृच्च यः ।
सद्यश्चच्छर्द तं कंसं क्षतकण्ठो महाबकः ॥ ६०
कंसो बकं सङ्गृहीत्वा पातयित्वा महीतले ।
कराभ्यां भ्रामयित्वा च युद्धे तं विचकर्ष ह ॥ ६१
तत्स्वसारं पूतनाख्यां योद्धुकामामवस्थिताम् ।
तामाह कंसः प्रहसन् वाक्यं मे शृणु पूतने ॥ ६२
स्त्रिया सार्द्धमहं युद्धं न करोमि कदाचन ।
बकासुरः स्यान्मे भ्राता त्वञ्च मे भगिनी भव ॥ ६३
ततोऽनन्तबलं कंसं वीक्ष्य भौमोऽपि धर्षितः ।
चकार सौहृदं कंसे साहाय्यार्थं सुरान् प्रति ॥ ६४

इति श्रीगर्गसंहितायां गोलोकखण्डे नारदबहुलाश्व-
संवादे कंसबलवर्णनं नाम
षष्ठोऽध्यायः ॥६

नारद उवाच

अथ कंसः प्रलम्बाद्यैरन्यैः पूर्वजितैश्च तैः ।
शम्बरस्य पुर प्रागात् स्वाभिप्रायं निवेदयन् ।। १
शम्बरो ह्यतिवीर्योऽपि न युयोध स तेन वै ।
चकार सौहृदं कसे सर्वैरतिबलै सह ।। २
त्रिशृङ्गशिखरे शेते व्योम्ना नामासुरो बली ।
कंसपादप्रबुद्धोऽभूत् क्रोधसरक्तलोचनः ॥ ३
कसं जघान चोत्थाय प्रबलैर्दृढमुष्टिभिः ।
तयोर्युद्धमभूद् घोरमितरेतरमुष्टिभिः ॥ ४
कंसस्य मुष्टिभिः सोऽपि निःसत्वोऽभूद् भ्रमातुरः ।
भृत्यं कृत्वाथ तं कंसः प्राप्त मां प्रणनाम ह ॥ ५
हे देव युद्धकाङ्क्षास्ति क्व यामि त्वं वदाशु मे ।
प्रोवाच त तदा गच्छ दैत्यं बाणं महाबलम् ॥ ६
प्रेरितश्चेति कंसाख्यो मया युद्धदिदृक्षुणा ।
भुजवीर्यमदोन्नद्धः शोणिताख्यं पुर ययौ ॥ ७
बाणासुरस्तत्प्रतिज्ञां श्रुत्वा क्रुद्धो ह्यभूद्भृशम् ।
तताड लत्तां भूमध्ये जगर्ज घनवद्बली ॥ ८
आजानुभूमिगां लत्तां पातालान्तमुपागताम् ।
कृत्वा तमाह बाणस्तु पूर्वं चैनां समुद्धर ॥ ९
श्रुत्वा वचः कराभ्यां तामुज्जहार मदोत्कटः ।
प्रचण्डविक्रमः कंसः खरदण्डं गजो यथा ॥ १०
तयाचोद्धृतयोत्खाता लोकाः सप्ततला दृढाः ।
निपेतुर्गिरयोऽनेका विचेलुर्दृढदिग्गजाः ।। ११

योद्धुं तमुद्यतं बाणं दृष्ट्वागत्य वृषध्वजः ।
सर्वान् सम्बोधयामास प्रोवाच बलिनन्दनम् ॥ १२

कृष्णं विनापरं चैनं भूमौ कोऽपि न जेष्यति ।
भार्गवेण वरं दत्तं धनुरस्मै च वैष्णवम् ॥ १३

नारद उवाच

इत्युक्त्वा सौहृदं हृद्यं सद्यो वै कंसबाणयोः ।
चकार परया शान्त्या शिवः साक्षान्महेश्वरः ॥ १४
अथ कंसो दिक्प्रतीच्यां श्रुत्वा वत्सं महासुरम् ।
तेन सार्धं स युयुधे वत्सरूपेण दैत्यराट् ॥ १५
पुच्छे गृहीत्वा तं वत्सं पोथयामास भूतले ।
वशीकृत्वाथ तं शीघ्रं म्लेच्छदेशांस्ततो ययौ ॥ १६
मन्मुखात् कालयवनः श्रुत्वा दैत्यं महाबलम् ।
निर्ययौ सम्मुखे योद्धुं रक्तश्मश्रुर्गदाधरः ॥ १७
कंसो गदां गृहीत्वा स्वां लक्षभारविनिर्मिताम् ।
प्राक्षिपद्यवनेन्द्राय सिंहनादमथाकरोत् ॥ १८
गदायुद्धमभूत्तत्र घोरं हि कंसकालयोः ।
विस्फुलिङ्गान् क्षरन्त्यौ द्वे गदे चूर्णीबभूवतुः ॥ १९
कंसः कालं सङ्गृहीत्वा पातयामास भूतले ।
पुनर्गृहीत्वा निष्पात्य मृततुल्यं चकार ह ॥ २०
बाणवर्षां प्रकुर्वन्तीं सेनां तां यवनस्य च ।
गदया पोथयामास कंसो दैत्याधिपो बली ॥ २१
गजांस्तुरङ्गान् सरथान् वीरान् भूमौ निपात्य च ।
जगर्ज घनवद्धीरो गदायुद्धे मृधाङ्गणे ॥ २२
ततश्च दुद्रुवुर्म्लेच्छाः त्यक्त्वा स्वं स्वं रणं परम् ।
भीतान् पलायितान् म्लेच्छांश्च जघानाथ नीतिवित् ॥ २३

उच्चपादो दीर्घजानुः स्तम्भोरुर्लघिमा कटिः।
कपाटवक्षा. पीनांसः पुष्टः प्रांशुर्बृहद्भुजः॥ २४
पद्मनेत्रो बृहत्केशोऽरुणवर्णोऽसिताम्बरः।
किरीटी कुण्डली हारी पद्ममाली लयार्करुक्॥ २५
खड्गी निषङ्गी कवची मुद्गराढ्यो धनुर्धरः।
मदोत्कटो ययौ जेतु देवान् कंसोऽमरावतीम्॥ २६
चाणूरमुष्टिकारिष्टशलतोशलकेशिभि·।
प्रलम्बेन बकेनापि द्विविदेन समावृत.॥ २७
तृणावर्त्ताघकूटैश्च भौमबाणाख्यशम्बरैः।
व्योमधेनुकवत्सैश्च रुरुधे सोऽमरावतीम्॥ २८.
कसादीनागतान् दृष्ट्वा शक्रो देवाधिपः स्वराट्।
सर्वैर्देवगणैः सार्धं योद्धुं क्रुद्धो विनिर्ययौ॥ २९
तयो र्युद्धमभूद्धोरं तुमुलं रोमहर्षणम्।
दिव्यैश्च शस्त्रसम्पातैर्बाणैस्तीक्ष्णै· स्फुरत्प्रभैः॥ ३०
शस्त्रान्धकारे सञ्जाते रथारूढो महेश्वरः।
चिक्षेप वज्र कंसाय शतधार तडिद्युति॥ ३१
मुद्गरेणापि तद्वज्र तताडाशु महासुरः।
पपात कुलिशं युद्धे छिन्नधारं बभूव ह॥ ३२
त्यक्त्वा वज्र तदा वज्री खड्गं जग्राह रोषतः।
कंसं मूर्ध्नि तताडाशु नादं कृत्वाथ भैरवम्॥ ३३
स क्षतो नाभवत् कंसो मालाहत इव द्विपः।
गृहीत्वा स गदां गुर्वीमष्टधातुमयीं दृढाम्॥ ३४
लक्षभारसमां कंसश्चिक्षेपेन्द्राय दैत्यराट्।
तां समापततीं वीक्ष्य जग्राहाशु पुरन्दरः॥ ३५
ततश्चिक्षेप दैत्याय गदां नमुचिसूदनः।
चचार युद्धे विदलन्नरीन् मातलिसारथिः॥ ३६

कंसो गृहीत्वा परिघ तताडांसेऽसुरद्विषः ।
तत्प्रहारेण देवेन्द्रः क्षणं मूर्च्छामवाप ह ॥ ३७
कंसं मरुद्गणाः सर्वे गृध्रपक्षैः स्फुरत्प्रभैः ।
बाणौघैश्छादयामासु प्रावृट्सूर्यमिवाम्बुदः ॥ ३८
दोःसहस्रयुतो वीरश्चापांष्टङ्कारयन् मुहुः ।
तदा तान् कालयामास बाणैर्बाणासुरो बली ॥ ३६
बाणश्च वसवो रुद्रा आदित्या ऋभवः सुराः ।
जघ्नुर्नानाविधैः शस्त्रैः सर्वतोऽद्रिं यथा गजाः ॥ ४०
ततो भौमासुर प्राप्तः प्रलम्बाद्यसुरैर्नदन् ।
तेन नादेन देवास्ते निपेतुर्मूर्च्छिता रणे ॥ ४१
उत्थायाशु तदा शक्रो गजमारुह्य रक्तदृक् ।
नोदयामास कंसाय मत्तमैरावतं गजम् ॥ ४२
अङ्कुशास्फालनात् क्रुद्ध पातयन्त पदैर्द्विपः ।
शुण्डादण्डस्य फूत्कारैर्मर्दयन्तमितस्ततः ॥ ४३
स्रवन्मदं चतुर्दन्तं हिमाद्रिमिव दुर्गमम् ।
नदन्तं शृङ्खलां शुण्डां चालयन्तं मुहुर्मुहुः ॥ ४४
घण्टाढ्यं किङ्किणीजालरत्नकम्बलमण्डितम् ।
गोमूत्रचयसिन्दूरकस्तूरीपत्रभृन् मुखम् ॥ ४५
दृढेन मुष्टिना कंसस्तं तताड महागजम् ।
द्वितीयमुष्टिना शक्रं स जघान रणाङ्गणे ॥ ४६
तस्य मुष्टिप्रहारेण दूरे शक्रः पपात ह ।
जानुभ्यां धरणीं स्पृष्ट्वा गजोऽपि विह्वलोऽभवत् ॥ ४७
पुनरुत्थाय नागेन्द्रो दन्तैश्चाहत्य दैत्यपम् ।
शुण्डादण्डेन चोद्धृत्वा चिक्षेप लक्षयोजनम् ॥ ४८
पतितोऽपि स वज्राङ्गः किञ्चिद्व्याकुलमानसः ।
स्फुरदोष्ठोऽतिरुष्टाङ्गो युद्धभूमिं समाययौ ॥ ४६

कंसो गृहीत्वा नागेन्द्रं सन्निपात्य रणाङ्गणे।
निष्पीड्य शुण्डं तस्यापि दन्तांश्चूर्णीचकार ह ॥ ५०
अथ चैरावतो नागो दुद्रावाशु रणाङ्गणात्।
निपातयन् महावीरान् देवधानीं पुरीं गतः ॥ ५१
गृहीत्वा वैष्णवं चापं सज्यं कृत्वाथ दैत्यराट्।
देवान् विद्रावयामास बाणौघैश्च धनुःस्वनैः ॥ ५२

ततः सुरास्तेन निहन्यमाना
विदुद्रुवुर्दीनधियो दिशान्ते।
केचिद्रणे मुक्तशिखा बभुवु
र्भीताः स्म इत्थं युधि वादिनस्ते ॥ ५३
केचित्तथा प्राञ्जलयोऽतिदीनवत्
सन्यस्तशस्त्रा युधि मुक्तकच्छका.।
स्थातुं रणे कंसनृदेवसम्मुखे
गतेप्सिताः केचिदतीवविह्वलाः॥ ५४
इत्थ स देवान् प्रगतान्निरीक्ष्य तान्
नीत्वा च सिंहासनमातपत्रवत्।
सर्वैस्तदा दैत्यगणैर्जनाधिप.
स्वराजधानीं मथुरां समाययौ ॥ ५५

इति श्रीगर्गसंहितायां गोलोकखण्डे नारदबहुलाश्व-
संवादे दिग्विजयवर्णन नाम
सप्तमोऽध्यायः ॥७

गर्ग उवाच

श्रुत्वा तदा शौनक भक्तियुक्त
श्रीमैथिलो ज्ञानभृतां वरिष्ठः ।
नत्वा पुनः प्राह मुनिं महान्तं
देवर्षिवर्यं हरिभक्तिनिष्ठ. ॥ १

बहुलाश्व उवाच

त्वया कुलं कौ विशदीकृतं मे
शुभं हरे र्यद् यशसाऽमलेन ।
श्रीकृष्णभक्तक्षणसङ्गमेन
जनोऽपि सत्स्याद्बहुना किमु स्वित् ॥ २
श्रीराधया पूर्णतमस्तु साक्षाद्
गत्वा व्रजं किं चरितं चकार ।
तद् ब्रूहि मे देव ऋषे ऋषीश
त्रितापदुःखात् परिपाहि मां त्वम् ॥ ३

नारद उवाच

धन्यं कुलं यन्निमिना नृपेण
श्रीकृष्णभक्तेन परात्परेण ।
पूर्णीकृत यत्र भवान् प्रजातः
शुक्तौ हि मुक्ताभवनं न चित्रम् ॥ ४
अथ प्रभोस्तस्य पवित्रलीलां
सुमङ्गलां संशृणुतां परस्य ।
अभूत् सतां यो भुवि रक्षणार्थं
न केवलं कंसवधाय कृष्णः ॥ ५

अथैव राधा वृषभानुपत्न्या-
मावेश्य रूपं महसः पराख्यम् ।
कलिन्दजाकूलनिकुञ्जदेशे
सुमन्दिरे सावततार राजन् ॥ ६

घनावृते व्योम्नि दिनस्य मध्ये
भाद्रे सिते नागतिथौ च सोमे ।
अवाकिरन् देवगणाः स्फुरद्भि-
स्तन्मन्दिरे नन्दनजैः प्रसूनैः ॥ ७

राधावतारेण तदा बभूवु-
र्नद्योऽमलाम्भाश्च दिशः प्रसेदुः ।
ववुश्च वाता अरविन्दरागैः
सुशीतलाः सुन्दरमन्दयानाः ॥ ८

सुतां शरच्चन्द्रशताभिरामां
दृष्ट्वाथ कीर्तिर्मुदमाप गोपी ।
शुभं विधायाशु ददौ द्विजेभ्यो
द्विलक्षमानन्दकरं गवांश्च ॥ ९

प्रेङ्खे खचिद्रत्नमयूखपूर्णे
सुवर्णयुक्ते कृतचन्दनाङ्गे ।
आन्दोलिता सा ववृधे सखीजनै-
र्दिने दिने चन्द्रकलेव भाभिः ॥ १०

यद्दर्शनं देववरैः सुदुर्लभं
यज्ञैर्नवाप्तं जनजन्मकोटिभिः ।
सविग्रहां तां वृषभानुमन्दिरे
ललन्ति लोका ललनाप्रलालनैः ॥ ११

श्रीरासरङ्गस्य विकासचन्द्रिका
दीपावलिर्या वृषभानुमन्दिरे ।
गोलोकचूडामणिकण्ठभूषणां
ध्यात्वा परां तां भुवि पर्यटाम्यहम् ॥ १२

बहुलाश्व उवाच

वृषभानो रहोभाग्यं यस्य राधा सुताऽभवत् ।
कलावत्या सुचन्द्रेण किं कृतं पूर्वजन्मनि ॥ १३

नारद उवाच

नृगपुत्रो महाभाग. सुचन्द्रो नृपतीश्वर. ।
चक्रवर्ती हरेरंशो बभूवातीव सुन्दरः ॥ १४
पितॄणां मानसी कन्यास्तिस्रोऽभूवन् मनोहराः ।
कलावती रत्नमाला मेनका नाम नामतः ॥ १५
कलावतीं सुचन्द्राय हरेरंशाय धीमते ।
वैदेहाय रत्नमालां मेनकां च हिमाद्रये ॥
पारिबर्हेण विधिना स्वेच्छाभिः पितरो ददुः ॥ १६
सीताऽभूद्रत्नमालायां मेनकायां च पार्वती ।
द्वयोश्चरित्रं विदित पुराणेषु महामते ॥ १७
सुचन्द्रोऽथ कलावत्या गोमतीतीरजे वने ।
दिव्यैर्द्वादशभिर्वर्षैस्तताप ब्रह्मणस्तपः ॥ १८
अथो विधिस्तमागत्य वरं ब्रूहीत्युवाच ह ।
श्रुत्वा वल्मीकदेशाच्च निर्ययौ दिव्यरूपधृक् ॥ १९
तं नत्वोवाच मे भूयाद्दिव्यं मोक्ष परात्परम् ।
तच्छ्रुत्वा दुःखिता साध्वी विधिं प्राह कलावती ॥ २०
पतिरेव हि नारीणां दैवत परमं स्मृतम् ।
यदि मोक्षमसौ याति तदा मे का गतिर्भवेत् ॥ २१

एतद्विना न जीवामि यदि मोक्ष प्रदास्यसि ।
तुभ्यं शाप प्रदास्यामि पतिविक्षेपविह्वला ॥ २२

ब्रह्मोवाच

त्वच्छापाद्भयभीतोऽहं मे वरोऽपि मृषा नहि ।
तस्मात्त्वं प्राणपतिना सार्द्धं गच्छ त्रिविष्टपम् ॥ २३
भुक्त्वा सुखानि कालेन युवां भूमौ भविष्यथः
गङ्गायमुनयोर्मध्ये द्वापरान्ते च भारते ॥ २४
युवयो राधिका साक्षात् परिपूर्णतमप्रिया ।
भविष्यति यदा पुत्री तदा मोक्षं गमिष्यथः ॥ २५

नारद उवाच

इत्थ ब्रह्मवरेणाथ दिव्येनामोघरूपिणा ।
कलावतीसुचन्द्रौ च भूमौ तौ द्वौ बभूवतुः ॥ २६
कलावती कान्यकुब्जे भलन्दननृपस्य च ।
जातिस्मरा ह्यभूद्दिव्या यज्ञकुण्डसमुद्भवा ॥ २७
सुचन्द्रो वृषभान्वाख्य सुरभानुगृहेऽभवत् ।
जातिस्मरो गोपवर कामदेव इवापरः ॥ २८
सम्बन्ध योजयामास नन्दराजो महामतिः ।
तयोश्च जातिस्मरयोरिच्छतोरिच्छया द्वयोः ॥ २९
वृषभानोः कलावत्या आख्यानं शृणुते नरः ।
सर्वपापविनिर्मुक्त कृष्णसायुज्यमाप्नुयात् ॥ ३०

इति श्रीगर्गसंहितायां गोलोकखण्डे नारदबहुलाश्व-
संवादे श्रीराधिकाजन्मवर्णनं नाम
अष्टमोऽध्याय ॥ ८

नारद उवाच

तत्रैकदा श्रीमथुरापुरे वरे
पुरोहितस्सर्वयदूत्तमैः कृतः ।
शूरेच्छया गर्ग इति प्रमाणिकः
समाययौ सुन्दरराजमन्दिरम् ।। १

हीराखचिद्धेमलसत्कपाटक
द्विपेन्द्रकर्णाहतभृङ्गनादितम् ।
इभस्रवन्निर्भरगण्डधारया
समार्द्रितंमण्डपखण्डमण्डितम् ।। २

महोद्भटैर्वीरजनैः सकञ्चुकै
र्धनुर्धरैश्चर्मकृपाणपाणिभिः ।
रथद्विपाश्वध्वजिनीबलादिभिः
सुरक्षितं मण्डपमङ्गलादिभिः ।। ३

ददर्श गर्गो नृपदेवमाहुक
श्वाफल्किना देवककंससेवितम् ।
श्रीशक्रसिंहासन उन्नते परे
स्थितं वृतं छत्रवितानचामरैः ।। ४

दृष्ट्वा मुनिं तं सहसासनाशया-
दुत्थाय राजा प्रणनाम यादवैः ।
संस्थाप्य सम्पूज्य सुभद्रपीठके
स्तुत्वा परिक्रम्य नतः स्थितोऽभवत् ।। ५

दत्त्वाशिषं गर्गमुनिर्नृपाय वै
पप्रच्छ सर्वं कुशलं नृपादिषु ।

श्रीदेवक प्राह महामना ऋषि
र्महौजसं नीतिविदं यदूत्तमम् ।। ६

गर्ग उवाच

शौरिं विना भुवि नृपेषु वरस्तु नास्ति
चिन्त्यो मया बहुदिनैः किल यत्र तत्र ।
तस्मान्नृदेव वसुदेववराय देहि
श्रीदेवकी तव सुतां विधिनोद्वहस्व ।। ७

नारद उवाच

कृत्वा तदैव पुरि निश्चयनागवल्लीं
श्रीदेवकः सकलधर्मभृतां वरिष्ठः ।
गर्गेच्छया तु वसुदेववराय पुत्रीं
कृत्वाथ मङ्गलमलप्रददौ विवाहे ॥ ८

कृतोद्वहः शौरिरतीवसुन्दरं
रथं प्रयाणे समलङ्कृतं हयैः ।
सार्धं तया देवकराजकन्यया
समारुहत् काञ्चनरत्नशोभया ।। ९

स्वसुः प्रियं कर्तुमतीव कंसो
जग्राह रश्मींश्चलतां हयानाम् ।
उवाह वाहांश्चतुरङ्गिणीभि-
र्वृतः कृपास्नेहपरोऽथ शौरौ ॥ १०

दासीसहस्रं त्वयुतं गजानां
सत्पारिबर्हं नियुतं हयानाम् ।
लक्षं रथानाञ्च गवां द्विलक्षं
प्रादाद्दुहित्रे नृपदेवको वै ।। ११

भेरीमृदङ्गोद्धरगोमुखानां
धुन्धुर्य्यवीणानकवेणुकानाम् ।
महत्स्वनोऽभूच्चलतां यदूनां
प्रयाणकाले पथि मङ्गलञ्च ॥ १२

आकाशवागाह तदैव कंस
त्वामष्टमो हि प्रसवोऽस्यास्याः ।
हन्ता न जानासि च यां रथस्थां
रश्मीन् गृहीत्वा वहसेऽबुधस्त्वम् ॥ १३

कुसङ्गनिष्ठोऽतिखलो हि कंसो
हन्तुं स्वसार धिषणां चकार ।
कचे गृहीत्वा शितखड्गपाणि
र्गतत्रपो निर्दय उग्रकर्मा ॥ १४

वादित्रकारा रहिता बभूवु-
रग्रेस्थिता. स्युश्चकिता हि पश्चात् ।
सर्वेषु वा श्वेतमुखेषु सत्सु
शौरिस्तमाहाशु सतां वरिष्ठः ॥१५

वसुदेव उवाच

भोजेन्द्र भोजकुलकीर्त्तिकरस्त्वमेव
भौमादिमागधबकासुरवत्सबाणैः ।
श्लाघ्या गुणास्तव युधि प्रतियोद्धुकामैः
स त्वं कथं नु भगिनीमसिनात्र हन्यात् ॥ १६

ज्ञात्वा स्त्रियं किल बकीं प्रतियोद्धुकामां
युद्धं कृतं न भवता यशसो निवृत्या ।
सा तु त्वयापि भगिनीव कृता प्रशान्त्यै
साक्षादियन्तु भगिनी किमु ते विचारात् ॥ १७

उद्वाहपर्वणि गता च तवानुजा च
बाला सुतेव कृपणा शुभदा सदैषा।
योग्योऽसि नात्र मथुराधिप हन्तुमेतां
त्वं दीनदुःखहरणे कृतचित्तवृत्तिः ।। १८

नारद उवाच

नामन्यतेत्थं प्रतिबोधितोऽपि
कुसङ्गनिष्ठोऽतिखलो हि कंसः।
तदा हरेः कालगतिं विचार्य
शौरिः प्रसन्नः पुनराह कंसम् ।। १९

वसुदेव उवाच

नास्यास्तु ते देव भयं कदाचिद्
यद् देववाण्या कथितं च तच्छृणु।
पुत्रान् ददामीति यतो भयं स्यान्
मा ते व्यथास्याः प्रसवप्रजातात् ।। २०

नारद उवाच

श्रुत्वा स निश्चित्य वचोऽथ शौरेः
कंसः प्रशस्याशु गृहङ्गतोऽभूत्।
शौरिस्तदा देवकराजपुत्र्या
भयावृतः सन् गृहमाजगाम ।। २१

इति श्रीगर्गसंहितायां गोलोकखण्डे
वसुदेवविवाहवर्णनं नाम
नवमोऽध्यायः ।। ९

नारद उवाच

भीतः पलायते नायं योद्धारः कंसनोदिताः ।
अयुतं शस्त्रसंयुक्ता रुरुधु शौरिमन्दिरम् ॥ १
शौरिः कालेन देवक्यामष्टौ पुत्रानजीजनत् ।
अनुवर्षं चाथ कन्यामेकां मायां सनातनीम् ॥ २
कीर्तिमन्तं सुतं ह्यादौ जातमानकदुन्दुभिः ।
नीत्वा कंससभामेत्य ददौ तस्मै परार्थवित् ॥ ३
सत्यवाक्यस्थितं शौरिं दृष्ट्वा कंसो घृणीत्वभूत् ।
दुःखं साधु न सहते सत्ये कस्य क्षमा नहि ॥ ४

कंस उवाच

एष बालो यातु गृहमेतस्मान्नहि मे भयम् ।
युवयोरष्टमं गर्भं हनिष्यामि न संशयः ॥ ५

नारद उवाच

इत्युक्तो वसुदेवस्तु सपुत्रो गृहमागतः ।
सत्यं नामन्यत मनाग् वाक्यं तस्य दुरात्मनः ॥ ६
तदाम्बरादागतं मां नत्वा पूज्योग्रसेनजः ।
पप्रच्छ देवाभिप्रायं प्रावोचं तं निबोध मे ॥ ७
नन्दाद्या वसवः सर्वे वृषभान्वादयः सुराः ।
गोप्यो वेदऋचाद्याश्च सन्ति भूमौ नृपेश्वर ॥ ८
वसुदेवाद्यो देवा मथुरायाञ्च वृष्णयः ।
देवक्याद्याः स्त्रियः सर्वा देवताः सन्ति निश्चयः ॥ ९
सप्तवारप्रसंख्यानादष्टमाः सर्व एव हि ।
ते हन्तुः सख्ययायं वै अङ्कानां वामतो गतिः ॥ १०

नारद उवाच

इत्युक्त्वा त मयि गते कृते दैत्यवधोद्यमे ।
कंसः कोपावृतः सद्यो यदून् हन्तु मनो दधे ॥११
वसुदेव देवकीञ्च बद्ध्वाथ निगडैर्दृढैः ।
ममर्द त शिलापृष्ठे देवकीगर्भजं शिशुम् ॥१२
जातिस्मरो विष्णुभयाज्जात जातं जघान ह ।
इति दुष्टविभावाच्च भूमौ भूतं न संशयम् ॥१३
उग्रसेनस्तदा क्रुद्धो यादवेन्द्रो नृपेश्वरः ।
वारयामास कंसाख्यं वसुदेवसहायकृत् ॥१४
कंसस्य दुरभिप्राय दृष्ट्वोत्तस्थुर्महाभटाः ।
उग्रसेनानुगा रक्षां चक्रुस्ते खड्गपाणयः ॥१५
उग्रसेनानुगान् दृष्ट्वा कंसवीराः समुत्थिताः ।
तै. सार्द्धमभवद्युद्ध सभामण्डपमध्यतः ॥१६
द्वारदेशेऽपि वीराणां युद्ध जातं परस्परम् ।
खड्गप्रहारैरयुतं जनानां निधन गतम् ॥१७
कसो गृहीत्वाथ गदां पितु. सेनां ममर्द ह ।
कंसस्य गदया स्पृष्टाः केचिच्छिन्नललाटकाः ॥१८
भिन्नपादा भिन्नमुखाश्छिन्नांसाश्छिन्नबाहवः ।
अधोमुखा ऊर्ध्वमुखाः सशस्त्राः पतिताः क्षणात् ॥१९
वमन्तो रुधिरं वीरा मूर्च्छिता निधनं गताः ।
सभामण्डपमारक्तं दृश्यते क्षतजस्रवात् ॥२०
इत्थं महोत्कटः कंसः सांनपात्योद्भटान् रिपून् ।
क्रोधाढ्यो राजराजेन्द्र जग्राह पितरं खलः ॥२१
नृपासनात् सङ्गृहीत्वा बद्ध्वा पाशैश्च तं खलः ।
तन्मित्रैश्च नृपैः सार्द्धं कारागारे रुरोध ह ॥२२

मधूनां शूरसेनानां देशानां सर्वसम्पदाम् ।
सिंहासने चोपविश्य स्वयं राज्यं चकार ह ॥ २३
पीडिता यादवाः सर्वे सम्बन्धस्य मिषैस्त्वरम् ।
चतुर्दिशोऽन्तरं देशान् विविशुः कालवेदिनः ॥ २४
देवक्याः सप्तमे गर्भे हर्षशोकविवर्धने ।
व्रजं प्रणीते रोहिण्यामनन्ते योगमायया ॥ २५
अहो गर्भः क्व विगत इत्यूचुर्माथुरा जनाः ॥ २६

अथ व्रजे पञ्चदिनेषु भाद्रे
तिथौ च षष्ठ्याञ्च सिते बुधे च ।
उच्चैर्ग्रहैः पञ्चभिरावृते च
लग्ने तुलाख्ये दिनमध्यदेशे ॥ २७
सुरेषु वर्षत्सु सुपुष्पवर्षं
घनेषु मुञ्चत्सु च वारिबिन्दून् ।
बभूव देवो वसुदेवपत्न्यां
विभासयन् नन्दगृहं स्वभासा ॥२८
नन्दोऽपि कुर्वञ्छिशुजातकर्म
ददौ द्विजेभ्यो नियुतं गवाञ्च ।
गोपान् समाहूय सुगायकानां
रावैर्महामङ्गलमातनोति ॥२९
द्वैपायनो देवलदेवरात
वसिष्ठवाचस्पतिभिर्मया च ।
आगत्य तत्रैव समास्थितोऽभूत्
पाद्यादिभिर्नन्दकृतैः प्रसन्नः ॥ ३०

नन्द उवाच

सुन्दरो बालकः कोऽयं न दृश्यो यत्समः क्वचित् ।
कथं पञ्चदिनाज्जातस्तन्मे ब्रूहि महामुने ॥ ३१

व्यास उवाच

अहो भाग्यन्तु ते नन्द शिशुः शेषः सनातनः ।
देवक्यां वसुदेवस्य जातोऽयं मथुरापुरे ॥ ३२
कृष्णेच्छया तदुदरात् प्रणीतो रोहिणीं शुभाम् ।
नन्दराज त्वया दृश्यो दुर्लभो योगिनामपि ॥३३
तद्दर्शनार्थं प्राप्तोऽहं वेदव्यासो महामुनिः ।
तस्मात्त्वं दर्शयास्माकं शिशुरूपं परात्परम् ॥ ३४

नारद उवाच

अथ नन्दः शिशुं शेषं दर्शयामास विस्मितः ।
दृष्ट्वा प्रेङ्खस्थितं प्राह नत्वा सत्यवतीसुतः ॥ ३५

व्यास उवाच

देवाधिदेव भगवन् कामपाल नमोऽस्तु ते ।
नमोऽनन्ताय शेषाय साक्षाद्रामाय ते नमः ॥ ३६
धराधराय पूर्णाय स्वधाम्ने सीरपाणये ।
सहस्रशिरसे नित्यं नमः सङ्कर्षणाय ते ॥ ३७
रेवतीरमण त्वं वै बलदेवोऽच्युताग्रजः ।
हलायुधः प्रलम्बघ्नः पाहि मां पुरुषोत्तम ॥ ३८
बलाय बलभद्राय तालाङ्काय नमो नमः ।
नीलाम्बराय गौराय रौहिणेयाय ते नमः ॥ ३९
धेनुकारिर्मुष्टिकारिः कूटारिर्बल्वलान्तकः ।
रुक्म्यरिः कूपकर्णारिः कुम्भाण्डारिस्त्वमेव हि ॥ ४०
कालिन्दीभेदनोऽसि त्वं हस्तिनापुरकर्षकः ।
द्विविदारिर्यादवेन्द्रो व्रजमण्डलमण्डनः ॥ ४१
कंसभ्रातृप्रहन्तासि तीर्थयात्राकरः प्रभुः ।
दुर्योधनगुरुः साक्षात् पाहि पाहि प्रभो जगत ॥ ४२

जय जयाच्युत देव परात्पर
स्वयमनन्त दिगन्तगतं यशः ।
सुरमुनीन्द्र फणीन्द्रवराय ते
मुसलिने बलिने हलिने नमः ॥ ४३

इह पठेत् सततं स्तवनन्तु यः
स तु हरेः परमं पदमाव्रजेत् ।
जगति सर्वबलं त्वरिमर्दनं
भवति तस्य जयः सजनं धनम ॥ ४४

नारद उवाच

बलं परिक्रम्य शतं प्रणम्य तै
र्द्वैपायनो देव पराशरात्मजः ।
विशालबुद्धिर्मुनिबादरायणः
सरस्वती सत्यवतीसुतो ययौ ॥ ४५

इति श्रीगर्गसंहितायां गोलोकखण्डे नारदबहुलाश्व-
संवादे बलभद्रजन्मवर्णनं नाम
दशमोऽध्यायः ॥१०

नारद उवाच

परिपूर्णतमः साक्षाच्छ्रीकृष्णो भगवान् स्वयम् ।
विवेश वसुदेवस्य मनः पूर्वं परात्परः ॥ १
सूर्येन्दुवह्निसङ्काशो वसुदेवो महामनाः ।
बभूवात्यन्तमहसा साक्षाद्यज्ञ इवापरः ॥ २
देवक्यामागते कृष्णे सर्वेषामभयङ्करे ।
रराज तेन सा गेहे घने सौदामिनी यथा ॥ ३
तेजोवतीञ्च तां वीक्ष्य कंसः प्राह भयातुरः ।
प्राप्तोऽयं प्राणहन्ता मे पूर्वमेषा न चेदृशी ॥ ४
जातमात्रं हनिष्यामीत्युक्त्वास्ते भयविह्वलः ।
पश्यन् सर्वत्र च हरिं पूर्वशत्रुं विचिन्तयन् ॥ ५
अहो वैरानुबन्धेन साक्षात् कृष्णोऽपि दृश्यते ।
तस्माद्वैरं प्रकुर्वन्ति कृष्णप्राप्त्यर्थमासुराः ॥ ६
अथ ब्रह्मादयो देवा मुनीन्द्रैरस्मदादिभिः ।
शौरिगेहोपरि प्राप्ताः स्तवं चक्रुः प्रणम्य तम् ॥ ७

देवा ऊचुः

यो जागरादिषु परं परमं ह्यहेतु-
र्हेतुः स्विदस्य विचरन्ति गुणाश्च येन ।
नैतद्विशन्ति महदिन्द्रियदेवसङ्घा-
स्तस्मै नमोऽग्निमिव विस्तृतविस्फुलिङ्गाः ॥ ८
नैवेशितुं प्रभुरयं बलिनां बलीयान्
मायेति शब्दमुव नो विषयीकरोति ।
तं ब्रह्म पूर्णममृतं परमं प्रशान्तं
शुद्धं परात्परतरं शरणं गताः स्मः ॥ ९

अंशांशकांशककलाद्यवतारवृन्दै-
रावेशपूर्णसहितैश्च परस्य यस्य ।
सर्गादयः किल भवन्ति तमेव कृष्णं
पूर्णात्परन्तु परिपूर्णतमं नताः स्मः ॥ १०

मन्वन्तरेषु च युगेषु गतागतेषु
कल्पेषु चांशकलया स्ववपुर्विभासि ।
अद्यैव धाम परिपूर्णतमं तनोषि
धर्मं विधाय भुवि मङ्गलमातनोषि ॥ ११

यद्दुर्लभं विशदयोगिभिरप्यगम्यं
गम्यं द्रवद्भिरमलाशयभक्तियोगैः ।
आनन्दकन्दचरतस्तव मन्दयान-
पादारविन्दमकरन्दरजो दधामः ॥ १२

पूर्वं तथात्र कमनीयवपुर्मयं त्वां
कन्दर्पकोटिशतमोहनमद्भुतञ्च ।
गोलोकधामधिषणद्युतिमादधानं
राधापतिं धरणिधुर्यधनं दधामः ॥ १३

नारद उवाच

नत्वा हरिं तदा देवा ब्रह्माद्या मुनिभिः सह ।
गायन्तस्तं प्रशंसन्तः स्वधामानि ययुर्मुदा ॥ १४
अथ मैथिल राजेन्द्र जन्मकाले हरेः सति ।
अम्बरं निर्मलं जातं निर्मलाश्च दिशो दश ॥ १५
उज्ज्वलास्तारका जाताः प्रसन्नं भूमिमण्डलम् ।
नदा नद्यः समुद्राश्च प्रसन्नापः सरोवराः ॥ १६
सहस्रदलपद्मानि शतपत्राणि सर्वतः ।
विकचानि मरुत्स्पर्शैः पतद्गन्धिरजांसि च ॥ १७

तेषु नेदुर्मधुकरा नदन्तश्चित्रपक्षिणः ।
शीतला मन्दयानाश्च गन्धाक्ता वायवो ववुः ॥ १८

ऋद्धा जनपदा ग्रामा नगरा मङ्गलायनाः ।
देवा विप्रा नगा गावो बभूवुः सुखसंवृताः ॥ १९

देवदुन्दुभयो नेदुर्जयध्वनिसमाकुलाः ।
यत्र तत्र महाराज सर्वेषां मङ्गलं परम् ॥ २०

विद्याधराश्च गन्धर्वाः सिद्धकिन्नरचारणाः ।
जगुः सनायका देवास्तुष्टुवुः स्तुतिभिः परम् ॥ २१

ननृतुर्दिवि गन्धर्व्यो विद्याधर्य्यो मुदान्विताः ।
पारिजातकमन्दारमालतीसुमनांसि च ॥ २२

मुमुचुर्देवमुख्याश्च गर्जन्तश्च घना जलम् ।
भाद्रे बुधे कृष्णपक्षे धात्रर्क्षे हर्षणे वृषे ।
ववेऽष्टम्यामर्द्धरात्रे नक्षत्रेशमहोदये ॥ २३

अन्धकारावृते काले देवक्यां शौरिमन्दिरे ।
आविरासीद्धरिः साक्षादरण्यामध्वरेऽग्निवत् ॥ २४

स्फुरदर्क्षविचित्रहारिणं
विलसत्कौस्तुभरत्नधारिणम् ।
परिधिद्युतिनूपुराङ्गदं
धृतबालार्ककिरीटकुण्डलम् ॥ २५

चलदद्भुतवह्निकङ्कणं
तडिदूर्जिगुणमेखलाञ्चितम् ।
मधुपध्वनिपद्ममालिनं
नवजाम्बूनददिव्यवाससम् ॥ २६

सतडिद्घनदिव्यसौभगं
चलनीलालकवृन्दभृन्मुखम् ।
चलदंशु तमोहरं परं
शुभदं सुन्दरमम्बुजेक्षणम् ॥२७
कृतपत्रविचित्रमण्डलं
सततं कोटिमनोजमोहनम् ।
परिपूर्णतमं परात्परं
कलवेणुध्वनिवाद्यतत्परम् ॥२८
तमवेक्ष्य सुतं यदूत्तमो
हरिजन्मोत्सवफुल्ललोचन· ।
अथ विप्रजनेभ्य आशु वै
नियुतं सन्मनसा गवां ददौ ॥२९
हरिमानकदुन्दुभिस्तत
स्तनयन्तं प्रणिपत्य विस्मितः ।
अकरोदुदितप्रभूदयो
गतभीः सूतिगृहे कृताञ्जलिः ॥३०

वसुदेव उवाच

एको यः प्रकृतिगुणैरनेकधासि
हर्ता त्वं जनक उतास्य पालकस्त्वम् ।
निर्लिप्तः स्फटिक इवाद्यदेहवर्णै
स्तस्मै श्रीभुवनपते नमामि तुभ्यम् ॥३१
एधस्सु ह्यनल इव प्रवर्तमानो
योऽन्तस्थो बहिरपि चाम्बरं यथा हि ।
आधारो धरणिरिवास्य सर्वसाक्षी
तस्मै ते नम इति सर्वगो नभस्वान् ॥३२

भूभारोद्धरहरणार्थमेव जातो
गोदेवद्विजनिजभक्तवत्सलोऽसि ।
गेहे मे भुवि पुरुषोत्तमोत्तमस्त्वं
कंसान्मां भुवनपते प्रपाहि पापात् ॥३३

नारद उवाच

परिपूर्णतमं साक्षाच्छ्रीकृष्णं श्यामसुन्दरम् ।
ज्ञात्वा नत्वाथ तं प्राह देवकी सर्वदेवता ॥३४

देवक्युवाच

हे कृष्ण हे विगणिताण्डपते परेश
गोलोकधामधिषण ध्वज आदिदेव ।
पूर्णेश पूर्ण परिपूर्णतम प्रभो मां
त्वं पाहि पाहि परमेश्वर कंसपापात् ॥३५

नारद उवाच

तच्छ्रुत्वा भगवान् कृष्णः परिपूर्णतमः स्वयम् ।
सस्मितो देवकीं शौरिं प्राह सद्वृजिनार्दनः ॥३६

भगवानुवाच

इयन्तु पृश्निः पतिदेवता च
त्वं पूर्वसर्गे सुतपाः प्रजार्थी ।
ब्रह्माज्ञया दिव्यतपो युवाभ्यां
कृतं परं निर्जलभोजनाभ्याम् ॥३७
काले तु मन्वन्तरजे व्यतीते
तपः परं तपतोः सुप्रजार्थे ।
तदा प्रसन्नो युवयोरभूवं
वरं परं ब्रूत मया तदोक्तम् ॥३८

श्रुत्वा युवाभ्यां कथितं तदेव
भूयात सुतस्त्वत्सदृशः किलावयोः।
तथास्तु चोक्त्वाथ गते मयि प्रजा-
पती ह्यभूत स्वकृतेन दम्पती ॥३९
न मत्समः कोऽपि सुतो जगत्यलं
विचार्य तद्धामभवं परेश्वर.।
श्रीपृश्निगर्भो भुवि विश्रुतः पुन
र्द्वितीयकालेऽहमुपेन्द्रवामन. ॥४०
तथाभव ह्यद्यतने परात्परो
नीत्वाथ मां प्रापय नन्दमन्दिरम्।
अतो न भूयाद्भयमौग्रसेनत.
सुतां ममादाय सुखी भविष्यथ ॥४१

नारद उवाच

तूष्णीं भूत्वा हरिस्तत्र तद्रूपं पश्यतोस्तयो.।
दृश्यं ह्यप्रकटं कृत्वा बालोऽभूत् कौ यथा नटः ॥४२
प्रेङ्खे धृत्वाथ तं शौरिर्यावद् गन्तुं समुद्यतः।
तावद् व्रजे नन्दपत्न्यां योगमायाजनि स्वत' ॥४३
तया शयाने विश्वस्मिन् रक्षकेषु स्वपत्सु च।
द्वारा उद्घाटिताः सर्वाः प्रस्फुटच्छृङ्खलार्गलाः ॥ ४४
निर्गते वसुदेवे च मूर्ध्नि श्रीकृष्णशोभिते।
सूर्योदये यथा सद्यस्तमोनाशोऽभवत्स्वतः ॥४५
घनेषु व्योम्नि वर्षत्सु सहस्रवदनः स्वराट्।
निवारयन् दीर्घफणैरासारं शौरिमन्वगात् ॥ ४६
ऊर्म्यावर्ताकुलावेगैः सिंहसर्पादिवाहिनी।
सद्यो मार्गं ददौ तस्मै कालिन्दी सरितां वरा ॥ ४७

नन्दव्रजं समेत्यासौ प्रसुप्तं सर्वत. परम् ।
शिशुं यशोदाशयने निधायाशु ददर्श ताम् ॥ ४८
तत्सुतां समुपादाय पुनर्गेहाज्जगाम सः ।
तीर्त्वा श्रीयमुनां शौरिः स्वागारे पूर्ववत्स्थितः ॥ ४६
सुतं सुतां वा जातं न ज्ञात्वा गोपी यशोमती ।
परिश्रान्ता स्वशयने सुष्वापानन्दनिद्रया ॥ ५०
अथ बालध्वनिं श्रुत्वा रक्षकाः समुपस्थिताः ।
ऊचुः कंसाय वीराय गत्वा तद्राजमन्दिरम् ॥ ५१
सूतीगृहं त्वरं प्रागात् कंसो वै भयकातरः ।
स्वसाथ भ्रातरं प्राह रुदती दीनवत्सती ॥ ५२

देवक्युवाच

सुतामेकां देहि मे त्वं पुत्रेषु प्रमृतेषु च ।
स्त्रियं हन्तुं न योग्योऽसि भ्रातस्त्वं दीनवत्सलः ॥ ५३
तेऽनुजाहं हतसुता कारागारे निपातिता ।
दातुमर्हसि कल्याण कल्याणीं तनुजाञ्च मे ॥ ५४

नारद उवाच

अश्रुमुख्या मोहितया समाच्छाद्यात्मजां बहु ।
प्रार्थितोऽङ्काद्विनिर्भर्त्स्य तां स आचिच्छिदे खलः ॥ ५५
कुसङ्गनिरतः पापः खलो यदुकुलाधमः ।
स्वसुः सुतां शिलापृष्ठे गृहीत्वाङ्घ्र्योर्न्यपातयत् ॥ ५६
कंसहस्तात् समुत्पत्य त्वरं सा चाम्बरं गता ।
शतचक्रे रथे दिव्ये सहस्रहयसेविते ॥ ५७
चामरान्दोलिते शुभ्रे स्थिताऽदृश्यत दिव्यदृक् ।
सायुधाष्टभुजा माया पार्षदैः परिसेविता ।
शतसूर्यप्रतीकाशा कंसमाह घनस्वना ॥ ५८

योगमायोवाच

परिपूर्णतमः साक्षाच्छ्रीकृष्णो भगवान् स्वयम् ॥
जातः क्व वा स ते हन्ता वृथा दीनान् दुनोषि वै ॥ ५९

नारद उवाच

इत्युक्त्वा तं ततो देवी गता विन्ध्याचले गिरौ ।
योगमाया भगवती बहुनामा बभूव ह ॥ ६०
अथ कंसो विस्मितोऽभूच्छ्रुत्वा मायावचः परम् ।
देवकीं वसुदेवञ्च मोचयामास बन्धनात् ॥ ६१

कंस उवाच

पापोऽहं पापकर्माहं खलो यदुकुलाधमः ।
युष्मत्पुत्रप्रहन्ताहं क्षमध्वं मत्कृतं भुवि ॥ ६२
हे स्वसः शृणु हे शौरे मन्ये कालकृतं त्विदम् ।
येन विश्वश्चाल्यमानो वायुनेव घनावलिः ॥ ६३
विस्रब्धोऽहं देववाक्यैर्देवास्तेऽपि मृषा गिरः ।
न जानामि क्व मे शत्रुर्जातः कौ कथितोऽमुया ॥ ६४

नारद उवाच

इत्थं कंसस्तदङ्घ्र्योश्च पतितोऽश्रुमुखो रुदन् ।
चकार सेवां परमां सौहृदं दर्शयंस्तयोः ॥ ६५
अहो श्रीकृष्णचन्द्रस्य परिपूर्णतमस्य भोः ।
दानदत्तैः कटाक्षैश्च किं न स्याद्भूमिमण्डले ॥ ६६
प्रातःकाले तदा कंसः प्रलम्बादीन् महासुरान् ।
समाहूय खलस्तेभ्योऽवददुक्तञ्च मायया ॥ ६७

कंस उवाच

जातो मे ह्यन्तकृद्भूमौ कथितो योगमायया ।
अनिर्दशान्निर्दशांश्च शिशून् यूयं हनिष्यथ ॥ ६८

दैत्या ऊचुः

सज्यस्य धनुषो युद्धे भवता द्वन्द्वयोधिना ।
टङ्कारेणोद्गता देवा मन्यसे तैः कथं भयम् ॥ ६६
गोविप्रसाधुश्रुतयो देवा धर्मादयः परे ।
ते विष्णोस्तनवो ह्येषां नाशे दैत्यबलं स्मृतम् ॥ ७०
जातो यदि महाविष्णुस्ते शत्रुर्यो महीतले ।
अयं हि तद्वधोपायो गवादीनां विहिंसनम् ॥ ७१

नारद उवाच

इत्थं महोत्कटा दुष्टा दैतेयाः कंसनोदिताः ।
ददुर्दुःखं गवादिभ्यो जघ्नुर्जातांश्च बालकान् ॥ ७२
आसमुद्राद्भूमितले विशन्तश्च गृहे गृहे ।
कामरूपधरा दैत्याश्चेरुः सर्व इतस्ततः ॥ ७३
उत्पथा उद्भटा दैत्यास्तत्रापि कंसनोदिताः ।
कपिः सुरापोऽलिहतो भूतग्रस्त इवाभवन् ॥ ७४

वैदेह मैथिल नरेन्द्र उपेन्द्रभक्त
धर्मिष्ठमुख्य सुतपो जनक प्रतापिन् ।
एतत् सताञ्च भुवि हेलनमङ्गराजन्
सर्वं छिनत्ति बहुलाश्व चतुःपरार्थान् ॥ ७५

इति श्रीगर्गसंहितायां गोलोकखण्डे नारदबहुलाश्व-
संवादे श्रीकृष्णजन्मवर्णनं नाम
एकादशोऽध्यायः ॥ ११

नारद उवाच

अथ पुत्रोत्सवं जातं श्रुत्वा नन्द उषःक्षणे ।
ब्राह्मणांश्च समाहूय कारयामास मङ्गलम् ॥ १
सविधि जातकं कृत्वा नन्दराजो महामनाः ।
विप्रेभ्यो दक्षिणाभिश्च दशलक्षं गवां ददौ ॥ २
क्रोशमात्रं रत्नसानून् सुवर्णशिखरान् गिरीन् ।
सरसान् सप्तधान्यानां ददौ विप्रेभ्य आनतः ॥ ३
मृदङ्गवीणाशङ्खाद्या नेदुर्दुन्दुभयो मुहुः ।
गायकाश्च जगुर्द्वारि ननृतुर्वारयोषितः ॥ ४
पताकैर्हैमकलशैर्वितानैस्तोरणैः शुभैः ।
अनेकवर्णैश्चित्रैश्च बभौ श्रीनन्दमन्दिरम् ॥ ५
रथ्या वीथ्यश्च देहल्यो भित्तिप्राङ्गणवेदिकाः ।
तोलिकामण्डपसभा रेजुर्गन्धिजलाम्बरैः ॥ ६
गावः सुवर्णशृङ्ग्यश्च हेममालालसद्गलाः ।
घण्टामञ्जीरझङ्कारा रक्तकम्बलमण्डिताः ॥ ७
पीतपुच्छाः सवत्साश्च तरुणीकरचिह्निताः ।
हरिद्राकुङ्कुमाक्ताश्च चित्रधातुविचित्रिताः ॥ ८
बर्हिपुच्छैर्गन्धजलैर्वृषा धर्मधुरन्धराः ।
इतस्ततो विरेजुः श्रीनन्दद्वारि मनोहराः ॥ ९
गोवत्सा हेममालाढ्या मुक्ताजालविराजिताः ।
इतस्ततो विलङ्घन्तो मञ्जीरचरणाः सिताः ॥ १०
श्रुत्वा पुत्रोत्सवं तस्य वृषभानुवरस्तथा ।
कलावत्या गजारूढो नन्दमन्दिरमाययौ ॥ ११
नन्दा नवोपनन्दाश्च तथा षड् वृषभानवः ।
नानोपायनसंयुक्ताः सर्वे तेऽपि समाययुः ॥ १२

उष्णीषोपरि मालाढ्याः पीतकञ्चुकशोभिताः ।
बर्हगुञ्जाबद्धकेशा वनमालाविभूषिताः ॥ १३
वंशीधरा वेत्रहस्ताः सुपत्रतिलकार्चिताः ।
बद्धवर्णपरिकरा गोपास्तेऽपि समाययुः ॥ १४
नृत्यन्तः परिगायन्तो धुन्वन्तो वसनानि च ।
नानोपायनसंयुक्ताः श्मश्रुलाः शिशवः परे ॥१५
हैयङ्गवीनदुग्धानां दध्याज्यानां बलि बहु ।
नीत्वा वृद्धा यष्टिहस्ता नन्दमन्दिरमाययुः ॥१६
पुत्रोत्सवं व्रजेशस्य कथयन्त. परस्परम् ।
प्रेमविह्वलभावैः स्वैरानन्दाश्रुसमाकुलाः ॥१७
जाते पुत्रोत्सवे नन्दः स्वानन्दाश्रुकुलेक्षणः ।
पूजयामास तान् सर्वांस्तिलकाद्यैर्विधानतः ॥१८

गोपा ऊचुः

हे व्रजेश्वर हे नन्द जातः पुत्रोत्सवस्तव ।
अनपत्यस्येच्छतोलभतः किं मङ्गलं परम् ॥१६
दैवेन दर्शितश्चेदं दिनं नो बहुभिर्दिनैः ।
कृतकृत्याश्च भूयास्मो दृष्ट्वा श्रीनन्दनन्दनम् ॥२०
हे मोहनेति दूरात्तमङ्कं नीत्वा गदिष्यसि ।
यदा लालनभावेन भविता नस्तदासुखम् ॥२१

नन्द उवाच

भवतामाशिषः पुण्याज्जातं सौख्यमिदं शुभम् ।
आज्ञावर्ती ह्यहं गोपा गोपानां व्रजवासिनाम् ॥२२

नारद उवाच

श्रीनन्दराजसुतसम्भवमद्भुतञ्च
श्रुत्वा विसृज्य गृहकर्म तदैव गोप्यः ।
तूर्णं ययुः सवलयो व्रजराजगेहा-
नुद्यत्प्रमोदपरिपूरितहृन्मनोज्ञाः ॥२३

आनन्दमन्दिरपुरात् स्वगृहाद् व्रजन्त्यः
सर्वा इतस्तत उत त्वरया व्रजन्त्यः ।
यानश्लथद्वसनभूषणकेशबन्धा
रेजुर्नरेन्द्रपथि भूपरि मुक्तमुक्ताः ॥२४

झाङ्कारनूपुरनवाङ्गदहेमचीर-
मञ्जीरहारमणिकुण्डलमेखलाभिः ।
श्रीकण्ठसूत्रभुजकङ्कणबिन्दुकीभिः
पूर्णेन्दुमण्डलनवद्युतिभिर्विरेजुः ॥२५

श्रीराजिकालवणरात्रिविशेषचूर्णैं
र्गोधूमसर्षपयवैः करलालनैश्च ।
उत्तार्य बालकमुखोपरि चाशिषस्ताः
सर्वा ददुर्नृप जगुर्जगदुर्यशोदाम् ॥२६

गोप्य ऊचु

साधु साधु यशोदे ते दिष्ट्या दिष्ट्या व्रजेश्वरि ।
धन्या धन्या परा कुक्षिर्ययायं जनितः सुतः ॥२७
इच्छा युक्तं कृतं ते वै देवेन बहुकालतः ।
रक्ष बालं पद्मनेत्र सुस्मितं श्यामसुन्दरम् ॥२८

यशोदोवाच

भवदीयदयाशीर्भिर्जातं सौख्य परञ्च मे ।
भवतीनामपि पर दिष्ट्या भूयादतः परम् ॥२९
हे रोहिणी महाबुद्धे पूजनन्तु व्रजौकसाम् ।
आगतानां सत्कुलानां यथेष्टं हीप्सितं कुरु ॥३०

नारद उवाच

रोहिणी राजकन्यापि तत्करौ दानशीलिनौ ।
तत्रापि नोदितादाने बभूवातिमहामनाः ॥३१

गौरवर्णा दिव्यवासा रत्नाभरणभूषिता ।
व्यचरद्रोहिणी साक्षात् पूजयन्ती व्रजौकसः ॥३२
परिपूर्णतमे साक्षाच्छ्रीकृष्णे व्रजमागते ।
नदत्सु नरतूर्येषु जयध्वनिरभून्महान् ॥३३
दधिक्षीरघृतैर्गोपा गोप्यो हैयङ्गवैर्नवैः ।
सिषिचुर्हर्षितास्तत्र जगुरुच्चैः परस्परम् ॥३४
बहिरन्तःपुरे जाते सर्वतो दधिकर्दमे ।
वृद्धाश्च स्थूलदेहाश्च पेतुर्हास्यं कृतं परैः ॥३५
सूताः पौराणिकाः प्रोक्ता मागधा वंशशंसकाः ।
बन्दिनस्त्वमलप्रज्ञा प्रस्तावसदृशोक्तयः ॥३६
तेभ्यो नन्दो महाराज सहस्रं गाः पृथक् पृथक् ।
वासोऽलङ्काररत्नानि हयेभानखिलान् ददौ ॥३७
बन्दिभ्यो मागधेभ्यश्च सर्वेभ्यो बहुलं धनम् ।
ववर्ष घनवद्गोपो नन्दराजो व्रजेश्वरः ॥३८
निधिः सिद्धिश्च वृद्धिश्च भुक्तिर्मुक्तिगृहे गृहे ।
वीथ्यां वीथ्यां लुठन्तीव तदिच्छा कस्यचिन्नहि ॥३९
सनत्कुमारकपिलशुकव्यासादिभिः सह ।
हंसदत्तपुलस्त्याद्यैर्मया ब्रह्मा जगाम ह ॥४०
हंसारूढो हेमवर्णो मुकुटी कुण्डली स्फुरन् ।
चतुर्मुखो वेदकर्ता द्योतयन् मण्डलं दिशाम् ॥४१
तथा तमनु भूताढ्यो वृषारूढो महेश्वरः ।
रथारूढो रविः साक्षाद्गजारूढः पुरन्दरः ॥४२
वायुश्च खञ्जनारूढो यमो महिषवाहनः ।
धनदः पुष्पकारूढो मृगारूढः क्षपेश्वरः ॥४३
अजारूढो वीतिहोत्रो वरुणो मकरस्थितः ।
मयूरस्थः कार्त्तिकेयो भारती हंसवाहिनी ॥४४

लक्ष्मी च गरुडारूढा दुर्गाख्या सिंहवाहिनी ।
गोरूपधारिणी पृथ्वी विमानस्था समाययौ ॥४५
दोलारूढा दिव्यवर्णा मुख्याः षोडशमातृकाः ।
षष्ठी च शिबिकारूढा खड्गिणी यष्टिधारिणी ॥४६
मङ्गलो मेषमारूढो भासारूढो बुधः स्मृतः ।
गीष्पतिः कृष्णसारस्थः शुक्रो गवयवाहनः ॥४७
शनिश्च मकरारूढ उष्ट्रस्थः सिंहिकासुतः ।
श्येनारूढस्तथाकेतुः शिशुमारेऽभिजित् स्थित ॥४८
सर्वेषामग्रतः प्राप्तो मूषकस्थो गणेश्वरः ।
कोटिबालार्कसङ्काश आययौ नन्दमन्दिरम् ॥४९
कोलाहलसमायुक्तं गोपगोपीगणाकुलम् ।
नन्दमन्दिरमभ्येत्य क्षणं स्थित्वा ययुः सुराः ॥५०
परिपूर्णतमं साक्षाच्छ्रीकृष्णं बालरूपिणम् ।
नत्वा दृष्ट्वा तदा देवाश्चक्रुस्तस्य स्तुतिं पराम् ॥५१
वीक्ष्य कृष्णं तदा देवा ब्रह्माद्या ऋषिभिः सह ।
स्वधामानि ययुः सर्वे हर्षिताः प्रेमविह्वलाः ॥५२

इति श्रीगर्गसंहितायां गोलोकखण्डे नारदबहुलाश्व-
संवादे नन्दमहोत्सववर्णनं नाम
द्वादशोऽध्यायः ॥१२

नारद उवाच

शौर्यनामयपृच्छार्थं करं दातुं नृपस्य च ।
पुत्रोत्सवं कथयितुं नन्दे श्रीमथुरां गते ॥१
कंसेन प्रेषिता दुष्टा पूतना बालघातिनी ।
पुरेषु ग्रामघोषेषु चरन्ती घर्घरस्वना ॥२
अथ गोकुलमासाद्य गोपगोपीगणाकुलम् ।
रूपं दधार सा दिव्यं वपुः षोडशवार्षिकम् ॥३
न केऽपि रुरुधुर्गोपाः सुन्दरीं ताश्च गोपिकाः ।
शचीं वाणीं रमां रम्भां रतिश्च क्षिपतीमिव ॥४
रोहिण्याश्च यशोदायां धर्षितायां स्फुरद्रुचा ।
अङ्कमादाय तं बालं लालयन्ती पुनः पुनः ॥५
ददौ शिशोर्महाघोरा कालकूटावृतं स्तनम् ।
प्राणैः सार्द्धं पपौ दुग्धं कटुरोषावृतो हरिः ॥६
मुञ्च मुञ्च वदन्तीत्थं धावती पीडितस्तना ।
नीत्वा बहिर्गता तं वै गतमाया बभूव ह ॥ ७
पतन्नेत्रा स्वेदगात्रा रुदन्ती पतिता भुवि ।
ननाद तेन ब्रह्माण्डं सप्तलोकैर्बिलैः सह ॥ ८
चचाल वसुधा द्वीपैस्तदद्भुतमिवाभवत् ।
षट्क्रोशं सा दृढान् दीर्घान् वृक्षान् पृष्ठतले गतान् ॥ ९
चूर्णीचकार वपुषा वज्राङ्गेण नृपेश्वर ।
वदन्तस्ते गोपगणा वीक्ष्य घोरं वपुर्महत् ॥ १०
अस्या अङ्गलिगो बालो न जीवति कदाचन ।
तस्या उरसि सानन्दं क्रीडन्तं सुस्मितं शिशुम् ॥ ११
दुग्धं पीत्वा जृम्भमाणं तं दृष्ट्वा जगृहुः स्त्रियः ।
यशोदया च रोहिण्या निधायोरसि विस्मिताः ॥ १२

सर्वतो बालकं नीत्वा रक्षां चक्रुर्विधानतः ।
कालिन्दीपुण्यमृत्तोयैर्गोपुच्छभ्रामणादिभिः ॥ १३
गोमूत्रगोरजोभिश्च स्नापयित्वा त्विदं जगुः ॥ १४

गोप्य ऊचुः

श्रीकृष्णस्ते शिरः पातु वैकुण्ठः कण्ठमेव हि ।
श्वेतद्वीपपतिः कर्णौ नासिकां यज्ञरूपधृक् ॥ १५
नृसिंहो नेत्रयुग्मञ्च जिह्वां दशरथात्मजः ।
अधराववतां ते तु नरनारायणावृषी ॥ १६
कपोलौ पातु ते साक्षात् सनकाद्याः कला हरेः ।
भालं ते श्वेतवाराहो नारदो भ्रूतलेऽवतु ॥ १७
चिबुकं कपिलः पातु दत्तात्रेय उरोऽवतु ।
स्कन्धौ द्वावृषभः पातु करौ मत्स्यः प्रपातु ते ॥ १८
दोर्दण्डं सततं रक्षेत् पृथुः पृथुलविक्रमः ।
उदरं कमठः पातु नाभिं धन्वन्तरिश्च ते ॥ १९
मोहिनी गुह्यदेशञ्च कटिं ते वामनोऽवतु ।
पृष्ठं परशुरामश्च तवोरू बादरायणः ॥ २०
बलो जानुद्वयं पातु जङ्घे बुद्धः प्रपातु ते ।
पादौ पातु सगुल्फौ च कल्किर्धर्मपतिः प्रभुः ॥ २१
सर्वरक्षाकरं दिव्यं श्रीकृष्णकवचं परम् ।
इदं भगवता दत्तं ब्रह्मणे नाभिपङ्कजे ॥ २२
ब्रह्मणा शम्भवे दत्तं शम्भुर्दुर्वाससे ददौ ।
दुर्वासाः श्रीयशोमत्यै प्रादाच्छ्रीनन्दमन्दिरे ॥ २३
अनेन रक्षां कृत्वास्य गोपीभिः श्रीयशोमती ।
पाययित्वा स्तनं दानं विप्रेभ्यः प्रददौ महत् ॥ २४
तदा नन्दादयो गोपा आगता मथुरापुरात् ।
दृष्ट्वा घोरां पूतनाख्यां बभूवुर्भयविह्वलाः ॥ २५

गर्ग उवाच

इत्येवं कथित दिव्य श्रीकृष्णचरित परम् ।
यः शृणोति नरो भक्त्या स कृतार्थो न संशयः ॥ १

शौनक उवाच

सुधाखण्डात्पर मिष्टं श्रीकृष्णचरित शुभम् ।
श्रुत्वा त्वन्मुखतः साक्षात् कृतार्थाः स्मो वयं मुने ॥ २
श्रीकृष्णभक्तः शान्तात्मा बहुलाश्वः सतां वरः ।
अतो मुनिं किं पप्रच्छ तन्मे ब्रूहि तपोधन ॥ ३

गर्ग उवाच

अथ राजा मैथिलेन्द्रो हर्षितः प्रेमविह्वलः ।
नारदं प्राह धर्मात्मा परिपूर्णतमं स्मरन् ॥ ४

बहुलाश्व उवाच

धन्योऽहञ्च कृतार्थोऽहं भवता भूरिकर्मणा ।
सङ्गो भगवदीयानां दुर्लभो दुर्घटोऽस्ति हि ॥ ५
श्रीकृष्णस्त्वर्भकः साक्षादद्भुतो भक्तवत्सलः ।
अग्रे चकार किं चित्रं चरित्रं वद मे मुने ॥ ६

नारद उवाच

साधु पृष्टं त्वया राजन् भवता कृष्णधर्मिणा ।
सङ्गमः खलु साधूनां सर्वेषां वितनोति शम् ॥ ७
एकदा कृष्णजन्मर्क्षे यशोदा नन्दगेहिनी ।
गोपीगोपान् समाहूय मङ्गलं चाकरोद् द्विजैः ॥ ८

रक्ताम्बरं कनकभूषणभूषिताङ्गं
बालं प्रगृह्य कलिताञ्जनपद्मनेत्रम् ।
श्यामं स्फुरद्धरिनखावृतचन्द्रहारं
देवान् प्रणम्य सुधनं प्रददौ द्विजेभ्यः ॥ ९

प्रेङ्खे निधाय निजमात्मजमाशु गोपी
सम्पूज्य मङ्गलदिने व्रजगोपिकास्ताः ।
नैवाशृणोत् सुरुदितस्य सुतस्य नादं
गोपेषु मङ्गलगृहेषु गतागतेषु ॥ १०

तत्रैव कसखलनोदित उत्कचाख्यो
दैत्य' प्रभञ्जनतनुः शकटं य एत्य ।
बालस्य मूर्ध्नि परिपातयितुं प्रवृत्तः
कृष्णोऽपि तं किल तताड पदारुणेन ॥ ११

चूर्णे गतेऽथ शकटे पतिते च दैत्ये
त्यक्त्वा प्रभञ्जनतनुं विमलो बभूव ।
नत्वा हरिं शतहयेन रथेन युक्तो
गोलोकधाम निजलोकमलं जगाम ॥ १२

नन्दादयो व्रजजना व्रजगोपिकाश्च
सर्वे समेत्य युगपत् पृथुकांस्तदाहुः ।
एष स्वयञ्च पतित' शकटः कथं हि
जानीथ हे व्रजसुताः सुगताश्च यूयम् ॥ १३

बाला ऊचु

प्रेङ्खस्थोऽयं क्षिपन् पादौ रुदन् दुग्धार्थमेव हि ।
तताड पादं शकटे तेनेदं पतितं खलु ॥ १४

नारद उवाच

श्रद्धां न चक्रुर्बालोक्ते गोपा गोप्यश्च विस्मिताः ।
त्रैमासिकः क्व बालोऽय क्व चैतद्भारभृत्त्वनः ॥ १५

बालमङ्के सङ्गृहीत्वा यशोदा ग्रहशङ्किता ।
कारयामास विधिवद् यज्ञं विप्रैः सुतर्पितैः ॥ १६

बहुलाश्व उवाच

कोऽयं पूर्वन्तु कुशली दैत्य उत्कचनामभाक् ।
अहो कृष्णपदस्पर्शाद् गतो मोक्षं महामुने ॥ १७

नारद उवाच

हिरण्याक्षसुतो दैत्य उत्कचो नाम मैथिल ।
लोमशस्याश्रमे गच्छन् वृक्षांश्चूर्णीचकार ह ॥ १८
तं दृष्ट्वा स्थूलदेहाढ्यमुत्कचाख्यं महाबलम् ।
शशाप रोषयुग् विप्रो विदेहो भव दुर्मते ॥ १९
सर्पकञ्चुकवद्देहोऽपतत् कर्मविपाकतः ।
सद्यस्तच्चरणोपान्ते पतित्वा प्राह दैत्यराट् ॥ २०

उत्कच उवाच

हे मुने हे कृपासिन्धो कृपां कुरु ममोपरि ।
त्वत्प्रभाव न जानामि वरं मे देहि हे प्रभो ॥ २१

नारद उवाच

तदा प्रसन्नः स मुनिर्दृष्टं येन शतं विधेः ।
सतां रोषोऽपि वरदो वरो मोक्षार्थद किमु ॥ २२

लोमश उवाच

वातदेहस्तु ते भूयाद् व्यतीते चाक्षुषेऽन्तरे
वैवस्वतान्तरे मुक्तिर्भविता च पदा हरेः ॥ २३

नारद उवाच

तस्मादुत्कचदैत्यस्तु मुक्तो लोमशतेजसा ।
तेभ्यस्तेभ्यो नमो ये वै समर्था वरशापयोः ॥ २४
उत्सङ्गे क्रीडितं बालं लालयन्त्येकदा नृप ।
गिरिभारं न सेहे तु वोढुं श्रीनन्दगेहिनी ॥ २५
अहो गिरिसमो बालः कथं स्यादिति विस्मिता ।
भूमौ निधाय तं सद्यो नेदं कस्मै जगाद ह ॥ २६

कंसप्रणोदितो दैत्यस्तृणावर्तो महाबल. ।
जहार बालं क्रीडन्तं वातावर्तेन सुन्दरम् ॥ २७
रजोऽन्धकारोऽभूत्तत्र घोरशब्दश्च गोकुले ।
रजस्वलानि चक्षूंषि बभूवुर्घटिकाद्वयम् ॥ २८
ततो यशोदा नापश्यत् पुत्रं तं मन्दिराजिरे ।
मोहिता रुदती घोषान् पश्यन्ती गृहशेखरान् ॥ २९
अदृष्टे च तदा पुत्रे पतिता भुवि मूर्च्छिता ।
उच्चैः रुरोद करुणं मृतवत्सा यथा हि गौः ॥ ३०
रुरुदुश्च तदा गोप्यः प्रेमस्नेहसमाकुलाः ।
अश्रुमुख्यो नन्दसूनुं पश्यन्त्यस्ता इतस्ततः ॥ ३१
तृणावर्तो नभः प्राप्त ऊर्ध्वं वै लक्षयोजनम् ।
स्कन्धे सुमेरुवद् बालं मन्यमान. प्रपीडितः ॥ ३२
अथ कृष्णं पातयितुं दैत्यस्तत्र समुद्यतः ।
गलं जग्राह तस्यापि परिपूर्णतमः स्वयम् ॥ ३३
मुञ्च मुञ्चेति गदिते दैत्ये कृष्णोऽद्भुतोऽर्भकः ।
गलग्राहेण महता व्यसुन् दैत्यञ्चकार ह ॥ ३४
तज्ज्योतिः श्रीघनश्यामे लीन सौदामिनी यथा ।
दैत्योऽम्बरान्निपतितः शिशुना सह भूतले ॥ ३५
विशीर्णावयवस्यापि पतितस्य स्वनेन वै ।
विनेदुश्च दिशः सर्वाः कम्पितं भूमिमण्डलम् ॥ ३६
तद्धृदिस्थं शिशुं तूर्णं रुदन्तो गोपिकास्ततः ।
ददृशुर्युगपत् सर्वा नीत्वा मात्रे ददुर्जगुः ॥ ३७

गोप्य ऊचुः

न योग्यासि यशोदे त्वं बालं लालयितुं मनाक् ।
न घृणा ते क्वचिद् दृष्टा क्रुद्धासि कथितेन वै ॥ ३८

प्राप्ते ऽन्धकारे स्वारोहात् कोऽपि बाल जहाति हि ।
त्वया निर्घृणया भूमौ धृतो बालो महाभये ॥ ३६

यशोदोवाच

न जानासि कथं बाले भारभूतो गिरीन्द्रवत् ।
तस्मान्मया कृतो भूमौ चक्रवाते समागते ॥ ४०

गोप्य ऊचु.

मा मृषा वद कल्याणि हे यशोदे गतव्यथे ।
अयं दुग्धमुखो बालो लघुः कुसुमतूलवत् ॥ ४१

नारद उवाच

तदा गोप्योऽथ गोपाश्च नन्दाद्या आगते शिशौ ।
अतीव मोदं सम्प्रापुर्वदन्तः कुशल जनैः ॥ ४२
यशोदा बालकं नीत्वा पाययित्वा स्तनं मुहु. ।
आघ्रायोरसि वस्त्रेण रोहिणी प्राह मोहिता ॥ ४३

यशोदोवाच

एको दैवेन दत्तोऽयं न पुत्रा बहवश्च मे ।
तस्यापि बहवोऽरिष्टा आगच्छन्ति क्षणे क्षणे ॥ ४४
अद्य मृत्युमुखान्मुक्तो भविष्यं किमतः परम् ।
किं करोमि क्व गच्छामि कुत्र वासो भवेदनु ॥ ४५
वज्रसाराश्च ये दैत्या निर्दया घोरदर्शनाः ।
वैरं कुर्वन्ति मे बाले दैव दैव कुतः सुखम् ॥ ४६
धन धान्यं गृहं सौधो रत्नानि विविधानि च ।
सर्वं जातं सुखं मे वै भूयान्मे कुशलो शिशुः ॥ ४७
हरेरर्चां दानमिष्ट पूर्तं देवालयं शतम् ।
करिष्यामि तदा बालोऽरिष्टेभ्यो विजयी यदा ॥ ४८
एकबालेन मे सौख्यमन्धयष्टिरिव प्रभुः ।
बालं नीत्वा गमिष्यामि देशे रोहिणि निर्भये ॥ ४६

नारद उवाच

तदैव विप्रा विद्वांस आगता नन्दमन्दिरे ।
यशोदया च नन्देन पूजिता आसनस्थिताः ।। ५०

ब्राह्मणा ऊचुः

मा शोकं कुरु हे नन्द हे यशोदे व्रजेश्वरि ।
करिष्यामः शिशो रक्षां चिरजीवी भवेदयम् ॥ ५१

नारद उवाच

इत्युक्त्वा द्विजमुख्यास्ते कुशाग्रैर्नवपल्लवैः ।।
पवित्रकलशैस्तोयैर्ऋग्यजुःसामजैः स्तवैः ।। ५२
परैः स्वस्त्ययनैर्यज्ञं कारयित्वा विधानतः ।
अग्निं सम्पूज्य विधिवद्रक्षां विदधिरे शिशोः ।। ५३

ब्राह्मणा ऊचुः

दामोदरः पातु पादौ जानुनी विष्टरश्रवाः ।
ऊरू पातु हरिर्नाभिं परिपूर्णतमः स्वयम् ॥ ५४
कटिं राधापतिः पातु पीतवासास्तवोदरम् ।
हृदयं पद्मनाभश्च भुजौ गोवर्द्धनोद्धरः ॥ ५५
मुखञ्च मथुरानाथो द्वारकेशः शिरोऽवतु ।
पृष्ठं पात्वसुरध्वंसी सर्वतो भगवान् स्वयम् ।। ५६
श्लोकत्रयमिदं स्तोत्रं यः पठेन्मानवः सदा ।
महासौख्यं भवेत्तस्य न भयं विद्यते क्वचित् ॥ ५७

नारद उवाच

नन्दस्तेभ्यो गवां लक्षं सुवर्णं दशलक्षकम् ।
सहस्रं नवरत्नानां वस्त्रलक्षं ददौ परम् ।। ५८
गतेषु द्विजमुख्येषु नन्दो गोपान्निमन्त्र्य च ।
भोजयामास सम्पूज्य वस्त्रैर्भूषैर्मनोहरैः ॥ ५९

बहुलाश्व उवाच

तृणावर्तः पूर्वकाले कोऽय सुकृतकृन्नरः ।
परिपूर्णतमे साक्षाच्छ्रीकृष्णे लीनतां गतः ॥६०

नारद उवाच

पाण्डुदेशोद्भवो राजा सहस्राक्षः प्रतापवान् ।
हरिभक्तो धर्मनिष्ठो यज्ञकृद्दानतत्परः ॥६१
रेवातटे महादिव्ये लतावेत्रसमाकुले ।
नारीणाञ्च सहस्रेण रमयन् विचचार ह ॥६२
दुर्वाससं मुनिं साक्षादागत न ननाम सः ।
तदा मुनिर्ददौ शाप राक्षसो भव दुर्मते ॥६३
पुनस्तदङ्घ्र्योः पतिते नृपे प्रादाद्वरं मुनिः ।
श्रीकृष्णविग्रहस्पर्शान्मुक्तिस्ते भविता नृप ॥६४

नारद उवाच

सोऽपि दुर्वाससः शापात्तृणावर्तोऽभवद्भुवि ।
श्रीकृष्णविग्रहस्पर्शात् परं मोक्षमवाप ह ॥६५

इति श्रीगर्गसंहितायां गोलोकखण्डे नारदबहुलाश्व-
संवादे शकटासुरतृणावर्तमोक्षोनाम
चतुर्दशोऽध्यायः ॥१४

नारद उवाच

प्रेङ्खे हरित्कनकरत्नमये शयानं
श्यामं शिशुं जनमनोहरमन्दहासम् ।
दृष्ट्यार्तिहारि मषिबिन्दुधरं यशोदा
स्वाङ्के चकार धृतकज्जलपद्मनेत्रम् ॥ १

पादं पिबन्तमतिचञ्चलमङ्गुताङ्गं
वक्रैर्विनीलनवकोमलकेशबन्धैः ।
श्रीमन्नृकेशरिनखस्फुरदर्द्धचन्द्रं
तं लालयन्त्यतिघृणं मुदमाप गोपी ॥ २

बालस्य पीतपयसो नृप जृम्भतो वै
तत्त्वानि चास्यवदने सकले विराजन् ।
माता सुरेन्द्रियमुखैः प्रयुतश्च सर्वं
दृष्ट्वा परं भयमवाप निमीलिताक्षी ॥३

राजन् परस्य परिपूर्णतमस्य साक्षात्
कृष्णस्य विश्वमखिलं कपटेन या हि ।
नष्टस्मृतिः पुनरभूत् स्वसुते घृणार्ता
किं वर्णयामि सुतपो बहु नन्दपत्न्याः ॥ ४

बहुलाश्व उवाच

नन्दो यशोदया सार्द्धं किं चकार तपो महत् ।
येन श्रीकृष्णचन्द्रोऽपि पुत्रीभूतो बभूव ह ॥ ५

नारद उवाच

अष्टानां वै वसूनाञ्च द्रोणो मुख्यो धरापतिः ।
अनपत्यो विष्णुभक्तो देवराज्यं चकार ह ॥ ६
एकदा पुत्रकाङ्क्षी च ब्रह्मणा नोदितो नृप ।
मन्दराद्रिं गतस्तप्तुं धरया भार्यया सह ॥ ७

कन्दमूलफलाहारौ ततः पर्णाशनौ ततः ।
जलभक्षौ ततस्तौ तु निर्जलौ निर्जने स्थितौ ॥ ८

वर्षाणामर्बुदे याते तपस्तप्तवतोर्द्वयोः ।
ब्रह्मा प्रसन्नस्तावेत्य वरं ब्रूहीत्युवाच ह ॥ ९

वल्मीकान्निर्गतो द्रोणो धरया भार्यया सह ।
नत्वा विधिञ्च सम्पूज्य हर्षितः प्राह तं प्रभुम् ॥१०

द्रोण उवाच

परिपूर्णतमे कृष्णे पुत्रीभूते जनार्दने ।
भक्तिः स्यादावयो र्यां वै वदन्ति प्रेमलक्षणाम् ॥११

ययाञ्जसा तरन्तीह दुस्तरं भवसागरम् ।
नान्यं वरं वाञ्छित स्यादावयोस्तपतोर्विधे ॥१२

ब्रह्मोवाच

युवाभ्यां याचितं यन्मे दुर्घटं दुर्लभं परम् ।
तथापि भूयात् सफलं युवयोरन्यजन्मनि ॥१३

नारद उवाच

द्रोणो नन्दोऽभवद्भूमौ यशोदा सा धरा स्मृता ।
कृष्णो ब्रह्मवचः कर्तुं प्राप्तो घोषे पितुः पुरात् ॥१४

सुधाखण्डात् परं मिष्ट श्रीकृष्णचरितं शुभम् ।
गन्धमादनशृङ्गे वै नारायणमुखाच्छ्रुतम् ॥१५

कृपया च कृतार्थोऽहं नरनारायणस्य च ।
मया तुभ्यञ्च कथित किं भूयः श्रोतुमिच्छसि ॥१६

बहुलाश्व उवाच

नन्दगेहे हरिः साक्षाच्छिशुरूपः सनातनः ।
किं चकार बलेनापि तन्मे ब्रूहि महामुने ॥१७

नारद उवाच

एकदा शिष्यसहितो गर्गाचार्यो महामुनिः ।
शौरिणा प्रेषितः साक्षादाययौ नन्दमन्दिरम् ॥१८

नन्दः सम्पूज्य विधिवत् पाद्याद्यैर्मुनिसत्तमम् ।
ततः प्रदक्षिणीकृत्य साष्टाङ्गं प्रणनाम ह ॥१९

नन्द उवाच

अद्य नः पितरो देवाः सन्तुष्टा अग्नयश्च नः ।
पवित्रं मन्दिर जातं युष्मच्चरणरेणुभिः ॥२०

मत्पुत्रनामकरणं कुरु द्विज महामुने ।
पुण्यैस्तीर्थैश्च दुष्प्राप्यं भवदागमनं प्रभो ॥२१

गर्ग उवाच

त्वत्पुत्रनामकरण करिष्यामि न संशयः ।
पूर्ववार्तां गदिष्यामि गच्छ नन्द रहः स्थलम् ॥२२

नारद उवाच

उत्थाप्य गर्गो नन्देन बालाभ्यां च यशोदया ।
एकान्ते गोव्रजे गत्वा तयोर्नाम चकार ह ॥२३

सम्पूज्य गणनाथादीन् ग्रहान् सशोध्य यत्नतः ।
नन्दं प्राह प्रसन्नाङ्गो गर्गाचार्यो महामुनिः ॥२४

गर्ग उवाच ।

रोहिणीनन्दनस्यास्य नामोच्चारं शृणुष्व तत् ।
रमन्ते योगिनो ह्यस्मिन् सर्वत्र रमतीति वा ॥२५

गुणैश्च रमयन् भक्तांस्तेन रामं विदुः परे ।
गर्भसङ्कर्षणादस्य सङ्कर्षण इति स्मृतः ॥२६

सर्वावशेषाद् यं शेषं बलाधिक्याद्बलं विदुः ।
त्वत्पुत्रस्यापि नामानि शृणु नन्द यतेह्यतः ॥२७

अघघ्नानि पवित्राणि जगतां मङ्गलानि च ।
ककारः कमलाकान्त ऋकारो राम इत्यपि ॥२८
षकारः षड्गुणपतिः श्वेतद्वीपनिवासकृत् ॥
णकारो नारसिंहोऽयमकारोह्यक्षरोऽग्निभुक् ॥२९
विसर्गश्च तथाह्यतौ नरनारायणावृषी ।
सम्प्रलीनाश्च षट्पूर्णा यस्मिञ्शुद्धे महात्मनि ॥ ३०
परिपूर्णतमे साक्षात्तेन कृष्णः प्रकीर्तितः ।
शुक्लो रक्तस्तथा पीतो वर्णोऽस्यानुयुगं धृतः ॥ ३१
द्वापरान्ते कलेरादौ बालोऽयं कृष्णतां गतः ।
तस्मात् कृष्ण इति ख्यातो नाम्नायं नन्दनन्दनः ॥ ३२
वसुशब्दाच्चेन्द्रियाणि तद्देवश्चित्तमेव हि ।
तस्मिन् यश्चेष्टते सोऽपि वासुदेव इति स्मृतः ॥ ३३
वृषभानुसुता राधा या जाता कीर्तिमन्दिरे ।
तस्याः पतिरयं साक्षात्तेन राधापतिः स्मृतः ॥ ३४
परिपूर्णतमः साक्षाच्छ्रीकृष्णो भगवान् स्वयम् ।
असङ्ख्यब्रह्माण्डपतिर्गोलोके धाम्नि राजते ॥ ३५
सोऽयं तव शिशुर्जातो भारावतरणाय च ।
कंसादीनां वधार्थाय भक्तानां रक्षणाय च ॥ ३६
अनन्तान्यस्य नामानि वेदगुह्यानि सत्पते ।
लीलाभिश्च भविष्यन्ति वत्कर्मसु न विस्मयः ॥ ३७
अहो भाग्यन्तु ते नन्द साक्षाच्छ्रीपुरुषोत्तमः ।
त्वद्गृहे वर्तमानोऽयं शिशुरूपः परात्परः ॥ ३८

नारद उवाच

इत्युक्त्वाथ गते गर्गे स्वात्मानं पूर्णमाशिषाम् ।
मेने प्रमुदितः पत्न्या नन्दराजो महामतिः ॥ ३९

अथ गर्गो ज्ञानिवरो ज्ञानदो मुनिसत्तम. ।
कालिन्दीतीरशोभाढ्यं वृषभानुपुरं गतः ॥ ४०
छत्रेण शोभित विप्रं द्वितीयमिव वासवम् ।
दण्डेन राजित साक्षाद्धर्मराजमिव स्थितम् ॥ ४१
तेजसा द्योतितदिशं साक्षात् सूर्यमिवापरम् ।
पुस्तकीमेखलायुक्तं द्वितीयमिव पद्मजम् ॥ ४२
शोभितं शुक्लवासोभिर्देव विष्णुमिव स्थितम् ।
तं दृष्ट्वा मुनिशार्दूलं सहसोत्थाय सादरम् ॥ ४३
प्रणम्य शिरसा सद्यः सम्मुखोऽभूत् कृताञ्जलिः ।
मुनिञ्च पीठके स्थाप्य पाद्यार्घैरुपचारवित् ॥ ४४
पूजयामास विधिवच्छ्रीगर्गं ज्ञानिनां वरम् ।
ततः प्रदक्षिणीकृत्य वृषभानुवरो महान् ॥ ४५

वृषभानुरुवाच

सतां पर्य्यटनं धन्यं गृहीणां शान्तये स्मृतम् ।
नृणामन्तस्तमोहारी साधुरेव न भास्करः ॥ ४६
तीर्थीभूता वयं गोपा जातास्त्वद्दर्शनात् प्रभो ।
तीर्थानि तीर्थीकुर्वन्ति त्वादृशाः साधवः क्षितौ ॥ ४७
हे मुने राधिका नाम कन्या मे मङ्गलायना ।
कस्मै वराय दातव्या वद त्वं मे सुनिश्चितम् ॥ ४८
त्वं पर्य्यटन्नर्क इव त्रिलोकी दिव्यदर्शनः ।
वदानया समो यो वै तस्मै दास्यामि कन्यकाम् ॥ ४९

नारद उवाच

हस्तं गृहीत्वा श्रीगर्गो वृषभानोर्मुदा मुनिः ।
जगाम यमुनातीरं निर्जनं सुन्दरस्थलम् ॥ ५०
कालिन्दीजलकल्लोलकोलाहलसमाकुलम् ।
तत्रोपविश्य गोपेशं मुनीन्द्रः प्राह धर्मवित् ॥ ५१

गर्ग उवाच

हे गोप गुप्तमाख्यानं कथनीयं न च त्वया ।
परिपूर्णतमः साक्षाच्छ्रीकृष्णो भगवान् स्वयम् ॥ ५२
असङ्ख्यब्रह्माण्डपतिर्गोलोकेशः परात्परः ।
तस्मात् परो वरो नास्ति जातो नन्दगृहे शिशुः ॥ ५३

वृषभानुरुवाच

अहो भाग्यमहो भाग्यं नन्दस्यापि महामुने ।
श्रीकृष्णस्यावतारस्य सर्वं त्वं वद कारणम् ॥ ५४

गर्ग उवाच

भुवो भारावताराय कंसादीनां वधाय च ।
ब्रह्मणा प्रार्थितः कृष्णो बभूव जगती तले ॥ ५५
श्रीकृष्णपट्टराज्ञी या गोलोके राधिकाभिधा ।
त्वद्गृहे सापि सञ्जाता त्वं न जानासि तां पराम् ॥ ५६

नारद उवाच

तदा प्रहर्षितो गोपो वृषभानुः सविस्मितः ।
कलावतीं समाहूय तया सार्द्धं विचार्य च ॥ ५७
राधाकृष्णानुभावञ्च ज्ञात्वा गोपवरः परः ।
आनन्दाश्रुकलां मुञ्चन् पुनराह महामुनिम् ॥ ५८

वृषभानुरुवाच

तस्मै दास्यामि हे ब्रह्मन् कन्यां कमललोचनाम् ।
त्वया पन्था दर्शितो मे त्वं कारय तदुद्वहम् ॥ ५९

गर्ग उवाच

अहं न कारयिष्यामि विवाहमनयोर्नृप ।
तयोर्विवाहो भविता भाण्डीरे यमुनातटे ॥ ६०
वृन्दावनसमीपे च निर्जने सुन्दरस्थले ।
परमेष्ठी समागत्य विवाहं कारयिष्यति ॥ ६१

तस्माद्राधां गोपवर विद्ध्यर्धाङ्गीं परस्य च ।
लोकचूडामणेः साक्षाद्राज्ञीं गोलोकमन्दिरे ॥ ६२
यूयं सर्वेऽपि गोपाला गोलोकादागता भुवि ।
तथा गोपीगणा गावो गोलोके राधिकेच्छया ॥ ६३

यद्दर्शनं दुर्लभमेव दुर्घटं
वेदैश्च यज्ञैर्नरजन्मभिः किमु ।
सविग्रहां तां तव मन्दिराजिरे
लक्षन्ति गुप्तां बहुगोपगोपिका ॥ ६४

नारद उवाच

तदातिविस्मितौ राजन् दम्पती हर्षितौ परम् ।
राधाकृष्णप्रभावं तं श्रुत्वा श्रीगर्गमूचतुः ॥ ६५

दम्पती ऊचतुः

राधाशब्दस्य हे ब्रह्मन् व्याख्यानं वद तत्त्वतः ।
त्वत्तो न संशयच्छेत्ता कोऽपि भूमौ महामुने ॥ ६६

गर्ग उवाच

सामवेदस्य भावार्थो गन्धमादनपर्वते ।
शिष्येणापि मया तत्र नारायणमुखाच्छ्रुतः ॥ ६७
रमया तु रकारः स्यादाकारस्त्वादिगोपिका ।
धकारो धरया च स्यादाकारो विरजा नदी ॥ ६८
श्रीकृष्णस्य परस्यापि चतुर्द्धा तेजसोऽभवत् ।
लीला भूः श्रीश्च विरजा चतस्रः पत्न्य एव हि ॥ ६९
सम्प्रलीनाश्च ताः सर्वा राधायां कुञ्जमन्दिरे ।
परिपूर्णतमां राधां तस्मादाहुर्मनीषिणः ॥ ७०
राधाकृष्णेति हे गोप ये जपन्ति पुनःपुनः ।
चतुःपदार्थं किं तेषां साक्षात् कृष्णोऽपि लभ्यते ॥ ७१

नारद उवाच

तदातिविस्मितो राजन् वृषभानुः प्रियायुतः ।
राधाकृष्णप्रभावं तं ज्ञात्वानन्दमयोह्यभूत् ॥ ७२

इत्थं गर्गो ज्ञानिवरः पूजितो वृषभानुना ।
जगाम स्वगृहं साक्षान्मुनीन्द्रः सर्ववित् कविः ॥ ७३

इति श्रीगर्गसंहितायां गोलोकखण्डे नारदबहुलाश्वसंवादे
नन्दपत्न्याविश्वरूपदर्शनश्रीकृष्णनामकरणं नाम
पञ्चदशोऽध्यायः ॥ १५

नारद उवाच

गाश्चारयन् नन्दनमङ्कदेशे
संलालयन् दूरतरं सकाशात् ।
कलिन्दजातीरसमीरकम्पितं
नन्दोऽथ भाण्डीरवनं जगाम ॥ १

कृष्णेच्छया वेगतरोऽथवातो
घनैरभून्मेदुरमम्बरञ्च ।
तमालनीपद्रुमपल्लवैश्च
पतद्भिरेजद्भिरतीव भाः कौ ॥ २

तदान्धकारे महति प्रजाते
बाले रुदत्यङ्कगतेऽतिभीते ।
नन्दो भयं प्राप शिशुं स बिभ्र-
द्धरिं परेशं शरणं जगाम ॥ ३

तदैव कोट्यर्कसमूहदीप्ति-
रागच्छतो वालतेव साशु ।
बभूव राजन् वृषभानुपुत्री
ददर्श राधां किल नन्दराजः ॥ ४

कोटीन्दुबिम्बद्युतिमादधानां
नीलाम्बरां सुन्दरगौरवर्णाम् ।
मञ्जीरधीरध्वनिनूपुराणा-
माबिभ्रतीं शब्दमतीव मञ्जुम् ॥ ५

काञ्चीकलाकङ्कणशब्दमिश्रां
हाराङ्गुलीयाङ्गदविस्फुरन्तीम् ।
श्रीनासिकामौक्तिकहेमबिन्दुं
श्रीकण्ठचूडामणिकुण्डलाढ्याम् ॥ ६

तत्तेजसा धर्षित आशु नन्दो
नत्वाथ तामाह कृताञ्जलिः सन्।
अयन्तु साक्षात् पुरुषोत्तमस्त्वं
प्रियास्य मुख्यासि सदैव राधे ॥ ७

गुप्तं त्विदं गर्गमुखेन वेद्मि
गृहाण राधे निजनाथमङ्कात्।
एनं गृहं प्रापय मेघभीत
वदामि चेत्थं प्रकृतेगु णाढ्यः ॥८

नमामि तुभ्य भुवि रक्ष मां त्वं
कृष्णप्रियासि प्रकृतेः परा त्वम्।
श्रुत्वा वचस्तस्य तदैव राधा
चन्द्रावली गोपपतिं तमाह ॥ ९

राधोवाच

वरं परं ब्रूहि महामते त्वं
यथेप्सितं सर्वजनैर्दुरापम्।
अहं प्रसन्ना तव भक्तिभावान्
मद्दर्शनं दुर्लभमेव नन्द ॥१०

नन्द उवाच

यदि प्रसन्नासि तदा भवेन्मे
भक्तिर्दृढा कौ युवयो. पदाब्जे।
सताञ्च भक्तिस्तव भक्तिभाजां
सङ्गः सदा मेऽथ युगे युगे च ॥ ११

नारद उवाच

तथास्तु चोक्त्वाथ हरिं कराभ्यां
जग्राह राधा निजनाथमङ्कात्।
गतेऽथ नन्दे प्रणते व्रजेशे
तदा हि भाण्डीरवनं जगाम ॥१२

गोलोकलोकाच्च पुरा समागता
भूमिर्निजं स्वं वपुरादधाना।
या पद्मरागादिखचित्सुवर्णा
बभूव सा तत्क्षणमेव सर्वा ॥१३

वृन्दावनं दिव्यवपुर्दधार
वृक्षैर्वरैः कामदुघैस्सहैव ।
कलिन्दपुत्री च सुवर्णसौधैः
श्रीरत्नसोपानमयी बभूव ॥१४

गोवर्द्धनो रत्नशिलामयोऽभूत्
सुवर्णशृङ्गैः परितः स्फुरद्भिः।
मत्तालिभिर्निर्झरसुन्दरीभि
र्दरीभिरुच्चाङ्गकरीव राजन् ॥ १५

तदा निकुञ्जोऽपि निजं वपुर्दधत्
सभायुतं प्राङ्गणदिव्यमण्डपम् ।
वसन्तमाधुर्यधरं मधुव्रतै-
र्मयूरपारावतकोकिलध्वनि ॥१६

सुवर्णरत्नादिखचित्पटैर्वृतं
पतत्पताकावलिभिर्विराजितम्।
सरः स्फुरद्भिर्भ्रमरावलीढितै
र्विराजितं काञ्चनपङ्कजैः शुभैः ॥१७

तदैव साक्षात् पुरुषोत्तमोत्तमो
बभूव कैशोरवपुर्घनप्रभः ।
पीताम्बरः कौस्तुभरत्नभूषणो
वंशीधरो मन्मथराशिमोहनः ॥१८

भुजेन सङ्गृह्य हसन् प्रियां हरि-
र्जगाम मध्ये सुविवाहमण्डपम् ।
विवाहसम्भारयुत समेखलं
सुदर्भ सद्वारि घटादिमण्डपम् ॥१६

तत्रैव सिंहासन उन्नते वरे
परस्परं सम्मिलितौ विरेजतुः ।
परं ब्रुवन्तौ मधुरञ्च दम्पती
स्फुरत्प्रभौ खे च तडिद्घनाविव ॥२०

तदाम्बराद्देववरो विधिः प्रभुः
समागतस्तस्य परस्य सम्मुखे ।
नत्वा तदङ्घ्री उशती गिराभिः
कृताञ्जलिश्चारु चतुर्मुखो जगौ ॥२१

ब्रह्मोवाच

अनादिमाद्यं पुरुषोत्तमोत्तमं
श्रीकृष्णचन्द्रं निजभक्तवत्सलम् ।
स्वयन्त्वसङ्ख्याण्डपतिं परात्परं
राधापतिं त्वां शरणं व्रजाम्यहम् ॥२२

गोलोकनाथस्त्वमतीवलीलो
लीलावतीयं निजलोकलीला ।
वैकुण्ठनाथोऽसि यदा त्वमेव
लक्ष्मीस्तदेयं वृषभानुजा हि ॥ २३

त्वं रामचन्द्रो जनकात्मजेयम्
भूमौ हरिस्त्वं कमलालयेयम् ।
यज्ञावतारोऽसि यदा तदेयं
श्रीदक्षिणास्ति प्रतिपत्निमुख्या ॥२४

त्वं नारसिंहोऽसि रमा तदेयं
नारायणस्त्वं हि नरेणयुक्तः।
तदा त्वियं शान्तिरतीव साक्षात्
श्रीरेव या चैव तवानुरूपा ॥२५

त्वं ब्रह्म चेयं प्रकृतिस्तटस्था
कालो यदेमाश्च विदुः प्रधानम्।
महान् यदा त्वं जगदङ्कुरोऽसि
राधा तदेयं सगुणा च माया ॥२६

यदान्तरात्मा विततश्चतुर्भि-
स्तदा त्वियं लक्षणरूपवृत्तिः।
यदा विराड्देहधरस्त्वमेव
तदाखिलं वा भुवि धारणेयम् ॥ २७

श्यामञ्च गौरं विदितं द्विधा मह-
स्तवैव साक्षात् पुरुषोत्तमोत्तम।
गोलोकधामाधिपतिं परात्परं
राधापतिं त्वां शरणं व्रजाम्यहम् ॥२८

सदा पठेद् यो युगलस्तवं परं
गोलोकधामप्रवरं प्रयाति सः।
इहैव सौन्दर्यसमृद्धिसिद्धयो
भवन्ति तस्यापि निसर्गतः पुनः ॥२९

सदा युवां प्रीतियुतौ च दम्पती
परात्परौ तावनुरूपरूपितौ।
तथापि लोकव्यवहारसङ्ग्रहात्
विधिं विवाहस्य तु कारयाम्यहम् ॥३०

नारद उवाच

तदा स उत्थाय विधिर्हुताशनं
प्रज्वाल्य कुण्डे स्थितयोस्तयोः पुरः ।
श्रुतेः करग्राहविधिं विधानतो
विधाय धाता समवस्थितोऽभवत् ॥३१

स कारयामास हरिश्च राधिकां
प्रदक्षिणाः सप्त हिरण्यरेतसः ।
ततश्च तौ तं प्रणमय्य वेदवित्
तौ पाठयामास च सप्त मन्त्रकम् ॥३२

ततो हरेर्वक्षसि राधिकाया
करञ्च संस्थाप्य हरेः करं पुनः ।
श्रीराधिकाया. किल पृष्ठदेशके
संस्थाप्य मन्त्रांश्च विधिः प्रपाठयत् ॥३३

राधा कराभ्यां प्रददौ च मालिकां
किञ्जल्किनीं कृष्णगलेऽलिनादिनीम् ।
हरेः कराभ्यां वृषभानुजागले
ततश्च वह्निं प्रणमय्य वेदवित् ॥३४

संवासयामास सुपीठयोश्च तौ
कृताञ्जली मौनयुतौ पितामहः ।
तौ पाठयामास तु पञ्च मन्त्रकं
समर्प्य राधाञ्च पितेव कन्यकाम् ॥३५

पुष्पाणि देवा ववृषुस्तदा नृप
विद्याधरीभिर्ननृतुः सुराङ्गनाः ।
गन्धर्वविद्याधरचारणाः किल
सकिन्नराः कृष्णसुमङ्गलं जगुः ॥३६

मृदङ्गवीणामुरजास्तु वेणवः
शङ्खानकादुन्दुभयः सतालकाः ।
नेदुर्मुहुर्देववरैर्दिविस्थितै-
र्जयेत्यभून्मङ्गलशब्दमुच्चकैः ॥३७

उवाच तत्रैव विधिं हरिः स्वयं
यथेप्सितां त्वं वद विप्र दक्षिणाम् ।
तदा हरिं प्राह विधिः प्रभो मे
देहि त्वदङ्घ्र्योर्निजभक्तिदक्षिणाम् ॥३८

तथास्तु वाक्यं वदतो विधिर्हरेः
श्रीराधिकायाश्च पदद्वयं शुभम्
नत्वा कराभ्यां शिरसा पुनःपुन-
र्जगाम गेहं प्रणतः प्रहर्षितः ॥ ३९

ततो निकुञ्जेषु चतुर्विधान्न
दिव्यं मनोज्ञं प्रियया प्रदत्तम् ।
जघास कृष्णः प्रहसन् परात्मा
कृष्णेन दत्तं क्रमुकञ्च राधा ॥ ४०

ततः करेणापि करं प्रियायाः
हरिर्गृहीत्वा प्रचलन्निकुञ्जे ।
जगाम जल्पन् मधुरं प्रपश्यन्
वृन्दावनं श्रीयमुनां लताश्च ॥ ४१

श्रीमल्लताकुञ्जनिकुञ्जमध्ये
निलीयमानं प्रहसन्तमेव ।
विलोक्य शाखान्तरितञ्च राधा
जग्राह पीताम्बरमाव्रजन्ती ॥ ४२

दुद्राव राधा हरिहस्तपद्माज्
भृङ्गारभङ्गैः प्रतिकुर्वती कौ।
निलीयमाना यमुनानिकुञ्जे
पुनर्व्रजन्ती हरिहस्तमात्रात्॥ ४३

यथा तमालः कलधौतवल्या
घनो यथा चञ्चलया चकास्ति।
नीलाद्रिराजो निकषाश्मखन्या
श्रीराधयायन्तु तथा रमण्या॥ ४४

श्रीरासरङ्गे जनवर्जिते परे
रेमे हरी रासरसेन राधया।
वृन्दावने भृङ्गमयूरकोकिलै-
र्वृते चरत्येव रतीश्वरः परः॥४५

श्रीराधया कृष्णहरिः परात्मा
ननर्त गोवर्द्धनकन्दरासु।
मत्तालिषु प्रस्रवणैः सरोभि-
र्विराजितासु द्युतिमल्लतासु॥४६

चकार कृष्णो यमुनां समेत्य
वारां विहारं वृषभानुपुत्र्या।
राधाकराल्लक्षदलं हि पद्मं
धावन् गृहीत्वा यमुनाजलेषु॥ ४७

राधा हरेः पीतपटञ्च वंशीं
वेत्रं गृहीत्वा सहसा हसन्ती।
देहीति वंशीं वदतो हरेश्च
जगाद राधा कमलं नु देहि॥४८

तस्यै ददौ देववरोऽथ पद्म
राधा ददौ पीतपटञ्च वशीम् ।
वेत्रञ्च तस्मै हरये तयोः पुन-
र्बभूव लीला यमुनातटेषु ॥ ४६

ततश्च भाण्डीरवने प्रियाया-
श्चकार शृङ्गारमलं मनोज्ञम् ।
पत्रावलीयावककज्जलाद्यैः
पुष्पैः सुरत्नैर्व्रजगोपरत्नः ॥ ५०

हरेश्च शृङ्गारमल प्रकर्त्तु
समुद्यता तत्र यदा हि राधा ।
तदैव कृष्णस्तु बभूव बालो
विहाय कैशोरवपुः स्वयं हि ॥५१

नन्देन दत्तं शिशुमेव यादृश
भूमौ लुठन्त प्ररुदन्तमाययौ ।
हरिं विलोक्याशु रुरोद राधिका
तनोषि मायां नु कथं हरे मयि ॥ ५२

इत्थं रुदन्ती सहसा विषण्णा-
माकाशवागाह तदैव राधाम् ।
शोचं नु राधे इह मा कुरु त्वं
मनोरथस्ते भविता हि पश्चात् ॥ ५३

श्रुत्वाथ राधा हि हरिं गृहीत्वा
गत्वाथ गेहे व्रजनन्दपत्न्याः ।
दत्वा च बालं किल नन्दपत्न्या
उवाच दत्त पथि ते च भर्त्रा ॥ ५४

उवाच राधां नृप नन्दगेहिनी
धन्यासि राधे वृषभानुकन्यके ।
त्वया शिशुर्मे परिरक्षितो भयान्
मेघावृते व्योम्नि भयातुरो वने ॥ ५५

सम्पूजिता श्लाघितसद्गुणा सा
सुनन्दिता श्रीवृषभानुपुत्री ।
तदाह्यनुज्ञाप्य यशोमतीं सा
शनैः स्वगेहं निजमाजगाम ॥ ५६

इत्थं हरेर्गुप्तकथा च वर्णिता
राधाविवाहस्य सुमङ्गलावृता ।
श्रुता च यैर्वा पठिता च पाठिता
तान् पापवृन्दा न कदा स्पृशन्ति ॥ ५७

इति श्रीगर्गसंहितायां गोलोकखण्डे नारदबहुलाश्व-
संवादे श्रीराधिकाविवाहवर्णनं नाम
षोडशोऽध्यायः ॥ १६

नारद उवाच

अथ बालौ रामकृष्णौ गौरश्यामौ मनोहरौ ।
लीलया चक्रतुरलं सुन्दरं नन्दमन्दिरम् ॥ १
रिङ्गमाणौ च जानुभ्यां पाणिभ्यां सह मैथिल ।
व्रजताल्पेन कालेन ब्रुवन्तौ मधुरं व्रजे ॥ २
यशोदया च रोहिण्या लालितौ पोषितौ शिशू ।
कदापि निर्गतावङ्कात् क्वचिदङ्कं समाश्रितौ ॥ ३
मञ्जीरकिङ्किणीराव कुर्वन्तौ तावितस्ततः ।
त्रिलोकीं मोहयन्तौ द्वौ मायाबालकविग्रहौ ॥ ४

क्रीडन्तमादाय शिशुं यशोदा-
जिरे लुठन्तं व्रजबालकैश्च ।
तद्धूलिलेपावृतधूसराङ्गं
चक्रे ह्यलं प्रोक्षणमादरेण ॥ ५

जानुद्वयाभ्यां प्रसभं कराभ्यां
पुनर्व्रजन् प्राङ्गणमेत्य कृष्णः ।
मात्रङ्कदेशे पुनराव्रजन् सन्
बभौ व्रजे केसरिबाललीलः ॥ ६

तं सर्वतो हैमनचित्रयुक्त
पीताम्बरं कञ्चुकमादधानम् ।
स्फुरत्प्रभं रत्नमयञ्च मौलिं
दृष्ट्वा सुतं प्राप मुदं यशोदा ॥ ७

बालं मुकुन्दमतिसुन्दरबालकेलिं
दृष्ट्वा परं मुदमवापुरतीव गोप्यः ।
श्रीनन्दराजगृहमेत्य गृह विहाय
सर्वास्तु विस्मृतगृहाः सुखविग्रहास्ताः ॥ ८

श्रीनन्दराजगृहकृत्रिमसिंहरूपं
दृष्ट्वा व्रजन् प्रतिरवन् नृप भीरुवद् यः ।
नीत्वा च तन्निजसुतं गृहमाव्रजन्तीं
गोप्यो व्रजे सघृणया ह्यवदन् यशोदाम् ॥ ६

गोप्य ऊचुः

क्रीडार्थं चपल ह्यं न मा बहिः कार्याङ्गणात् ।
बालकेलिं दुग्धमुखं काकपक्षधरं शुभे ॥ १०
ऊर्ध्वदन्तद्वयं जातं पूर्वमातुलदोषदम् ।
अस्यापि मातुलो नास्ति ते सुतस्य यशोमति ॥ ११
तस्माद्दानन्तु कर्तव्यं विघ्नानां नाशहेतवे ।
गोविप्रसुरसाधूनां छन्दसां पूजन तथा ॥ १२

नारद उवाच

तदा यशोदारोहिण्यौ सुतकल्याणहेतवे ।
वस्त्ररत्नवान्नानां दानं नित्यञ्च चक्रतुः ॥ १३
अथ व्रजे रामकृष्णौ बालसिंहावलोकनौ ।
पद्भ्यां चलन्तौ घोषेषु वर्द्धमानौ बभूवतुः ॥ १४
श्रीदामसुबलाद्यैश्च वयस्यैरुपनन्दजैः ।
यमुनासैकते शुभ्रे लुठन्तौ सकुतूहलौ ॥ १५
कालिन्द्युपवने श्यामैस्तमालैः सघनैर्वृते ।
कदम्बकुञ्जशोभाढ्ये चरन्तौ रामकेशवौ ॥ १६
जनयन् गोपगोपीनामानन्दं बाललीलया ।
वयस्यैश्चोरयामास नवनीतं घृतं हरिः ॥ १७
एकदा ह्युपनन्दस्य पत्नी नाम्ना प्रभावती ।
श्रीनन्दमन्दिरं प्राप्ता यशोदां प्राह गोपिका ॥ १८

प्रभावत्युवाच

नवनीतं घृतं दुग्धं दधि तक्रं यशोमति ।
आवयोर्भेदरहितं त्वत्प्रसादाच्च मेऽभवत् ॥ १९
नाहं वदामि बालेन स्तेय कुत्रापि शिक्षितम् ।
शिक्षां करोषि न सुते नवनीतमुषि स्वतः ॥ २०
यदा मया कृता शिक्षा तदा धृष्टस्तवाङ्गजः ।
गालिप्रदानं कृत्वायं द्रवति प्राङ्गणान् मम ॥ २१
व्रजाधीशस्य पुत्रोऽयं भूत्वा स्तेयं समाचरेत् ।
न मया कथितं किञ्चिद् यशोदे तव गौरवात् ॥ २२

नारद उवाच

श्रुत्वा प्रभावती वाक्यं यशोदा नन्दगेहिनी ।
बालं निर्भर्त्स्य तामाह साम्ना प्रेमपरायणा ॥ २३

यशोदोवाच

गवां कोटिगृहे मेऽस्ति गोरसैराद्रिताचला ।
न जाने दधिमुड् बालो नास्ति सोऽत्र कदाचन ॥ २४
अनेन मुषितं गव्यं तत्समं त्व गृहाण मे ।
ते शिशोर्मे शिशोर्भेदो नास्ति किञ्चित् प्रभावति ॥ २५
नवनीतमुखश्चैनं मे बालं ह्यानयिष्यसि ।
तदा शिक्षां करिष्यामि भर्त्सनं बन्धनं तथा ॥ २६

नारद उवाच

श्रुत्वा वाक्यं तदा गोपी प्रसन्ना गृहमागता ।
एकदा दधिचौर्यार्थं कृष्णस्तस्या गृहं गतः ॥ २७
वयस्यैर्बालकैः सार्द्धं पार्श्वकुड्ये गृहस्य च ।
हस्ताद्धस्तं सङ्गृहीत्वा शनैः कृष्णो विवेश ह ॥ २८
शिक्यस्थं गोरसं दृष्ट्वा हस्ताग्राह्यं हरिः स्वयम् ।
उलूखलं पीठकञ्च गोपान् स्थाप्यारुरोह तम् ॥ २९

तदापि प्रांशुना लभ्य गोरसं शिक्यसंस्थितम् ।
श्रीदाम्ना सुबलेनापि दण्डेनापि तताड च ॥ ३०

भग्नभाण्डात् सर्वगव्यं वहद्भूमौ मनोहरम् ।
जघास सबलो मर्कैर्बालकैः सह माधवः ॥ ३१

भग्नभाण्डस्वनं श्रुत्वा प्राप्ता गोपी प्रभावती ।
पलायितेषु बालेषु जग्राह श्रीकरं हरेः ॥ ३२

नीत्वा मृषाश्रुं भीरुश्च गच्छन्ती नन्दमन्दिरम् ।
अग्रे नन्दं स्थितं दृष्ट्वा मुखे वस्त्रं चकार ह ॥ ३३

हरिर्विचिन्तयन्नित्थं माता दण्डं प्रदास्यति ।
दधार तद्बालरूपं स्वच्छन्दगतिरीश्वरः ॥ ३४

सा यशोदां समेत्याशु प्राह गोपी रुषान्विता ।
भाण्डं भग्नंकृतं सर्वं मुषितं दध्यनेन वै ॥ ३५

यशोदा तत्सुतं वीक्ष्य हसन्ती प्राह गोपिकाम् ।
वस्त्रान्तञ्च मुखाद् गोपी दूरीकृत्य वदांहसः ॥ ३६

अपवादो यदा देयो निर्वासं कुरु मे पुरात् ।
युष्मत्पुत्रकृतं चौर्यमस्मत्पुत्रकृतं भवेत् ॥ ३७

जनलज्जा समायुक्ता दूरीकृत्य मुखाम्बरम् ।
सापि प्राह निजं बालं वीक्ष्य विस्मितमानसा ॥ ३८

निष्पदस्त्वं कुतः प्राप्तो वजूसारोऽस्ति मे करे ।
वदन्तीत्थञ्च तं नीत्वा निर्गता नन्दमन्दिरात् ॥ ३९

यशोदा रोहिणी नन्दो रामो गोपाश्च गोपिकाः ।
जहसुः कथयन्तस्ते दृष्टान्यायो व्रजे महान् ॥ ४०

भगवांस्तु बहिर्वीथ्यां भूत्वा श्रीनन्दनन्दनः ।
प्रहसन् गोपिकां प्राह धृष्टाङ्गश्चञ्चलेक्षणः ॥ ४१

भगवानुवाच

पुनर्मां यदि गृह्णासि कदाचित्त्वं हि गोपिके ।
ते भर्तृरूपन्तु तदा भविष्यामि न संशयः ॥ ४२

नारद उवाच

श्रुत्वा सा विस्मिता गोपी गता गेहेऽथ मैथिल ।
तदा सर्वा व्रजे गोप्यो न गृह्णन्ति हरिं ह्रिया ॥ ४३

इति श्रीगर्गसंहितायां गोलोकखण्डे नारदबहुलाश्व-
संवादे दधिस्तेयवर्णनं नाम
सप्तदशोऽध्यायः ॥ १७

नारद उवाच

गोपीगृहेषु विचरन्नवनीतचौरः
श्यामो मनोहरवपुर्नवकञ्जनेत्रः ।
श्रीबालचन्द्र इव वृद्धिगतो नराणां
चित्तं हरन्निव बलेन चकार शोभाम् ॥ १
श्रीनन्दनन्दनमतीव चलं गृहीत्वा
गेहं निधाय मुमुहुर्नवनन्दगोपाः ।
सत्कन्दुकैश्च सततं परिपालयन्तो
गायन्त ऊर्जितसुखा न जगत् स्मरन्तः ॥ २

राजोवाच

नवोपनन्दनामानि वद देव ऋषे मम ।
अहोभाग्यन्तु येषां वै ते पूर्वं क इहागताः ॥ ३
तथा षड् वृषभानूनां कर्माणि मङ्गलानि च ।

नारद उवाच

गयश्च विमलः श्रीशः श्रीधरो मङ्गलायनः ॥ ४
मङ्गलो रङ्गवल्लीशो रङ्गोजिर्देवनायकः ।
नवनन्दाश्च कथिता बभूवुर्गोकुले व्रजे ॥ ५
वीतहोत्रोऽग्निभुक् शाम्बः श्रीकरो गोपतिः श्रुतः ।
व्रजेशः पावनः शान्त उपनन्दाः प्रकीर्तिताः ॥ ६
नीतिविन् मार्गदः शुक्लः पतङ्गो दिव्यवाहनः ।
गोपेष्टश्च व्रजे राजन् जाताः षड् वृषभानवः ॥ ७
गोलोके कृष्णचन्द्रस्य निकुञ्जद्वारमाश्रिताः ।
वेत्रहस्ताः श्यामलाङ्गा नवनन्दाश्च ते स्मृताः ॥ ८

निकुञ्जे कोटिशो गावस्तासां पालनतत्पराः ।
वंशीमयूरपक्षाढ्या उपनन्दाश्च ते स्मृताः ॥ ६
निकुञ्जदुर्गरक्षायां दण्डपाशधराः स्थिताः ।
षड्द्वारमास्थिताः षड् वै कथिता वृषभानवः ॥ १०
श्रीकृष्णस्येच्छया सर्वे गोलोकादागता भुवि ।
तेषां प्रभावं वक्तुं हि न समर्थश्चतुर्मुखः ॥ ११
अहं किमु वदिष्यामि तेषां भाग्यं महोदयम् ।
येषामारोहमास्थाय बालकेलिर्बभौ हरिः ॥ १२
एकदा यमुनातीरे मृत् कृष्णेनावलीढिता ।
यशोदां बालकाः प्राहुरत्ति बालो मृद तव ॥ १३
बलभद्रे च वदति तदा सा नन्दगेहिनी ।
करे गृहीत्वा स्वसुतं भीरुनेत्रमुवाच ह ॥ १४

यशोदोवाच

कस्मान्मृदं भक्षितवान् रसाज्ञो
भवान् वयस्याश्च वदन्ति साक्षात् ।
ज्यायान् बलोऽयं वदति प्रसिद्ध
मा एवमर्थं न जहाति नेष्टम् ॥ १५

भगवानुवाच

सर्वे मृषावादरता व्रजार्भका
मातर्मया क्वापि न मृत् प्रभक्षिता ।
यदा समीचीनमनेन वाक्पथं
तदा मुख पश्य मदीयमञ्जसा ॥ १६

नारद उवाच

अथ गोपी बालकस्य पश्यन्ती सुन्दरं मुखम् ।
प्रसारितञ्च ददृशे ब्रह्माण्डं रचितं गुणैः ॥ १७

सप्तद्वीपान् सप्तसिन्धून् सखण्डान् सगिरीन् दृढान् ।
आब्रह्मलोकाल्लोकांस्त्रीन् स्वात्मभिः सव्रजैः सह ॥ १८

दृष्ट्वा निर्मीलिताक्षी सा भूत्वा श्रीयमुनातटे ।
बालोऽयं मे हरिः साक्षादिति ज्ञानमयी ह्यभूत् ॥ १९

तदा जहास श्रीकृष्णो मोहयन्निव मायया ।
यशोदा वैभवं दृष्ट्वा न सस्मार गतस्मृतिः ॥ २०

इति श्रीगर्गसंहितायां गोलोकखण्डे नारदबहुलाश्व-
संवादे ब्रह्माण्डदर्शनं नाम
अष्टादशोऽध्यायः ॥१८

नारद उवाच

एकदा गोकुले गोप्यो ममन्थुर्दधि सर्वतः ।
गृहे गृहे प्रगायन्त्यो गोपालचरितं परम् ॥ १

यशोदापि समुत्थाय प्रातः श्रीनन्दमन्दिरे ।
भाण्डे गव्यं विनिक्षिप्य ममन्थ दधि सुन्दरी ॥ २

मञ्जीररावं संकुर्वन् बालः श्रीनन्दनन्दनः ।
ननर्त्त नवनीतार्थं गव्यादानकुतूहलात् ॥३

बालकेलिर्बभौ नृत्यन् मातुः पार्श्वमनुभ्रमन् ।
सुनादिकिङ्किणीसङ्घझङ्कार कारयन् मुहुः ॥४

हैयङ्गवीनं सततं नवीनं
याचन् स मातुर्मधुरं ब्रुवन् सः ।
आदाय हस्तेऽश्मसुतं रुषा सुधी-
र्बिभेद कृष्णो दधिमन्थपात्रम् ॥५

पलायमानं स्वसुतं यशोदा
प्रधावती प्राप न हस्तमात्रात् ।
योगीश्वराणामपि यो दुरापः
कथं स मातुर्ग्रहणे प्रयाति ॥ ६

तथापि भक्तेषु च भक्तवश्यता
प्रदर्शिता श्रीहरिणा नृपेश्वर ।
बालं गृहीत्वा स्वगृहे यशोमती
बबन्ध रज्ज्वाथ रुषा ह्युलूखले ॥ ७

आदाय यद्यद्वहुदाम तत्तत्
स्वल्पं प्रभूतं स्वसुते यदो वै ।
गुणैर्न बद्धः प्रकृतेः परो य
कथं स बद्धो भवतीह दाम्ना ॥ ८

यदा यशोदा गतबन्धनेच्छा
स्विन्ना निषण्णा नृप खिन्नमानसा ।
आसीत्तदायं कृपया स्वबन्धे
स्वच्छन्दयानः स्ववशोऽपि कृष्णः ।।६

एष प्रसादो न हि वीतकर्मणां
न ज्ञानिनां कर्मधियां कुतः पुनः ।
मातुर्यथाभून्नृप एष तस्मान्
मुक्तिं व्यधाद्भक्तिमलं न माधवः ।।१०

तदैव गोप्यस्तु समागतास्त्वरं
दृष्ट्वाथ भग्नं दधिमन्थभाजनम् ।
उलूखले बद्धमतीव दामभि-
र्भीतं शिशुं वीक्ष्य जगुर्घृणातुराः ।।११

गोप्य ऊचुः

अस्मद्गृहेषु पात्राणि भिनत्ति सततं शिशुः ।
तदप्येवं नो वदामः कारुण्यान्नन्दगेहिनि ।।१२

गतव्यथे ह्यकरुणे यशोदे हे व्रजेश्वरि ।
यष्ट्या निर्भर्त्सितो बालस्त्वया बद्धो घटक्षयात् ।।१३

नारद उवाच

इत्युक्तायां यशोदायां व्यग्रायां गृहकर्मसु ।
कर्षन्नुलूखलं कृष्णो बालैः श्रीयमुनां ययौ ।।१४

तत्तटे च महावृक्षौ पुराणौ यमलार्जुनौ ।
तयोर्मध्ये गतः कृष्णो हसन् दामोदरः प्रभुः ।।१५

चकर्ष सहसा कृष्णस्तिर्यग्गतमुलूखलम् ।
कर्षणेन समूलौ द्वौ पेततुर्भूमिमण्डले ।।१६

पतनेनापि शब्दोऽभूत् प्रचण्डो वज्रपातवत् ।
विनिर्गतौ च वृक्षाभ्यां देवौ द्वावेधसोऽग्निवत् ॥१७
दामोदरं परिक्रम्य पादौ स्पृष्ट्वा स्वमौलिना ।
कृताञ्जली हरिं नत्वा तौ तु तत्सम्मुखे स्थितौ ॥१८

देवावूचतुः

आवां मुक्तौ ब्रह्मदण्डात् सद्यस्तेऽच्युतदर्शनात् ।
माभूत्ते निजभक्तानां हेलन ह्यावयोर्हरे ॥१९
करुणानिधये तुभ्यं जगन्मङ्गलशीलिने ।
दामोदराय कृष्णाय गोविन्दाय नमोनमः ॥२०

नारद उवाच

इति नत्वा हरिं तौ द्वौ उदीचीञ्च दिश गतौ ।
तदैव ह्यागताः सर्वे नन्दाद्या भयकातराः ॥२१
कथं वृक्षौ प्रपतितौ विना वातं व्रजार्भकाः ।
वदताशु तदा बाला ऊचुः सर्वे व्रजौकसः ॥२२

बाला ऊचुः

अनेन पातितौ वृक्षौ ताभ्यां द्वौ पुरुषौ स्थितौ ।
एनं नत्वा गतावद्य तावुदीच्यां स्फुरत्प्रभौ ॥२३

नारद उवाच

इति श्रुत्वा वचस्तेषां न ते श्रद्दधिरे ततः ।
मुमोच नन्दः स्वं बालं दाम्ना बद्धमुलूखले ॥२४
संलालयन् स्वाङ्कदेशे समाघ्राय शिशुं नृप ।
निर्भर्त्स्य भामिनीं नन्दो विप्रेभ्यो गोशतं ददौ ॥२५

बहुलाश्व उवाच

काविमौ पुरुषौ दिव्यौ वद देवर्षिसत्तम ।
केन दोषेण वृक्षत्वं प्रापितौ यमलार्जुनौ ॥२६

नारद उवाच

नलकूबरमणिग्रीवौ राजराजसुतौ परौ ।
जग्मतुर्नन्दनवनं मन्दाकिन्यास्तटे स्थितौ ॥२७
अप्सरोभिर्गीयमानौ चेरतुर्गतवाससौ ।
वारुणीमदिरामत्तौ युवानौ द्रव्यदर्पितौ ॥२८
कदाचिद्देवलो नाम मुनीन्द्रो वेदपारगः ।
नग्नौ दृष्ट्वा च तावाह दुष्टशीलौ गतस्मृती ॥२९

देवल उवाच

युवां वृक्षसमौ दृष्टौ निर्लज्जौ द्रव्यदर्पितौ ।
तस्माद् वृक्षौ तु भूयास्तां वर्षाणां शतकं भुवि ॥३०
द्वापरान्ते भारते च माथुरे व्रजमण्डले ।
कलिन्दनन्दिनीतीरे महावनसमीपतः ॥३१
परिपूर्णतमं साक्षात्कृष्णं दामोदरं हरिम् ।
गोलोकनाथं तं दृष्ट्वा पूर्वरूपौ भविष्यथः ॥३२

नारद उवाच

एवं देवलशापेन वृक्षत्वं प्रापितौ नृप ।
नलकूबरमणिग्रीवौ श्रीकृष्णेन विमोचितौ ॥३३

इति श्रीगर्गसंहितायां गोलोकखण्डे नारदबहुलाश्व-
संवादे यमलार्जुनभङ्गो नाम
एकोनविंशोऽध्यायः॥१९

तपस्तताप वर्षाणां शतकोटीः प्रभु भजन् ।
नैमित्तिकाख्ये प्रलये प्राप्ते विश्वभयङ्करे ।। ११
आगच्छन्तः समुद्रास्ते प्लावयन्तो धरातलम् ।
वहंस्तेषु च दुर्वासा न प्रापान्तं जलस्य च ॥ १२
व्यतीते युगसाहस्रे मग्नोऽभूद्विगतस्मृतिः ।
पुनर्जलेषु विचरन्नण्डमन्यं ददर्श ह ।। १३
तच्छिद्रे च प्रविष्टोऽसौ दिव्यां सृष्टिं गतस्ततः ।
तदण्डमूर्ध्नि लोकेषु विवरेषु च सञ्चरन् ॥ १४
एकं छिद्रं तत्र वीक्ष्य प्रविश्य च हरिं स्मरन् ।
बहिर्विनिर्गतो ह्यण्डाद्ददर्शाशु महाजलम ॥ १५
तस्मिन् जले तु लक्ष्यन्ते कोटिशो ह्यण्डराशयः ।
ततो मुनिर्जलं पश्यन् ददर्श विरजां नदीम् ।। १६
तत्पारं प्रगतः साक्षाद्गोलोकं प्राविशन् मुनि ।
वृन्दावन गोवर्द्धनं यमुनापुलिनं शुभम् ।। १७
दृष्ट्वा प्रसन्नः स मुनिर्निकुञ्जं प्राविशंस्ततः ।
गोपगोपीगणवृतं गवां कोटिभिरन्वितम् ॥ १८
असङ्ख्यकोटिमार्तण्डज्योतिषां मण्डले ततः ।
दिव्ये लक्षदले पद्मे स्थितं राधापतिं हरिम् ।। १९
परिपूर्णतमं साक्षाच्छ्रीकृष्णं पुरुषोत्तमम् ।
असङ्ख्यब्रह्माण्डपतिं गोलोकेशं ददर्श ह ॥ २०
श्रीकृष्णस्यापि हसतः प्रविष्टस्तन्मुखे मुनि. ।
पुनर्विनिर्गतोऽपश्यद्बालं श्रीनन्दनन्दनम् ।। २१
कालिन्दीनिकटे पुण्ये सैकते रमणस्थले ।
बालकैः सहितं कृष्णं विचरन्तं महावने ॥ २२
तदा मुनिश्च दुर्वासा ज्ञात्वा कृष्णं परात्परम् ॥
श्रीनन्दनन्दनं नत्वा नत्वा प्राह कृताञ्जलिः ॥ २३

मुनिरुवाच

बालं नवीनशतपत्रविशालनेत्रं
बिम्बाधरं सघनमेघरुचिं मनोज्ञम् ।
मन्दस्मितं मधुरसुन्दरमन्दयानं
श्रीनन्दनन्दनमहं मनसा नमामि ॥ २४
मञ्जीरनूपुररणन्नवरत्नकाञ्ची-
श्रीहारकेयुरनखप्रतियन्त्रसङ्गम् ।
दृष्ट्यार्तिहारिमषिबिन्दुविराजमान
वन्दे कलिन्दतनुजातटबालकेलिम् ॥ २५
पूर्णेन्दुसुन्दरमुखोपरिकुञ्चिताग्राः
केशा नवीनघननीलविभाः स्फुरन्ति ।
राजन्त आनतशिरः कुतुकस्य यस्य
नन्दात्मजाय सबलाय नमोऽस्तु तस्मै ॥ २६

श्रीनन्दनन्दनस्तोत्रं प्रातरुत्थाय यः पठेत् ।
तन्नेत्रगोचरो याति सानन्दं नन्दनन्दनः ॥ २७

नारद उवाच

इति प्रणम्य श्रीकृष्णं दुर्वासा मुनिसत्तमः ।
तं ध्यायन् प्रजपन् प्रागाद् बदर्य्याश्रममुत्तमम् ॥ २८

गर्ग उवाच

इत्थ देवर्षिवर्येण नारदेन महात्मना ।
कथितं कृष्णचरितं बहुलाश्वाय धीमते ॥ २९
मया ते कथितं ब्रह्मन् यशः कलिमलापहम् ।
चतुःपदार्थदं दिव्यं किं भूयः श्रोतुमिच्छसि ॥ ३०

शौनक उवाच

बहुलाश्वो मैथिलेन्द्रः किं पप्रच्छ महामुनिम् ।
नारदं ज्ञानदं शान्तं मे तद् ब्रूहि कृपाकर ॥ ३१

गर्ग उवाच

नारदं ज्ञानदं नत्वा मानदो मैथिलो नृपः ।
पुनः पप्रच्छ कृष्णस्य चरित मङ्गलायनम् ॥ ३२

बहुलाश्व उवाच

श्रीकृष्णो भगवान् साक्षात् परमानन्दविग्रहः ।
अग्रे चकार किं वित्र चरित्रं वद मे प्रभो ॥ ३३
पूर्वावतारैश्चरितं श्रुतं वै मङ्गलायनम् ।
अपरं किन्तु कृष्णस्य विचित्रं चरितं परम् ॥ ३४

नारद उवाच

साधु साधु त्वया पृष्टं चरित्रं मङ्गलं हरेः ।
तत्तेऽहं वर्णयिष्यामि वृन्दारण्येऽपि यद्यश ॥ ३५
इदं गोलोकखण्डञ्च गुह्य परमनुत्तमम् ।
श्रीकृष्णेन प्रकथितं गोलोके रासमण्डले ॥ ३६
निकुञ्जे राधिकायैव राधा मह्य ददाविदम् ।
मया तुभ्यं श्रावितञ्च दत्त सर्वार्थदं परम् ॥ ३७
इदं पठित्वा विप्रस्तु सर्वशास्त्रार्थगो भवेत् ।
श्रुत्वेदं चक्रवर्ती स्यात् क्षत्रियश्चण्डविक्रमः ॥ ३८
वैश्यो निधिपतिर्भूयाच्छूद्रो मुच्येत पातकात् ।
निष्कामो योऽपि जगति जीवन्मुक्तः स जायते ॥ ३९
यो नित्यं पठते सम्यग् भक्तिभावसमन्वितः ।
स गच्छेत् कृष्णचन्द्रस्य गोलोकं प्रकृतेः परम् ॥ ४०

इति श्रीगर्गसंहितायां गोलोकखण्डे नारदबहुलाश्व-
संवादे भगवज्जठरगतदुर्वाससोब्रह्माण्डगोलोक-
दर्शनपूर्वकश्रीनन्दनन्दनस्तोत्रकरणं नाम
विंशोऽध्यायः ॥२०

इति प्रथमोगोलोकखण्डः समाप्तः ॥

गर्गसंहितायां गोलोकखण्डे पाठान्तरादिप्रदर्शनम् ।

अत्र क = राजकीयसंस्कृतमहाविद्यालयसरस्वतीभवनस्थं १५६०८ संख्यकं पुस्तकम् ।

ख = रा० स० महाविद्यालयसरस्वतीभवनस्थं १५३९५ संख्यकं पु० ।

ग = रा० स० म० सरस्वतीभवनस्थं १४६८३ संख्यकं पु० ।

घ = रा० स० म० सरस्वतीभवनस्थं १६२३२ संख्यकं पु० ।

मु० = खेमराज श्रीकृष्णदासेन मुम्बई वेंकटेश्वरप्रेसतः प्रकाशितं पु० ।

अग्रे श्लोकपरिचयात्मिकासु संख्यासु प्रथमा अध्यायबोधिका, अनन्तरा च श्लोकसंख्याबोधिका । यथा १।३ इत्यस्य प्रथमाध्यायस्य तृतीयश्लोकोऽर्थः वेदितव्यः ।

१।१ नास्ति ख० पु०।

१।२ ०मुनिसेवितं० इति मु० पु० । ०चलद्व्यतिपद० इति मु० पु० ।

१।५ ०पाद्याद्यैरुप० इति मु०पु० ।

१।७ ०रवतारो भवत्यलम् ॥ इति मु० पु० ।

१।८ सर्वेषु पुस्तकेषु श्रीशब्देन सहैव गर्ग इत्यादि शब्दा दृश्यन्ते । अत्र च मुद्रण-सौकर्यार्थं श्रीशब्दं विनैव 'गर्ग उवाच' इत्यादीनां निवेशः कृतोऽस्माभिः ।

१।१२ योऽनादिरात्मा० इति ख० मु० पु० ।

ब्रूहि महामते ॥ इति मु० पु ।

१।१३ तनुं धत्ते हरिः० इति मु० पु० ।

१।१४ ०मुमुहुस्ते न संशय॰ ॥ इति मु० पु० ।

१।१५ ०रवतारो भवत्यलम् । इति मु० पु० ।

०रक्षणार्थं हि कृपया० इति मु० पु० ।

नास्ति ग० पु० ।

नारद उवाच इत्यपि नास्ति ग० पु० ।

१।१६ अंशांशोंऽशस्तथा० इति मु० पु० ।

१।१७ अंशांशस्तु मरीच्यादिरंशा

ब्रह्मादय स्मृताः। इति ख० ग० पु०।
०ब्रह्मादयस्तथा। इति मु० पु०।
१।२० ०कुर्वन्तः सदाशास्ते० इति मु० पु०।
१।२१ येभ्योऽप्यन्तर्गतो विष्णुर्व्यापकत्वाद्विनिर्गतः। इति क० पु०।
नानावेशावतारांश्च० इति मु० पु०।
१।२२ धर्मं विज्ञाय कृत्वा यः० इति मु० पु०।
०कृत्वा यं० इति ख० पु०।
१।२३ ०दृश्यन्ते वरमानवः। इति, ०वीर्य्याणि यत्तु पूर्णः प्रकथ्यते। इतिच ख० पु०।
१।२४ ०वदन्ति परे साक्षात्० इति मु० पु०।
१।२५ ०जना.सोऽयं० इति मु० पु०।
१।२७ ०सदानन्दमयं कृपाकरं गुणाकरं तं शरणं व्रजाम्यहम्॥ इति ख० मु० पु०।
१।२८ ०राजा रोमाञ्ची प्रेमविह्वलः। इति मु० पु०।
०राजा रोमाञ्चोद्धर्षविह्वलः। इति क० ग० पु०।
प्रामृश्य नेत्रे० इति मु० पु०।
१।३० ०ब्रूहि ब्रह्मन् बृहन्मुने। इति मु० पु०।
१।३१ ०जन्म तप परम्। इति क० ख० ग० पु०।
१।३३ ०श्रीकृष्णोष्ठौ० इति मु०पु०।

२।१ ०मोक्षनिःश्रेणी स न रोहति० इति ख० पु०।
०मोक्षनिःश्रेणीं स नारोहति० इति मु० पु०।
२।३ ०दानवदेवाना नराणा खलु० इति ख० पु०।
२।५ ब्रह्माथाश्वास्य० इति मु० पु०।
२।७ श्रीनाथभगवानुवाच इति ख० पु०।
२।८ यदि योऽन्यस्तस्य० इति ख० मु० पु०।
०दर्शय नः प्रभो॥ इति मु० पु०।
२।११ कुलिङ्गबिम्ब इति ख० पु०।
२।१३ ०योजनोर्ध्वं वै० इति ख० मु० पु०।
२।१४ तरङ्गितं क्षौमशुभ्रं० इति

मु० पु० ।
तरङ्गितक्षौमशुभ्रं ०इति ख० पु० ।
२।१५ ०तत्पुरं जग्मु० इति मु० पु० ।
२।१७ ०पश्यत्साकारं० इति मु० पु० ।
तस्मिन्महा० इति मु०पु० ।
२।१९ ०विशत्येव० इति मु० पु० ।
२।२२ ०श्रीकृष्णस्य सखीजनान्। इति क०ग० पु० ।
२।२४ वदताशु गमिष्यामि० इति मु० पु० ।
२।२५ अहो अण्डान्यु० इति ख० मु० पु० ।
०प्रजानीमोऽथोऽपरं नास्ति० इति मु० पु० ।
२।२६ ब्रह्मदेव लुठन्तीह० इति मु० पु० ।
२।२७ ०कदा नात्र समागताः। इति ख० मु० पु० ।
जड़वच्च प्रपश्यन्ति०इति क० ग० पु० ।
२।२८ ब्रह्माण्डमेकं जानीथ० इति क० ग० पु० ।
२।३१ ०भ्योऽप्याज्ञां० इति मु० पु० ।
०दत्त्वा गता पुरे। इति क० ख० ग० पु० ।
२।३२ तत्र गोवर्द्धनो० इति मु० पु० ।
२।३३ वसन्तमानिनीभि० इति मु० पु० ।
२।३४ यत्र कृष्णानदी० इति मु० पु० ।
२।३६ पुलिने शीतले० इति मु० पु० ।
२।३८ सप्तधा पद्मरागा० इति ख० मु० पु० ।
०गुलिकाद्युतिः। इति मु० पु० ।
२।३९ जातभ्रमर० इति मु० पु० ।
०सङ्गीतो मत्त० इति ख० मु० पु० ।
२।४४ ०हेमतुल्या हारमाला० इति क० ग० पु० ।
२।४५ ०स्त्वनेकधा ॥ इति मु० पु० ।
धूम्राः.. स्त्वनेकशः ॥ इति नास्ति ख० पु० ।
२।४६ समुद्र.. ..चिह्निताः ॥ इति नास्ति ख० पु० ।

२।४७ दीर्घकन्धरसङ्गा० इति मु० पु० ।

२।४९ ०निकुञ्जन्तन्नत्वा०इति०मु० पु० ।
०निकुञ्जेऽन्त नत्वा० इति ख० पु० ।
०मण्डलं पद्मं० इति मु० पु० ।

२।५० ०दीर्घं सोपानत्रय० इति ख० ग० मु० पु० ।
०दीर्घं सोपानं यत्र मण्डितम् । इति क० पु० ।

२।५१ ०देवताः सर्वा.० इति मु० पु० ।
०राधिकायुतम् । इति ख० पु० ।

२।५२ ०गोपालसेवितै· ॥ इति मु० पु० ।

२।५४ श्रीराधयालङ्कृत० इति ख० पु० ।

२।५५ ०बहुपीतवाससम् । इति ख० मु० पु० ।
०मिलिन्दशब्दैर्विराजितं० इति मु० पु० ।
०मिलिन्दसेव्यया० इति क० ग० पु० ।
०वनमालयावृतम् । इति ख० पु० ।

२।५६ काञ्चीफलाकङ्कण० इति क० पु० ।

२।५७ ०पुरुषं पुराणम् ॥ इति क० ख० ग० पु० ।

३।१ जनक उवाच इति ख० मु० पु० ।

३।२ ०वैकुण्ठोऽपि हरि० इति मु० पु० ।

३।३ ०कृष्णातेजसि ॥ इति ख० म० पु० ।

३।५ संप्रलीनो० इति ख० मु० पु० ।

३।७ ०चामरैर्दोलिते० इति मु० पु० ।
०वानरेन्द्रोघै० इति क० ग० पु० ।

३।८ ०शातकुम्भे० इति क० ग० पु० ।

३।९ ०प्रलयाटोपज्वल० इति मु० पु० ।

३।१० ०श्यामसुन्दरे ॥ इति ख० पु० ।

३।१२ ०मण्डितोऽखण्डितप्रभः ॥

इति ग० पु० ।

३।१६ ०विदितं यददोऽद्वयं० इति ख० मु० पु० ।
०महतां पतये० इति क० ग० पु० ।

३।१७ ०प्रकृतेः परं च त्वां ब्रह्म० इति मु० पु० ।
०निर्गुणममलं शरण० इति मु० पु० ।

३।१८ ०केचित्प्रशान्तमपरे० इति मु० पु० ।
०शरणं व्रजामः ।। इति ख० पु० ।

३।२० ०रमलाशययुक्त० इति मु० पु० ।

३।२१ ०जीवनमूलहार । इति मु० पु० ।

३।२२ ०धराधिपते धरा त्वं० इति ख० मु० पु० ।
०द्धरण उद्धर धर्मधाराम् ।। इति मु० पु० ।
०उद्धर धर्मधार ।। इति ख० पु० ।

३।२३ नास्ति ग० पु० ।
भगवान उवाच इत्यपि नास्ति ग० पु० ।

३।२४ यादवेषु च० इति मु०पु० ।
०जन्यध्वमंशैः स्त्रीभि० इति ख० मु० पु० ।
०र्ममाज्ञया ।। इति ख०पु० ।

३।२७ ०पाखण्डिभि० इति ख० मु० पु० ।

३।२८ ०पतिं प्राणवियोग० इति मु० पु० ।
०दु.खलतेव० इति मु०पु० ।
०श्रुकम्परोमाञ्च० इति मु० पु० ।

३।२९ ०मलं व्रजेर्भुवं कृतं० इति मु० पु० ।
०शपथं शृणु त्वम् ।। इति क० ग० पु० ।
०शपथं शृणोत्वतः ।। इति मु० पु० ।
०त्वयि प्राणपते च० इति मु० पु० ।
त्वयि गते प्राणपते च० इति ख० पु० ।

३।३० यदा त्वमेवं शपथं० इति मु० पु० ।
०द्वितीयवारांबुदयामि वा-क्पथम् । इति मु० पु० ।
प्राणोऽधरेगन्तु० इति ख०

मु० पु० ।
०कपूरधूलेः कणा० इति मु० पु० ।

३।३२ ०यत्र नो यमुना० इति मु० पु० ।

३।३७ ०रुक्मिणी भैमी० इति मु० पु० ।

४।१ नन्दोपनन्दभुवने० इति क० पु० ।
नवोपनन्दभवने० इति ग० पु० ।
नवोपनन्दभुवने० इति ख० पु० ।
नन्दोपनन्दभवनाः० इति मु० पु० ।

४।३ ०कस्य वा वृष० इति ख० पु० ।

४।४ ०प्रोक्ता येषा त्वं० इति ख० पु० ।
०प्रोक्तास्तेषा त्वं० इति मु० पु० ।

४।५ उपनन्द गवांपतिः । इति नास्ति क० ग० पु० ।

४।६ वृषभानुःस वै प्रोक्तो० इति क० ग० पु० ।

४।७ कोत्यूर्ध्वं च गवा० इति क० ग० पु० ।

४।८ ०लक्षगलक्ष्याढ्यौ० इति मु० पु० ।

४।९ ०हे जगत्प्राण कारण । इति क० ग० पु० ।
०तन्मे ब्रूहि सुरेश्वर ॥ इति क० ग० पु० ।

४।१३ ०जाह्नवीयूथ एवहि ॥ इति क० ग० पु० ।

४।१५ एवं ह्यष्ट० इति मु० पु० ।
०सखीना च यूथा० इति मु० पु० ।

४।१६ ०वासिन्यो यत्र० इति मु० पु० ।
०यज्ञसीताः पुलिन्दिकाः । इति ख० पु० ।

४।१७ ०पूर्वं पूर्वं युगे० इति ख० पु० ।

४।१८ ०ते वै योगिभिः० इति क० ख० ग० पु० ।

४।२० ०यूयं वै जन्मनो० इति क० पु० ।
०कि दुर्लभ भवेत् । इति क० ग० पु० ।
०किं दुर्लभ हि नतु । इति मु० पु० ।

४।२१ ०गोचरातीतं न कैः संज्ञायते तु० इति क० ग० पु० ।
०यदि देवो वरो हि न. । इति ख० पु० ।
०यदि देयो वरो हि नः । इति नास्ति क० ग०पु० ।
भगवान् उवाच इति नास्ति आदर्शेषु । पर अर्थानुसन्धानेन स्थापितमस्माभिस्तद्वाक्यम् ।

४।२२ केवलानुभवानन्दमित्यस्य पूर्वत एव गर्ग उवाच इति दृश्यते क० ग० पु० ।
तत्तु प्रकरणानपेक्षित्वात्परित्यक्तमस्माभि ।

४।२४ रत्नव्रातमय०इति मु०पु०।
०सुपक्षिगणसङ्कुल० । इति ख० पु० ।
०सुपक्षिगणसंवृत० । इति मु० पु० ।

४।२७ दर्शयित्वा च ता. प्राह० इति मु० पु० ।

४।२८ ०स्मरलुब्धान्य० इति क० ग० पु० ।
०स्मरक्षिप्तान्य० इति मु० प० ।

४।२६ यथा त्वल्लोकवासिन्यः काम तत्त्वेन गोपिकाः । इति ख० मु० पु० ।

४।३० ०युष्माकन्तु मनोरथः । इति मु० पु० ।

४।३१ ०विरञ्चौ० इति क० ख० ग० पु० ।
कल्पे सारस्वतेऽतीते० इति मु० पु० ।

४।३३ ०सर्वोऽपि० इति क० ग० पु० ।
०सर्वेऽपि० इति ख०पु० ।

४।३६ ०चकार ह । इति ख० पु० ।

४।३८ तामाह राघवेन्द्रस्तु० इति मु० पु० ।
तान्प्राह राघवेन्द्रस्तु० इति ख० पु० ।
०मा शोकं० इति मु०पु० ।

४।४१ मार्गेण० इति क०ग०पु० ।

४।४३ ०सैनिकै० महितं रघुम् । इति ख० मु० पु० ।

४।४५ ०विरजे वने । इति ख०पु० ।

४।४६ चचार सीतया० इत्यादि श्लोकार्द्ध नास्ति क० ग० पु० ।

४।४६ ०वीक्ष्य परिविस्मितमानसाः ।

इति ख० पु० ।

४।५० उचुस्तेऽयं नु इत्यादि श्लोकार्द्धं नास्ति क०पु० । उचुस्ते ध्यानगोपालं वंशीवेत्रे विनाप्रभुम् । इति ग० पु० ।

४।५२ सद्यैव सफलो भाव्यो० इति ख० पु० ।

४।५३ सीतोपमेव० इति मु० पु० । सीतोपमेय० इति ख०पु० ।

४।५७ ०मा कुरुत स्त्रियो० इति ख० मु० पु० । ०मा कुर्य्यास्त स्त्रियो० इति क० ग० पु० ।

४।५६ ०पुरीं ययौ । इति ख० मु० पु० ।

४।६० ०सतामपि महत्० इति ख० पु० ।

४।६३ ०आह राघवेशेन्द्रो० इति मु० पु० ।

४।६४ ०यज्ञकालेतु० इति ख० पु० ।

४।६५ नास्ति ग० पु० ।

४।६६ नास्ति ग० पु० । अत्र राम उवाच इत्यपि नास्ति ।

४।६७ नास्ति क० पु० । ०पुरा वृन्दावने शुभे । इति ग० पु० ।

५।१ ०श्वेतद्वीप० इत्यादि श्लोकान्त यावत नास्ति ख० पु० ।

५।२ श्रीलोकाचलवासिन्य० इति नास्ति ख० पु० ।

५।४ ०प्रेमभावेन० इति ख० पु० । ०देवजनाः स्त्रिय ॥ इति मु० पु० ।

५।७ ०हरिः परः ॥ इति क० ख० ग० पु० ।

५।८ ०वव्रिरे तं पति हि नाः । इति क० ग० पु० ।

५।११ ऊचुर्वाक्यं हरिं साक्षाद-स्माकं त्वं वरो भव । इति क० ग० पु० ।

५।१२ ०भजतामु रमापति[illegible] । इति ग० पु० ।

५।१३ ०श्रीमात्स्यं हरिं० इति ख० पु० ।

५।१४ ०दुदोह ह इति ख० मु० पु० ।

५।१७ श्रीऋषिरुवाच इति क० ग० पु० ।

५।१६ कामसेनामोदनार्थं० इति क०

गः पुः ।

५।२४ ०हृषीको धनद० इति ग० पु० ।

५।२५ गदः प्राचीन० इति क० ग० पु० ।

०ह्य प्रसेनकः । इति क० ग० पु० ।

५।२६ ०प्रह्लादः सात्वतस्तथा । इति क० ग० पु० ।

०भीष्मो दोषो वसूत्तमः । इति क० ग० पु० ।

५।२७ शलश्चैव० इति मु० पु० ।

०धर्मराजो युधिष्ठिरः । इति मु० पु० ।

५।३१ ०कुले च भवता० इति क० ग० पु० ।

०च भवत०० इति ख० पु० ।

५।३२ ०राज्ञा रमांशकाः । इति क० पु० ।

५।३६ ०स्वधाम च समाययौ । इति मु० पु० ।

५।३८ तदपि श्रीहरे० इति क० ख० ग० पु० ।

६।१ कंस. कोऽय० इति ख० मु० पु० ।

६।३ ०सञ्जीविण्याऽथ विद्यया । इति मु० पु० ।

०सञ्जीविन्या च विद्यया। इति ख० पु० ।

६।५ ०वर्षेष्वतीतेषु त पितामहः । इति क० ग० पु०।

०वर्षेष्वतीतेषु पितामहः । इति ख० पु० ।

०ब्रूहीत्युवाच ह ।। इति क० ख० ग० पु०।

६।६ ०मृत्युः पूर्णेनापि च मा भवेत् ।। इति क० ग० पु० ।

६।७ ०ते पूर्णः स्यात्० इति क० ख० ग० पु० ।

६।८ ०सततं संयुयोध ह ।। इति क० ग० पु० ।

६।९ ०शिविरो विहितस्ततः ।। इति क० ग० पु०

६।१० ०शृङ्खलासङ्ग० इति ख० मु० पु० ।

०शिविरान् मदी ।। इति ख० पु० ।

६।११ ०मन्दिरान् भूभुजांस्तटान् इति मु० पु० ।

०भूजनान् परिमर्दयन् । इति ग० पु० ।

६।१२ ०कसस्तन्तु समागतम् । इति मु० पु० ।

६।१३ ०शतयोजनम् । इति मु० पु० ।

६।१४ ०मगधेश्वर.। इति मु० पु० ।
अस्तिप्राप्त्यौ ददौ० इति क० ग० पु०।
०कंसाय शंसिते ॥ इति मु० पु० ।

६।१५ ०पारिबर्हं० इति क० ख० ग० पु०।

६।१६ ०वीरोऽप्येकाकी० इति क० ग० पु०।

६।१७ ०मल्लयुद्धजयैषिणा ॥ इति मु० पु० ।

६।१८ ०दीयध्व रङ्गमेव ते। इति ख० पु०।
०साम्ना हि दीयध्वं रङ्गमेव मे। इति मु० पु० ।
०दोर्युद्धं करमेवमे। इति क० ग० पु० ।

६।१९ ०करोम्यहम् । इति मु० पु० ।
०कृत्वाशु युयुधे० इति क० पु० ।

६।२० यथागत० इति क० ग० पु० ।

६।२१ यदागत० इति क०ग० पु० ।
यदायातं० इति० ख० पु० ।
०युधिनिर्गतम् ॥ इति मु० पु० ।

६।२२ पातयित्वा इत्यादि श्लोकापरार्द्धं नास्ति मु० पु० ।

६।२३ ०भूमि तं विचकर्ष ह । इति मु० पु० ।

६।२५ दासभावेन ता० इति ख० पु० ।
०यार्दवेश्वरः । इति मु० पु० ।
०ययावाशु प्रव० इति मु० पु० ।

६।२६ ०दिने' कंस वातयित्वा नभोगत इति असङ्गत पाठः ग० पु० ।
०कंसो × विक्रमं ॥ इति ख० पु० ।

६।२७ नास्ति ग० पु० ।

६।२८ द्विविदो० इत्यादि पूर्वार्द्ध नास्ति ग० पु० ।

६।२९ ०कश्मलमाययौ । इति मु० पु० ।

६।३० ०वनं गत.। इति ख० पु०
०हयरूपो० इति मु० पु० ।

६।३४ हे कोट० इति ख० पु० ।
०कर्मटीडिम्भ० इति मु० पु० ।

६।३५ ०दुष्टत्तत्रियं० इति क० ग० मु० पु० ।
०वीर्यमानिनम् । इति ख० मु० पु० ।

६।३७ ०कुशलं महत् । इति क० ग० पु० ।

६।३८ ०सज्ज कृत्वा० इति ख० मु० पु० ।

६।३९ प्रत्यञ्चास्फोटयामास टङ्कोऽभूत्तडित्स्वनः । इति ख० प० ।

६।४० ०स्तारा एजद्भूखण्डमण्डलम् । इति ख० प० ।
०राजद्भूखण्डमण्डलम् । इति क० ग० पु० ।

६।४२ ०दासोऽस्मि० इति ख० पु० ।

६।४३ ०यद् येन० इति ख० पु० ।
०परिपूर्णातमोनात्र० इति क० पु० ।

६।४४ ०मदोन्मदः । इति मु०पु० ।
न तेऽपि युयुधु ० इति क० ग० पु० ।

६।४७ ०गच्छतापि गजो यथा । इति क० पु० ।

६।४८ ०पर्वतानुच्चांश्चित्तेप० इति मु० पु० ।
०चाक्षिपत्तस्य० इति मु० पु० ।

६।५० प्रागूज्योतिषपुरं० इति क० ग० पु० ।

६।५१ ०करोम्यलम् । इति ख० पु० ।

६।५२ ०मृगेन्द्रोऽद्रावुद्ध० इति मु० पु० ।

६।५३ ०पुरान्तरे ॥ इति मु० पु० ।

६।५५ कंसस्तु नोद०इति ख०पु० ।
०मुष्टिभि' पदैः ॥ इति ग० पु० ।
०मुष्टिभिः धदैः ॥ (?) इति क० पु० ।

६।५६ ०लक्षयोजने ॥ इति क० ग० पु० ।

६।५७ ०स पातयामास० इति क० ग० पु० ।

६।५८ तुण्डेनाप्यग्रसन्त च० इति क० ग० पु० ।

६।६३ ०सार्द्धं महायुद्ध ० इति क० ख० ग० पु० ।
बकासुर इत्यादि श्लोकोत्तरार्द्धं नास्ति क०ग०पु० ।

६।६४ ततोऽनन्त इत्यादि श्लोकपूर्वार्द्धं नास्ति क० ग० पु० ।

चकार सौहृद इत्याद्यपि श्लोकोत्तरार्द्धं नास्ति ग० पु० ।

७।५ ०स्वाभिप्रायं न्यवेदयत् । इति मु० पु० ।

७।६ ०युद्धाकाङ्क्षोऽस्मि० इति मु० पु० ।

७।८ ०क्रुद्धो ह्यभून्महान् । इति ख० मु० पु० ।

७।६ ०पातालान्तस्थमागताम् । इति क० ख० पु० ।

०पातालान्तस्थमाततान् । इति ग० पु० ।

७।१० ०करदण्डं० इति ख० पु० ।

७।१२ कंसं योद्धुं तमुद्यन्तं० इति क० पु० ।

७।१३ ०विनापरं चैतं० इति मु० पु० ।

७।१५ ०सार्द्धं च युयुधे० इति क० ग० पु० ।

७।१६ वशेकृत्वा० इति मु० पु०

०शैलं म्लेच्छ० इति ख० मु० पु० ।

७।१६ ०मभूद्घोरं तत्तर्हि० इति मु० पु० ।

०मभूद्घोरं तत्र हि० इति ख० पु० ।

श्लोकोऽयं नास्ति ग० पु० ।

७।२० ०कालं गृहीत्वाथ० इति क० ग० पु० ।

०गृहीत्वा निर्जित्य० इति क० ग० पु० ।

७।२१ बाणवर्षं० इति मु० पु० ।

७।२२ नास्ति ग० पु० ।

०तुरङ्गान् सुरथान्० इति मु० पु० ।

०गदायुद्धो मृधाङ्गणे । इति ख० मु० पु० ।

०गृहाङ्गणे ॥ इति क० पु० ।

७।२३ ०दुद्रुवुर्मूर्च्छां० इति मु० पु० ।

०म्लेच्छान्राजघानाथ० इति क० ग० पु० ।

०नीतिमान् ॥ इति मु० पु०

७।२५ ०रुग्णवक्षासिता० इति क० ग० पु० ।

श्लोकोऽयं नास्ति ख० पु० ।

७।२६ ०कंसोऽमरावतीं ॥ इति ख० पु० ।

७।२७ ०प्रलम्बेनरकेनापि० इति ख० पु० ।

७।३० ०शस्त्रसंघातै० इति मु० पु० ।

७।३६ ०वीरोनमुचि० इति ख० मु० पु० ।

७।३७ ०मवाप सः ॥ इति ख० मु० पु० ।

७।३८ ०वर्षासूर्यमिवाम्बुदः ॥ इति ख० पु० ।

०वर्षास्विनमिवाम्बुदः ॥ इति मु० पु० ।

७।३९ ०वीरश्चापल कारयन्मुहुः । इति मु० पु० ।

०वीरश्चापटकारयन्मुहु । इति क० ग० पु० ।

७।४० ०आदित्या ऋषयः सुराः । इति क० ग० पु० ।

०द्रिं समागता ॥ इति मु० पु० ।

७।४१ ०सुरैर्वदन् । इति क० ग० पु० ।

७।४३ ०पदैर्द्विपम् । इति क० ख० ग० पु० ।

७।४५ ०घण्टाढ्यकिङ्कि० इति मु० पु० ।

०जालं रत्न० इति क० ख० ग० पु० ।

गोमूत्रचयसिन्दूर० इति क० ख० ग० पु० ।

७।४७ ०दूरं शक्रः० इति क० ग० पु० ।

७।५१ ०देवयानीं पुरीं० इति ख० पु० ।

७।५२ ०सज्जं कृत्वाथ० इति मु० पु० ।

७।५३ ०स्तेन विहन्यमाना० इति क० ग० पु० ।

०लीनधियो दिशान्ते । इति ख० पु० ।

०र्वलनिधयो दिशान्ते । इति मु० पु० ।

०दिनान्ते ।. इति ग० पु० ।

७।५४ ०शस्त्रायुधमुक्तकच्छाः । इति मु० पु० ।

७।५५ ०सिंहासनमातपत्रम् । इति क० ग० पु० ।

८।१ ०वरिष्ठम् । इति ख० मु० पु० ।

८।२ ०स्वानन्ददोर्ज्जयशना-नलेन । (?) इति ख० पु० ।

०स्वानन्ददोर्जयशसामलेन । (?) इति मु० पु० ।

८।३ ०भूत्वा व्रजे० इति ख० मु०

पु० ।

८।४ ०युक्तो हि मुक्ता० इति ख० पु० ।

०युक्तो हि मुक्ता भवतो० इति मु० पु० ।

८।६ अथैव गाथां० इति मु० पु० ।

०पत्न्यामाश्चर्यरूपं सहसः पराख्यम् । इति ख० पु० ।

८।८ ०नद्योऽमलाभाश्च० इति ख० मु० पु०

०मन्दपानै ।। इति मु०पु० ।

८।६ ०दृष्ट्वा च० इति क० ग०पु० ।

०कीर्तिमुद० इति मु० पु० ।

८।१० प्रेङ्खेऽथचिद्र० इति मु०पु० ।

८।११ ०यज्ञैरवाप्तं० इति मु०पु० ।

०लक्षन्ति लोका० इति मु० पु० ।

०मंदंतिलोका०इति ग०पु० ।

८।१२ ०दीपावलीवा० इति मु०पु० ।

०दीपावलीभिर्वृ ष० इति ख० पु० ।

८।१३ नास्ति । नारद उवाच इत्यपि नास्ति ग० पु० ।

८।१४ नृपपुत्रो० इति क० ग०पु० श्लोकापरार्द्धं नास्ति क० ग० पु० ।

८।१६ अथविधिः० इति ख० मु० पु० ।

०स्तथागत्यवरं० इति ख० पु० ।

०दिव्यरूपदृक् । इति ख० पु० ।

८।२० सुचन्द्रोवाच० इति क० ग० पु० ।

०दिव्योमोक्ष. परात्परम् । इति क० ग० पु० ।

६।१ ०प्रमाणिकं इति क० पु० ।

६।२ ०समावृतं मण्डप० इति मु० पु० ।

०खण्डमन्दिरम् ।। इति ख० पु० ।

०खण्डवर्णितम् ।। इति क० ग० पु० ।

०मण्डवखण्ड० इति ग० पु० ।

६।३ ०ध्वजिनी बलालिभं० इति ख० पु० ।

०ध्वजिनीवलाभि ० इति मु० पु० ।

०मण्डलमाण्डलीभिः ।। इति ख० पु० ।

०मण्डलमण्डलीभि. ॥ इति मु० पु० ।

६।४ ०श्वफल्किना० इति ख० पु० ।
०वृतच्छत्र० इति क० ग० पु० ।

६।५ ०सनाश्रयादुत्था० इति मु० पु० ।
०पीठके तथा परिक्रम्य० इति क० ग० पु० ।

६।७ ०भुविवरेपु वरस्तु० इति ग० पु० ।
०निजसुता० इति ख० मु० पु० ।

६।८ ०तदैव पुरि निश्चित० इति क० ग० पु० ।
०तदैव मुनि निश्चयनाग० इति ख० पु० ।

६।९ कृत्वोद्वहः० इति क० ग० पु० ।

६।१० ०स्नेहपरोऽथ शौरिः॥ इति क० ख० ग० पु० ।

६।११ श्लोकपूर्वार्द्धं नास्ति ग० पु० ।
०पारबर्हं० इति क० ख० पु० ।

६।१२ ०मृदङ्गोदरगोमु० इति क० ग० पु० ।
०धुन्धुर्जवीणा० इति मु० पु० ।

६।१५ ०रग्रेस्थितास्तेश्चकिता० इति क० ख० ग० पु० ।

६।१६ ०भौमाधिमागध० इति क० ग० पु० ।
०कथन्तु भगिनी० इति मु० पु० ।
०सिनात्र हन्ता ॥ इति ग० पु० ।

६।१७ ०बकी युधि युद्धकामा० इति क० ख० ग० पु० ।
०भवता नृपनीतिवृत्या । इति मु० पु० ।
०भगिनी हि कृता० इति ख० पु० ।

६।१८ ०शुभदा स चैषा० इति ख० पु० ।
०हन्तुमेना० इति मु० पु० ।

६।२० ०द्देव वाक्यात्कथितं० इति मु० पु० ।
०प्रसवप्रजातान् ॥ इति क० ख० ग० पु० ।

६।२१ ०प्रशंस्याशु० इति मु० पु० ।

१०।१ ०पलायते चायं इति ख० पु० ।

०पलायतीवार्यं० इति मु० पु० ।

१०।२ ०तथा कन्या० इति ख० पु० ।

१०।३ ०कंसं समभ्येत्य० इति मु० पु० ।

१०।४ ०घृणीह्यभूत् । इति मु० पु० ।

०साधुनं सहते० इति क० पु० ।

१०।१० ०दष्टमः सर्वं० इति ग० पु० ।

०प्रसङ्ख्यानामष्टमा० इति मु० पु० ।

०देवानां वामतो० इति क० ग० मु० पु० ।

११।११ ०कृतदैत्यवधोद्यमे । इति मु० पु० ।

१०।१३ भूतं नृशंसयम् ॥ इति ख० पु० ।

०भूतं ह्यसशयम ॥ इति मु० पु० ।

१०।१६ ०पादाभिन्ननखा० इति मु० पु० ।

०छिन्नाङ्गाश्छिन्नवाहवः । इति ख० पु० ।

१०।२१ इत्यं मदोत्कटः० इति मु० प० ।

०संनिपाताद्भटान् रिपून् । इति क० ख० ग० पु० ।

१०।२२ ०कारागारं रुरोध० इति क० ख० ग० पु० ।

१०।२३ माथुरां शूरसेनानां० इति ख० पु० ।

०त्वयं राज्यं चकारह । इति ख० पु० ।

१०।२४ चतुर्दशान्तरं देशान्० इति मु० पु० ।

चतुर्दिशान्तर देशान्० इति क० ग० पु० ।

१०।२८ ०सुपुष्पवर्षां० इति क० ग० पु० ।

१०।२९ श्लोकोत्तरार्द्धं नास्ति क० पु० ।

१०।३० श्लोकपूर्वार्द्धं नास्ति क० पु० ।

व्यासस्तु तत्रैव० इति ख० पु० ।

१०।३१ सदृशो बालकः० इति क० ग० पु० ।

१०।३६ श्लोकोत्तरार्द्धं नास्ति क० ख० ग० पु० ।

१०।३७ नास्ति क० ख० ग० पु० ।

१०।४० ०मुष्टिकारिः कुम्भाण्डारिस्त्वमेवहि । इति मु० पु० ।

रुक्मारिः० इति क० ख० ग० पु० ।
०कुभाण्डारि० इति क० ग० पु० ।
१०।४० ०कर्णारिः कूटारिर्बल्वलान्तकः। इति मु० पु० ।
१०।४२ नास्ति क० ग० पु० ।
१०।४३ ०दिगन्तगतश्रुत। इति मु० पु० ।
१०।४४ ०तस्य जयं० इति क० ख० ग० पु० ।
०जयः स्वधनं घनम्। इति मु० पु० ।
०स्वजनं धनम्। इति ख० ग० पु० ।
१०।४५ ०प्रणम्य ते० इति ख० पु० ।

११।१ ०मनः सर्वं परात्परः। इति क० ख० ग० पु० ।
११।२ सूर्यवद्वह्निसङ्काशो० इति ख० पु० ।
०त्यन्त सहसा० इति ख० पु० ।
११।५ ०त्युक्तास्ते भयविह्वलाः। इति मु० पु० ।

११।८ यज्जागरा० इति मु० पु० ।
यो यज्जरादिषु० इति ख० पु० ।
०भवेषु परं ह्यहेतु० इति मु० पु० ।
०गुणाश्रयेण। इति मु० पु० ।
११।६ ०वलीयाम्नायानशब्द उतनो० इति मु० पु० ।
तद्ब्रह्म० इति क० ग० मु० पु० ।
११।११ ०वपुर्बिभर्षि। इति मु० पु० ।
०मण्डलमातनोषि। इति क० ख० पु० ।
११।१२ ०गम्यं रूप महद्भिरमला० इति क० ग० पु० ।
०गम्यं रूपं द्रवद्भिरमला० इति ख० पु० ।
०मन्दयानं पादारविन्द० इति ख० मु० पु० ।
११।१३ पूर्वं तथाच कम० इति क० ख० ग० पु० ।
०वपुष्मयं० इति मु० पु० ।
०धरणाधुर्य्यधनं० इति मु० पु० ।
११।१६ नदनद्यः० इति मु० पु० ।

११।१८ ०तदन्तश्चित्रपक्षिणः। इति ग० पु०।

११।१९ ०नागराः मङ्गलायनाः। इति क० ख० ग० पु०।

११।२१ जगुः सुनायका० इति मु० पु०।

११।२२ ०दिवि गन्धर्वा० इति मु० पु०।

११।२३ ०घना जले। इति मु० पु०।

कर्णोष्टम्या० इति मु० पु०।

११।२५ ०विस्रसत्कौस्तुभ० इति ग० पु०।

११।२६ ०तडिदत्यद्भुत मेखलार्चितम्। इति मु० पु०।

०तडिदूर्ज्जद्गुणा० इति ख० पु०।

मधुभृद्ध्वनि० इति मु०पु०।

११।२८ ०ध्वनिवादतत्परम्॥ इति ख० पु०।

११।२९ ०जनेषु चाशु वै नियुतं० इति मु० पु०।

११।३० ०दुन्दुभिः स्तवैः स्तवयन्तं० इति मु० पु०।

११।३१ ०धासि कर्त्तात्वं० इति क० ख० पु०।

११।३२ एधस्सु त्वनल इवात्र वर्त० इति मु० पु०

११।३३ भूभारोद्धय० इति क० ग० पु०।

०निजवत्सपालकोऽसि। इति मु० पु०।

११।३६ ०प्राह स वृजिनार्दनः॥ इति मु० पु०।

११।३७ इयञ्च पृश्नि०० इति मु० पु०।

११।३८ कालेऽथ० इति मु० पु०।

०मन्वन्तरके० इति मु० पु०।

०पर तत्तपस. प्रजार्थी। इति मु० पु०।

११।३९ ०प्रजा पतीह्यभूत० इति ख० ग० मु० पु०।

११।४० ०तद्धामभव० इति क० ग० पु०।

श्रीवृष्णिगर्भो० इति क० पु०।

११।४१ ०ह्यद्यतनः० इति क० पु०।

०मौग्रसेनितः० इति क० पु०।

११।४२ ०स्तत्र तद्भूयः पश्यतो० मु० पु०।

इत्थं ह्यप्रकटं० इति ख० पु०।

०बालो भूत्वा यथा नटः ॥ इति ख० ग० पु० ।
११।४३ ०र्यदा गन्तु समु० इति क० ख० पु० ।
११।४५ ०वसुदेवेषु० इति ख० पु० ।
११।४६ ०फणौरागारात्० इति ख० पु० ।
११।४८ ०सर्वतः पुरम् । इति मु० पु० ।
०ददर्श स ॥ इति ग० पु० ।
११।४६ ०पुनर्गेह० इति क० पु० ।
११।५० ०जातं चाज्ञात्वा० इति मु० पु० ।
०जातं मेऽज्ञात्वा० इति ख० पु० ।
११।५२ सूतीगृहान्तरं० इति क० ख० पु० ।
०दीनवत्सरी । इति ग० पु० ।
०दीनवत्सवी । इति क० पु० ।
११।५४ नास्ति ग० पु० ।
११।५५ ०कंस आचिच्छिदे च ताम् । इति क० पु० ।
०कंसमाच्छिद्य कन्यकाम् । इति ख० पु० ।
११।५७ ०हस्तात्समुत्सृज्य० । इति क० पु० ।
०चाम्बरे गता । इति ग० मु० पु० ।
शतपत्रे रथे० इति मु० पु० ।
११।५८ ०दिव्यरुक् । इति क० ख० पु० ।
उद्यताष्टभुजा० इति क० ख० पु० ।
११।५६ ०क वा तु ते० इति ग० मु० पु० ।
०धुनोषि वै । इति ग० पु० ।
११।६२ ०प्रहन्तारं० इति ख० मु० पु० ।
०मे कृतं भुवि ॥ इति ग० मु० पु० ।
११।६३ ०श्रृणु मे शौरे० इति ग० मु० पु० ।
येन निश्चाल्यमानो वा० इति मु० पु० ।
११।६४ ०देववाक्ये० इति मु० पु० ।
०कथितो यया । इति ख० मु० पु० ।
११।६६ ०तमप्रभोः । इति ख० मु० पु० ।
११।६७ नास्ति ग० पु० ।

११।६८ जातस्तेह्यन्त० इति क० ख० पु० ।

११।७० विष्णोश्च तनवो० इति ग० मु० पु० ।
०नाशैर्दैत्यबलं० इति ख० पु० ।

११।७१ अयञ्चैतद्वधो० इति मु० पु० ।
०गवादीनाञ्च हिंसनम् । इति क० ख० पु० ।

११।७२ दुद्रुवुः खं० इति मु० पु० ।

११।७३ ०श्चेरुः सर्पा इवाभवन् । इति मु० पु० ।
०सर्वा इतस्ततः । इति ग० पु० ।

११।७४ कंसोऽपि सुप्यलिहतो० इति क० पु० ।
कपिः सुराप्यलिहतो० इति ख० ग० मु० पु० ।

११।७५ ०चतुः पदार्थान् । इति ख० ग० मु० पु० ।

१२।१ ०नन्द. शुभेक्षणे । इति क० ख० पु० ।

१२।२ ०दक्षिणाभ्यश्च० इति क० ख० ग० पु ।
०नन्दो लक्षगवां० इति ग० मु० पु० ।

१२।३ ०शिखरान् वहून् । इति क० ख० ग० पु० ।
०सप्तधान्यानि० इति मु० पु० ।

१२।४ ०वरयोषितः । इति मु० पु० ।

१२।८ ०कुङ्कुमायुक्ताश्चित्र० इति मु० पु० ।
०कुङ्कुमाषिक्ता चित्र० इति ख० पु० ।

१२।६ बर्हपुष्पै.० इति ग० मु० पु० ।

१२।१० ०मुक्ताहारविराजिताः । इति मु० पु० ।
०मुक्तास्तरविरा० इति ग० पु० ।

१२।११ वृषभानुवरो गोपः श्रुत्वा पुत्रोत्सवं परम् । इति क० ख० पु० ।

१२।१३ बद्धकुञ्जा बद्धकेशा० इति ग० मु० पु० ।
०मालाभिभूषणाः । इति मु० पु० ।

१२।१४ बद्धोपर्णापरि० इति क० ख० पु० ।

बद्धवर्णापरि० इति ग० पु० ।

१२।१६ हय्यङ्गवीन० इति मु० पु० ।
०वलीन् बहून्। इति मु० पु० ।

१२।१६ ०पुत्रोत्सवस्तथा। इति मु० पु० ।

१२।२० ०दिनं वो बहुभि० इति ग० मु० पु० ।
०कृत्याश्च भूताः स्मो० इति मु० पु० ।

१२।२२ आज्ञावर्त्ती त्वहं० इति क० ख० पु० ।
०गोपगोपीनां व्रजवासिनाम्। इति ग० मु० पु० ।

१२।२४ ०त्वरमाव्रजन्तः। इति मु० पु० ।

१२।२५ ०विन्दुकाभि.० इति मु० पु०।

१२।२६ ०लवलराहलदीविचूर्णौ० इति ग० पु० (?)

१२।२७ ०र्यथायं जनितः शिशुः ॥ इति ख० पु० ।
०र्येनायं जनितः शिशुः ॥ इति क० पु० ।

१२।२६ ०सौख्यं दया च० इति ग० मु० पु० ।

१२।३० रोहिणी च महा० इति ग० पु० ।

१२।३१ ०दाने ददावति० इति ग० मु० पु० ।

१२।३६ नास्ति ख० पु० ।

१२।३७ नास्ति ग० पु० ।
०सहस्रा गाः० इति ख० पु० ।
०हेयत्वानखिला० इति ख० पु० ।
०हयान् स्वानखि० इति क० पु० ।

१२।३८ मागधेभ्योऽथ सर्वेभ्यो बहुलञ्च धनं ददौ। इति ग० पु० ।
०मागधेभ्यश्च बहुलञ्च धन ददौ। इति० क० ख० पु० ।

१२।४२ ०मनु भूषाढ्यो० इति ख० पु० ।

१२।४३ ०मृगारूढो धनेश्वरः ॥ इति ग० पु० ।

१२।४६ ०खड्गैर्यष्टिधारिणी ॥ इति ग० मु० पु० ।

१२।४७ मङ्गलो वानरारूढो० इति ग० मु० पु० ।

०वानरारूढो बुधः स्मृतः ।
इति क० पु० ।
०कृष्णासारथ्यः० इति ख० मु० पु० ।

१२।४८ शनिश्च महिषारूढश्चो० इति क० ख० पु० ।
श्येनारूढ इत्यादि नास्ति मु० पु० ।

१२।४९ श्लोकपूर्वार्द्धं नास्ति मु० पु० ।

१२।५१ ०श्चक्रुस्तत्र स्तुति० इति क० ख० ग० पु० ।

१३।१ ०मयद्दष्ट्यर्थं० इति क० ख० ग० पु० ।

१३।२ ०पूतनाघातकारिणी । इति ग० मु० पु० ।
०ग्रामघोरेषु० इति ग० पु० ।

१३।४ ०रुरुधुर्देवाः० इति ग० मु० पु० ।

१३।५ ०हर्षितायां स्फुरत्कुचा । इति मु० पु० ।

१३।६ पपौ प्राणैः समं कृष्णः गतमाया बभूव सा ॥ इति ग० पु० ।

१३।७ नास्ति ग० पु० ।

१३।८ ०पतनेन बिलैः सह । इति क० ख० पु० ।

१३।११ ०सस्मितं शिशुम् ॥ इति ग० पु० ।

१३।१२ यशोदाया च रोहिण्या० इति ग० मु० पु० ।

१३।१३ ०गोपुच्छभ्रमणा० इति ख० ग० मु० पु० ।

१३।१७ ०भूतलेऽवतु ॥ इति ख० ग० मु० पु० ।
०भ्रूलतेऽवतु इत्येव सम्यक् इति प्रतिभाति ।

१३।२४ ०श्रीयशोमती । इति नास्ति ग० पु० ।
श्लोकोत्तरार्द्धं नास्ति ग० पु० ।

१३।२५ श्लोकपूर्वार्द्धं नास्ति ग० पु० ।
दृष्ट्वा घोरां० इति नास्ति ग० पु० ।

१३।२७ ०गन्धिभृत् । इति क० ख० ग० मु० पु० ।

१३।२८ ०पूतनायै मातृगतिं० इति क० ख० पु० ।

१३।२९ नास्ति ग० पु० ।

नारद उवाच इति नास्ति ग० पु० ।

१३।३० ०स्नेहं चकार तम्। इति क० ख० पु० ।

इतः परं १३।२६ श्लोकः वर्त्तत ग० पु० ।

१३।३१ ०बालो मे किं शुचिस्मितः। इति क० ख० पु० ।

०बालमेकं शुचिस्मितम्। इति ग० पु० ।

०बालमेनं शुचिस्मितम्। इति मु० पु० ।

१३।३२ ०मनसापि वरं० इति ख० पु० ।

१३।३३ ०स्पर्शसम्पूता० इति ग० मु० पु० ।

१३।३४ ०त्रिवर्गशुद्धिः० इति मु० पु० ।

१४।१ ०चरितं वरम्। इति ग० मु० पु० ।

१४।२ ०खण्डं पर मिष्टं० इति ग० मु० पु० ।

१४।८ ०जन्मर्क्षं० इति क० ख० पु० ।

१४।६ ०हरितस्वावृतचन्द्रहारं० इति ख० पु० ।

१४।१० ०प्रतिगोपिकास्ताः। इति ग० मु० पु०

०सरुदितस्य० इति मु० पु० ।

०सुतस्य शब्दं० इति ग० मु० पु० ।

०मङ्गलयुतेषु० इति क० ख० पु० ।

१४।११ ०शकटं परीत्य। इति क० पु० ।

०शकटं परेत्य। इति ख० पु० ।

०यदि पातयितुं० इति ग० मु० पु० ।

०तु रोदनेन। इति मु० पु० ।

० × रः पदेन। इति ग० पु० ।

१४।१३ ०व्रजजन व्रज० इति मु० पु० ।

०द्रगताश्च यूयम्॥ इति क० ख० पु० ।

१४।१४ प्रेङ्खस्थः प्रक्षिपत्पादौ० इति क० ख० पु० ।

०तेनेदं सङ्कटं त्वनु॥ इति मु० पु० ।

०तेनेदं शकटं त्वनु ॥ इति

गा० पु० ।

१४।१५ नारद उवाच इति नास्ति मु० पु० ।

०भृत्तनुः ॥ इति क० ख० पु० ।

१४।२१ ते प्रभावं० इति ग० मु० पु० ।

०देहं मे देहि० इति मु० पु० ।

१४।२२ नास्ति ग० पु० ।

०दृष्टं नयशतं० इति मु० पु० ।

रोषोऽपि वरवत्तस्य० इति क० पु० ।

१४।२३ लोमशउवाच इति नास्ति ग० पु० ।

नारद उवाच इति नास्ति ग० पु० ।

सद्भ्यो नमोऽस्तु ये नूनं० इति ग० मु० पु० ।

१४।२५ ०सेहे तं वोढुं० इति मु० पु० ।

०न सोहेत वोढुं० इति ग० पु० ।

१४।२६ ०रुदती घोरान्० इति ग० मु० पु० ।

०यदा पुत्रे० इति क० ग० मु० पु० ।

१४।३३ ०दैत्ये तत्र समुद्यते । इति ख० पु० ।

१४।३५ ०श्रीथलश्यामे लीनाभूद्दामिनी यथा । इति ख० पु० ।

०शिलायां शिशुना सह । इति मु० पु० ।

०सह मैथिल ॥ इति क० ग० पु० ।

१४।३७ तत्पृष्ठस्थं शिशुं० इति ग० मु० पु० ।

०मात्रे ददौ ततः ॥ इति ख० पु० ।

१४।३८ ०यशोदैवं बालं० इति क० ख० पु० ।

०दृष्टा शुद्धासि० इति मु० पु० ।

०दृष्टा क्रुद्ध्यसि० इति ख० पु० ।

१४।४० ०कथं बालो० इति मु० पु० ।

०चक्रवाते महाभये ॥ इति ग० मु० पु० ।

१४।४४ ०आगच्छन्ति क्षणेन वै । इति ग० मु० पु० ।

१४।४५ ०मुक्तो भविष्यत् किमतः० इति मु० पु० ।

०भवेद्तः ॥ इति ग० मु० पु० ।

१४।४६ नास्ति ग० मु० पु० ।

१४।४७ धनं नन्दगृहे सौख्यं० इति ख० पु० ।

धनं देहो गृहं सौधं० इति मु० पु० ।

धनं देवो गृहा (?) सौधो० इति ग० पुं ।

सर्वेषां तु ह्यवश्यं वै० इति ग० मु० पु० ।

१४।४८ ०इष्टं पूर्वं० इति मु० पु० ।

१४।४९ ०यष्टिरिव प्रिये । इति मु० पु० ।

१४।५० ०नन्दमन्दिरम् । इति मु० पु० ।

१४।५१ मा शोच० इति क० ख० ग० पु० ।

१४।५६ ०द्वारिकेश शिरो० इति क० ख० पु० ।

०पातु मुरध्वंसी सर्वतो० इति ग० पु० ।

१४।५७ ०त्रयमितं स्तोत्रं० इति मु० पु० ।

१४।५८ ०सहस्रं नवरत्नानि० इति क० ख० पु० ।

नास्ति ग० पु० ।

१४।५९ ०गोपान्नियम्य च । इति मु० पु० ।

नास्ति ग० पु० ।

१४।६० राजोवाच इति क० ख० पु० ।

नास्ति ग० पु० ।

१४।६१ ०द्दानकृत्परः ॥ इति क० पु० ।

१४।६२ रेवातीरे० इति क० पु० ।

०लताचित्रसमन्विते । इति क० ख० पु० ।

०सहस्राणि० इति मु० पु० ।

१४।६३ ०ननाम ह । इति ग० मु० पु० ।

१४।६४ ०पतितं नृपं० इति मु० पु० ।

१५।२ ०वक्रातिनीलनवकोमलकेशवेशम् । इति क० पु० ।

०केशवेये (?) इति ख० पु० ।

श्रीयन्त्रकेशरि० इति क० ग० पु० ।

श्रीपत्रकेशरि० इति मु० पु० ।

०तिघृणा० इति ग० मु०

पु० ।

१५।३ ०जृम्भतोऽस्य तत्त्वव्रतञ्च० इति ख० पु० ।

०जृम्भतः सा तत्त्वावृताञ्च० इति ग० पु० ।

०जृम्भतः स्यात्तत्त्वावृतञ्च वदने सकलं विराजम् । इति मु० पु० ।

मात्रासुरे० इति ग० पु० ।

मात्रा गुणेन्द्रियसुरप्रमुखं प्रयुक्तं दृष्ट्वा० इति क० ख० पु० ।

१५।४ ०कपटेन योहि । इति ख० पु० ।

०कपटेन मोहि । इति मु० पु० ।

०कपटेव मोही । इति ग० पु० ।

१५।६ अष्टानाञ्च० इति ख० पु० ।

१५।७ नास्ति ख० पु० ।

मन्दरं त्विगत० इति क० पु० ।

१५।८ नास्ति ग० पु० ।

०तप्तपर्णाशिनौ तपः । इति मु० पु० ।

१५।९ ०तपस्तत्तपतो० इति मु० पु० ।

०तपतस्तापतो० इति ग० पु० ।

०तेपात्तेस्तपसोस्तयोः । इति ख० पु० ।

१५।१० ०प्राहतं यथा ।। इति क० ख० पु० ।

१५।११ ०दावयोः स्फीतां० इति ग० पु० ।

०लक्षणम् ।। इति क० पु० ।

१५।१२ नान्यो वरो वाञ्छितः० इति क० पु० ।

१५।१३ ०दुर्लभं वरम् । इति ग० मु० प० ।

१५।१४ ०प्राप्तो घोषं० इति मु० पु० ।

१५।१५ सुधारसात्परं० इति ग० पु० ।

१५।१७ ०बलेनैव० इति क० ख० पु० ।

१५।१८ शौरिणा नोदितः० इति ग० मु० पु० ।

१५।२१ तत्पुत्रनाम० इति ग० पु० ।

१५।२२ ०वार्त्तां वदिष्यामि० इति क० पु० ।

०वार्त्तां करिष्यामि० इति ख० पु० ।

०रहःस्थले ।। इति क० ख०

पु० ।

१५।२४ ०संशोध्य सर्वतः। इति क० ख० पु० ।

१५।२५ ०शृणुष्व च। इति मु० पु० ।

शृणु स्वतः। इति ग० पु० ।

०योगिनो यस्मिन्० इति ख० ग० पु० ।

१५।२६ ०रमयन् भक्त्या० इति क० ख० पु० ।

गुणाश्च रमयेद् भक्तां० इति मु० पु० ।

०रमयत्भक्त्या० इति ग० पु० ।

१५।२७ स्वपुत्रस्यापि० इति ग० मु० पु० ।

१५।२८ अद्य प्राणि पवित्राणि० इति ग० मु० पु० ।

०रकारो राम इत्य० इति ख० प० ।

१५।३० ०ऽब्छब्दे महात्मनि। इति ख० ग० पु० ।

ऽब्छब्दे महामनौ। इति मु० पु० ।

१५।३३ वसवश्चेन्द्रियाणीतितद्देव-श्चित्त एव हि। इति ग० मु० पु० ।

वसुशब्दो (?) श्चेन्द्रियाणि तद्देवश्चित्त एव हि। इति ख० पु० ।

१५।३६ ०जातो भूभारोतारणाय च। इति ग० पु० ।

१५।३७ अन्यं तातस्य नामानि० इति ख० पु० ।

०गुह्यानि भारत। इति मु० पु० ।

१५।३८ स्वगृहे वर्त्त० इति ग० पु० ।

१५।३९ ०पूर्णमाशिषम्। इति ग० मु० पु० ।

१५।४० ०ज्ञानवरो ज्ञानदो० इति क० ख० ग० पु० ।

१५।४४ ०पाद्याद्यैरुपचा० इति ख० ग० मु० पु० ।

१५।४६ ०पर्यटनं शान्तं० इति ग० मु० पु० ।

१५।४९ वरोऽनया समो० इति ग० मु० पु० ।

०कस्मै दास्यामि० इति मु० पु० ।

१५।५० ०भानोर्महामुनिः। इति ग० मु० पु० ।

१५।५३ ०नन्दगृहे पतिः॥ इति ग०

मु० पु० ।

१५।५६ कृष्णास्य पट्ट० इति क० ख० पु० ।

०गोलोकाद्राधिका० इति क० ख० पु० ।

१५।५७ भानुः सुविस्मितः । इति मु० पु० ।

१५।५९ ०मे त्वया कार्य यदूद्वहम् । इति ग० पु० ।

०मे त्वया कार्यो यदूद्वहः । इति मु० पु०

१५।६० ०भाण्डीरे कारयिष्यति । इति ग० पु० ।

१५।६१ नास्ति ग० पु० ।

१५।६२ लोकचूडामणिः० इति मु० पु० ।

०राज्ञां गोलोकमन्दिरम् ॥ इति मु० पु० ।

१५।६३ ०गणा गोपा गोलोके० इति ग० मु० पु० ।

१५।६४ ०दुर्घटं देवैश्च यज्ञैर्नच० इति मु० पु० ।

०दुर्घटं देवैश्च० इति ग० पु० ।

०बहुगोपिकां ताम् ॥ इति ख० पु० ।

१५।६५ तदा च विस्मितौ० इति ग० मु० पु० ।

०प्रभावञ्च श्रुत्वा० इति ग० मु० पु० ।

१५।६७ ०भावार्थं गन्धमा० इति क० ख० ग० पु० ।

०मुखाच्छ्रुतम् ॥ इति क० ख० ग० पु० ।

१५।६८ ०दाकारस्त्वादिलीलया । इति क० ख० पु० ।

०धरया हि स्या० इति मु० पु ।

०धरया ह्यस्या० इति ग० पु० ।

०धरया साम्या० इति ख० पु० ।

०दापगा विरजा नदी ॥ इति ख० ग० मु० पु० ।

१५।६९ लीला श्रीभूश्च० इति क० ख० पु० ।

१५।७२ तथातिविस्मितौ० इति ख० पु० ।

१६।१ ०दूरतमं० इति मु० पु० ।

०नन्दोऽपि भाण्डीर० इति मु० पु० ।

१६।२ ०रतीव भानौ॥ इति ख० पु० ।
०रतीव भोः कौ ॥ इति ग० पु० ।
०रतीव भीकैः ॥ इति मु० पु० ।

१६।४ ०गच्छतीवाचलती दिशासु। इति मु० पु० ।
गच्छती वांललतेव सासु। इति ख० पु० ।
०गच्छती वाललतेव सा शुभा। इति क० पु० ।
०गच्छती वाचलती दिशाशु। इति ग० पु ।
बभूव तस्यां वृषभानुपुत्रीं० इति ख० ग० पु० ।
बभूव तत्र वृषभानुपुत्री० इति मु० पु० ।
०राधां नवनन्दराजः ॥ इति ग० पु० ।
०राधामथ नन्द० इति मु० पु० ।

१६।५ ०न्दुविद्युद्द्युति० इति क० ख० पु० ।
०मादिवर्णाम्। इति मु० पु० ।
०मतीव मञ्जुलम्॥ इति क० पु० ।

१६।६ ०मौक्तिकहंसिकाभिः। इति मु० पु० ।

१६।७ ०प्रियास्मि मुख्यासि० इति ग० मु० पु० ।

१६।८ ०वदामि तत्थं० (?) इति ख० पु० ।
०गुणाढ्यम्॥ इति मु० पु० ।

१६।६ ०त्वं यथेप्सितं सर्वजनैर्दु-रापम्। इति म०पु० ।
श्लोकोत्तरार्द्धं नास्ति मु० पु० ।

१६।१० श्लोकपूर्वार्द्धं नास्ति मु० पु० ।

१६।१२ ०भाण्डीरवटं० इति क० ख० पु० ।

१६।१३ ०खचित्स्ववर्णां० इति ख० पु० ।
०खचित्सुवर्णां० इति ग० मु० पु० ।
०बभूव तत्र क्षणमेव० इति क० ख० पु० ।
०बभूव साक्षात्क्षण० इति मु० पु० ।

१६।१४ ०वपुर्दधानं० इति ग० मु० पु० ।
०सुवर्णसङ्घैः० इति क० ख० पु० ।
०सुवर्णसार्धैः इति मु० पु० ।
१६।१५ मत्तालिभिर्म्फुङ्कुर इति ख० पु० ।
मत्तालिभिर्निर्मलसुन्दरी० इति ग० पु० ।
१६।१६ ०सभायुत प्राङ्गणा० इति ग० मु० पु० ।
०कोकिलाध्वनि ॥ इति क० ख० पु० ।
१६।१७ ०खचिद् घटै० इति ख० ग० पु० ।
०खचिद् भटै० इति मु० पु० ।
०विचर्चितं काञ्चनचारु पङ्कजैः ॥ इति ग० मु० पु० ।
१६।१६ ०हसत्प्रियां० इति क० ख० पु० ।
०सदर्भमद्वारि० इति मु० पु० ।
०सुदर्भमद्वारि० इति ख० पु० ।
१६।२१ तदाम्बरादेव० इति ग० मु० पु० ।
०विधिः प्रभु.० इति क० ग० मु० पु० ।
१६।२२ अनादिमध्यं० इति क० ख० पु० ।
१६।२३ गोलोकलोक० इति ग० पु० ।
१६।२४ ०दक्षिणा स्त्री० इति मु० पु० ।
०प्रतिपल्लिमुख्या ॥ इति क० पु० ।
श्लोकोत्तरार्द्धं नास्ति ग० पु० ।
१६।२५ भ्रष्टः पाठ. ग० पु० ।
०रमा हृदीयं० इति मु० पु० ।
०स्त्वञ्च नरेण० इति मु० पु० ।
०साक्षाच्छायेव याता च० इति मु० पु० ।
श्लोकोऽयं क्रमव्यत्यासेन वर्त्तते क० ख० पु० ।
१६।२७ ०विततश्चतुर्भि० इति ग० मु० पु० ।
०स्त्वमेवं० इति मु० पु० ।
१६।२८ ०परेशं परात्परं त्वां शरणं० इति ग० मु० पु० ।
१६।२६ ०युगलस्त्वमेवं० इति ख० पु० ।

इहैव शौर्य्यञ्च० इति क० ख० पु० ।
इहैव चौधार्य(?)० इति ग० पु० ।
१६।३० यदा युवां० इति ग० मु० पु० ।
०विवाहस्य च० इति ग० पु० ।
१६।३१ तदा समुस्थाय० इति ख० पु० ।
०स्तयोः परः। इति क० ख० पु० ।
श्रुतौ करग्राह० इति क० पु० ।
०स्थितोऽभूत्॥ इति ग० पु०।
१६।३२ स वाहयामास० इति ग० मु० पु० ।
०प्रदक्षिणं सप्त० इति ग० मु० पु०।
१६।३३ ०प्रपाठयन्॥ इति मु० पु०।
१६।३४ ०गले निनादिनीम्। इति ख० ग० पु० ।
१६।३५ स वासयामास० इति ख० ग० पु० ।
१६।३६ ०विद्याधरी सन्तनृतुः० (?) इति ख० पु० ।
०चारणाः कलं० इति ग० मु० पु० ।
१६।३७ ०मुरजष्टिवेणवः० इति क० पु० ।
०मुरुजष्टिवेणवः० इति ख० पु० ।
०मरुयष्टिवेणवः० इति ग० पु० ।
०मुरुयष्टिवेणवः० इति मु० पु० ।
१६।३८ ०यथेप्सित त्व० इति ग० पु० ।
१६।४१ ०प्रचचाल कञ्जे। इति ग० मु० पु० ।
०श्रीयमुनालताश्च ॥ इति क० ग० मु० पु० ।
०यमुनालतांश्च॥ इति ख० पु० ।
१६।४२ ०निकुञ्जदेशे० इति क० ख० पु० ।
१६।४३ ०हरिहस्तपद्मा० इति मु० पु० ।
०झङ्कारमङ्ग्योः० इति मु० पु० ।
१६।४४ नीलोऽद्रिराजो० इति ग०

मु० पु० ।
०श्रीराधया यस्तु० इति ख० पु० ।
०श्रीराधयास्यस्तु (?)० इति ग० पु० ।
०श्रीराधयाद्यस्तु० इति मु० पु० ।
१६।४५ ०मयूरकूजल्लते० इति मु० पु० ।
१६।४७ चचार कृष्णो० इति ग० मु० पु० ।
०वरं विहारं० इति मु० पु० ।
०वारं विहारं० इति ख० पु० ।
०वनं विहारं० इति ग० पु० ।
०कृष्णादलं सपद्मं धावन्० इति ग० पु० ।
०दलं सपद्मं० इति मु० पु० ।
१६।४८ ०ददौ लक्षदलञ्च पद्मं० इति ख० पु० ।
१६।५० ०भाण्डीरवटे० इति क० ख० ग० पु ।
पत्रावलीपावक० इति मु० पु० ।

१६।५१ समुद्यता तत्र यदाहि राधा कर्त्तुं हि शृङ्गारमलं परस्य । इति क० ख० पु० ।
०कैशोरमयं वपुः स्वयम् ॥ इति क० ख० पु० ।
१६।५२ ०मा यथा । इति ख० पु० ।
०मा भयात् । इति ग० मु० पु० ।
०मायां हि कथं० इति क० ख० पु० ।
१६।५३ इत्थं वदन्तीं० इति क० पु० ।
शोचन्तु राधे० इति क० ख० पु० ।
१६।५४ ०गत्वाशु गेहे० इति ग० पु० ।
०गताशु गेहे० इति मु० पु० ।
०व्रजराजपत्न्याः । इति ग० मु० पु० ।
१६।५६ ०सद्गुणश्लाघिता सा० इति मु० पु० ।
०सद्गुणश्लाघिता च० इति ग० पु० ।
०संनन्दिता श्रीवृष० इति ग० पु० ।
०सानन्दिता श्रीवृष० इति मु० पु० ।

यदाह्यनु० इति ग० मु० पु० ।
६ ०निजगाम राधा ॥ इति मु० पु० ।
७ स्तुता च यै० इति ख० पु० ।
श्रुत्वा च यै० इति ग० पु० ।
०पठिता च ध्यापिता० इति ग० पु० ।

०कृष्णारामौ० इति मु० पु० ।
लीलां प्रचक्रतुरलं सुन्दरां० इति क० ख० पु० ।
व्रजं ता च कालेन० इति क० पु० ।
व्रजे चापल्यकालेन० इति ख० पु० ।
अयञ्च श्लोकः चतुर्थश्लोकादनन्तरं दृश्यते ग० पु० ।
कदा विनिर्गता० इति मु० पु० ।
०तौ मायाबालक० इति क० ख० पु० ।
०लेपाधृतधूसरा० इति ख० ग० पु० ।
०प्रोत्तग्यामाततान ॥ इति क० ख० पु० ।
०च समं कराभ्यां० इति ग० मु० पु० ।
१७।८ ०राजव्रजमेत्य० इति ग० मु० पु० ।
०सर्वा सुविस्मृतगृहाः० इति क० पु० ।
१७।१३ ०नित्यं दानं प्रचक्रतुः ॥ इति ग० पु० ।
१७।१५ ०वयस्यैर्व्रजबालकैः । इति ग० मु० पु० ।
यमुनासिकते० इति ग० मु० पु० ।
१७।१६ ०शोभाढ्ये चेरतू० इति मु० पु० ।
१७।२० ०वदामि चानेन० इति क० ख० ग० मु० पु० ।
शिक्षां करोति० इति क० ख० ग० पु० ।
न श्रुते नवनीतमनिश्चतः (?) ॥ इति ग० पु० ।
१७।२१ ०तदा रुष्टस्तवा० इति क० ख० पु० ।
०प्रदानं दत्त्वार्यं० इति ख० ग० मु० पु० ।
१७।२४ ०गृहे ह्यस्ति० इति क० ख० पु० ।
०मुड् बालं० इति ग० मु०

पु० ।
०नास्ति सोऽत्र० इति ग० पु० ।
०नाति सत्र० इति ख० पु० ।
१७।२५ ते शिशौ मे शिशौ० इति मु० पु० ।
१७।२६ ०चैनं मोलतो स्वानयिष्यति । इति ख० पु० ।
०चैनमत्र त्वं० इति मु० पु० ।
०मन्त्र सौखानयिष्यति (?) । इति ग० पु० ।
१७।२८ ०कुड्ये गृहेषु च । इति क० ख० पु० ।
१७।२९ उलूखले पीठकञ्च गोप्यं० इति क० ख० पु० ।
उलूखले पीठके च० इति मु० पु० ।
०गोप स्थाप्या० इति ग० प० ।
१७।३० नास्ति क० ख० ग० पु० ।
१७।३१ भाण्डभाण्डात् स्वयं गव्यं० इति क० ख० पु० ।
श्लोकप्रथमपादः नास्ति ग० पु० ।
१७।३२ भाण्डभाण्डस्वन० इति क० ख० पु० ।
१७।३३ ०विंचिन्त्यन् नित्यं० इति ग० मु० पु० ।
०विंचिन्तयं नित्यं० इति ख० पु० ।
१७।३५ भाण्डं भस्मीकृतं० इति ग० मु० पु० ।
१७।३६ ३७ श्लोकादनन्तरं वर्त्तते ग० पु० ।
०पटांहसः ॥ इति ख० पु० ।
१७।३६ निपटस्त्वं कुतः० इति ख० पु० ।
०प्राप्तो वर्ज्यमानोऽपि मे० इति ग० पु० ।
१७।४० ०दशोन्यायो व्रजे० इति ख० ग० पु० ।
०दश्यो न्यायो व्रजे० इति मु० पु० ।
१७।४२ ०यदि गत्वासि कदाचिद्० इति ख० पु० ।
०कदाचिद् यदि गोपिके । इति क० ख० पु० ।
०रूपश्च तदा० इति मु० पु० ।
१७।४३ श्रुत्वा सुविस्मिता० इति मु० पु० ।

गः मुः पुः ।

१६।८ ०स्वसुते यशोदा ॥ इति गः मुः पुः ।

१६।६ ०नृप स्विन्नमानसा ॥ इति कः पुः ।

०नेच्छाखिन्ना० इति गः मुः पुः ।

०नृपछिन्नमानसा ॥ इति गः मुः पुः ।

१६।१० एवं प्रसादो० इति गः मुः पुः ।

०कर्मभियां कुतः० इति गः पुः ।

०नृप एव तस्मात्० इति गः पुः ।

१६।११ तथैव गोप्यस्तु० इति कः पुः ।

१६।१२ अस्मद् गृहेतु० इति कः गः पुः ।

तदप्येनं नो० इति गः मुः पुः ।

१६।१३ यशोदे से महेश्वरी । इति गः पुः ।

१६।१७ पतनेनासिशब्दो० इति कः पुः ।

पतनेनाभिशब्दो० इति मुः पुः ।

१६।१८ ०नत्वा नतौ तत्सम्मुखे० इति गः मुः पुः ।

१६।२५ श्लोकोत्तरार्द्धं नास्ति गः पुः ।

१६।२६ श्लोकपूर्वार्द्धं नास्ति गः पुः ।

१६।२८ ०गायमानौ चेरतु० इति कः खः पुः ।

१६।३३ इत्थं देवल० इति गः मुः पुः ।

२०।१ नास्ति गः पुः ।

२०।२ ०निकटे पुण्ये० इति गः मुः पुः ।

०च कृष्णमारात्० इति गः मुः पुः ।

२०।४ धावद्भिर्बालकैः० इति कः खः पुः ।

२०।५ ईश्वरोऽयञ्च भगवान्० इति गः पुः ।

स ईश्वरोऽयं० इति मुः पः ।

य ईश्वरोऽयं० इति खः पुः ।

२०।६ ०ह्यागतः पुनः ॥ इति कः खः पुः ।

२०।७ नास्ति गः पुः ।

०सम्मुख पुनरा० इति मु० पु० ।

२०।८ ०सोऽरण्यं जन० इति ख० पु० ।

२०।९ तदेवाजगरेणापि० इति मु० पु० ।

२०।१४ ०लोकेषु विधेरायुः समं चरन्। इति ग० मु० पु० ।

२०।१५ एवं छिद्रं० इति ग० मु० पु० ।

प्राविशत् स हरिं स्मरन्। इति ग० मु० पु० ।

२०।१६ श्लोकस्यान्तिमः पादः नास्ति क० ख० पु० ।

२०।१७ नास्ति ख० पु० ।

२०।१८ श्लोकस्याद्यः पादः नास्ति ख० पु० ।

श्लोकान्तिमः पादः नास्ति क० ख० पु० ।

२०।१९ नास्ति क० ख० पु० ।

२०।२० श्लोकस्याद्यः पादः नास्ति क० ख० पु० ।

०गोलोकं स्वं ददर्श० इति ग० मु० पु० ।

२०।२२ ०विचरन्तं महामुने ॥ इति ख० ग० पु० ।

२०।२४ ०मन्दपानं० इति मु० पु० ।

०मलं मनसा नमामि ॥ इति क० ख० पु० ।

२०।२५ ०नवहेमकाञ्ची० इति क० ख० पु० ।

०हारकेसरिनख० इति क० ग० मु० पु० ।

०विन्दुविलज्जमानं० इति ख० पु० ।

२०।२६ ०सुन्दरमुखं परि० इति क० ख० पु० ।

०घनराजिनिभाः० इति क० पु० ।

०घननीलनिभाः० इति ग० पु० ।

०घननालिलिभाः इति ख० पु० ।

०शिरः कुतुकेन यस्य० इति क० पु० ।

०नमो नमस्ते ॥ इति ग० मु०पु० ।

२०।२७ ०प्रातः काले तु यः० इति क० ख० पु० ।

२०।२८ श्लोकद्वितीयपादः श्लोकोत्तरार्द्धं सहितः नास्ति ग० पु० ।

२०।२६ गर्ग उवाच इति श्लोकपूर्वार्द्धञ्च न स्तः ग० पु० ।
श्लोकोत्तरार्द्धेऽपि कथितं कृष्णां इति नास्ति ग० पु० ।

२०।३१ ०तन्मे ब्रूहि तपोधन ॥ इति ग० मु० पु० ।

२०।३२ ०मैथिलेश्वरः । इति ग०पु० ।

२०।३४ ०श्चरितं कृतं वै० इति ख० ग० मु० पु० ।
०विचित्रं वद चतः परम् ॥ इति ख० पु० ।
०पवित्रं किमतः परम् ॥ इति ग० मु० पु० ।

२०।३५ ०हं सम्प्रवक्ष्यामि वृन्दा० इति ग० मु० पु० ।

२०।३६ ०परममद्भुतम् । इति ग० मु० पु० ।

२०।३७ ०राधिकायै च० इति ग० मु० पु० ।

२०।३८ इदं पठति विप्र० इति ग० मु० पु० ।

२०।३९ ०मुच्येत बन्धनात् । इति ग० मु० पु० ।
निष्फलो योऽपि० इति ख० ग० मु० पु ।

——

श्रीगणेशाय नमः ।

गर्गसंहिता

(वृन्दावन खण्डः)

कृष्णातीरे कोकिलाकेलिकीरे
गुञ्जापुञ्जे देवपुष्पादिकुञ्जे ।
कम्बुग्रीवौ क्षिप्तबाहू चलन्तौ
राधाकृष्णौ मङ्गलं मे भवेताम् ॥१
अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया ।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥२

नारद उवाच

एकदोपद्रवं वीक्ष्य नन्दो नन्दान् सहायकान् ।
वृषभानूपनन्दांश्च वृषभानुवरास्तथा ॥३
समाहूयापरान् वृद्धान् सभायां तानुवाच ह ।

नन्दराजोवाच

किं कर्त्तव्यं नु वदतोत्पाताः सन्ति महावने ॥४

नारद उवाच

तेषां श्रुत्वाथ सन्नन्दो गोपवृद्धोऽतिमन्त्रवित् ।
अङ्के नीत्वा रामकृष्णौ नन्दराजमुवाच ह ॥५

सन्नन्द उवाच

उत्थातव्यमितोऽस्माभिः सर्वैः परिकरैः सह ।
गन्तव्यं चान्यदेशेषु यत्रोत्पाता न सन्ति हि ॥६

बालस्ते प्राणवत् कृष्णो जीवनं व्रजवासिनाम् ।
व्रजे धनं कुले दीपो मोहनो बाललीलया ॥७

हा वक्या शकटेनापि तृणावर्तेन बालकः ।
मुक्तोऽयं द्रुमपातेन ह्युत्पातः किमतःपरम् ॥८

तस्माद्वृन्दावनं सर्वैर्गन्तव्यं बालकैः सह ।
उत्पातेषु व्यतीतेषु पुनरागमनं कुरु ॥९

नन्द उवाच

कति क्रोशैर्विस्तृतं तद्वनं वृन्दावनं व्रजात् ।
तल्लक्षणं तत्सुखञ्च वद बुद्धिमतां वर ॥१०

सन्नन्द उवाच

प्रागुदीच्यां बर्हिषदो दक्षिणस्यां यदोः पुरात्
पश्चिमायां शोणपुरान्माथुरं मण्डलं विदुः ॥११

विशद्योजनविस्तीर्णं सार्द्धं यद्योजनेन वै ।
माथुरं मण्डलं दिव्यं व्रजमाहुर्मनीषिणः ॥१२

मथुरायां शौरिगृहे गर्गाचार्यमुखाच्छ्रुतम् ।
माथुरं मण्डलं दिव्यं तीर्थराजेन पूजितम् ॥१३

वनेभ्यस्तत्र सर्वेभ्यो वनं वृन्दावनं वरम् ।
परिपूर्णतमस्यापि लीलाक्रीडं मनोहरम् ॥१४

वैकुण्ठान्नापरो लोको न भूतो न भविष्यति ।
एकं वृन्दावनं नाम वैकुण्ठाच्च परात्परम् ॥१५

यत्र गोवर्द्धनो नाम गिरिराजो विराजते ।
कालिन्दीनिकटे यत्र पुलिनं मङ्गलायनम् ॥१६

बृहत्सानुर्गिरिर्यत्र यत्र नन्दीश्वरो गिरिः ।
क्रोशानाञ्च चतुर्विंशद्भिस्तृतैः काननैर्वृतम् ॥१७

पशव्यं गोपगोपीनां गवां सेव्यं मनोहरम् ।
लताकुञ्जवृतं तद्वै वनं वृन्दावनं स्मृतम् ॥१८

नन्द उवाच

कदा व्रजोऽयं सन्नन्द तीर्थराजेन पूजित. ।
एतद्वेदितुमिच्छामि परं कौतूहल हि मे ॥१९

सन्नन्द उवाच

शङ्खासुरो महादैत्य. पुरा नैमित्तके लये ।
स्वपतो ब्रह्मण: सोऽपि वेदध्रुक् दैत्यपुङ्गवः ॥२०
जित्वा देवान् ब्रह्मलोकान्नीत्वा वेदान् गतोऽर्णवे ।
गतेषु यदि वेदेषु देवानाञ्च गतं बलम् ॥२१
तदा साक्षाद्धरिः पूर्णो धृत्वा मात्स्यं वपुः परम् ।
नैमित्तिकलयाम्भोधौ युयुधे तेन यज्ञराट् ॥ २२
शूलं चिक्षेप हरये शङ्खो दैत्यो महाबलः ।
स्वचक्रेण हरि साक्षात्तच्छूलं शतधाऽकरोत् ॥ २३
हरिं तताड शिरसा शङ्खो विष्णुमुरः स्थले ।
तस्य मूर्द्धप्रहारेण न चचाल परात्परः ॥ २४
तदा गदां समादाय मत्स्यरूपधरो हरिः ।
पृष्ठे जघान तं दैत्यं शङ्खरूपं महाबलम् ॥ २५
गदाप्रहारव्यथित. किञ्चिद्व्याकुलमानसः ।
पुनरुत्थाय सर्वेशं मुष्टिना स तताड ह ॥ २६
तदा विष्णुः स्वचक्रेण सशृङ्गं तच्छिरो दृढम् ।
जहार कुपितः साक्षाद्भगवान् कमलेक्षणः ॥ २७
जित्वा शङ्खं देववरैः सार्द्धं विष्णुर्व्रजेश्वरः ।
प्रयागमेत्य स हरिर्वेदांस्तान् ब्रह्मणे ददौ ॥ २८

यज्ञं चकार विधिवत् सर्वदेवगणैः सह ।
प्रयागञ्च समाहूय तीर्थराजं चकार ह ॥ २९
तत्साक्षादक्षयवटः कृतो लीलातपत्रवत् ।
मुनिभानुसुते चोर्मिचामरैस्ते विरेजतुः ॥ ३०
तदैव सर्वतीर्थानि जम्बुद्वीपस्थितानि च ।
नीत्वा बलिं समाजग्मुस्तीर्थराजाय धीमते ॥ ३१
तीर्थराजञ्च सम्पूज्य नत्वा तीर्थानि सर्वतः ।
स्वधामानि ययुर्नन्द हरौ देवैर्गते सति ॥ ३२
तदैव नारदः प्राप्तो मुनीन्द्रः कलहप्रियः ।
सिंहासने भ्राजमान तीर्थराजमुवाच ह ॥ ३३

नारद उवाच

तीर्थैः प्रपूजितस्त्वं वै तीर्थराज महातपः ।
तुभ्यञ्च सर्वतीर्थानि मुख्यानीह बलिं ददुः ॥ ३४
व्रजा वृन्दावनादीनि नागतानीह ते पुरः ।
तीर्थानां राजराजस्त्वं प्रमत्तैस्तैस्तिरस्कृतः ॥ ३५

सन्नन्द उवाच

इति प्रभाष्य तं साक्षाद् गते देवर्षिसत्तमे ।
तीर्थराजस्तदा क्रुद्धो हरिलोकं जगाम ह ॥ ३६
नत्वा हरिं परिक्रम्य पुरः स्थित्वा कृताञ्जलिः ।
सर्वतीर्थैः परिवृतः श्रीनाथं प्राह तीर्थराट् ॥ ३७

तीर्थराज उवाच

हे देवदेव प्राप्तोऽहं तीर्थराजस्त्वया कृतः ।
बलिं ददुर्मे तीर्थानि मथुरामण्डलं विना ॥ ३८
प्रमत्तैर्व्रजतीर्थैश्च तैरहन्तु तिरस्कृतः ।
तस्मात्तुभ्यञ्च कथितं प्राप्तोऽहं तव मन्दिरे ॥ ३९

भगवानुवाच

धरायां सर्वतीर्थानां त्वं कृतस्तीर्थराण्मया ।
किन्तु स्वस्य गृहस्यापि न कृतो राट् त्वमेव हि ।। ४०
किं त्वं मे मन्दिरं लिप्सुर्मत्तवद्भाषसे कथम् ।
तीर्थराज गृहं गच्छ शृणु वाक्यं शुभञ्च मे ।। ४१
मथुरामण्डलं साक्षान्मन्दिरं मे परात्परम् ।
लोकत्रयात् परं दिव्यं प्रलयेऽपि न संहृतम् ।। ४२

सन्नन्द उवाच

इति श्रुत्वा तीर्थराजो विस्मितोऽभूद् गतस्मयः ।
आगत्य नत्वा सम्पूज्य माथुरं व्रजमण्डलम् ।
ततः प्रदक्षिणीकृत्य स्वधाम गतवान् पुनः ।। ४३
धराया मानभङ्गार्थं पूर्वमेतत् प्रदर्शितम् ।
मया तवाग्रे कथितं किं भूयः श्रोतुमिच्छसि ।। ४४

नन्द उवाच

धराया मानभङ्गार्थं केन पूर्वं प्रदर्शितम् ।
एतन्मे वद गोपेश माथुरं व्रजमण्डलम् ।। ४५

सन्नन्द उवाच

आदौ वाराहकल्पेऽस्मिन् हरिर्वाराहरूपधृक् ।
रसातलात् सुमुद्धृत्य गां बभौ दंष्ट्रया प्रभुः ।। ४६
गच्छन्त वारिवृन्देषु भगवन्तं रमेश्वरम् ।
दंष्ट्राग्रशोभिता पृथ्वी प्राह देवं जनार्दनम् ।। ४७

धरोवाच

देव कुत्र स्थले त्वं वै स्थापनां मे करिष्यसि ।
जलपूर्णं जगत्सर्वं दृश्यते वद हे प्रभो ।। ४८

वाराह उवाच

यदा वृक्षाः प्रदृष्टा हि भवन्त्युद्वेगता जले ।
तदा ते स्थापना भूयात् पश्यन्ती गच्छ भूरुहान् ॥ ४९

धरोवाच

स्थावराणान्तु रचना ममोपरि समाश्रिता ।
अन्यास्ति किंवा धरणी त्वहं हि धारणामयी ॥ ५०

सन्नन्द उवाच

वदन्तीत्थं ददर्शाग्रे जले वृक्षान् मनोहरान् ।
वीक्ष्य पृथ्वी हरिं प्राह सर्वतोऽपि गतस्मया ॥ ५१

धरोवाच

देव कस्मिन् स्थले वृक्षाः सन्ति ह्येते सपल्लवाः ।
इदं मनसि मे चित्रं वद यज्ञपते प्रभो ॥ ५२

वाराह उवाच

माथुरं मण्डल दिव्यं दृश्यतेऽग्रे नितम्बिनि ।
गोलोकं भूमिसयुक्तं प्रलयेऽपि न संहृतम् ॥ ५३

सन्नन्द उवाच

तच्छ्रुत्वा विस्मिता पृथ्वी गतमाना बभूव ह ।
तस्मान्नन्द महाबाहो व्रजोऽयं सर्वतोऽधिकः ॥ ५४
श्रुत्वेदं व्रजमाहात्म्य जीवन्मुक्तो भवेन्नरः ।
तीर्थराजात् परं विद्धि माथुरं व्रजमण्डलम् ॥ ५५

इति श्रीगर्गसंहितायां वृन्दावनखण्डे नन्दसन्नन्द -
संवादे वृन्दावनोद्योगवर्णनं नाम
प्रथमोऽध्यायः ॥१

नन्द उवाच

हे सन्नन्द महाप्राज्ञ सर्वज्ञोऽसि बहुश्रुतः ।
व्रजमण्डलमाहात्म्यं वदतस्ते मुखाच्छ्रुतम् ॥ १
गिरिर्गोवर्द्धनो नाम तस्योत्पत्तिश्च मे वद ।
कस्मादेनं गिरिवरं गिरिराजं वदन्ति हि ॥ २
यमुनेयं नदी साक्षात् कस्माल्लोकात् समागता ।
तन्माहात्म्यञ्च वद मे त्वमसि ज्ञानिनां वरः ॥ ३

सन्नन्द उवाच

एकदा हास्तिनपुरे भीष्मं धर्मभृतां वरम् ।
पप्रच्छ पाण्डुरित्थं तं जनानां चानुशृण्वताम् ॥ ४
परिपूर्णतमः साक्षाच्छ्रीकृष्णो भगवान् स्वयम् ।
असङ्ख्यब्रह्माण्डपतिर्गोलोकाधिपतिः प्रभुः ॥ ५
भुवो भारावताराय गच्छन् देवो जनार्दनः ।
राधां प्राह प्रिये भीरु गच्छ त्वमपि भूतले ॥ ६

राधोवाच

यत्र वृन्दावनं नास्ति न यत्र यमुना नदी ।
यत्र गोवर्द्धनो नास्ति तत्र मे न मनः सुखम् ॥ ७

सन्नन्द उवाच

वेदनागक्रोशभूमिं स्वधाम्नः श्रीहरिः स्वयम् ।
गोवर्द्धनञ्च यमुनां प्रेषयामास भूपरि ॥ ८
वेदनागक्रोशभूमिः सापि चात्र समागता ।
चतुर्विंशद्वनैर्युक्ता सर्वलोकैश्च वन्दिता ॥ ९

भारतात्पश्चिमदिशि शाल्मलीद्वीपमध्यतः ।
गोवर्द्धनो जन्म लेभे पत्न्यां द्रोणाचलस्य च ॥ १०
गोवर्द्धनोपरि सुराः पुष्पवर्षं प्रचक्रिरे ।
हिमालयसुमेर्वाद्याः शैलाः सर्वे समागताः ॥ ११
नत्वा प्रदक्षिणीकृत्य पूजां कृत्वा विधानतः ।
गोवर्द्धनस्य परमां स्तुतिं चक्रुर्महाद्रयः ॥ १२

शैला ऊचुः

त्वं साक्षात् कृष्णचन्द्रस्य परिपूर्णतमस्य च ।
गोलोके गोगणैर्युक्तो गोपीगोपालसंयुतः ॥ १३
त्वं हि गोवर्द्धनो नाम वृन्दारण्ये विराजसे ।
त्वं नो गिरीणां सर्वेषां गिरिराजोऽसि साम्प्रतम् ॥ १४
नमो वृन्दावनाङ्काय तुभ्यं गोलोकमौलिने ।
पूर्णब्रह्मातपत्राय नमो गोवर्द्धनाय च ॥ १५

सन्नन्द उवाच

इति स्तुत्वाथ गिरयो जग्मुः स्वं स्वं गृहं ततः ।
शैलो गिरिवरः साक्षाद् गिरिराज इति स्मृतः ॥ १६
एकदा तीर्थगामी च पुलस्त्यो मुनिसत्तमः ।
द्रोणाचलसुतं श्यामं गिरिं गोवर्द्धनं वरम् ॥ १७
माधवीलतिकापुष्पफलभारसमन्वितम् ।
निर्झरैर्नादितं शान्तं कन्दरामङ्गलायनम् ॥ १८
तपोयोग्यं रत्नमयं शतशृङ्गं मनोहरम् ।
चित्रधातुविचित्राङ्गं सटङ्कं पक्षिसङ्कुलम् ॥ १९
मृगैः शाखामृगैर्व्याप्तं मयूरध्वनिमण्डितम् ।
मुक्तिप्रदं मुमुक्षूणां तं ददर्श महामुनिः ॥ २०
तल्लिप्सुर्मुनिशार्दूलो द्रोणपार्श्वे समागतः ।
पूजितो द्रोणगिरिणा पुलस्त्यः प्राह तं गिरिम् ॥ २१

पुलस्त्य उवाच

हे द्रोण त्वं गिरीन्द्रोऽसि सर्वदेवैश्च पूजितः ।
दिव्यौषधिसमायुक्तः सदा जीवनदो नृणाम् ॥ २२
अर्थी तवान्तिके प्राप्तः काशीस्थोऽहं महामुनिः ।
गोवर्द्धनं सुतं देहि नान्यैर्मेऽत्र प्रयोजनम् ॥ २३
विश्वेश्वरस्य देवस्य काशीनाम्ना महापुरी ।
यत्र पापी मृतः सद्यः परं मोक्षं प्रयाति हि ॥ २४
यत्र गङ्गाऽऽगता साक्षाद्विश्वनाथोऽपि यत्र वै ।
तत्रैनं स्थापयिष्यामि यत्र कोऽपि न पर्वतः ॥ २५
गोवर्द्धने तव सुते लतावृक्षसमाकुले ।
तस्मिंस्तपः करिष्यामि जातोऽयं मे मनोरथः ॥ २६

सन्नन्द उवाच

पुलस्त्यवचनं श्रुत्वा स्वसुतस्नेहविह्वलः ।
अश्रुपूर्णो द्रोणगिरिस्तं मुनिं वाक्यमब्रवीत् ॥ २७

द्रोण उवाच

पुत्रस्नेहाकुलोऽहं वै पुत्रो मेऽयमतिप्रियः ॥
ते शापभयभीतोऽहं ददाम्येनं महामुने ॥ २८
हे पुत्र गच्छ मुनिना भारते कर्मकौ शुभे ।
त्रैवर्ग्यं लभते यत्र नृभिर्मोक्षमपि क्षणात् ॥ २९

गोवर्द्धन उवाच

मुने कथं मां नयसि लम्बितं योजनाष्टकम् ।
योजनद्वयमुच्चाङ्गं पञ्चयोजनविस्तृतम् ॥ ३०

पुलस्त्य उवाच

उपविश्य करे मे त्वं गच्छ पुत्र यथासुखम् ।
वाहयामि करे त्वां वै यावत्काशीसमागमः ॥ ३१

गोवर्द्धन उवाच

मुने यत्र स्थले भूम्यां स्थापनां मे करिष्यसि ।
करिष्यामि नचोत्थानं तद्भूम्याः शपथो मम ॥ ३२

पुलस्त्य उवाच

अहमाशाल्मलिद्वीपान्मर्यादीकृत्य कौशलम् ।
न स्थापनां करिष्यामि शपथस्तेऽपि मे पथि ॥ ३३

सन्नन्द उवाच

मुनेः करतले तस्मिन्नारुरोह महाचलः ।
प्रणम्य पितरं द्रोणमश्रुपूर्णाकुलेक्षणः ॥ ३४
मुनिस्तं दक्षिणकरे धृत्वा गच्छन् शनैः शनैः ।
स्वतेजो दर्शयन्नृणां प्राप्तोऽभूद् व्रजमण्डले ॥ ३५
जातिस्मरो गिरिस्तत्र प्राहेदं पथि चिन्तयन् ।
परिपूर्णतमः साक्षाच्छ्रीकृष्णो भगवान् स्वयम् ॥ ३६
असङ्ख्यब्रह्माण्डपतिर्व्रजेऽत्रावतरिष्यति ।
बाललीलाश्च कैशोरीं चेष्टां गोपालबालकैः ॥ ३७
दानलीलां मानलीलां हरिरत्र करिष्यति ।
तस्मान्मया न गन्तव्यं भूमिश्चेयं कलिन्दजा ॥ ३८
गोलोकाद्राधया सार्द्धं श्रीकृष्णोऽत्रागमिष्यति ।
कृतकृत्यो भविष्यामि कृत्वा तद्दर्शनं परम् ॥ ३९
इति विचार्य मनसा भूरिभारं ददौ करे ।
तदा मुनिश्च श्रान्तोऽभूद्भूतपूर्वगतस्मृतिः ॥ ४०
करादुत्तार्य तं शैलं निधाय व्रजमण्डले ।
लघुशङ्काजयार्थं हि गतोऽभूद्भारपीडितः ॥ ४१
कृत्वा शौचं जले स्नात्वा पुलस्त्यो मुनिसत्तमः ।
उत्तिष्ठेति मुनिः प्राह गिरिं गोवर्द्धनं वरम् ॥ ४२

नोत्थितं भूरिभाराढ्यं कराभ्यां त महामुनिः ।
स्वतेजसा बलेनापि ग्रहीतुमुपचक्रमे ॥ ४३
मुनिना संगृहीतोऽपि गिरिराजो गिराद्रया ।
न चचालाङ्गुलिं किञ्चित्तदपि द्रोणनन्दनः ॥ ४४

पुलस्त्य उवाच

गच्छ गच्छ गिरिश्रेष्ठ भारं मा कुरु मा कुरु ।
मया ज्ञातोऽसि रुष्टस्त्वमभिप्रायं वदाशु मे ॥ ४५

गोवर्द्धन उवाच

मुने न मेऽत्र दोषोऽस्ति त्वया मे स्थापना कृता ।
करिष्यामि नचोत्थानं पूर्वं मे शपथः कृतः ॥ ४६

सन्नन्द उवाच

पुलस्त्यो मुनिशार्दूलः क्रोधात् प्रचलितेन्द्रियः ।
स्फुरदोष्ठो द्रोणपुत्रं शशाप विगतोद्यमः ॥ ४७

पुलस्त्य उवाच

गिरे त्वयातिधृष्टेन न कृतो मे मनोरथः ।
तस्मात्तु तिलमात्रं हि नित्यं त्वं क्षीणतां व्रज ॥ ४८

सन्नन्द उवाच

काशीं गते पुलस्त्यर्षावयं गोवर्द्धनो गिरिः ।
नित्यं संक्षीयते नन्द तिलमात्रं दिने दिने ॥ ४९
यावद्भागीरथी गङ्गा यावद्गोवर्द्धनो गिरिः ।
तावत् कलेः प्रभावस्तु भविष्यति न कर्हिचित् ॥ ५०

गोवर्द्धनस्य प्रकटं चरित्रं
नृणां महापापहरं पवित्रम् ।
मया तवाग्रे कथितं विचित्रं
सुमुक्तिदं कौ रुचिरं न चित्रम् ॥ ५१

इति श्रीगर्गसंहितायां वृन्दावनखण्डे नन्दसन्नन्दसंवादे
गिरिराजोत्पत्तिकथनं नाम
द्वितीयोऽध्यायः ॥ २

सन्नन्द उवाच

गोलोके हरिणाज्ञप्ता कालिन्दी सरितां वरा ।
कृष्णं प्रदक्षिणीकृत्य गन्तुमभ्युदिताऽभवत् ॥१
तदैव विरजा साक्षाद् गङ्गा ब्रह्मद्रवोद्भवा ।
द्वे नद्यौ यमुनायान्तु संप्रलीने बभूवतुः ॥२
परिपूर्णतमां कृष्णां तस्मात् कृष्णस्य नन्दराट् ।
परिपूर्णतमस्यापि पट्टराज्ञीं विदुर्जनाः ॥३
ततो वेगेन महता कालिन्दी सरितां वरा ।
बिभेद विरजावेगं कुञ्जद्वारांयनिर्गता ॥४
असङ्ख्यब्रह्माण्डचयं स्पृष्ट्वा ब्रह्मद्रवं गता ।
भिन्दन्ती तज्जलं दीर्घं स्ववेगेन महानदी ॥५
वामपादाङ्गुष्ठनखभिन्नब्रह्माण्डमस्तके ।
श्रीवामनस्याविवरे ब्रह्मद्रवसमाकुले ॥६
तस्मिन् श्रीगङ्गया सार्द्धं प्रविष्टाभूत् सरिद्वरा ।
वैकुण्ठञ्चाजितपदं सम्प्राप्य ध्रुवमण्डले ॥७
ब्रह्मलोकमभिव्याप्य पतन्ती ब्रह्ममण्डलात् ।
ततः सुराणां शतशो लोकाल्लोकं जगाम ह ॥८
ततः पपात वेगेन सुमेरुगिरिमूर्द्धनि ।
गिरिकूटानतिक्रम्य भित्त्वा गण्डशिलातटान् ॥९
सुमेरोर्दक्षिणदिशं गन्तुमभ्युदिताऽभवत् ।
ततः श्रीयमुनासाक्षाच्छ्रीगङ्गायां विनिर्गता ॥१०
गङ्गा तु प्रययौ शैलं हिमवन्तं महानदी ।
कृष्णा तु प्रययौ शैल कलिन्दं प्राप्य सा यदा ॥११

कालिन्दीति समाख्याता कलिन्दप्रभवा यदा ।
कलिन्दगिरिसानूनां गण्डशैलतटान् दृढान् १२
भित्त्वा लुठन्ती भूखण्डे कृष्णा वेगवती सती ।
देशान् पुनन्ती कालिन्दी प्राप्ता सा खाण्डवे वने ॥१३
परिपूर्णतमं साक्षाच्छ्रीकृष्ण वरमिच्छती ।
धृत्वा वपु. पर दिव्य तपस्तेपे कलिन्दजा ॥१४
पित्रा विनिर्मिते गेहे जलेऽद्यापि समाश्रिता ।
ततो वेगेन कालिन्दी प्राप्ताऽभूद् व्रजमण्डले ॥१५
वृन्दावनसमीपे च मथुरानिकटे शुभे ।
श्रीमहावनपार्श्वे च सैकते रमणस्थले ॥१६
श्रीगोकुले च यमुना यूथीभूत्वाऽतिसुन्दरी ।
श्रीकृष्णचन्द्ररासार्थं निजवास चकार ह ॥१७
अथो व्रजाद् व्रजन्ती सा व्रजविक्षेपविह्वला ।
प्रेमानन्दाश्रुसंयुक्ता भूत्वा पश्चिमवाहिनी ॥१८
ततस्त्रिवारं वेगेन नत्वा श्रीव्रजमण्डलम् ।
देशान् पुनन्ती प्रययौ प्रयागं तीर्थसत्तमम् ॥१६
पुनः श्रीगङ्गया सार्द्धं क्षाराब्धि सा जगाम ह ।
देवाः सुवर्षं पुष्पाणां चक्रुर्दिवि जयध्वनिम् ॥२०
कृष्णा श्रीयमुना साक्षात् कालिन्दी सरितां वरा ।
समुद्रमेत्य श्रीगङ्गां प्राह गद्गदया गिरा ॥२१

यमुनोवाच

हे गङ्गे त्वन्तु धन्यासि सर्वब्रह्माण्डपावनी ।
कृष्णपादाब्जसम्भूता सर्वलोकैकवन्दिता ॥२२
ऊर्ध्वं यामि हरेर्लोकं गच्छ त्वमपि हे शुभे ।
त्वत्समानं न तीर्थं हि दिव्यधोभूतलेऽपि च ॥२३

सर्वतीर्थमयीं दिव्यां तस्मात्त्वां प्रणमाम्यहम् ।
यत्किञ्चिद्वा प्रकथितं तत् क्षमस्व सुमङ्गले ॥२४

गङ्गोवाच

हे कृष्णे त्वन्तु धन्यासि सर्वब्रह्माण्डपावनि ।
कृष्णवामांशसम्भूता परमानन्दरूपिणी ॥२५
परिपूर्णतमा साक्षात् सर्वगोलोकवन्दिता ।
परिपूर्णतमस्यापि श्रीकृष्णस्य महात्मनः ॥२६
पट्टराज्ञीं परां कृष्णे कृष्णां त्वां प्रणमाम्यहम् ।
तीर्थैर्देवैर्दुर्लभा त्वं गोलोकेऽपि च दुर्घटा ॥२७
अहं यास्यामि पातालं श्रीकृष्णस्याज्ञया शुभे ।
त्वद्वियोगातुरा साहं प्रयाणं कर्त्तुमक्षमा ॥२८
यूथीभूत्वा भविष्यामि श्रीव्रजे रासमण्डले ।
यत्किञ्चिन्मे प्रकथितं तत्क्षमस्व हरिप्रिये ॥२९

सन्नन्द उवाच

इत्थ परस्परं नत्वा द्वे नद्यौ ययतुर्द्रुतम् ।
लोकान् पवित्रीकुर्वन्ती पाताले स्वःसरिद्गता ॥३०
सापि भोगवतीनाम्ना बभौ भोगवतीवने ॥
यज्जलं सत्रिनयनः शेषो मूर्ध्ना बिभर्त्ति हि ॥३१
अथ कृष्णा स्ववेगेन भित्त्वा सप्ताब्धिमण्डलम् ।
सप्तद्वीपमहीपृष्ठे लुठन्ती वेगवत्तरा ॥३२
गत्वा स्वर्णमयीं भूमिं लोकालोकाचलं गता ।
तत्सानुगण्डशैलानां तटं भित्त्वा कलिन्दजा ॥३३
तन्मूर्ध्नि चोत्पपाताशु स्फारावज्जलधारया ।
उद्गच्छन्ती तदूर्ध्वं सा ययौ स्वर्गन्तु नाकिनाम् ॥३४

आब्रह्मलोकं लोकांस्तानभिव्याप्य हरेः पदम् ।
ब्रह्माण्डरन्ध्रं श्रीब्रह्मद्रवयुक्तं समेत्य सा ॥३५
पुष्पवर्षं प्रवर्षत्सु देवेषु प्रणतेषु च ।
पुनः श्रीकृष्णगोलोकमारुरोह सरिद्वरा ॥३६
कलिन्दगिरिनन्दिनी तव चरित्रमेतच्छुभं
श्रुतञ्च परिपाठितं भुवि तनोति सन्मङ्गलम् ।
जनोऽपि यदि धारयेत् किल पठेच्च निःसंशयः
स याति परमं पद निजनिकुञ्जलीलावृतम् ॥३७

इति श्रीगर्गसंहितायां वृन्दावनखण्डे नन्दसन्नन्द-
संवादे कालिन्द्यागमनवर्णनं नाम
तृतीयोऽध्यायः ॥३

नारद उवाच

सन्नन्दस्य वचः श्रुत्वा गन्तुं नन्दः समुद्यतः ।
सर्वैर्गोपगणैः सार्द्धं मुदितोऽभून्महामनाः ॥१
यशोदया च रोहिण्या सर्वगोपीगणैः सह ।
अश्वै रथै र्वीरजनैर्मण्डितो विप्रमण्डलैः ॥२
गोभिश्च शकटैर्युक्तो वृद्धैर्बालैस्तथाऽनुगैः ।
गायकैर्गीयमानश्च शङ्खदुन्दुभिनिःस्वनैः ॥३
पुत्राभ्यां रामकृष्णाभ्यां नन्दराजो महामतिः ।
रथमारुह्य हे राजन् वनं वृन्दावनं ययौ ॥४
वृषभानुवरो गोपो गजमारुह्य भार्यया ।
अङ्के नीत्वा सुतां राधां गीयमानश्च गायकैः ॥५
मृदङ्गतालवीणानां वेणूनां कलनिःस्वनैः ।
गोपालगोगणैः सार्द्धं वृन्दारण्यं जगाम ह ॥६
उपनन्दास्तथा नन्दास्तथा षड् वृषभानवः ।
सर्वैः परिकरैः सार्द्धं जग्मुर्वृन्दावनं वनम् ॥७
वृन्दावनं संप्रविश्य गोपाः सर्वे सहानुगाः ।
घोषान् विधाय वसतीर्वासं चक्रुरितस्ततः ॥ ८
सभामण्डपसंयुक्तं सदुर्गं परिखायुतम् ।
चतुर्योजनविस्तीर्णं पुरं नन्दश्चकार ह ॥ ९
प्राकारपरिखायुक्तं विचित्रभवनान्वितम् ।
योजनत्रयविस्तीर्णं सप्तद्वारसमन्वितम् ॥ १०
सरोवरैः परिवृतं राजमार्गमनोहरम् ।
सहस्रकुञ्जश्च पुर वृषभानुरचीक्लृपत् ॥ ११
श्रीकृष्णो नन्दनगरे वृषभानुपुरेऽर्भकैः ।
चचार क्रीडनपरो गोपीनां प्रीतिमावहन् ॥ १२

अथ वृन्दावने राजन् सर्वगोपालसम्मतौ ।
बभूवतुर्वत्सपालौ रामकृष्णौ मनोहरौ ।। १३
चारयामासतुर्वत्सान् ग्रामसीम्न्यर्भकैः सह ।
कालिन्दीनिकटे पुण्ये पुलिने रामकेशवौ ।। १४
निकुञ्जेषु च कुञ्जेषु संप्रलीनावितस्ततः ।
रिङ्गमाणौ च कुत्रापि नन्दन्तौ चेरतुर्वने ।। १५
किङ्किणीजालसंयुक्तौ शिञ्जन्मञ्जीरनूपुरौ ।
नीलपीताम्बरधरौ हारकेयूरभूषितौ ।। १६
क्षेपणैः क्षिपतौ बालैर्वंशीवादनतत्परौ ।
मुखेन किङ्किणीशब्दं कुर्वद्भिर्बालकैश्च तौ ।। १७
धावन्तौ पक्षिभिश्छायां रेजतू रामकेशवौ ।
मयूरपक्षसंयुक्तौ पुष्पपल्लवभूषितौ ।। १८
एकदा वत्सवृन्देषु प्राप्तं वत्सासुरं नृप ।
कंसप्रणोदितं ज्ञात्वा शनैस्तत्र जगाम ह ।। १९
धावन् गोपेषु सर्वत्र लाङ्गूलं चालयन् मुहुः ।
दैत्यः पश्चिमपादाभ्यां हरिमंसे तताड ह ।। २०
पलायितेषु बालेषु कृष्णस्तं पादयोर्द्वयोः ।
गृहीत्वा भ्रामयित्वाथ पातयामास भूतले ।। २१
पुनर्नीत्वा कराभ्यां तं कपित्थे प्राहिणोद्धरिः ।
तदा मृत्युं गते दैत्ये कपित्थोऽपि महाद्रुमः ।। २२
कपित्थान् पातयामास तदद्भुतमिवाभवत् ।
विस्मितेषु च बालेषु साधु साध्विति वादिषु ।। २३
दिवि देवा जयारावैः पुष्पवर्षं प्रचक्रिरे ।
तद्दैत्यस्य महज्ज्योतिः कृष्णे लीनं बभूव ह ।। २४

बहुलाश्व उवाच

अहो पूर्वं सुकृतकृत् कोऽयं वत्सासुरो मुने ।
श्रीकृष्णे लीनतां प्राप्तः परिपूर्णे परात्परे ॥ २५

नारद उवाच

मुरुपुत्रो महादैत्यः प्रमीलो नाम देवजित् ।
वसिष्ठस्याश्रमे प्राप्तो नन्दिनीं गां ददर्श ह ॥ २६
तल्लिप्सुर्ब्राह्मणो भूत्वा ययाचे गां मनोहराम् ।
तूष्णीं स्थिते गौरुवाच वसिष्ठे दिव्यदर्शने ॥ २७

नन्दिन्युवाच

मुनीनां गां समाहर्तुं भूत्वा विप्रः समागतः ।
दैत्योऽसि मुरुजस्तस्माद् गोवत्सो भव दुर्मते ॥ २

नारद उवाच

तदैव वत्सरूपोऽभून्मुरुपुत्रो महासुरः ।
वसिष्ठं गां परिक्रम्य नत्वा त्राहीत्युवाच ह ॥ २६

गौरुवाच

द्वापरान्ते महादैत्य वृन्दारण्ये यदा तव ।
गोवत्सेषु गतस्यापि तदा मुक्तिर्भविष्यति ॥ ३०

नारद उवाच

परिपूर्णतमे साक्षात् कृष्णे पतितपावने ।
तस्माद्वत्सासुरो दैत्यो लीनोऽभून्नहि विस्मयः ॥ ३

इति श्रीगर्गसंहितायां वृन्दावनखण्डे नारदबहुला
संवादे वत्सासुरमोक्षो नाम
चतुर्थोऽध्यायः ॥४

नारद उवाच

एकदा चारयन् वत्सान् सरामो बालकैर्हरिः
यमुनानिकटे प्राप्तं बकं दैत्यं ददर्श ह ॥ १

श्वेतपर्वतसङ्काशो बृहत्पादो घनध्वनिः ।
पलायितेषु बालेषु वज्रतुण्डोऽग्रसद्धरिम् ॥ २

कृष्णं महाबकग्रस्तं दृष्ट्वा ते व्रजवासिनः ।
रुदन्तो बालकाः सर्वे गतप्राणा इवाभवन् ॥ ३

हाहाकारं तदा कृत्वा देवाः सर्वे समागताः ।
इन्द्रो वज्रं तदा नीत्वा तं तताड महाबकम् ॥ ४

तेन घातेन पतितो न ममार समुत्थितः ।
ब्रह्मापि ब्रह्मदण्डेन तं तताड रुषान्वितः ॥ ५

तेन घातेन पतितो मूर्च्छितो घटिकाद्वयम् ।
विधुन्वन् स्वतनुं वेगाज्जृम्भितः पुनरुत्थितः ॥

न ममार तदा दैत्यो जगर्ज घनवद्बली ।
त्रिलोचनस्त्रिशूलेन तं जघान महासुरम् ॥ ७

छिन्नैकपक्षो दैत्योऽपि न मृतोऽतिभयङ्करः ।
वायव्यास्त्रेण वायुस्तं संजघान बकं ततः ॥ ८

उच्चचाल बकस्तेन पुनस्तत्र स्थितोऽभवत् ।
यमस्तं यमदण्डेन ताडयामास चाग्रतः ॥९

तेन दण्डेन न मृतो बको वै चण्डविक्रमः ।
दण्डोऽपि भग्नतां प्रागात् स क्षतो नाभवद्बकः ॥ १०

तदैव चाग्रतः प्राप्तश्चण्डांशुश्चण्डविक्रमः ।
शतबाणैर्बकं दैत्यं संजघान धनुर्धरः ॥ ११

तीक्ष्णैः पक्षगतैर्बाणैर्न ममार बकस्ततः ।
धनदस्तत्र खड्गेन सुतीक्ष्णेन जघान ह ॥ १२

छिन्नद्वितीयपक्षोऽभून्न मृतो दैत्यपुङ्गवः ।
नीहारास्त्रेण तं सोमः संजघान महाबकम् ॥ १३
शीतार्तो मूर्च्छितो दैत्यो न मृत पुनरुत्थितः ।
आग्नेयास्त्रेण तं ह्यग्निः संतताड महाबकम् ।। १४
भस्मरोमाभवद्दैत्यो न ममार महाखलः ।
अपाम्पतिस्तं पाशेन बध्वा कौ विचकर्ष ह ॥ १५
कर्षणात् स महापाशश्छिन्नोऽभून्न मृतश्च सः ।
तताड गदया तं वै भद्रकाली तरस्विनी ॥ १६
मूर्च्छितस्तत्प्रहारेण परं कश्मलतां ययौ ।
क्षतमूर्द्धा समुत्थाय विधुन्वन् स्वतनुं पुनः ।
जगर्ज घनवद्धीरो बको दैत्यो महाबलः ॥ १७
तदा शक्तिधरः शक्तिं तस्मै चिक्षेप सत्वरः ।
तयैव भग्नपादोऽभून्न मृत. पक्षिणां वरः ॥ १८
तदा क्रोधेन सहसा धावन् दैत्यस्तडित्स्वनः ।
देवान् विद्रावयामास स्वचञ्च्वा तीक्ष्णतुण्डया ॥ १९
अग्रे पलायितान् देवानन्वधावद्बकोऽम्बरे ।
पुनस्तत्रागतो दैत्यो नादयन् मण्डलं दिशाम् ॥ २०
तदा देवर्षयः सर्वे सर्वे ब्रह्मर्षयो द्विजा ।
श्रीनन्दनन्दनायाशु सफलां चाशिषं ददुः ।। २१
तदैव कृष्णस्तन्मध्ये ततान वपुरुज्ज्वलम् ।
चच्छर्द कृष्णं सहसा क्षतकण्ठो महाबकः ।। २२
पुनः कृष्णं समाहर्तुं तीक्ष्णया तुण्डयागतम् ।
पुच्छे गृहीत्वा तं कृष्णः पोथयामास भूतले ॥ २३
पुनरुत्थाय तुण्डं स्वं प्रसार्य्यावस्थितं बकम् ।
ददार तुण्डे हस्ताभ्यां कृष्णः शाखां गजो यथा ।। २४
तदा मृतस्य दैत्यस्य ज्योतिः कृष्णे समाविशत् ।

देवता ववृषुः पुष्पैर्जयारावैः समन्विताः ॥ २५
गोपाला विस्मिताः सर्वे कृष्णमाश्लिष्य सर्वतः ।
ऊचुस्त्वं कुशलीभूतो मुक्तो मृत्युमुखात् सखे ॥ २६
एवं कृष्णो बकं हत्वा सबलो बालकैः सह ।
गोवत्सैर्हर्षितो गायन्नाययौ राजमन्दिरम् ॥ २७
परिपूर्णतमस्यास्य श्रीकृष्णस्य महात्मनः ।
जगुर्गृहे गता बालाः श्रुत्वेदं तेऽतिविस्मिताः ॥ २८

बहुलाश्व उवाच

कोऽयं दैत्यः पूर्वकाले कस्मात् केन बकोऽभवत् ।
पूर्णे ब्रह्मणि सर्वेशे श्रीकृष्णे लीनतां गतः ॥ २९

नारद उवाच

हयग्रीवसुतो दैत्य उत्कलो नाम हे नृप ।
रणेऽमरान् विनिर्जित्य शक्रच्छत्रं जहार ह ॥ ३०
तथा नृणां नृपाणाञ्च राज्यं हृत्वा महाबलः ।
चकार वर्षाणि शत राज्यं सर्वविभूतिमत् ॥ ३१
एकदा विचरन् दैत्यः सिन्धुसागरसङ्गमे ।
जाजलेर्मुनिसिद्धस्य पर्णशालासमीपतः ॥ ३२
जले निक्षिप्य बडिशं मीनानाकर्षयन् मुहुः ।
निषेधितोऽपि मुनिना नामन्यत स दुर्मतिः ॥ ३३
तस्मै शापं ददौ सिद्धो जाजलिर्मुनिसत्तमः ।
बकवत्त्वं झषानत्सि त्वं बको भव दुर्मते ॥ ३४
तत्क्षणाद्बकरूपोऽभूद् भ्रष्टतेजा गतस्मयः ।
पतितः पादयोस्तस्य नत्वा प्राह कृताञ्जलिः ॥ ३५

उत्कल उवाच

न जाने ते तपश्चण्डं मुने मां पाहि जाजले ।
साधूनां भवतां सङ्गं मोक्षद्वारं परं विदुः ॥ ३६

मित्रे शत्रौ समा मानेऽपमाने हेमलोष्ठयोः ।
सुखे दुःखे समा ये वै त्वादृशाः साधवश्च ते ॥ ३७
किं किं न जातं महतां दर्शनात् कौ मुने नृणाम् ।
पारमेष्ठ्यञ्च साम्राज्यमैन्द्रयोगपद भवेत् ॥ ३८
जाजले मुनिशार्दूल त्रैवर्ग्यं किञ्च भूजनैः ।
साधूनां कृपया साक्षात् पूर्णब्रह्मापि लभ्यते ॥ ३९

नारद उवाच

तदा प्रसन्नः स मुनिर्जाजलिस्तमुवाच ह ।
षष्टिवर्षसहस्राणि तपस्तप्तञ्च येन वै ॥ ४०

जाजलिरुवाच

वैवस्वतान्तरे प्राप्ते ह्यष्टाविंशतिमे युगे ।
द्वापरान्ते भारते च माथुरे व्रजमण्डले ॥ ४१
परिपूर्णतमः साक्षाच्छ्रीकृष्णो भगवान् स्वयम् ।
वृन्दावने गवां वत्सांश्चारयन् विचरिष्यति ॥ ४२
तदा तन्मयतां कृष्णे यास्यसि त्वं न संशयः ।
हिरण्याक्षादयो दैत्या वैरेणापि परं गताः ॥ ४३

नारद उवाच

इत्थं बकासुरो दैत्य उत्कलो जाजलेर्वरात् ।
श्रीकृष्णे लीनतां प्राप्तः सत्सङ्गात् किं न जायते ॥ ४४

इति श्रीगर्गसंहितायां वृन्दावनखण्डे नारदबहुलाश्व
संवादे बकासुरमोक्षो नाम
पञ्चमोऽध्यायः ॥ ५

नारद उवाच

एकदा बालकैः साकं गोवत्सांश्चारयन् हरिः।
कालिन्दीनिकटे रम्ये बालक्रीडां चकार सः॥ १
अघासुरो नाम महान् दैत्यस्तत्र स्थितोऽभवत्।
क्रोशदीर्घं वपुः कृत्वा प्रसार्य मुखमण्डलम्॥ २
दूराद् यं पर्वताकारं वीक्ष्य वृन्दावने वने।
गोपा जग्मुर्मुखे तस्य वत्सैः कृत्वाञ्जलिस्वनम्॥ ३
तद्रक्षार्थञ्च सबलस्तन्मुखे प्राविशद्धरिः।
निगीर्णेषु सवत्सेषु बालेषु त्वहिरूपिणा॥ ४
हाशब्दोऽभूत् सुराणान्तु दैत्यानां हर्ष एव हि।
कृष्णो वपुः स्वं वैराजं ततानाघोदरे ततः॥ ५
तस्य संरोधगाः प्राणाः शिरो भित्त्वा विनिर्गताः।
तन्मुखान्निर्गतः कृष्णो बालैर्वत्सैश्च मैथिल॥ ६
सवत्सकान् शिशून् दृष्ट्वा जीवयामास माधवः।
तज्ज्योतिः श्रीघनश्यामे लीनं जातं तडिद्यथा॥ ७
तदैव ववृषुर्देवाः पुष्पवर्षाणि पार्थिव।
एवं श्रुत्वा मुनेर्वाक्यं मैथिलो वाक्यमब्रवीत्॥ ८

राजोवाच

कोऽयं दैत्यः पूर्वकाले श्रीकृष्णे लीनतां गतः।
अहो वैरानुबन्धेन शीघ्रं दैत्या हरिं गताः॥ ९

नारद उवाच

शङ्खासुरसुतो राजन्नघो नाम महाबलः।
युवाऽतिसुन्दरः साक्षात् कामदेव इवापरः॥ १०
अष्टावक्रं मुनिं यान्तं विरूपं मलयाचले।
दृष्ट्वा जहास तमघः कुरूपोऽयमिति ब्रुवन्॥ ११

त शशाप महातेजास्त्वं सर्पो भव दुर्मते ।
कुरूपा वक्रगा जातिः सर्पाणां भूमिमण्डले ॥ १२

तत्पादयोर्निपतितं दैत्यं दीनं गतस्मयम् ।
दृष्ट्वा प्रसन्नः स मुनिर्वरं तस्मै ददौ पुनः ॥ १३

अष्टावक्र उवाच

कोटिकन्दर्पलावण्यः श्रीकृष्णस्तु तवोदरे ।
यदा गच्छेत् सर्परूपात्तदा मुक्तिर्भविष्यति ॥ १४

नारद उवाच

अष्टावक्रस्य शापेन सर्पो भूत्वा ह्यघासुरः ।
तद्वरात् परमं मोक्षं गतो देवैश्च दुर्लभम् ॥ १५

इति श्रीगर्गसंहितायां वृन्दावनखण्डे नारदबहुलाश्वसंवादे
अघासुरमोक्षो नाम
षष्ठोऽध्यायः ॥ ६

नारद उवाच

अथान्यच्छृणु राजेन्द्र श्रीकृष्णस्य महात्मनः ।
कौमारे क्रीडनञ्चेदं गौगखडे कीर्तनं तथा ॥ १
श्रीकृष्णोऽघमुखान्मृत्यो रक्षित्वा वत्सवत्सपान् ।
यमुनापुलिनं गत्वा प्राहेदं हर्षवर्द्धनम् ॥ २
अहोऽतिरम्यं पुलिनं प्रिया कोमलवालुकम् ।
शरत्प्रफुल्लपद्मानां परागै परिपूरितम् ॥ ३
वायुना त्रिविधाख्येन सुगन्धेन सुगन्धितम् ।
मधुपध्वनिसंयुक्तं कुञ्जद्रुमलताकुलम ॥ ४
अत्रोपविश्य गोपाला दिनैकप्रहरे गते ।
भोजनस्यापि समयं तस्मात् कुरुत भोजनम् ॥ ५
अत्र भोजनयोग्या भूर्दृश्यते मृदुवालुका ।
वत्सका सलिलं पीत्वा ते चरिष्यन्ति शाद्वलम् ॥ ६
इति कृष्णवचः श्रुत्वा तथेत्याहुश्च बालकाः ।
प्रकर्तुं भोजनं सर्वे ह्युपविष्टाः सरित्तटे ॥ ७
अथ केचिद्बालकाश्च येषा पार्श्वे न भोजनम् ॥
ते तु कृष्णस्य कर्णान्ते जगदुर्दीनया गिरा ॥ ८
वयन्तु किं करिष्यामोऽस्मत्पार्श्वे न तु भोजनम ।
नन्दग्रामन्तु दूरं हि गच्छामो वत्सकैर्वयम् ॥ ९
इति श्रुत्वा हरिः प्राह माशोकं कुरुत प्रियाः ।
अहं दास्यामि सर्वेषां प्रयत्नेनापि भोजनम ॥ १०
तस्मान्मद्वाक्यनिरताः सर्वे भवत बालकाः ।
इति कृष्णस्य वचनात् कृष्णपार्श्वे च ते स्थिताः ।
मुक्त्वा शिक्यानि सर्वेऽन्ये बुभुजुः कृष्णसंयुताः ॥ ११

चकार कृष्णः किल राजमण्डलीं
गोपालबालैः परतः प्रपूरितैः ।
अनेकवर्णैर्व्यसनैः प्रकल्पितै
र्मध्ये स्थितो पीतपटेन भूषितः ॥ १२
रेजे ततः सो वरगोपदारकै
र्यथामरेशो ह्यमरैश्च सर्वतः ।
पुनर्यथाम्भोरुहकोमलैर्दलै
र्मध्ये तु वैदेह सुवर्णकर्णिका ॥ १३
कुसुमैरङ्कुरैः केचित् पल्लवैश्च दलैः फलैः ।
हस्तैर्दृषद्भिः शिग्भिश्च जक्षुस्ते कृतभाजनाः ॥ १४
तत्रैको बालकः शीघ्रं कृष्णाय कवलं ददौ ।
कृष्णस्तु कवलं भुक्त्वा सर्वान् पश्यन्निदं जगौ ॥ १५
अन्यान्निदर्शयन् स्वादु नाहं जानामि वै सखे ।
तथेत्युक्त्वा स बालश्च नीत्वाऽन्यान् कवलान् ददौ ॥ १६
भुक्त्वा ते कथयामासुः प्रहसन्त परस्परम् ।
पुनस्तत्रापि सुबलो हरये कवल ददौ ॥ १७
कृष्णस्तु कवलं किञ्चिद् भुक्त्वा तत्र जहास ह ।
ये भुक्तकवला बालास्ते सर्वे जहसुः स्फुटम् ॥ १८

बाला ऊचुः

यस्य माता महामूढा शृणु नन्दकुमारक ।
न ज्ञान भोजने तस्यास्तस्मात् स्वादु न विद्यते ॥ १९
ततो ददौ च कवलं श्रीदामा माधवाय च ।
अन्यान् सर्वान् बहुश्रेष्ठं जगुः सर्वे व्रजार्भकाः ॥ २०
पुनः कृष्णाय प्रददौ कवलं च वरूथप ।
अन्यान् बालाँस्तथा सर्वान् किञ्चित्किञ्चित् प्रयत्नतः ॥ २१
भुक्त्वा तु जहसुः सर्वे श्रीकृष्णाद्या व्रजार्भकाः ।

बाला ऊचुः

तादृशं भोजनञ्चास्य यादृशं सुबलस्य वै ॥ २२
भुक्त्वात्युद्विग्नमनसः सर्वे वयमतः किल ।
एवं पृथक्पृथक् सर्वे दर्शयन्तः स्वभोजनम् ॥ २३
हासयन्तो हसन्तश्च चक्रुः क्रीडां परस्परम् ।
जठरस्य पटे वेणुं वेत्रं शृङ्गञ्च कक्षके ॥ २४
वामे पाणौच कवलं ह्यङ्गुलीषु फलानि च ।
शिरसा मुकुटं बिभ्रन् स्कन्धे पीतपटं तथा ॥ २५
हृदये वनमालाञ्च कटौ काञ्ची तथैव च ।
पादयोर्नूपुरौ बिभ्रच्छ्रीवत्सं कौस्तुभं हृदि ॥ २६
तिष्ठन् मध्ये गोपगोष्ठ्यां हासयन्नर्मभिः स्वकैः ।
स्वर्गे लोके च मिषति बुभुजे यज्ञभुग्घरिः ॥ २७
एवं कृष्णात्मनाथेषु भुञ्जानेष्वर्भकेषु च ।
विविशुर्गह्वरे दूरं तृणलोभेन वत्सकाः ॥ २८
विलोक्य तान् भयत्रस्तान् गोपान् कृष्ण उवाच ह ।
यूयं गच्छन्तु माहन्तु ह्यानेष्ये वत्सकानिह ॥ २९
इत्युक्त्वा कृष्ण उत्थाय गृहीत्वा कवलं करे ।
विचिकाय दरीकुञ्जगह्वरे वत्सकान् स्वकान् ॥ ३०

तदैव चाम्भोजभवः समागतो
विलोक्य मुक्तिं ह्यघराक्षसस्य च ।
ददर्श कृष्णं पुलिने यथारुचि
भुञ्जानमन्नं व्रजबालकैः सह ॥ ३१
दृष्ट्वा च कृष्णं मनसि स ऊचे
त्वयं हि गोपो नहि देवदेवः ।
हरिर्यदि स्याद् बहुकुत्सितान्ने
कथं रतो वा व्रजगोपबालैः ॥ ३२

इत्युक्त्वा मोहितो ब्रह्मा मायया परमात्मनः ।
द्रष्टुं मञ्जुमहत्वन्तु मनश्चक्रे ह्यहो नृप ॥ ३३
सर्वान् वत्सानितो गोपान्नीत्वा खेऽवस्थित. पुरा ।
अन्तर्दधे विस्मितोऽजो दृष्ट्वाघासुरमोक्षणम् ॥ ३४

इति श्रीगर्गसंहिताया वृन्दावनखण्डे नारदबहुलाश्व-
सवादे वत्सवत्सपालहरणा नाम
सप्तमोऽध्यायः ॥ ७

नारद उवाच

अदृष्ट्वा वत्सकानेत्य वत्सपान् पुलिने हरिः ।
उभौ विचिन्वन् विपिने मेने कर्म्म विधेः कृतम् ॥ १
ततो गवा गोपिकानां मुदं कर्तुं स लीलया ।
सर्वन्तु विश्वकृच्चक्रे ह्यात्मानमुभयायितम् ॥ २
यावद्वत्सपवत्सानां वपुः पाणिपदादिकान् ।
यावद्यष्टिविषाणादीन् यावच्छीलगुणादिकान् ॥ ३
यावद् भूषणवस्त्रादीन् तावच्छ्रीहरिणा स्वतः ।
सर्वं विष्णुमयं विश्वमिति वाक्यं प्रदर्शितम् ॥ ४
आत्मवत्सानात्मगोपैश्चारयन् क्रीडया हरि. ।
प्राविशन् नन्दनगरमस्तंगिरि गते रवौ ॥ ५
तत्तद्गोष्ठे पृथङ् नीत्वा तत्तद्वत्सान् प्रवेश्य च ।
कृष्णोऽभवत्तत्तदात्मा तत्तद्गेहं प्रविष्टवान् ॥ ६
श्रुत्वा वंशीरवं गोप्यः सम्भ्रमाच्छीघ्रमुत्थिता ।
पयांसि पाययामासुर्लालयित्वा सुतान् पृथक् ॥ ७
स्वान् स्वान् वत्साँस्तथा गावो रम्भमाणा निरीक्ष्य च ।
लिहन्त्यो जिह्वयाङ्गानि पयांसि च ह्यपाययन् ॥ ८
अभवन् मातरः सर्वा गोप्यो गावो हरेरहो ।
अतिस्नेहश्च ववृधे पूर्वतो हि चतुर्गुणम् ॥ ९
स्वपुत्राँल्लालयित्वा तु मज्जनोन्मर्द्दनादिभिः ।
पश्चाद् गोप्यश्च कृष्णस्य दर्शनं कर्तुमाययुः ॥ १०
अनेकानान्तु बालानामुद्वाहाः कृष्णरूपिणाम् ।
बभूवुस्ता व्रजे वध्वो रताः कृष्णे तु कोटिशः ॥ ११
वत्सपालमिषेणापि स्वात्मानं ह्यात्मना हरेः ।
पालितो वत्सरश्चैको बभूव व्रजमण्डले ॥ १२

सरामश्चैकदा वत्साँश्चारण्यं चारयन् ययौ ।
हायनापूरणीष्वत्र पञ्चषासु च रात्रिषु ॥ १३

तत्रापि दूराच्चरतश्च गावो
वत्सानुपव्रज्य गिरेश्च शृङ्गात् ।
लिहन्ति चाङ्गानि विलोकयन्त्यो
ह्यपाययंस्ता अमृतानि सद्यः ॥ १४

गोवर्द्धनादधो वत्सान् पीतदुग्धान् विलोक्य च ।
स्नेहावृता स्थिता गाश्च गोपाला ददृशुर्नृप ॥ १५
ततः क्रोधेन महता पर्वतादवतीर्य च ।
ताडनार्थंसु पुत्राणामाजग्मुः कच्छतो द्रुतम् ॥ १६
यदागता समीपे तु पुत्राणां गोपनायकाः ।
स्वान् स्वान् सुतांस्तदोन्नीय ह्यङ्के कृत्वा मिलन्ति वै ॥ १७
यथा युवानो वृद्धाश्च स्नेहादश्रुपरिप्लुताः ।
स्वान् स्वान् पौत्रान् गृहीत्वा तु ह्युपविष्टा मिलन्ति हि ॥ १८
एवं प्रेमपरान् सर्वान् दृष्ट्वा सङ्कर्षणो बल. ।
बहुप्रकारं सन्देहं कृत्वा मनसि सोऽब्रवीत् ॥ १९
अहो किं वत्सरात् प्राप्तो न ज्ञातोऽपि व्रजे मया ।
अतिस्नेहस्तु सर्वेषा वर्द्धते च दिने दिने ॥ २०
केयं माया समायाता देवगन्धर्वरक्षसाम् ।
नान्या मे मोहिनी माया विना कृष्णस्य साम्प्रतम् ॥ २१
एवं विचार्य्य रामस्तु लोचने स्वे न्यमीलयन् ।
भूतं भव्यं भविष्यञ्च दिव्याक्षाभ्यां ददर्श ह ॥ २२
सर्वान् वत्साँस्तथा गोपान् वंशीवेत्रविभूषितान् ।
बर्हिपत्रधरान् श्यामान् भृगवङ्घ्रिकृतकौतुकान् ॥ २३
जालकाना मणीनाञ्च गुञ्जानां स्रग्भिरेव च ।
पद्मानां कुमुदानाञ्च ह्येषां स्रग्भिर्विभूषितान् ॥ २४

उष्णीषैर्मुकुटैर्दिव्यैः कुण्डलैरलकैर्वृतान् ।
आनन्दवर्षान् कुर्वाणान् शरत्पद्मदृशैरपि ॥ २५
कोटिकन्दर्पलावण्यान् नासामौक्तिकशोभितान् ।
शिखाभूषणसंयुक्तान् पाणिभूषणभूषितान् ॥ २६
द्विभुजान् पीतवस्त्रैश्च काञ्चीकटकनूपुरैः ।
प्रभातरविकोटीनां शोभाभिः शोभितान् शुभान् ॥ २७
उत्तरे गिरिराजस्य यमुनायाश्च दक्षिणे ।
आचष्ट वृन्दकारण्ये सर्वान् कृष्णं हलायुधः ॥ २८
ज्ञात्वा कृष्णकृतं कर्म तथा विधिकृतं बलः ।
पुनर्वत्सान् वत्सपांश्च पश्यन् कृष्णमुवाच ह ॥ २९

ब्रह्मानन्तो धर्म इन्द्रः शिवश्च
सेवन्ते तं भक्तियुक्ताः सदैते ।
स्वात्मारामः पूर्णकामः परेशः
स्रष्टुं शक्तः कोटिशोऽण्डानि यः खे ॥ ३०

नारद उवाच

एवं ब्रुवति श्रीरामे तावत्तत्रागतो विधिः ।
ददर्श कृष्णं रामञ्च वत्सकैर्वत्सपैः समम् ॥ ३१
अहो कृष्णेन चानीता यत्र सर्वे धृता मया ।
इति ब्रुवन् ययौ स्थाने तत्र सर्वान् ददर्श सः ॥ ३२
दृष्ट्वा प्रसुप्तान् सर्वांस्तु स आगत्य व्रजे पुनः ।
वत्सपालैर्हरिं वीक्ष्य मनसि प्राह विस्मितः ॥ ३३
अहो विचित्रं ये सर्वे कुत्र स्थानात् समागताः ।
क्रीडन्तो पूर्ववच्चात्र साकं कृष्णेन क्रीडनैः ॥ ३४
मत्त्रुटिर्वत्सरश्चैको व्यतीतोऽभून्महीतले ।
सर्वे प्रसन्नतां प्राप्ता न ज्ञातः केनचित् क्वचित् ॥ ३५

एवं संमोहयन् ब्रह्मा मोहनं विश्वमोहनम् ।
स्वमाययान्धकारेण स्वगात्र नैव दृष्टवान् ॥ ३६
वत्सपालापहरणात् किमभूज्जगत. पतेः ।
अहो खद्योतवद्वेधा श्रीकृष्णारविसम्मुखे ॥ ३७
एवं विमुह्यति सति जडीभूते च ब्रह्मणि ।
स्वमायां कृपयाकृष्य कृष्णः स्वं दर्शनं ददौ ॥ ३८
एवं तत्र सकृद् ब्रह्मा गोवत्सान् गोपदारकान् ।
सर्वानाचष्ट श्रीकृष्णं भक्त्या विज्ञानलोचनैः ॥ ३९
ददर्शाथ विधिस्तत्र बहिरन्त. शरीरतः ।
स्वात्मना सहितं राजन् सर्वं विष्णुमयं जगत् ॥ ४०
एवं विलोक्य ब्रह्मा तु जडो भूत्वा स्थिरोऽभवत् ।
वृन्दावद् वृन्दकारण्ये प्रदृश्येत यथा तथा ॥ ४१
स्वात्मनो महिमां द्रष्टुं ह्यनीशेऽपि च ब्रह्मणि ।
चच्छाद सपदि ज्ञात्वा मायाजवनिकां हरिः ॥ ४२
ततः प्रलब्धनयनः स्रष्टा सुप्त इवोत्थितः ।
उन्मील्य नयने कृच्छ्राद्ददर्शेदं सहात्मना ॥ ४३
समाहितस्तत्र भूत्वा सद्योऽपश्यद्दिशो दश ।
श्रीमद्वृन्दावनं रम्यं वासन्तीलतिकान्वितम् ॥ ४४
शार्दूलबालकैर्यत्र क्रीडन्ति मृगबालकाः ।
श्येनैः कपोता नकुलै. सर्पा वैरविवर्जिताः ॥ ४५
ततश्च वृन्दकारण्ये सपाणिकवलं विधिः ।
वत्सान् सखीन् विचिन्वन्तमेकं कृष्णं ददर्श सः ॥ ४६
दृष्ट्वा गोपालवेषेण गुप्तं गोलोकवल्लभम् ।
ज्ञात्वा साक्षाद्धरिं ब्रह्मा भीतोऽभूत् स्वकृतेन च ॥ ४७
तं प्रसादयितुं राजन् ज्वलन्तं सर्वतो दिशम् ।
लज्जयावाङ्मुखो भूत्वा ह्यवतीर्य स्ववाहनात् ॥ ४८

शनैरुपससारेशं प्रसीदेति वदन् नमन् ।
स्रवद्धर्षाश्रुदत्तार्घः स पपाताथ दण्डवत् ॥ ४९
उत्थाप्याश्वास्य तं कृष्णः प्रियं प्रिय इव स्पृशन् ।
सुरान् सुभुवि दूरस्थानालुलोक सुधार्द्रदृक् ॥ ५०
ततो जयजयेत्युच्चैः स्तुवतां नमतां समम् ।
तद्दयादृष्टदृष्टानां सानन्दः सम्भ्रमोऽभवत् ॥ ५१

दृष्ट्वा हरिं तत्र समास्थितं विधि
र्ननाम तं भक्तमनाः कृताञ्जलिः ।
स्तुतिं चकाराशु स दण्डवल्लुठन्
प्रहृष्टरोमा भुवि गद्गदाक्षरः ॥ ५२

इति श्रीगर्गसंहितायां वृन्दावनखण्डे नारदबहुलाश्व-
संवादे श्रीकृष्णदर्शनवर्णनं नाम
अष्टमोऽध्यायः ॥ ८

विद्युद्द्युतिस्त्वृतुगुणो जलमध्यरेखा
भूतोल्मुकः कपटपान्थरतिर्यथा च ।
इत्थं तथास्य जगतस्तु सुखं मृषेति
दुःखावृतं विषयघूर्णमलातचक्रम् ॥ ७

वृक्षा जलेन चलतापि चला इवात्र
नेत्रेण भूरिचलितेन चलेव भूश्च ।
एवं गुणाः प्रकृतिजैर्भ्रमतो जनस्थं
सत्यं वदेद् गुणसुखादिदमेव कृष्ण ॥ ८

दुःखं सुखञ्च मनसा प्रभवञ्च सुप्ते
मिथ्या भवेत्पुनरहो भुवि जागरेऽस्य ।
इत्थं विवेकघटितस्य जनस्य सर्वं
स्वप्नभ्रमाहृतजगत् सततं भवेद्धि ॥ ६

ज्ञानी विसृज्य ममतामभिमानयोग
वैराग्यभावरसिक सततं निरीहः ।
दीपेन दीपकशतञ्च यथा प्रजातं
पश्येत्तथात्मविभवं भुवि चैकतत्त्वम् ॥ १०

भक्तो भजेदजपतिं हृदि वासुदेवं
निर्धूमवह्निरिव मुक्तगुणस्वभावः ।
पश्यन् घटेषु सजलेषु यथेन्दुमेक
मेतादृश. परमहंसवरः कृतार्थः ॥ ११

स्तुवन्ति वेदा सततञ्च यं सदा
हरेर्महिम्नः किल षोडशीं कलाम् ।
कदापि जानन्ति न ते त्रिलोके
वक्तुं गुणांस्तस्य जनोऽस्ति कः परः ॥ १२

वक्त्रैश्चतुर्भिस्त्वहमेव देवः
श्रीपञ्चवक्त्रः किल पञ्चवक्त्रैः ।
सहस्रशीर्षास्तु सहस्रवक्त्रै
र्यं स्तौति सेवां कुरुते च तस्य ॥ १३

विष्णुश्च वैकुण्ठनिवासकृच्च
क्षीरोदवासी हरिरेव साक्षात् ।
नारायणो धर्मसुतस्तथापि
गोलोकनाथं भजते भवन्तम् ॥ १४

अहोऽतिधन्यो महिमा मुरारे
जानन्ति भूमौ मुनयो न मानवाः ।
सुरासुरा वा मनवो बुधा पुनः
स्वप्नेऽपि पश्यन्ति न तत्पदद्वयम् ॥ १५

वरं हरिं गुणाकर सुमुक्तिदं परात्परम् ।
रमेश्वरं गुणेश्वरं व्रजेश्वरं नमाम्यहम् ॥ १६

ताम्बूलसुन्दरमुखं मधुरं ब्रवन्तं
बिम्बाधरं स्मितयुतं सितकुन्ददन्तम् ।
नीलालकावृतकपोलमनोहराभं
वन्दे चलत्कनककुण्डलमण्डनार्हम् ॥ १७

सुन्दरन्तु तव रूपमेव हि
मन्मथस्य मनसो हरं परम् ।
आविरस्तु मम नेत्रयो सदा
श्यामलं मकरकुण्डलावृतम् ॥ १८

वैकुण्ठलीलाप्रवरं मनोहरं
नमस्कृतं देवगणैः परं वरम् ।
गोपाललीलाभियुतं भजाम्यहं
गोलोकनाथं शिरसा नमाम्यहम् ॥ १९

युक्तं वसन्तकलकण्ठविहङ्गमैश्च
सौगन्धिकं त्वरुणपल्लवशाखिसङ्गम् ।
वृन्दावनं सुधितधीरसमीरलीलं
गच्छन् हरिर्जयति पातु सदैव भक्तान् ॥ २०
हरति कमलमानं लोलमुक्ताभिमान
धरनिरसिकदानं कामदेवस्य बाणम् ।
श्रवणविदितयानं नेत्रयुग्मप्रयाणं
भज यदुत समक्षं दानदक्षं कटाक्षम् ॥ २१
शरच्चन्द्राकारं नखमणिसमूहं सुखकरं
सुरक्तं हृत्पूर्णं प्रकटिततमः खण्डनकरम् ।
भजेऽहं ब्रह्माण्डे सकलनरपापाभिदलनं
हरेर्विष्णोर्देवैर्दिवि भरतखण्डे स्तुतमलम् ॥ २२
महापद्मे किंवा परिधिरिव चाभाति सततं
कदादित्यस्फूर्जद्रथचरण इत्थं ध्वनिधरः ।
यथा न्यस्तं चक्रं शतकिरणयुक्तन्तु हरिणा
स्फुरच्छ्रीमञ्जीरं हरिचरणपद्मे त्वधिगतम् ॥ २३
कट्यां पीताम्बरं दिव्यं क्षुद्रघण्टिकयान्वितम् ।
भजाम्यहं चित्तहरं कृष्णस्याक्लिष्टकर्मणः ॥ २४
भजे कृष्णक्रोडे भृगुमुनिपदं श्रीगृहमलं
तथा श्रीवत्साङ्कं निकषरुचियुक्तं द्युतिपरम् ।
गले हीराहारान् कनकमणिमुक्तावलिधरान्
स्फुरत्ताराकारान् भ्रमरवलिभारान् ध्वनिकरान् ॥ २५
वंशीविभूषितमलं द्विजदानशीलं
सिंदूरवर्णमतिकीचकरावलीलम् ।
हेमाङ्गुलीयनिकरं नखचन्द्रयुक्तं
हस्तद्वयं स्मर कदम्बसुगन्धपृक्तम् ॥ २६

शनैश्चलन् मानसराजहंसः ।
ग्रीवाकृतौ कन्धर उच्चदेशे ।
कादम्बिनीमानहरौ करौ च
भजामि नित्यं हरिकाकृपत्तौ ॥ २७
कलदर्पणावद्विशदं सुखदं
नवयौवनरूपधरं नृपतिम् ।
मणिकुण्डलकुन्तलशालिरतिं
भज गण्डयुगं रविचन्द्ररुचि ॥ २८
खचितकनकमुक्तारक्तवैदूर्य्यवासं
मदनवदनलीलासर्वसौन्दर्य्यरासम् ।
अरुणविधुसकाशं कोटिसूर्यप्रकाशं
घटितशिखिसुवीटं नौमि विष्णोः किरीटम् ॥ २९
यदूद्धारि देशे न गतिर्गुहेन्द्र-
गणेशतारेशदिवाकराणाम् ।
आज्ञां विना यान्ति न कुञ्जमण्डलं
तं कृष्णचन्द्रं जगदीश्वरं भजे ॥ ३०
इति कृत्वा स्तुतिं ब्रह्मा श्रीकृष्णस्य महात्मनः ।
पुनः कृताञ्जलिर्भूत्वा स्वविज्ञप्तिं चकार ह ॥ ३१
अपराधन्तु पुत्रस्य मातृवत्त्वं क्षमस्व च ।
अहं त्वन्नाभिकमलात् सम्भवोऽहं जगत्पते ॥ ३२
क्वाहं लोकपतिः क्व त्वं कोटिब्रह्माण्डनायकः ।
तस्माद् व्रजपते देव रक्ष मां मधुसूदन ॥ ३३
मायया यस्य मुह्यन्ति देवदैत्यनरादयः ।
स्वमायया तन्मोहाय मूर्खोऽहं ह्युद्यतोऽभवम् ॥ ३४
नारायणस्त्वं गोविन्द नाहं नारयणो (!) हरे ।
ब्रह्माण्डं त्वं विनिर्माय शेषे नारायणः पुरा ॥ ३५

यस्य श्रीब्रह्मणि धाम्नि प्राणं त्यक्त्वा तु योगिनः ।
यथा यास्यन्ति तस्मिंस्तु सकुला पूतना गता ॥ ३६

वत्सानां वत्सपानाञ्च कृत्वा रूपाणि माधव ।
विचचार वने त्वन्तु ह्यपराधान् मम प्रभो ॥ ३७

तस्मात् क्षमस्व गोविन्द प्रसीद त्वं ममोपरि ।
अगण्यापराधं मे सुतोपरि पिता यथा ॥ ३८

त्वद्भक्ता रता ज्ञाने तेषा क्लेशो विशिष्यते ।
परिश्रमात् कर्षकाणां यथा क्षेत्रे तुषार्थिनाम् ॥ ३९

त्वद्भक्तिभावे निरता बह्वस्त्वद्गतिं गताः ।
योगिनो मुनयश्चैव तथा ये व्रजवासिनः ॥ ४०

द्विधा रतिर्भवेद्धरा श्रुताच्च दर्शनाच्च वा ।
अहो हरे तु मायया बभूव नैव मे रति. ॥ ४१

इत्युक्त्वाश्रुमुखो भूत्वा नत्वा तत्पादपङ्कजौ ।
पुनराह विधिः कृष्णं भक्त्या सर्वं क्षमापयन ॥ ४२

घोषेषु वासिनामेषा भूत्वाहं त्वत्पदाम्बुजम् ।
यदा भजेयं सुगतिस्तदा भूयान्नचान्यथा ॥ ४३

वयन्तु गोपदेहेषु संस्थिताश्च शिवादयः ।
सकृत् कृष्णन्तु पश्यन्तस्तस्माद्धन्याश्च भारते ॥ ४४

अहोभाग्यन्तु श्रीकृष्ण मातापित्रोस्तव प्रभो ।
तथा च गोपगोपीनां पूर्णस्त्वं दृश्यसे व्रजे ॥ ४५

मुक्ताहारः सर्वविश्वोपकारः
सर्वाधारः पातु मां विश्वकार ।
लीलागारः सूरिकन्याविहारः
क्रीडापारः कृष्णचन्द्रावतारः ॥ ४६

श्रीकृष्ण वृष्णिकुलपुष्कर नन्दपुत्र
राधापते मदनमोहन देवदेव ।
संमोहितं व्रजपते भुवि तेऽजया (!) मा
गोविन्द गोकुलपते परिपाहि पाहि ॥ ४७

करोति यः कृष्णहरेः प्रदक्षिणां
भवेज्जगत्तीर्थफलञ्च तस्य तु ।
ते कृष्णलोकं सुखदं परात्पर
गोलोकलोकं प्रवरं गमिष्यति ॥ ४८

नारद उवाच

इत्यभिष्टूय गोविन्दं श्रीमद्वृन्दावनेश्वरम् ।
नत्वा त्रिवारं लोकेशश्चकार तु प्रदक्षिणाम् ॥ ४९
तत्र चालक्षितो भूत्वा वत्सान् बालान् पितामहः ।
वरं दत्त्वा प्रयाणार्थं याचनां स चकार ह ॥ ५०
ततश्च ब्रह्मणे तस्मै नेत्रेणाज्ञा ददौ हरिः ।
पुनः प्रणम्य स्वं लोकमात्मभूः प्रत्यपद्यत ॥ ५१
अथ कृष्णो वनाच्छीघ्रमानयामास वत्सकान् ।
यत्रापि पुलिने राजन् गोपानां राजमण्डली ॥ ५२
गोपार्भकाश्च श्रीकृष्णं वत्सैः सार्धं समागतम् ।
क्षणार्धं मेनिरे वीक्ष्य कृष्णमायाविमोहिताः ॥ ५३
त ऊचुर्वत्सकैः कृष्ण त्वरं त्वन्तु समागतः ।
कुरुष्व भोजनञ्चात्र केनापि न कृतं प्रभो ॥ ५४
ततश्च विहसन् कृष्णोऽभ्यवहृत्यार्भकैः सह ।
दर्शयामास सर्वेभ्यश्चर्माजगरमेव च ॥ ५५
सायंकाले सरामस्तु कृष्णो गोपैः परावृतः ।
अग्रे कृत्वा वत्सवृन्दं ह्याजगाम शनैर्व्रजम् ॥ ५६

गोवत्सकैः सितसितासितपीतवर्णै
रक्तादिधूम्रहरितैर्बहुशीलरूपैः ।
गोपालमण्डलगतं व्रजपालपुत्रं
वन्दे वनात् सुखदगोष्ठकमाव्रजन्तम् ॥ ५७

आनन्दो गोपिकानान्तु ह्यासीत् कृष्णस्य दर्शने ।
यासां येन विना राजन् क्षणो युगसमोऽभवत् ॥ ५८
कृत्वा गोष्ठे पृथग् वत्सान् बालाः स्वं स्वं गृहं गताः ।
जगुश्चाघासुरवधमात्मनो रक्षणं हरेः ॥ ५९

इति श्रीगर्गसंहितायां वृन्दावनखण्डे नारद-
बहुलाश्वसंवादे ब्रह्मस्तुतिर्नाम
नवमोऽध्यायः ॥ ९]

नारद उवाच

वत्साद्बकमुखान्मुक्तं ततो मुक्तं ह्यघासुरात् ।
श्रुत्वा कति दिनैः कृष्णं यशोदाभूद्भयातुरा ॥ १६

कलावतीं रोहिणीञ्च गोपीगोपान् वयोऽधिकान् ।
वृषभानुवरं गोपं नन्दराजं व्रजेश्वरम् ॥ १७

नवोपनन्दान्नन्दांश्च वृषभानून् प्रजेश्वरान् ।
समाहूय तदग्रे च वचः प्राह यशोमती ॥ १८

यशोदोवाच

किं करोमि क्व गच्छामि कल्याणं मे कथं भवेत् ।
मत्सुते बहवोऽरिष्टा आगच्छन्ति क्षणे क्षणे ॥ १६

पूर्वं महावनं त्यक्त्वा वृन्दारण्ये गता वयम् ।
एतत्यक्त्वा क्व यास्यामो देशे वदत निर्भये ॥ २०

चञ्चलोऽयं बालको मे क्रीडन् दूरे प्रयाति हि ।
बालकाश्चञ्चलाः सर्वे न मन्यन्ते वचो मम ॥ २१

बकासुरश्च मे बालं तीक्ष्णतुण्डोऽग्रसद्बली ।
तस्मान्मुक्तन्तु जग्राहार्भकैर्दीनमघासुरः ॥ २२

वत्सासुरस्तज्जिघांसुः सोऽपि दैवेन मारितः ।
वत्सार्थं स्वगृहाद्बालं न बहिः कारयाम्यहम् ॥ २३

नारद उवाच

इत्थं वदन्तीं सततं रुदन्तीं
यशोमतीं वीक्ष्य जगाद नन्दः ।
आश्वासयामास सुवल्गुवाक्यै
र्धर्मार्थविद्धर्मभृतां वरिष्ठः ॥ २४

नन्द उवाच

गर्गवाक्यं त्वया सर्वं विस्मृतं हे यशोमति ।
ब्राह्मणानां वचः सत्यं नासत्यं भवति क्वचित् ॥ २५
तस्माद्दानं प्रकर्तव्यं सर्वारिष्टनिवारणम् ।
दानात् परन्तु कल्याणं न भूतं न भविष्यति ॥ २६

नारद उवाच

तदा यशोदा विप्रेभ्यो नवरत्नं महाधनम् ।
स्वालङ्कारांश्च बालस्य सबलस्य ददौ नृप ॥ २७
अयुतं वृषभाणाञ्च गवां लक्षं मनोहरम् ।
द्विलक्षमन्नभाराणां नन्दो दाने ददौ ततः ॥ २८

इति श्रीगर्गसंहितायां वृन्दावनखण्डे नारदबहुलाश्व-
संवादे अघासुरमोक्षो नाम
षष्ठोऽध्यायः ॥ ६

नारद उवाच

गोपेच्छया रामकृष्णौ गोपालौ तौ बभूवतुः ।
गाश्चारयन्तौ गोपालैर्वयस्यैश्चेरतुर्वने ॥ १
अग्रे गावस्तथा पृष्ठे चरन्त्यः पार्श्वयोर्द्वयोः ।
श्रीकृष्णस्य बलस्यापि पश्यन्तीः सुन्दरं मुखम् ॥ २
घण्टामञ्जीरझाङ्कारं कुर्वन्त्यस्ता इतस्ततः ।
किङ्किणीजालसंयुक्ता हेममालालसद्गलाः ॥ ३
मुक्तागुच्छैर्बर्हिपिच्छैर्लसत्पुच्छाच्छकेसराः ।
स्फुरतां नवरत्नानां भालपुष्पैर्विराजिताः ॥ ४
शृङ्गयोरन्तरे राजच्छिरोमणिमनोहराः ।
हेमरश्मिप्रभास्फूर्ज्जच्छृङ्गपार्श्वप्रवेष्टनाः ॥ ५
आरक्ततिलकाः काश्चित् पीनपुच्छारुणाङ्घ्रयः ।
कैलासगिरिसङ्काशाः शीलरूपा महागुणाः ॥ ६
सवत्सा मन्दगामिन्य ऊधोभारेण मैथिल ।
कुण्डोध्न्यः पाटलाः काश्चिल्लक्षन्त्यो भव्यमूर्तयः ॥ ७
काश्चित् पीता विचित्राश्च श्यामाश्च हरितास्तथा ।
ताम्रा धूम्रा घनश्यामा घनश्यामे गतेक्षणाः ॥ ८
लघुशृङ्ग्यो दीर्घशृङ्ग्य उच्चशृङ्ग्यो वृषैः सह ।
मृगशृङ्ग्यो वक्रशृङ्ग्यः कपिला मङ्गलायनाः ॥ ९
शाड्वलं कोमलं शान्तं वीक्षन्त्योऽपि वने वने ।
कोटिशः कोटिशो गावश्चरन्त्यः कृष्णपार्श्वयोः ॥ १०
पुण्यं श्रीयमुनातीरं तमालैः श्यामलं वनम् ।
नीपैर्निम्बैः कदम्बैश्च प्रवालैः पनसैर्द्रुमैः ॥ ११
कदलीकोविदाराम्रैर्जम्बुबिल्वैर्मनोहरैः ।
अश्वत्थैश्च कपित्थैश्च माधवीभिश्च मण्डितम् ॥ १२

बभौ वृन्दावनं दिव्यं वसन्तर्तुमनोहरम् ।
नन्दनं सर्वतोभद्रं क्षिपच्चैत्ररथं वनम् ॥ १३
यत्र गोवर्द्धनो नाम सुनिर्झरदरीयुतः ।
रत्नधातुमयः श्रीमान् मन्दारवनसङ्कुलः ॥ १४
श्रीखण्डबदरीरम्भादेवदारुवटैर्वृतः ।
पलाशप्लक्षाशोकैश्चारिष्टार्जुनकदम्बकैः ॥ १५
पारिजातैः पाटलैश्च चम्पकैः परिशोभितः ।
करञ्जजालकुञ्जाढ्यः श्यामैरिन्द्रयवैर्वृतः ॥ १६
कलकण्ठैः कोकिलैश्च पुंस्कोकिलमयूरभृत् ।
गाश्चारयँस्तत्र कृष्णो विचचार वने वने ॥ १७
वृन्दावने मधुवने पार्श्वे तालवनस्य च ।
कुमुद्वने बाहुले च दिव्ये कामवने परे ॥ १८
बृहत्सानुगिरेः पार्श्वे गिरेर्नन्दीश्वरस्य च ।
सुन्दरे कोकिलवने कोकिलाध्वनिसङ्कुले ॥ १९
रम्ये कुशवने सौम्ये लताजालसमन्विते ।
महापुण्ये भद्रवने भाण्डीरोपवने नृप ॥ २०
लोहार्गले च यमुनातीरे तीरे वने वने ।
पीतवासः परिकरो नटवेषो मनोहरः ॥ २१
वेत्रभृद्वादयन् वंशीं गोपीनां प्रीतिमावहन् ।
मयूरपक्षभृन्मौलिस्रग्वी कृष्णो बभौ नृप ॥ २२
अग्रे कृत्वा गवां वृन्दं सायं काले हरिः स्वयम् ।
रागैः समीरयन् वंशीं श्रीनन्दव्रजमाविशत् ॥ २३
वंशीध्वनिकलं श्रुत्वा श्रीवंशीवटमार्गतः ।
गोरजोभिर्नभोव्याप्तं वीक्ष्य गेहाद्विनिर्गताः ॥ २४
दूरीकर्तुं ह्याधिबाधामाहर्तुं सुखमुत्तमम् ।
विस्मर्तुं न समर्थास्तं द्रष्टुं गोप्यः समाययुः ॥ २५

सङ्कोचवीथीषु न संगृहीतः
शनैश्चलन् गोगणसङ्कुलासु ।
सिंहावलोको गजबाललीलै
र्वधूजनैः पङ्कजपत्रनेत्र : ॥ २६
सुमण्डितं मैथिल गोरजोभि
र्नीलं परं कुन्तलमादधानः ।
हेमाङ्गदी मौलिविराजमान
आकर्णवक्रीकृतदृष्टिबाणः ॥ २७
गोधूलिभिर्मण्डितकुन्दहारः
कर्णोपरिस्फूर्जितकर्णिकार : ।
पीताम्बरो वेणुनिनादकारः
पातु प्रभुर्वो हृतभूरिभारः ॥ २८

इति श्रीगर्गसंहितायां वृन्दावनखण्डे नारदबहुलाश्व-
संवादे श्रीकृष्णगोचारवर्णनं नाम
सप्तमोऽध्यायः ॥ ७

नारद उवाच

एकदा सबलः कृष्णश्चारयन् गा मनोहराः ।
गोपालैः सहितैः सर्वैर्ययौ तालवनं वनम् ॥ १
धेनुकस्य भयाद् गोपा न गतास्ते वनान्तरम् ।
कृष्णोऽपि न गतस्तत्र बल एको विवेश ह ॥ २
नीलाम्बरं कटौ बद्ध्वा बलदेवो महाबलः ।
परिपक्वफलार्थं हि तद्वने विचचार ह ॥ ३
बाहुभ्यां कम्पयंस्तालान् फलसङ्घं निपातयन् ।
गर्जंश्च निर्भयः साक्षादनन्तोऽनन्तविक्रमः ॥ ४
फलानां पततां शब्दं श्रुत्वा क्रोधावृतः खरः ।
मध्याह्ने स्वापकृद् दुष्टो भीमः कंससखो बली ॥ ५
आययौ सम्मुखे योद्धुं बलदेवस्य धेनुकः ।
बलं पश्चिमपादाभ्यां निहत्योरसि सत्वरम् ॥ ६
चकार खरशब्दं स्वं परिधावन् मुहुर्मुहुः ।
गृहीत्वा धेनुकं शीघ्रं बलः पश्चिमपादयोः ॥ ७
चिक्षेप तालवृक्षे च हस्तेनैकेन लीलया ।
तेन भग्नः स तालोऽपि तालान् पार्श्वस्थितान् बहून् ॥ ८
पातयामास राजेन्द्र तदद्भुतमिवाभवत् ।
पुनरुत्थाय दैत्येन्द्रो बलं जग्राह रोषतः ॥ ९
योजनं नोदयामास गजं प्रति गजो यथा ।
गृहीत्वा तं बलः सद्यो भ्रामयित्वाथ धेनुकम् ॥ १०
भूपृष्ठे पोथयामास मूर्च्छितो भग्नमस्तकः ।
क्षणेन पुनरुत्थाय क्रोधसंयुक्तविग्रहः ॥ ११
मूर्ध्नि कृत्वा चतुःश्रृङ्गं धृत्वा रूपं भयङ्करम् ।
गोपान् विद्रावयामास श्रृङ्गैस्तीक्ष्णैर्भयङ्करैः ॥ १२

अग्रे पलायितान् गोपान् दुद्रावाशु मदोत्कटः ।
श्रीदामा तञ्च दण्डेन सुबलो मुष्टिना तथा ॥ १३
स्तोकः पाशेन त दैत्यं संतताड महाबलम् ।
क्षेपणेनार्जुनोऽशुश्च दैत्यं यष्टिकया खरम् ॥ १४
विशालर्षभ एत्याशु पादेन स्वबलेन च ।
तेजस्वी ह्यर्द्धचन्द्रेण देवप्रस्थश्चपेटकैः ॥ १५
वरूथप. कन्दुकेन संतताड महाखरम् ।
अथ कृष्णोऽपि तं नीत्वा हस्ताभ्यां धेनुकासुरम् । ॥ १६
भ्रामयित्वाशु चिक्षेप गिरिगोवर्द्धनोपरि ।
श्रीकृष्णस्य प्रहारेण मूर्च्छितो घटिकाद्वयम् ॥ १७
पुनरुत्थाय स्वतनुं विधुन्वन् दारयन् मुखम् ।
शृङ्गाभ्या श्रीहरिं नीत्वा धावन् दैत्यो नभो गतः ॥ १८
चकार तेन खे युद्धमूर्ध्वं वै लक्षयोजनम् ।
गृहीत्वा धेनुक दैत्यं श्रीकृष्णो भगवान् स्वयम् ॥ १६
चिक्षेपाधो भूमिमध्ये चूर्णितास्थिं सुमूर्च्छितम् ।
पुनरुत्थाय शृङ्गाभ्यां नादं कृत्वातिभैरवम् ॥ २०
गोवर्द्धनं समुत्पाट्य श्रीकृष्णे प्राहिणोत् खरः ।
गिरि गृहीत्वा श्रीकृष्णः प्राक्षिपत्तस्य मस्तके ॥ २१
दैत्यो गिरि गृहीत्वाथ श्रीकृष्णे प्राहिणोद्बली ।
कृष्णो गोवर्द्धनं नीत्वा पूर्वस्थाने समाक्षिपत् ॥ २२
पुनर्धावन् महादैत्यः शृङ्गाभ्यां दारयन् भुवम् ।
बलं पश्चिमपादाभ्यां ताडयित्वा जगर्ज ह ॥ २३
ननाद तेन ब्रह्माण्डं प्रैजद्भूखण्डमण्डलम् ।
हस्ताभ्यां संगृहीत्वा तं बलदेवो महाबलः ॥ २४
भूपृष्ठे पोथयामास मूर्च्छितं भग्नमस्तकम् ।
पुनस्तताड तं दैत्यं मुष्टिना ह्यच्युताग्रजः ॥ २५

तेन मुष्टिप्रहारेण सद्यो वै निधनं गतः ।
तदैव ववृषुर्देवाः पुष्पैर्नन्दनसम्भवैः ॥ २६
देहाद्विनिर्गतः सोऽपि श्यामसुन्दरविग्रहः ।
स्रग्वी पीताम्बरो देवो वनमालाविभूषितः ।
श्रीकृष्णं सबलं नत्वा परिक्रम्य स्थितोऽभवत् ॥ २७
तदैव सद्यो गोलोकादागतोऽभून्महारथः ।
लक्षपार्षदसंयुक्तः सहस्रध्वजशोभितः ।
सहस्रचक्रध्वनिभृद्धयायुतसमन्वितः ॥ २८
लक्षचामरशोभाढ्योऽरुणवर्णोऽतिरत्नभृत् ।
दिव्यो योजनविस्तीर्णो मनोयायी मनोहरः ॥ २६
किङ्किणीजालसंयुक्तो घण्टामञ्जीरमण्डितः ।
हरिं प्रदक्षिणीकृत्य सबलं दिव्यरूपधृक् ॥ ३०
दिव्यं रथं समारुह्य द्योतयन् मण्डलं दिशाम् ।
जगाम दैत्यो हे राजन् गोलोकं प्रकृतेः परम् ॥ ३१
श्रीकृष्णो धेनुकं हत्वा सबलो बालकैः सह ।
तद्यशस्तु प्रगायद्भिर्बभौ गोकुलगोगणैः ॥ ३२

राजोवाच

मुने मुक्तिं कथं प्राप्तः पूर्वं को धेनुकासुरः ।
कथं खरत्वमापन्न एतन्मे ब्रूहि तत्त्वतः ॥ ३३

नारद उवाच

वैरोचनेर्बलेः पुत्रो नाम्ना साहसिको बली ।
नारीणां दशसाहस्रै रेमे वै गन्धमादने ॥ ३४
वादित्राणां नूपुराणां शब्दोऽभूत्तद्वने महान् ।
गुहायामास्थितस्यापि श्रीकृष्णं स्मरतो मुनेः ॥ ३५
दुर्वाससोऽथ तेनापि ध्यानभङ्गो बभूव ह ।
निर्गतः पादुकारूढो दुर्वासाः कृशविग्रहः ॥ ३६

दीर्घश्मश्रुर्यष्टिधरः क्रोधपुञ्जोऽनलद्युतिः।
यस्य शापाद्विश्वमिदं कम्पते स जगाद ह ॥ ३७

दुर्वासा उवाच

उत्तिष्ठ गर्दभाकार गर्दभो भव दुर्मते।
वर्षाणान्तु चतुर्लक्षे व्यतीते भारते पुनः ॥ ३८
माथुरे मण्डले दिव्ये पुण्ये तालवने वने।
बलदेवस्य हस्तेन मुक्तिस्ते भविताऽसुर ॥ ३९

नारद उवाच

तस्माद् बलस्य हस्तेन श्रीकृष्णस्तं जघान ह।
प्रह्लादाय वरो दत्तो न वध्यो मे तवान्वयः ॥ ४०

इति श्रीगर्गसंहितायां वृन्दावनखण्डे नारदबहुलाश्व-
संवादे धेनुकासुरमोक्षो नाम
अष्टमोऽध्यायः ॥ ८

नारद उवाच

बलं विनाथ गोपालैश्चारयन् गा हरिः स्वयम् ।
कालिन्दीकूलमागत्य पपौ वारि विषावृतम् ॥ १
कालियेन फणीन्द्रेण जलं यत्र विदूषितम् ।
पीत्वा निपेतुर्व्यसवो गावो गोपा जलान्तिके ॥ २
तदा तान् जीवयामास दृष्ट्या पीयूषपूर्णया ।
आर्द्रचित्तो हरिः साक्षाद्भगवान् वृजिनार्दनः ॥ ३
कटौ पीतपटं बद्ध्वा नीपमारुह्य माधवः ।
पपातोत्तुङ्गविटपात् तत्तोये विषदूषिते ॥ ४
उच्चचाल जलं दुष्टं कृष्णसम्पातघूर्णितम् ।
तत्सर्पमन्दिरं नद्यां भङ्गीभूतं बभूव ह ॥ ५
तदैव कालियः क्रुद्धः फणी फणशतावृतः ।
दशन् दन्तैश्च भुजया चच्छाद नृप माधवम् ॥ ६
कृष्णो दीर्घं वपुः कृत्वा बन्धनान्निर्गतश्च तम् ।
पुच्छे गृहीत्वा सर्पेन्द्रं भ्रामयित्वा त्वितस्ततः ॥ ७
जले निपात्य हस्ताभ्यां चिक्षेपाशु धनुःशतम् ।
पुनरुत्थाय सर्पेन्द्रो लेलिहानो भयङ्करः ॥ ८
वामहस्ते हरिं सर्पो रुषा जग्राह माधवम् ।
हरिर्दक्षिणहस्तेन गृहीत्वा तं महाखलम् ॥ ९
तज्जले पोथयामास सुपर्ण इव पन्नगम् ।
सर्पो मुखशतं दीर्घं प्रसार्य पुनरागतः ॥ १०
पुच्छे गृहीत्वा तं कृष्णश्चकर्षाशु धनुःशतम् ।
कृष्णहस्ताद्विनिष्क्रम्य सर्पस्तं व्यदशत् पुनः ॥ ११
तताड मुष्टिना सर्पं त्रैलोक्यबलधारकः ।
कृष्णमुष्टिप्रहारेण मूर्च्छितो विगतस्मृतिः ॥ १२

नतं कृत्वाननशत स्थितोऽभूत् कृष्णसम्मुखे ।
आरुह्य तत्फणशतं मणिवृन्दमनोहरम् ।। १३
ननर्त नटवत् कृष्णो नटवेषो मनोहरः ।
गायन् सप्तस्वरै रागं सङ्गीतञ्च सतालकम् ॥ १४
पुष्पैर्देवेषु वर्षत्सु ताण्डवे नटराजवत् ।
वादयत्सु मुदा वीणानकदुन्दुभिवेणुकान् ॥ १५
सतालपदविन्यासैस्तत्फणान् उद्भटान् बहून् ।
बभञ्ज श्वसतः कृष्णः कालियस्य दुरात्मनः ॥ १६
तदैव नागपत्न्यस्ता आगता भयविह्वलाः ।
नत्वा कृष्ण परं देवमूचुर्गद्गदया गिरा ॥ १७

नागपत्न्य ऊचुः

नमः श्रीकृष्णचन्द्राय गोलोकपतये नमः ।
असङ्ख्याण्डाधिपतये परिपूर्णतमाय ते ॥ १८
श्रीराधापतये तुभ्यं व्रजाधीशाय ते नमः ।
नमः श्रीनन्दपुत्राय यशोदानन्दनाय ते ।। १९

पाहि पाहि परदेव पन्नग
त्वत्परं न शरणं जगत्त्रये ।
त्वं परात्परतरो हरिः स्वयं
लीलया किल तनोषि विग्रहम् ॥ २०

नारद उवाच

नागपत्नीस्तुतः कृष्णः कालियं विगतस्मयम् ।
विससर्ज हरिः साक्षात् परिपूर्णतमः स्वयम् ॥ २१
पाहीति प्रवदन्तं त कालियं भगवान् हरिः ।
प्रणतं सम्मुखे प्राप्तं प्राह देवो जनार्दनः ॥ २२

भगवानुवाच

द्वीपं रमणक गच्छ सकलत्रसुहृद्वृतः ।
सुपर्णोऽद्यतनात्त्वां वै नाद्यान्मत्पादलाञ्छितम् ॥ २३

नारद उवाच

सर्पः कृष्णन्तु संपूज्य परिक्रम्य प्रणम्य तम् ।
कलत्रपुत्रसहितो द्वीपं रमणकं ययौ ॥ २४
अथ श्रुत्वा कालियेन संग्रस्तं नन्दनन्दनम् ।
तत्राजग्मुर्गोपगणा नन्दाद्याः सकलत्रकाः ॥ २५
जलाद्विनिर्गतं कृष्णं दृष्ट्वा मुमुदिरे ततः ।
आश्लिष्य स्वसुतं नन्दः परां मुदमवाप ह ॥ २६
सुतं लब्ध्वा यशोदा सा सुतकल्याणहेतवे ।
ददौ दानं द्विजातिभ्यः स्नेहस्नुतपयोधरा ॥ २७
तत्रैव शयनं चक्रुर्गोपाः सर्वे परिश्रमात् ।
कालिन्दीनिकटे राजन् गोपीभिर्गोगणैः सह ॥ २८
वेणुसङ्घर्षणोद्धतो दावाग्निः प्रलयाग्निवत् ।
निशीथे सर्वतो गोपान् दग्धुमागतवान् स्फुरन् ॥ २६
गोपा वयस्याः श्रीकृष्णं सबलं शरणं गताः ।
नत्वा कराञ्जलिं कृत्वा तमूचुर्भयकातराः ॥ ३०

गोपा ऊचुः

कृष्ण कृष्ण महाबाहो राम राम महाबल ।
पाहि पाहि वनं कष्टाद्दावाग्नेः स्वजनान् प्रभो ॥ ३१

नारद उवाच

स्वलोचनानि माभैष्ट न्यमीलयत माधवः ।
इत्युक्त्वा वह्निमपिबद् देवो योगेश्वरेश्वरः ॥ ३२
प्रातर्गोपगणैः सार्द्धं विस्मितैर्नन्दनन्दनः ।
गोगणैः सहितः श्रीमद् व्रजमण्डलमाययौ ॥ ३३

इति श्रीगर्गसंहितायां वृन्दावनखण्डे नारदबहुलाश्वसंवादे
कालियदमनदावाग्निपानं नाम
नवमोऽध्यायः ॥६

वैदेह उवाच

यद्रजो दुर्लभं लोके योगिनां बहुजन्मभिः ।
तत्पादाब्जं हरेः साक्षाद्बभौ कालियमूर्द्ध सु ।। १
कोऽयं पूर्वं कुशलकृत् कालियः फणिनां वरः ।
एनं वेदितुमिच्छामि ब्रूहि देवर्षिसत्तम ।। २

नारद उवाच

स्वायम्भुवान्तरे पूर्वं नाम्ना वेदशिरा मुनिः ।
विन्ध्याचले तपोऽकार्षीद्भृगुवंशसमुद्भवः ।।३
तदाश्रमे तप कर्तुं प्राप्तो ह्यश्वशिरा मुनिः ।
तं वीक्ष्य रक्तनयनः प्राह वेदशिरा रुषा ॥ ४

वेदशिरा उवाच

ममाश्रमे तपो विप्र मा कुर्याः सुख्यहं नहि ।
अन्यत्र ते तपोयोग्या भूमिर्नास्ति तपोधन ।। ५

नारद उवाच

श्रुत्वाथ वेदशिरसो वाक्यं ह्यश्वशिरा मुनिः ।
क्रोधयुक्तो रक्तनेत्रः प्राह तं मुनिपुङ्गवम् ।। ६

अश्वशिरा उवाच

महाविष्णोरियं भूमिर्न ते मे मुनिसत्तम ।
कतिभिर्मुनिभिश्चात्र न कृतं तप उत्तमम् ।। ७
श्वसन् सर्पेन्द्रवत्त्वं भो वृथा क्रोधं करोषि हि ।
तदा सर्पो भव त्वं हि भूयात्ते गरुडाद्भयम् ॥ ८

वेदशिरा उवाच

त्वं महादुरभिप्रायो लघुद्रोहे महोद्यमः ।
कार्यार्थी काक इव कौ त्वं काको भव दुर्मते ॥ ६

नारद उवाच

आविरासीत्ततो विष्णुरित्थश्च शपतोस्तयोः ।
स्वस्वशापादुःखितयोः सान्त्वयामास तौ गिरा ॥ १०

भगवानुवाच

युवां तु मे समौ भक्तौ भुजाविव तनौ मुनी ।
स्ववाक्यन्तु मृषा कर्तुं समर्थोऽहं मुनीश्वरौ ॥ ११
भक्तवाक्य मृषा कर्तुं नेच्छामि शपथो मम ।
ते मूर्ध्नि हे वेदशिरश्चरणौ मे भविष्यतः ॥ १२
तदा ते गरुडाद्भीतिर्न भविष्यति कर्हिचित् ।
शृणु मेऽश्वशिरो वाक्यं शोचं मा कुरु मा कुरु ॥ १३
काकरूपेऽपि सुज्ञानं ते भविष्यति निश्चितम् ।
परं त्रैकालिकं ज्ञानं संयुतं योगसिद्धिभिः ॥ १४

नारद उवाच

इत्युक्त्वाथ गते विष्णौ मुनिरश्वशिरा नृप ।
साक्षात् काकभुशुण्डोऽभूद् योगीन्द्रो नीलपर्वते ॥ १५
रामभक्तो महातेजाः सर्वशास्त्रार्थदीपकः ।
रामायणं जगौ यो वै गरुडाय महात्मने ॥ १६
चाक्षुषे ह्यन्तरे प्राप्ते दक्षः प्राचेतसो नृप ।
कश्यपाय ददौ कन्या एकादश मनोहराः ॥ १७
तासां कद्रूश्च या ज्येष्ठा सावैवं रोहिणी स्मृता ।
वसुदेवप्रिया यस्यां बलदेवोऽभवत् सुतः ॥ १८
सा कद्रूश्च महासर्पान् जनयामास कोटिशः ।
महोद्भटान् विषबलानुग्रान् पञ्चशताननान् ॥ १९
महामणिधरान् दिव्यान् कांश्चिद् दशशताननान् ।
तेषां वेदशिरा नाम कालियोऽभून्महाफणी ॥ २०

तेषामादौ फणीन्द्रोऽभूच्छेषोऽनन्तः परात्परः ।
सोऽद्यैव बलदेवोऽस्ति रामोऽनन्तोऽच्युताग्रजः ॥ २१
एकदा श्रीहरिः साक्षाद्भगवान् प्रकृतेः परः ।
शेषं प्राह प्रसन्नात्मा मेघगम्भीरया गिरा ॥ २२

भगवानुवाच

भूमण्डलं समाधातुं सामर्थ्यं कस्यचिन्नहि ।
तस्मादेनं महीगोलं मूर्ध्नि त्वं हि समुद्वह ॥ २३
अनन्तविक्रमस्त्वं वै ततोऽनन्त इति स्मृतः ।
इदं कार्यं प्रकर्तव्यं जनकल्याणहेतवे ॥ २४

शेष उवाच

अवधिं कुरु यावत्त्वं धरोद्धारस्य मे प्रभो ।
भूभारं धारयिष्यामि तावत्ते वचनादिह ॥ २५

भगवानुवाच

नित्यं सहस्रवदनैरुच्चारश्च पृथक् पृथक् ।
मद्गुणस्फुरतां नाम्नां कुरु सर्पेन्द्र सर्वतः ॥ २६
मन्नामानि च दिव्यानि यदा यान्त्यवसानताम् ।
तदा भूभारमुत्तार्य फणिस्त्वं सुसुखो भव ॥ २७

शेष उवाच

स्वाधारोऽहं भविष्यामि मदाधारश्च को भवेत् ।
निराधारः कथं तोये तिष्ठामि कथय प्रभो ॥ २८

भगवानुवाच

अहञ्च कमठो भूत्वा धारयिष्यामि ते तनुम् ।
महीभारमयी दीर्घा मा शोचं कुरुतात् सखे ॥ २९

नारद उवाच

तदा शेषः समुत्थाय नत्वा श्रीगरुडध्वजम् ।
जगाम नृप पातालादधो वै लक्षयोजनम् ॥ ३०

गृहीत्वा स्वकरेणेदं गरिष्ठं भूमिमण्डलम् ।
दधार स्वफणे शेषोऽप्येकस्मिंश्चण्डविक्रमः ॥ ३१
सङ्कर्षणेऽथ पाताले गतेऽनन्ते परात्परे ।
अन्ये फणीन्द्रास्तमनु विविशुर्ब्रह्मणोदिताः ॥ ३२
अतले वितले केचित् सुतले च महातले ।
तलातले तथा केचित् प्राप्ताः केचिद्रसातले ॥ ३३
तेभ्यस्तु ब्रह्मणा दत्त द्वीपं रमणकं भुवि ।
कालियप्रमुखास्तस्मिन् न्यवसन् सुखसयुताः ॥ ३४
इति ते कथितं राजन् कालियस्य कथानकम् ।
भुक्तिदं मुक्तिदं सारं किं भूयः श्रोतुमिच्छसि ॥ ३५

इति श्रीगर्गसंहितायां वृन्दावनखण्डे नारदबहुलाश्वसंवादे
कालियोपाख्यानवर्णनं नाम
दशमोऽध्यायः ॥ १०

राजोवाच

द्वीपे रमणके ब्रह्मन् सर्पानन्यान् विना कथम् ।
एतन्मे ब्रूहि सकलं कालियस्याभवद्भयम् ।। १

नारद उवाच

तत्र नागान्तको नित्यं नागसङ्घं जघास ह ।
गतक्षुधं चैकदा ते तार्क्ष्यं प्राहुर्भयातुराः ।। २

नागा ऊचुः

हे गरुत्मन् नमस्तुभ्यं त्वं साक्षाद्विष्णुवाहनः ।
अस्मानत्सि यदा सर्पान् कथं नो जीवनं भवेत् ।। ३
तस्माद् बलिं गृहाणाशु मासे मासे गृहात् पृथक् ।
वनस्पतिसुधान्नानामुपचारैर्विधानतः ।। ४

गरुड उवाच

एकः सर्पस्तु मे देयो भवद्भिर्वा गृहात् पृथक् ।
कथं पचामि तमृते बलिं वीटकवत् परम् ॥ ५

नारद उवाच

तथास्तु चोक्तास्ते सर्वे गरुडाय महात्मने ।
गोपीथायात्मनो राजन् नित्य दिव्यं बलिं ददुः ।। ६
कालियस्य गृहस्यापि समयोऽभूद्यदा नृप ।
तदा तार्क्ष्यबलिं सर्वं बुभुजे कालियो बलात् ।। ७
तदागतः प्रकुपितो प्रोद्यतः कालियोपरि ।
चकार पादविक्षेपं गरुडश्चण्डविक्रमः ॥ ८
गरुडाङ्घ्रिप्रहारेण कालियो मूर्च्छितोऽभवत् ।
पुनरुत्थाय जिह्वाभिः प्रावलीढन् मुखं श्वसन् ।। ९
प्रसार्य्य स्वं फणशतं कालियः फणिनां वरः ।
व्यदशद् गरुडं वेगाद्दद्भिर्विषमयैर्बली ॥ १०

गृहीत्वा तञ्च तुण्डेन गरुडो विष्णुवाहनः ।
भूपृष्ठे पोथयामास पक्षाभ्यां ताडयन् मुहुः ॥ ११
तुण्डाद्विनिर्गतः सर्पस्तत्पक्षान् विचकर्ष ह ।
तत्पादौ वेष्टयंस्तुद्यन् फूत्कारं व्यदधन् मुहुः ॥ १२
तार्क्ष्यपक्षौ च पतितौ भूमध्ये द्वौ विरेजतुः ।
एकेन बर्हिणोऽभूवन् नीलकण्ठा द्वितीयतः ॥ १३
तेषान्तु दर्शनं पुण्यं सर्वकामफलप्रदम् ।
शुक्लपक्षे मैथिलेन्द्र दशम्यामाश्विनस्य तत् ॥ १४
कुपितो गरुडस्तं वै नीत्वा तुण्डेन कालियम् ।
निपात्य भूम्यां सहसा तत्तनुं विचकर्ष ह ॥ १५
तदा दुद्राव तत्तुण्डात् कालियो भयविह्वलः ।
तमन्वधावत् सहसा पक्षिराट् चण्डविक्रमः ॥ १६
सप्तद्वीपान् सखण्डांश्च सप्तसिन्धून् गतः फणी ।
यत्र यत्र गतस्तार्क्ष्यं तत्र तत्र ददर्श ह ॥ १७
भूर्लोकञ्च भुवर्लोकं स्वर्लोकं प्रगतः फणी ।
महर्लोकं ततो धावज्जनलोकं जगाम ह ॥ १८
तत्रैव गरुडे प्राप्तेऽधोऽधोऽलोकं पुनर्गतः ।
श्रीकृष्णस्य भयात् केऽपि रक्षां तस्य न सन्दधुः ॥ १९
कुत्रापि न सुखे जाते कालियोऽतिभयातुरः ।
जगाम देवदेवस्य शेषस्य चरणान्तिके ॥ २०
नत्वा प्रणम्य तं शेषं परिक्रम्य कृताञ्जलिः ।
दीनो भयातुरः प्राह दीर्घपृष्ठिः (?) प्रकम्पितः ॥ २१

कालिय उवाच

हे भूमिभर्तर्भुवनेश भूमन्
भूभारहारिन् निजभूरिलील ।

मां पाहि पाहि प्रभविष्णु पूर्णः
परात्परस्त्वं पुरुषः पुराणः ॥ २२

नारद उवाच

दीनं भयातुरं दृष्ट्वा कालियं श्रीफणीश्वरः ।
वाचा मधुरया प्रीणन् प्राह देवो जनार्दनः ॥ २३

शेष उवाच

हे कालिय महाबुद्धे शृणु मे परमं वचः ।
कुत्रापि न हि ते रक्षा भविष्यति न संशयः ॥ २४
आसीत् पुरा मुनिः सिद्धः सौभरिर्नाम नामतः ।
वृन्दारण्ये तपस्तेपे वर्षाणामयुतं जले ॥ २५
मीनराजविहारं यो वीक्ष्य गेहस्पृहोऽभवत् ।
स उवाह महाबुद्धिर्मान्धातुस्तनुजाशतम् ॥ २६
तस्मै ददौ हरिः साक्षात् परां भागवतीं श्रियम् ।
वीक्ष्य तां नृप मान्धाता विस्मितोऽभूद्गतस्मयः ॥ २७
यमुनान्तर्जले दीर्घं सौभरेस्तपतस्तपः ।
पश्यतस्तस्य गरुडो मीनराजं जघान ह ॥ २८
मीनान् सुदुःखितान् दृष्ट्वा दुःखहा दीनवत्सलः ।
तस्मै शापं ददौ क्रुद्धः सौभरिर्मुनिसत्तमः ॥ २९

सौभरिरुवाच

मीनानद्यतनादत्र यद्यत्सि त्वं बलाद् विराट् ।
तदैव प्राणनाशस्ते भूयान्मे शापतस्त्वरम् ॥ ३०

शेष उवाच

तद्दिनात्तत्र नायाति गरुडः शापविह्वलः ।
तस्मात् कालिय गच्छाशु वृन्दारण्ये हरेर्वने ॥ ३१
कालिन्द्याञ्च निजं वासं कुरु मद्वाक्यनोदितः ।
निर्भयोऽतिभयं तार्क्ष्यान्न भविष्यति कर्हिचित् ॥ ३२

नारद उवाच

इत्युक्तः कालियो भीतः सकलत्रः सपुत्रकः ।
कालिन्द्यां वासकृद्राजन् श्रीकृष्णेन विवासितः ।। ३३

इति श्रीगर्गसंहितायां वृन्दावनखण्डे नारदबहुलाश्वसंवादे
कालियोपाख्यानवर्णनं नाम
एकादशोऽध्यायः ।। ११

नारद उवाच

इदं मया ते कथितं कालियस्यापि मर्दनम् ।
श्रीकृष्णचरितं पुण्यं किं भूयः श्रोतुमिच्छसि ॥ १

बहुलाश्व उवाच

श्रीकृष्णस्य कथां श्रुत्वा भक्तस्तृप्तिं न याति हि ।
यथामरः सुधां पीत्वा यथालिः पद्मकर्णिकाम् ॥ २
रासं कृत्वा हरौ जाते शिशुरूपे महात्मनि ।
भाण्डीरे देववागाह श्रीराधां खिन्नमानसाम् ॥ ३
शोचं मा कुरु कल्याणि वृन्दारण्ये मनोहरे ।
मनोरथस्ते भविता श्रीकृष्णेन महात्मना ॥ ४
इत्थं देवगिरा प्रोक्तो मनोरथमहार्णवः ।
कथं बभूव भगवान् वृन्दारण्ये मनोहरे ॥ ५
कथं श्रीराधया सार्द्धं रासक्रीड़ां मनोहराम्
चकार वृन्दकारण्ये परिपूर्णतमः स्वयम् ॥ ६

नारद उवाच

साधु पृष्ट त्वया राजन् भगवच्चरितं शुभम् ।
गुप्तं वदामि देवैश्च लीलाख्यानं मनोहरम् ॥ ७
एकदा मुख्यसख्यौ द्वे विशाखाललिते शुभे ।
वृषभानोर्गृहं प्राप्य राधां जगदतू रहः ॥ ८

सख्यावूचतुः ।

यं चिन्तयसि राधे त्वं यद्गुणं वदसि स्वतः ।
सोऽपि नित्यं समायाति वृषभानुपुरेऽर्भकैः ॥ ९
प्रेक्षणीयस्त्वया राधे दर्शनीयोऽतिसुन्दरः ।
पश्चिमायां निशीथिन्यां गोचारणविनिर्गतः ॥ १०

राधोवाच

लिखित्वा तस्य चित्रं हि दर्शयाशु मनोहरम् ।
तर्हि तत्प्रेक्षणं पश्चात् करिष्यामि न संशयः ॥ ११

नारद उवाच

अथ सख्यौ व्यलिखतां चित्रं नन्दशिशोः शुभम् ।
नवयौवनमाधुर्यं राधायै ददतुस्त्वरम् ॥ १२

तं दृष्ट्वा हर्षिता राधा कृष्णदर्शनलालसा ।
चित्रं करे प्रपश्यन्ती सुष्वापानन्दसङ्कुला ॥ १३

ददर्श कृष्णं भवने शयाना
घनप्रभं पीतपटं दधानम् ।
भाण्डीरदेशे यमुनां समेत्य
नृत्यन्तमाराद्वृषभानुपुत्री ॥ १४

तदैव राधा शयनात् समुत्थिता
परस्य कृष्णस्य वियोगविह्वला ।
सञ्चिन्तयन्ती कमनीयरूपिणं
मेने त्रिलोकीं तृणवद् विदेहराट् ॥ १५

तर्ह्यावजन्तं स्ववनाद् व्रजेश्वरं
सङ्कोचवीथ्यां वृषभानुपत्तने ।
गवाक्षमेत्याशु सखीप्रदर्शितं
दृष्ट्वा तु मूर्च्छां समवाप सुन्दरी ॥ १६

कृष्णोऽपि दृष्ट्वा वृषभानुनन्दिनीं
सुरूपकौशल्ययुतां गुणाश्रयाम् ।
कुर्वन् मनो रन्तुमतीव माधवो
लीलातनुः स प्रययौ स्वमन्दिरम् ॥ १७

एवं ततः कृष्णवियोगविह्वलां
प्रभूतकामज्वरखिन्नमानसाम् ।
संवीक्ष्य राधां वृषभानुनन्दिनी
मुवाच वाचं ललिता सखी वरा ॥ १८

ललितोवाच

कथं त्वं विह्वला राधे मूर्च्छितातिव्यथां गता ।
यदीच्छसि हरिं सुभ्रूस्तस्मिन् स्नेहं दृढं कुरु ॥ १९
लोकस्यापि सुखं सर्वमधिकृत्यास्ति साम्प्रतम् ।
दुःखाग्निर्हृत् प्रदहति कुम्भकाराग्निवच्छुभे ॥ २०

नारद उवाच

ललितायाश्च ललितं वचः श्रुत्वा व्रजेश्वरी ।
नेत्रे उन्मील्य ललितां प्राह गद्गदया गिरा ॥ २१

राधोवाच

व्रजालङ्कारचरणौ न प्राप्तौ यदि मे सखि ।
कदाचिद्विग्रहं तर्हि नाहं स्वं धारयाम्यहम् ॥ २२

नारद उवाच

इति श्रुत्वा वचस्तस्या ललिता भयविह्वला ।
श्रीकृष्णपार्श्वं प्रययौ कृष्णातीरे मनोहरे ॥ २३
माधवीजालसंयुक्ते मधुपध्वनिसङ्कुले ।
कदम्बमूले रहसि प्राह चैकाकिनं हरिम् ॥ २४

ललितोवाच

यस्मिन् दिने च ते रूपं राधया दृष्टमद्भुतम् ।
तद्दिनात् स्तम्भतां प्राप्ता पुत्रिकेव न वक्ति किम् ॥ २५
अलङ्कारस्त्वर्चिरिव वस्त्रं भर्जरजो यथा ।
सुगन्धिः कटुवद् यस्या मन्दिरं निर्जनं वनम् ॥ २६

पुष्पं बाणं चन्द्रबिम्बं विषकन्दमवेहि भो।
तस्यै सन्दर्शनं देहि राधायै दुःखनाशनम् ॥ २७
ते साक्षिणः किं विदित न भूतले
सृजस्यल पासि हरस्यथो जगत्।
यदा समानोऽसि जनेषु सर्वत
स्तथापि भक्तान् भजसे परेश्वरः ॥ २८

नारद उवाच

इति श्रुत्वा हरिः साक्षाल्ललितं ललितावचः।
उवाच भगवान् देवो मेघगम्भीरया गिरा ॥ २९

भगवानुवाच

सर्वं हि भावं मनसः परस्परं
नह्येकतो भामिनि जायते ततः।
प्रेमैव कर्तव्यमतो मयि स्वतः
प्रेम्णा समानं भुवि नास्ति किञ्चित् ॥ ३०
यथा हि भाण्डीरवने मनोरथो
बभूव तस्या हि तथा भविष्यति।
अहैतुकं प्रेम च सद्भिराश्रितं
तच्चापि सन्तः किल निर्गुणं विदुः ॥ ३१
ये राधिकायां मयि केशवे मनाग्
भेदं न पश्यन्ति हि दुग्धशौक्ल्यवत्।
त एव मे ब्रह्मपदं प्रयान्ति तद-
हैतुकस्फूर्जितभक्तिलक्षणाः ॥ ३२
ये राधिकायां मयि केशवे हरौ
कुर्वन्ति भेदं कुधियो नरा भुवि।
ते कालसूत्रे प्रपतन्ति दुःखिता
रम्भोरु यावत् किल चन्द्रभास्करौ ॥ ३३

नारद उवाच

इत्थं श्रुत्वा कृष्णवचो नत्वा तं ललिता सखी।
राधां समेत्य रहसि प्राह प्रहसितानना॥ ३४

ललितोवाच

त्वमिच्छसि यथा कृष्णं तथा त्वां मधुसूदनः।
युवयोर्भेदरहितं तेजस्त्वेकं द्विधा जनैः॥ ३५
तथापि देवि कृष्णाय कर्म निष्कारणं कुरु।
येन ते वाञ्छितं भूयाद् भक्त्या परमया सति॥ ३६

नारद उवाच

इति श्रुत्वा सखीवाक्यं राधा रासेश्वरी नृप।
चन्द्राननां प्राह सखीं सर्वधर्मविदां वराम्॥ ३७

राधोवाच

श्रीकृष्णस्य प्रसन्नार्थं परं सौभाग्यवर्द्धनम्।
महापुण्यं वाञ्छितदं पूजनं वद कस्यचित्॥ ३८
त्वया भद्रे धर्मशास्त्रं गर्गाचार्यमुखाच्छ्रुतम्।
तस्माद् व्रतं पूजनं वा ब्रूहि मह्यं महामते॥ ३९

इति श्रीगर्गसंहितायां वृन्दावनखण्डे
राधाकृष्णप्रेमवर्णनं नाम
द्वादशोऽध्यायः॥ १२

नारद उवाच

राधावाक्यं ततः श्रुत्वा राजन् सर्वसखीवरा ।
चन्द्रानना प्रत्युवाच संविचार्य क्षणं हृदि ॥ १

चन्द्राननोवाच

परं सौभाग्यदं राधे महापुण्य वरप्रदम् ।
श्रीकृष्णस्यापि लब्ध्यर्थं तुलसीसेवनं मतम् ॥ २
दृष्टा स्पृष्टाथवा ध्याता कीर्तिता नामभिः स्तुता ।
रोपिता सिञ्चिता नित्यं पूजिता तुलसीष्टदा ॥ ३
नवधातुलसीभक्तिं ये कुर्वन्ति दिने दिने ।
युगकोटिसहस्राणि ते यान्ति सुकृतं शुभे ॥ ४
यावच्छाखाप्रशाखाभिर्बीजपुष्पदलैः शुभे ।
रोपिता तुलसी मर्त्यैर्वर्धते वसुधातले ॥ ५
तेषां वंशेषु ये जाता ये भविष्यन्ति ये गताः ।
आकल्पयुगसाहस्रं तेषां वासो हरेर्गृहे ॥ ६
यत्फलं सर्वपत्रेषु सर्वपुष्पेषु राधिके ।
तुलसीदलेन चैकेन सर्वदा प्राप्यते तु तत् ॥ ७
तुलसीप्रभवैः पत्रैर्यो नरः पूजयेद्धरिम् ।
लिप्यते न स पापेन पद्मपत्रमिवाम्भसा ॥ ८
सुवर्णभारशतकं रजतं यच्चतुर्गुणम् ।
तत्फलं समवाप्नोति तुलसीवनपालनात् ॥ ९
तुलसीकाननं राधे गृहे यस्यावतिष्ठति ।
तद्गृहं तीर्थरूपं हि न यान्ति यमकिङ्कराः ॥ १०
सर्वपापहरं पुण्यं कामदं तुलसीवनम् ।
रोपयन्ति नरश्रेष्ठास्ते न पश्यन्ति भास्करिम् ॥ ११

रोपणात् पालनात् सेकाद्दर्शनात् स्पर्शनान्नृणाम् ।
तुलसी दहते पापं वाङ्मनःकायसञ्चितम् ॥ १२
पुष्कराद्यानि तीर्थानि गङ्गाद्याः सरितस्तथा ।
वासुदेवादयो देवा वसन्ति तुलसीदले ॥ १३
तुलसीमञ्जरीयुक्तो यस्तु प्राणान् विमुञ्चति ।
यमोऽपि नेक्षितुं शक्तो युक्तं पापशतैरपि ॥ १४
तुलसीकाष्ठजं यस्तु चन्दनं धारयेन्नरः ।
तद्देहं न स्पृशेत् पापं क्रियमाणमपीह यत् ॥ १५
तुलसीविपिनच्छाया यत्र यत्र भवेच्छुभे ।
तत्र श्राद्धं प्रकर्तव्य पितॄणां दत्तमक्षयम् ॥ १६
तुलस्याः सखि माहात्म्यमपि देवश्चतुर्मुखः ।
न समर्थो भवेद्वक्तुं यथा देवस्य शार्ङ्गिणः ॥ १७
श्रीकृष्णचन्द्रचरणे तुलसी चन्दनैर्युता ।
यो ददाति पुमांस्त्री वा यथोक्तं फलमाप्नुयात् ॥ १८
तुलसीसेवनं नित्यं कुरु त्वं गोपकन्यके ।
श्रीकृष्णो वश्यतां याति येन वा सर्वदैव हि ॥ १९

नारद उवाच

इत्थं चन्द्राननावाक्य श्रुत्वा रासेश्वरी नृप ।
तुलसीसेवनं साक्षादारेभे हरितोषणम् ॥ २०
केतकीवनमध्ये च शतहस्तं सुवर्तुलम् ।
उच्चैर्हेमखचिद्भित्ति पद्मरागतटं शुभम् ॥ २१
हरिद्धीरकमुक्तानां प्राकारेण महोज्ज्वलत् ।
सर्वतस्तोलिकायुक्त चिन्तामणिसुमण्डपम् ॥ २२
हेमध्वजसमायुक्तं मुक्तातोरणराजितम् ।
हैमैर्वितानैः परितो वैजयन्तमिवस्फुरत् ॥ २३
एतादृशं श्रीतुलसीमन्दिरं सुमनोहरम् ।
तन्मध्ये तुलसीं स्थाप्य हरित्पल्लवशोभिताम् ॥ २४

अभिजिन्नामनक्षत्रे तत्सेवां सा चकार ह ।
समाहूतेन गर्गेण दिष्टेन विधिना सती ॥ २५
श्रीकृष्णतोषणार्थाय भक्त्या परमया सती ।
इषपूर्णां समारभ्य चैत्रपूर्णावधि व्रतम् ॥ २६
कृत्वा न्य।षञ्चद् दुग्धेन तथा चेक्षुरसेन वै ।
द्राक्षयाम्ररसेनापि सितया बहुमिष्टया ॥ २७
पञ्चामृतेन तुलसीं मासे मासे पृथक् पृथक ।
उद्यापनं समारेभे वैशाखप्रतिपद्दिने ॥ २८
गर्गादिष्टेन विधिना वृषभानुसुता नृप ।
षट्पञ्चाशत्तमैर्भोगैर्ब्राह्मणानां द्विलक्षकम् ॥ २९
सन्तर्प्य वस्त्रभूषाद्यैर्दक्षिणां राधिका ददौ ।
दिव्यानां स्थूलमुक्तानां लक्षभारं विदेहराट् ॥ ३०
कोटिभारं सुवर्णानां गर्गाचार्याय सा ददौ ।
शतभार सुवर्णानां मुक्तानाञ्च तथैव हि ॥ ३१
भक्त्या परमया राधा ब्राह्मणे ब्राह्मणे ददौ ।
देवदुन्दुभयो नेदुर्ननृतुश्चाप्सरोगणाः ।
तन्मन्दिरोपरि सुराः पुष्पवर्षं प्रचक्रिरे ॥ ३२

तदाविरासीत्तुलसी हरिप्रिया
सुपर्णपृष्ठोपरि शोभितासना ।
चतुर्भुजा पद्मपलाशवीक्षणा
श्यामा स्फुरद्धेमकिरीटकुण्डला ॥ ३३
पीताम्बराच्छादितसर्पवेणी
स्रजं दधानां नववैजयन्तीम् ।
खगात् समुत्तीर्य च रङ्गवल्ली
चुचुम्ब राधां परिरभ्य बाहुभिः ॥ ३४

तुलस्युवाच

अहं प्रसन्नास्मि कलावतीसुते
त्वद्भक्तिभावेन जिता निरन्तरम् ।
कृतश्च लोकव्यवहारसङ्ग्रहा-
त्वया व्रतं भामिनि सर्वतोमुखम् ॥ ३५

मनोरथस्ते सफलोऽत्र भूयाद्
बुद्धीन्द्रियैश्चित्तमनोभिरग्रतः ।
सदानुकूलत्वमलं पतेः परं
सौभाग्यमेवं भुवि कीर्तनीयकम् ॥ ३५

नारद उवाच

एवं वदन्तीं तुलसीं हरिप्रियां
नत्वाथ राधा वृषभानुनन्दिनी ।
प्रत्याह गोविन्दपदारविन्दयो
र्भक्तिर्भवेन्मे विदिता ह्यहैतुकी ॥ ३७

तथास्तु चोक्त्वा तुलसी हरिप्रिया-
प्यन्तर्दधे मैथिल राजसत्तम ।
तदैव राधा वृषभानुनन्दिनी
प्रसन्नचित्ता स्वपुरे बभूव ह ॥ ३८

श्रीराधिकाख्यानमिदं विचित्रं
शृणोति यो भक्तिपरः पृथिव्याम् ।
त्रैवर्ग्यभावं मनसा समेत्य
राजंस्ततो याति नरः कृतार्थताम् ॥ ३९

इति श्रीगर्गसंहितायां वृन्दावनखण्डे नारद-
बहुलाश्वसंवादे तुलसीपूजनं नाम
त्रयोदशोऽध्यायः ॥ १३

बहुलाश्व उवाच

राधाकृष्णस्य चरितं शृण्वतो मे मनो मुने ।
न तृप्तिं याति शरदः पङ्कजे भ्रमरो यथा ॥ १
रासेश्वर्य्या कृष्णपत्न्या तुलसीसेवने कृते ।
यद् बभूव ततो ब्रह्मंस्तन्मे ब्रूहि तपोधन ॥ २

नारद उवाच

राधिकायाश्च विज्ञाय तुलसीसेवने तपः ।
प्रीतिं परीक्षन् श्रीकृष्णो वृषभानुपुरं ययौ ॥ ३
अद्भुतं गोपिकारूपं चलज्झङ्कारनूपुरम् ।
किङ्किणीघण्टिकाशब्दमङ्गुलीयकभूषितम् ॥ ४
रत्नकङ्कणकेयूरमुक्ताहारविराजितम् ।
बालार्कताटङ्कलसत्कबरीपाशकौशलम् ॥ ५
नासामौक्तिकदिव्याभं श्यामकुन्तलसङ्कुलम् ।
धृत्वासौ वृषभानोश्च मन्दिरं संददर्श ह ॥ ६
प्राकारपरिखायुक्तं चतुर्द्वारसमन्वितम् ।
करीन्द्रैः कज्जलाकारैर्द्वारि द्वारि मनोहरम् ॥ ७
वायुवेगैर्मनोवेगैश्चित्रवर्णैस्तुरङ्गमैः ॥
हारचामरसंयुक्तैः प्रोल्लसन्मण्डपाजिरम् ॥ ८
गवां गणैः सवत्सैश्च वृषैर्धर्मधुरन्धरैः ।
गोपाला यत्र शोभन्ते वंशीवेत्रधरा नृप ॥ ९
वृषभानुवरस्यैवं पश्यन् मन्दिरकौशलम् ।
मायायुवतिवेषोऽसौ ततो ह्यन्तःपुरं ययौ ॥ १०
यत्र कोटिरविस्फूर्जत्कपाटस्तम्भपङ्क्तयः ।
रत्नाजिरेषु शोभन्ते ललनारत्नसंयुताः ॥११

विज्ञाय तद्गौरवमुत्तमं मह-
दुत्थाय दोर्भ्यां परिरभ्य राधिका।
दिव्यासने स्थाप्य सुलोकरीत्या
जलादिकं चार्हणमाहरच्छुभम्॥ २३

राधोवाच

स्वागतं ते सखि शुभे नामधेयं वदाशु मे।
भूरिभाग्यं ममैवाद्य भवत्यागतया स्वत.॥ २४
त्वत्समानं दिव्यरूपं दृश्यते नहि भूतले।
यत्र त्वं वर्तसे सुभ्रू: पत्तनं धन्यमेव तत्॥ २५
वद देवि सविस्तारं हेतुमागमनस्य च।
मम योग्यं च यत्कार्यं वक्तव्यं तत्त्वया खलु॥ २६
कटाक्षेण सुदीप्त्या च वचसा सुस्मितेन वै।
गत्याकृति: श्रीपतीव दृश्यते साम्प्रतं मया॥ २७

नित्यं शुभे मे ःमलनार्थमाव्रज
न चेत् स्वसङ्कृतमलं विधेहि।
येनैव सङ्गो विधिना भवेद्धि
विधिर्भवत्या स सदा विधेय:॥ २८
अयि त्वदात्मातिपरं प्रियो मम
त्वदाकृति: श्रीव्रजराजनन्दन:।
येनैव मे देवि हृतन्तु चेत
स्त्वया ननन्देव वधूर्दधामि तम्॥ २६

नारद उवाच

एवं राधावचः श्रुत्वा मायायुवतिवेषधृक्।
उवाच भगवान् कृष्णो राधां कमललोचनाम्॥ ३०

भगवानुवाच

रम्भोरु नन्दनगरे नन्दगेहस्य चोत्तरे ।
गोकुले वसतिर्मेऽस्ति नाम्नाऽहं गोपदेवता ॥ ३१
त्वद्रूपगुणमाधुर्यं श्रुतं मे ललितामुखात् ।
तद्द्रष्टुं चञ्चलापाङ्गि त्वद्गृहेऽहं समागता ॥ ३२
श्रीमल्लवङ्गलतिकास्फुटमोदनीनां
गुञ्जानिकुञ्जमधुपध्वनिकुञ्जपुञ्जम् ।
दृष्टं श्रुतं नववनं तव कञ्जनेत्रे
दिव्यं पुरन्दरपुरेऽपि न यत्समानम् ॥ ३३

नारद उवाच

एवं तयोर्मेलनन्तु बभूव मिथिलेश्वर ।
प्रीतिं परस्परं कृत्वा वने तत्र विरेजतुः ॥ ३४
हसन्त्यौ ते च गायन्त्यौ पुष्पकन्दुकलीलया ।
पश्यन्त्यौ वनवृक्षांश्च चेरतुर्मैथिलेश्वर ॥ ३५
कलाकौशल्यसम्पन्नां राधां कमललोचनाम् ।
गिरा मधुरया राजन् प्राहेदं गोपदेवता ॥ ३६

गोपदेवतोवाच

दूरे वै नन्दनगरं सन्ध्या जाता व्रजेश्वरि ।
प्रभाते चागमिष्यामि त्वत् सकाशं न संशयः ॥ ३७

नारद उवाच

श्रुत्वा वचस्तत् परुषं व्रजेश्वरी
निक्षिप्य सद्यो नयनाम्बुसन्ततिम् ।
रोमाञ्चहर्षोद्गमभावसंवृता
रम्भेव भूमौ पतिता मरुद्धता ॥ ३८

शङ्कागतास्तत्र सखीगणाभृशं
त्वरं व्रजन्त्यो व्यजनैर्व्यवस्थिताः ।
श्रीखण्डपुष्पद्रवचर्चितांशुकां
जगाद राधां नृप गोपदेवता ॥ ३९

गोपदेवतोवाच

प्रभाते चागमिष्यामि मा शोकं कुरु राधिके ।
गोश्च भ्रातुर्गोरसस्य शपथो मे न चेदिदम् ॥ ४०

नारद उवाच

एवमुक्त्वा हरी राधां समाश्वास्य नृपेश्वर ।
मायायुवतिवेषोऽसौ ययौ श्रीनन्दगोकुलम् ॥ ४१

इति श्रीगर्गसंहितायां वृन्दावनखण्डे नारदबहुलाश्व-
संवादे प्रीतिपरीक्षणं नाम
चतुर्दशोऽध्यायः ॥ १४

नारद उवाच

अथ रात्र्यां व्यतीतायां मायायोषिद्वपुर्हरिः।
राधादुःखप्रशान्त्यर्थं वृषभानोर्गृहं ययौ ॥ १
राधा तामागतां वीक्ष्य समुत्थायातिहर्षिता।
दत्त्वासनं विधानेन पूजयामास मैथिल ॥ २

राधोवाच

त्वया विनाहं निशि दुःखिताभवं
त्वय्यागतायां सखि लब्धवस्तुवत्।
पूर्वं ह्यपथ्यस्य सुखं यथा ततो
दुःखं तथा भामिनि सत्प्रसङ्गतः ॥ ३

नारद उवाच

इति श्रुत्वाथ तद्वाक्यं विमना गोपदेवता ॥
न किञ्चिदूचे श्रीराधां दुःखितेव व्यवस्थिता ॥ ४
विज्ञाय खेदसम्पन्नां राधिका गोपदेवताम्।
सखीभिः संविचार्य्याथ जगाद स्नेहतत्परा ॥ ५

राधोवाच

विमनास्त्वं कथं भद्रे वद मां गोपदेवते।
मात्रा भर्त्रा ननान्द्रा वा श्वश्र्वा क्रोधेन भर्त्सिता ॥ ६
सपत्नीकृतदोषेण स्वभर्तुर्विरहेण वा।
अन्यत्रलग्नचित्तेन विमनाः किं मनोहरे ॥ ७
मार्गखेदेन वा कच्चिद्विद्वलाभूः रुजाथवा।
शीघ्रं वद महाभागे स्वस्य दुःखस्य कारणम् ॥ ८
कृष्णभक्तमृते विप्रं येन केनापि कुत्सितम्।
कथितं तेऽथ रम्भोरु तच्चिकित्सां करोम्यहम् ॥ ९

गजाश्वादीनि रत्नानि वस्त्राणि च धनानि च ।
मन्दिराणि विचित्राणि गृहाण त्वं यदीच्छसि ॥ १०

धनं दत्वा तनुं रक्षेत्तनु दत्वा त्रपां व्यधात् ।
धन तनुं त्रपां दद्यान्मित्रकार्यार्थमेव हि ।
धनं दत्वा च सततं रक्षेत् प्राणान्निरन्तरम् ॥ ११

यो मित्रतां निष्कपटं करोति
निष्कारणं धन्यतमः स एव ।
विधाय मैत्रीं कपटं विदध्या
त्तं लम्पटं हेतुपटं नटं धिक् ॥ १२

तस्याः प्रेमवचः श्रुत्वा भगवान् गोपदेवता ।
प्रहसन्नाह राजेन्द्र श्रीराधां कीर्तिनन्दिनीम् ॥ १३

गोपदेवतोवाच

राधे बृहत्सानुगिरेस्तटीषु
सङ्कोचवीथीषु मनोहरासु ।
यान्तीं स्वतो मां दधिविक्रयार्थं
रुरोध मार्गे नवनन्दपुत्रः ॥ १४

वंशीधरो वेत्रकरः करे मां
त्वरं गृहीत्वा प्रहसन् विलज्जः ।
मह्यं करादानधनाय दानं
देहीति जल्पन् विपिने रसज्ञः ॥ १५

तुभ्यं न दास्यामि कदापि दानं
स्वयम्भुवे गोरसलम्पटाय ।
एवं मयोक्ते वचनेऽथ भाण्डं
नीत्वा विशीर्णीकृतवान् स दक्षः ॥ १६

भाण्डं स भित्वा दधि किञ्च पीत्वा
नीत्वोत्तरीयं मम चेडुरीयम् ।
नन्दीश्वराद्रेर्विदिशं जगाम
तेनाहमाराद्विमना स्म जाता ॥ १७
जात्या स गोपः किल कृष्णवर्णोऽ
धनी न वीरो नहि शीलरूपः ।
यस्मिंस्त्वया प्रेमकृतं सुशीले
त्यजाशु निर्मोहिनमद्य कृष्णम् ॥ १८

नारद उवाच

इत्थं सवैरं परुषं वचस्त-
च्छ्रुत्वाथ राधा वृषभानुनन्दिनी ।
सुविस्मिता वाक्यपदे सरस्वतीं
परं स्मयन्तो निजगाद तां प्रति ॥ १९

राधोवाच

यत्प्राप्तये विधिहरप्रमुखास्तपन्ति
वह्नौ तपः परमया निजयोगरीत्या ।
दत्तः शुकः कपिल आसुरिरङ्गिरा यत्
पादारविन्दमकरन्दरजः स्पृशन्ति ॥ २०
तं कृष्णमादिपुरुषं परिपूर्णदेवं
लीलावतारमजमार्तिहरं जनानाम् ।
भूभूरिभारहरणाय सतां शुभाय
जातं विनिन्दसि कथं सखि दुर्विनीते ॥ २१
गाः पालयन्ति सततं रजसो गवाञ्च
गाश्च स्पृशन्ति च जपन्ति गवां सुनाम ।
प्रेक्षन्त्यहर्निशमलं सुमुखं गवाञ्च
जातिः परा न विदिता भुवि गोपजातेः ॥ २२

तत्कृष्णवर्णविलसत्सुकलां समीक्ष्य
तल्लग्नमग्नमनसा स्वसुखं विहाय ।
उन्मत्तवद्व्रजति धावति नीलकण्ठो
बिभ्रत्कपर्दविषभस्मकपालसर्पान् ॥ २३

स्वर्लोकसिद्धमुनियक्षमरुद्गणानां
पालः समस्तनरकिन्नरनागनाथाः ।
यत्पादपद्ममनिशं प्रणिपत्य भक्त्या
लब्धश्रियः किल बलिं प्रददुः स्म तस्मै ॥ २४

वत्साघकालियबकार्जुनधेनुकाना
माचक्रवातशकटासुरपूतनानाम् ।
एषां वधः किमुत तस्य यशो मुरारे-
र्यैः कोटिशोऽण्डनिचयोद्भवनाशहेतुः ॥ २५

भक्तात् प्रियो न विदितः पुरुषोत्तमस्य
शम्भुर्विधिर्न च रमा न च रौहिणेयः ।
भक्ताननुव्रजति भक्तिनिबद्धचित्त-
श्चूडामणिः सकललोकजनस्य कृष्णः ॥ २६

गच्छन् निजं जनमनुप्रपुनाति लोका-
नावेदयन् हरिजने स्वरुचिं महात्मा ।
तस्मादतीव भजतां भगवान् मुकुन्दो
मुक्तिं ददाति न कदापि सुभक्तियोगम् ॥ २७

गोपदेवतोवाच

राधे त्वदीयधिषणा धिषणं हसन्ती
वाणीं श्रुतिं प्रकुशलेन विडम्बयन्ती ।
अत्रागमिष्यति यदाद्य हरिः परेशः
सत्यं तदा हि वचनं तव देवि मन्ये ॥ २८

राधोवाच

अत्रागमिष्यति यदाद्य हरिः परेशः
किं कारयामि भवतीं वद तर्हि सुभ्रूः।
चेदागमो नहि भवेद्वनमालिनः स्वं
सर्वं धनञ्च भवनञ्च ददामि तुभ्यम् ॥ २९

नारद उवाच

अथ राधा समुत्थाय नत्वा श्रीनन्दनन्दनम्।
उपविश्यासने दध्यौ ध्यानस्तिमितलोचना ॥ ३०
उत्कण्ठितां स्वेदयुक्तां बाष्पकण्ठीं प्रियां हरिः।
अश्रुपूर्णमुखीं वीक्ष्य बिभ्रत् स्वां पौरुषीं तनूम् ॥ ३१
पश्यन्तीनां सखीनाञ्च सहसा भक्तवत्सलः।
राधां प्राह प्रसन्नात्मा मेघगम्भीरया गिरा ॥ ३२

कृष्ण उवाच

रम्भोरु चन्द्रवदने व्रजसुन्दरीशे
राधे प्रिये नवलयौवनमानशीले।
उन्मील्य नेत्रमपि पश्य समागतं मां
तूर्णं त्वया माधुरया च गिरोपहूतम् ॥ ३३
आगच्छ कृष्ण इति वाक्यमतः श्रुतं मे
सद्यो विसृज्य निजगोकुलगोपवृन्दम्।
वंशीवटाच्च यमुनानिकटात् प्रधावं
त्वत्प्रीतयेऽथ ललनेऽत्र समागतोऽस्मि ॥ ३४
मय्यागते सति गता सखिरूपिणीका.
यद्यासुरी किमु नरी किल किन्नरी वा।
मायावती छलयितुं भवतीञ्च तस्माद्
विश्वास एव न विधेय उरङ्गपत्न्याम् ॥ ३५

नारद उवाच

अथ राधा हरिं दृष्ट्वा नत्वा तत्पादपङ्कजम् ।
मुदमाप परां राजन् सद्यः पूर्णमनोरथा ॥ ३६
एवं श्रीकृष्णचन्द्रस्य चरितान्यद्भुतानि च ।
यः शृणोति नरो भक्त्या स कृतार्थो भवेन्नृप ॥ ३७

इति श्रीगर्गसंहितायां वृन्दावनखण्डे नारदबहुलाश्व-
संवादे श्रीकृष्णचन्द्रदर्शन नाम
पञ्चदशोऽध्यायः ॥ १५

बहुलाश्व उवाच

राधायै दर्शनं दत्त्वा कृत्वा प्रेमपरीक्षणम् ।
अग्रे चकार कां लीलां भगवानात्मलीलया ॥ १

नारद उवाच

माधवो माधवे मासि माधवीभिः समाकुले ।
वृन्दावने समारेभे रासं रासेश्वरः स्वयम् ॥ २
वैशाखमासपञ्चम्यां जाते चन्द्रोदये शुभे ।
यमुनोपवने रेमे रासेश्वर्या मनोहरः ॥ ३
पुरा मैथिल गोलोकाद्भूमिर्या कौ समागता ।
सर्वा बभूव सौवर्णपद्मरागमयी त्वरम् ॥ ४
वृन्दावनं दिव्यवपुर्दधत् कामदुघैर्द्रुमैः ।
माधवीभिर्लताभिश्च प्राक्षिपन् नन्दनं वनम् ॥ ५
रत्नसोपानसम्पन्ना स्फुरत्सौवर्णतोलिका ।
रराज यमुना राजन् हंसपद्मादिसङ्कुला ॥ ६
रत्नधातुमयः श्रीमद्रत्नशृङ्गस्फुरद्द्युतिः ।
सुपक्षिगणसंयुक्तो लतापुष्पमनोहरः ॥ ७
निर्झरैः सुन्दरीभिश्च दरीभिर्भ्रमरीवृतः ।
रेजे गोवर्द्धनो नाम गिरिराजः करीन्द्रवत् ॥ ८
सर्वे निकुञ्जाः परितो रेजुर्दिव्यवपुर्धराः ।
सभामण्डपवीथीभिः प्राङ्गणस्तम्भपङ्क्तिभिः ॥९
पतत्पताकैर्दिव्याभैः सौवर्णैः कलशैर्नृप ।
श्वेतारुणैः पुष्पदलैः पुष्पमन्दिरवर्त्मभिः ॥ १०
वसन्तमाधुर्यधराः कूजत्कोकिलसारसाः ।
पारावतैर्मयूरैश्च यत्र तत्र निकूजिताः ॥ ११

राधाकृष्णकथां पुण्यां गायमानैर्मधुव्रतैः ।
पतद्भिर्मधुमत्तैश्च कुञ्जाः सर्वे विराजिताः ॥ १२
पुलिने शीतलो वायुर्मन्दगामी वहत्यलम् ।
सहस्रदलपद्मानां रजो विक्षेपयन् मुहुः ॥ १३
काश्चिद्दोलोकवासिन्यः काश्चिच्छय्योपकारिकाः ।
शृङ्गारप्रकराः काश्चित् काश्चिद्वै द्वारपालिकाः ॥ १४
पार्षदाख्याः सखिजनाश्छत्रचामरपाणयः ।
पुष्पाभरणकारिण्यः श्रीवृन्दावनपालिकाः ॥ १५
गोवर्द्धननिवासिन्यः काश्चित् कुञ्जविधायिकाः ।
तन्निकुञ्जनिवासिन्यो नर्तक्यो वाद्यतत्पराः ॥ १६
सर्वा वै चन्द्रवदनाः किशोरवयसो नृप ।
आसां द्वादशयूथाश्च जग्मुः कृष्णस्य सन्निधौ ॥ १७
तथैव यमुना साक्षाद्यूथीभूत्वा समाययौ ।
नीलाम्बरा रत्नभूषा श्यामा कमललोचना ॥ १८
तथैव जाह्नवी गङ्गा यूथीभूत्वा समाययौ ।
श्वेताम्बरा गौरवर्णा मुक्ताभरणभूषणा ॥ १९
तथाययौ रमा साक्षाद्यूथीभूत्वारुणाम्बरा ।
चन्द्रवर्णा मन्दहासा पद्मरागविभूषिता ॥ २०
तथाययौ कृष्णपत्नी नाम्ना या मधुमाधवी ।
पद्मवर्णा पुष्पभूषा यूथीभूत्वा शुभाम्बरा ॥ २१
तथैव विरजा साक्षाद्यूथीभूत्वा समाययौ ।
हरिद्वस्त्रा गौरवर्णा रत्नालङ्कारभूषिता ॥ २२
ललिताद्या विशाखाद्या मायायूथः समाययौ ।
एवं त्वष्टसखीनाञ्च सखीनां किल षोडश ॥ २३
द्वात्रिंशच्च सखीनाञ्च यूथाः सर्वे समाययुः ।
रराज भगवान् राजन् स्त्रीगणै रासमण्डले ॥ २४

वृन्दावने यथाकाशे चन्द्रस्तारागणैर्यथा ।
पीतवासाः परिकरो नटवेषो मनोहरः ॥ २५
वेत्रभृद्वादयन् वंशीं गोपीनां प्रीतिमावहन् ।
मयूरपक्षभृन्मौलिस्रग्वी कुण्डलमण्डितः ॥ २६
राधया शुशुभे रासे यथा रत्या रतीश्वरः ।
एवं गायन् हरिः साक्षात् सुन्दरीगणसंवृतः ॥ २७
यमुनापुलिनं पुण्यमाययौ राधयायुतः ।
गृहीत्वा हस्तपद्मेन पद्माभं स्वप्रियाकरम् ॥ २८
निषसाद हरिः कृष्णातीरे नीरमनोहरे ।
पुनर्जल्पन् सुमधुरं पश्यन् वृन्दावनश्रियम् ॥ २९
चलन् हसन् राधिकया कुञ्जं कुञ्जं चचार ह ।
कुञ्जे निलीयमानं तं त्वरं त्यक्त्वा प्रियाकरम् ॥ ३०
विलोक्य शाखान्तरितं राधा जग्राह माधवम् ।
राधा दुद्राव तद्धस्ताज्झङ्कारं कुर्वती पदे ॥ ३१
निलीयमाना कुञ्जेषु पश्यतो माधवस्य च ।
धावन् हरिर्गतो यावत्तावद्राधा ततो गता ॥ ३२
वृक्षपार्श्वे हस्तमात्रादितश्चेतश्च धावती ।
तमालो हेमवल्ल्येव घनश्चञ्चलया यथा ॥ ३३
हेमखन्येव नीलाद्री रेजे राधिकया हरिः ।
राधया विश्वमोहिन्या बभौ मदनमोहनः ॥ ३४
वृन्दावने रासरङ्गे रत्येव मदनो यथा ।
धृत्वा रूपाणि तावन्ति यावन्त्यो व्रजयोषितः ॥ ३५
ननर्त रासरङ्गेऽसौ रङ्गभूम्यां नटो यथा ।
गायन्त्यश्चापि नृत्यन्त्यः सर्वा गोप्यो मनोहराः ॥ ३६
विरेजुः कृष्णचन्द्रैश्च यथा शक्रैः सुराङ्गनाः ।
वारां विहारं कृष्णायां चकार मधुसूदनः ॥ ३७

सर्वैर्गोपीगणैः सार्द्धं यक्षीभिर्यक्षराडिव ।
कबरीकेशपाशाभ्यां प्रसूनैः प्रच्युतैः शुभैः ।
चित्रवर्णैर्बभौ कृष्णा यथोऽिणङ्मुद्रिता तथा ॥ ३८

मृदङ्गतालैर्मधुरध्वनिस्वनै-
र्जगुर्यशस्ता मधुसूदनस्य हि ।
प्रापुर्मुदं पूर्णमनोरथाश्च
प्रसूनहारा हरिणा गतव्यथाः ॥ ३९

श्रीहस्तसताडितवारिबिन्दुभिः
स्फारासमस्फूर्जितशीकरद्युभिः
वृन्दावनेशो व्रजसुन्दरीभी-
रेजे गजीभिर्गजराडिव स्वयम् ॥ ४०

विद्याधर्यो देवगन्धर्वपत्न्यः
पश्यन्त्यस्ता रासरङ्ग दिविस्थाः ।
देवैः सार्द्धं चक्रिरे पुष्पवर्षं
मोहं प्राप्ताः प्रश्लथद्वस्त्रनीव्यः ॥ ४१

इतिश्रीगर्गसंहितायां वृन्दावनखण्डे-
रासक्रीडायां वृन्दावनविहारो नाम
षोडशोऽध्यायः ॥ १६

नारद उवाच

अथ कृष्णो हरिर्वारिलीलां कृत्वा मनोहरः ।
सर्वैर्गोपीगणैः सार्द्धं गिरिं गोवर्द्धनं ययौ ॥ १
गोवर्द्धने कन्दरायां रत्नभूम्यां हरिः स्वयम् ।
रासञ्च राधया सार्द्धं रासेश्वर्या चकार ह ॥ २
तत्र सिंहासने दिव्ये तस्थतुः पुष्पसङ्कुले ।
तडिद्घनाविव गिरौ राधाकृष्णौ विरेजतुः ॥ ३
स्वामिन्यास्तत्र शृङ्गारं चक्रुः सख्यो मुदान्विताः ।
श्रीखण्डकुङ्कुमाद्यैश्च यावकागुरुकज्जलैः ॥ ४
मकरन्दैः कीर्तिसुतां समभ्यर्च्य विधानतः ।
ददौ श्रीयमुना साक्षाद्राधायै नूपुराण्यलम् ॥ ५
मञ्जीरभूषणं दिव्यं श्रीगङ्गा जह्नुनन्दिनी ।
श्रीरमा किङ्किणीजालं हारं श्रीमधुमाधवी ॥ ६
चन्द्रहारञ्च विरजा कोटिचन्द्रामलं शुभम् ।
ललिता कञ्चुकमणिं विशाखा कण्ठभूषणम् ॥ ७
अङ्गुलीयकरत्नानि ददौ चन्द्रानना तदा ।
एकादशी राधिकायै रत्नाढ्यं कङ्कणद्वयम् ॥ ८
भुजकङ्कणरत्नानि शतचन्द्रानना ददौ ।
तस्यै मधुमती साक्षात् स्फुरद्रत्नाङ्गदद्वयम् ॥ ९
ताटङ्कयुगलं बन्दीकुण्डले सुखदायिनी ।
आनन्दी या सखी मुख्या राधायै भालतोरणम् ॥ १०
पद्मा सद्भालतिलकं बिन्दुं चन्द्रकला ददौ ।
नासामौक्तिकमालोलं ददौ पद्मावती सती ॥ ११
बालार्कद्युतिसंयुक्तं भालपुष्पं मनोहरम् ।
श्रीराधायै ददौ राजन् चन्द्रकान्ता सखी शुभा ॥ १२

शिरोमणि सुन्दरी च रत्नवेणीं प्रहर्षिणी ।
भूषणे चन्द्रसूर्याख्ये विद्युत्कोटिसमप्रभे ॥ १३
राधिकायै ददौ देवी वृन्दा वृन्दावनेश्वरी ।
एवं शृङ्गारसंस्फूर्जद्रूपया राधया हरिः ॥ १४
गिरिराजे बभौ राजन् यज्ञो दक्षिणया यथा ।
यत्र वै राधया रासे शृङ्गारोऽकारि मैथिल ॥ १५
तत्र गोवर्द्धने जातं स्थलं शृङ्गारमण्डलम् ।
अथ कृष्णः स्वप्रियाभिर्ययौ चन्द्रसरोवरम् ॥ १६
चकार तज्जले क्रीडां गजीभिर्गजराडिव ।
तत्र चन्द्रः समागत्य चन्द्रकान्तौ मणी शुभौ ॥ १७
सहस्रदलपद्मे द्वे स्वामिन्यै हरये ददौ ।
अथ कृष्णो हरिः साक्षात् पश्यन् वृन्दावनश्रियम् ॥ १८
प्रययौ बाहुलवनं लताजालसमन्वितम् ।
तत्र स्वेदसमायुक्तं वीक्ष्य सर्वं सखीजनम् ॥ १९
रागन्तु मेघमल्लारं जगौ वंशीधरः स्वयम् ।
सद्यस्तत्रैव ववृषुर्मेघा अम्बुकणांस्तदा ॥ २०
तदैव शीतला वाता ववुर्गन्धिमनोहराः ।
तैश्च गोपीगणाः सर्वे सुखं प्राप्ता विदेहराट् ॥ २१
जगुर्यशः श्रीमुरारेरुच्चैस्तत्र समन्विताः ।
तस्मात्तालवनं प्रागाच्छ्रीकृष्णो राधिकापतिः ॥ २२
रासमण्डलमारेभे गायन् व्रजवधूवृतः ।
तत्र गोपीगणाः सर्वे स्वेदयुक्तास्तृषातुराः ।
ऊचू रासेश्वरं रासे कृताञ्जलिपुटाः शनैः ॥ २३

गोप्य ऊचुः

दूरे वै यमुना देव तृषा जाता परं हि नः ।
कर्तव्यं भवतात्रैव सरो दिव्यं मनोहरम् ॥ २४

वारां विहारं पानञ्च करिष्यामो हरे वयम् ।
जगत्कर्ता पालकस्त्वं संहारस्यापि नायकः ॥ २५

नारद उवाच

तच्छ्रुत्वा वेत्रदण्डेन कृष्णो भूमिं तताड ह ।
तदैव निर्गतः स्रोतो वेत्रगङ्गेति कथ्यते ॥ २६
यज्जलस्पर्शमात्रेण ब्रह्महत्या प्रमुच्यते ।
तत्र स्नात्वा नरः कोऽपि गोलोक याति मैथिल ॥ २७
गोपीभी राधया सार्द्धं श्रीकृष्णो भगवान् हरिः ।
वारां विहारं कृतवान् देवो मदनमोहनः ॥ २८
ततः कुमुद्वनं प्राप्तो लतावृन्दमनोहरम् ।
भ्रमरध्वनिसयुक्तं चक्रे रासं सखीजनैः ॥ २९
गोपीभिर्निर्मिते कुञ्जे सूपविष्टो हरिर्यदा ।
राधा तत्रैव शृङ्गारं श्रीकृष्णस्य चकार ह ॥ ३०
पुष्पैर्नानाविधैर्दिव्यैः पश्यन्तीनां व्रजौकसाम् ।
चम्पकोद्यत्परिकरः स्वर्णयूथीभुजाङ्गदः ॥ ३१
सहस्रदलराजीवकर्णिकाविलसच्छ्रुतिः ।
मोदनीमालतीकुन्दकेतकीहारभृद्धरिः ॥ ३२
कदम्बपुष्पविलसत्किरीटकटकोज्ज्वलः ।
मन्दारपुष्पोत्तरीयः पद्मयष्टिधरः प्रभुः ॥ ३३
तुलसीमञ्जरीयुक्तो वनमालाविभूषितः ।
एवं शृङ्गारतां प्राप्तः श्रीकृष्णः प्रियया स्वया ॥ ३४
बभौ कुमुद्वने राजन् वसन्तो हर्षितो यथा ।
मृदङ्गवीणावंशीभिर्मुरुयष्टिसुकांस्यकैः ॥ ३५
तालशङ्खैस्तलैर्युक्ता जगुर्गोप्यो मनोहरम् ।
भैरवं मेघमल्लारं दीपकं मालकोशकम् ॥ ३६

श्रीरागश्चापि हिन्दोलं रागमेवं पृथक् पृथक् ।
अष्टतालैस्त्रिभिर्ग्रामैः स्वरैः सप्तभिरग्रतः ॥ ३७
नृत्यैर्नानाविधै रम्यैर्हावभावसमन्वितैः ।
तोषयन्त्यो हरिं राधां कटाक्षैर्व्रजगोपिकाः ॥ ३८
गायन् मधुवनं प्रागात् सुन्दरीगणसंवृतः ।
रासेश्वर्या रासलीलां चक्रे रासेश्वरः स्वयम् ॥ ३९
वैशाखचन्द्रकौमुद्यां मालतीगन्धवायुना ।
स्फुरत्सौगन्धिकह्लारपतद्रेणूत्करेण वै ॥ ४०
विकसन्माधवीवृन्दैः शोभिते निर्जने वने ।
रेमे गोपीगणैः कृष्णो नन्दने वृत्रहा यथा ॥ ४१

इति श्रीगर्गसंहितायां वृन्दावनखण्डे रासक्रीडायां
गोवर्द्धनबहुलतालकुमुद्वनमधुवनविहारो नाम
सप्तदशोऽध्यायः ॥ १७

नारद उवाच

इत्थं कुन्दवने रम्ये मालतीनां वने शुभे ।
आम्राणां नागरङ्गाणां निम्बूनां सघने वने ।। १
दाडिमीनाञ्च द्राक्षाणां बदामानां वने नृप ।
कदम्बानां श्रीफलानां कुटजानां तथैव च ॥ २
बटानां पनसानाञ्च पिप्पलानां वने शुभे ।
तुलसीकोविदाराणां केतकीकदलीवने ।। ३
करिल्लकुञ्जबकुलमन्दाराणां वने हरिः ।
चरन् कामवनं प्रागाद्राजन् व्रजवधूवृतः ॥ ४
तत्रैव पर्वते कृष्णो ननाद मुरलीकलम् ।
मूर्च्छिता विह्वला जातास्तन्नादेन व्रजाङ्गनाः ॥ ५
मनोजबाणभिन्नाङ्गाः श्लथन्नीव्यः सुरैः सह ।
कश्मलं प्रययू राजन् विमानेष्वमराङ्गनाः ।। ६
चतुर्विधा जीवसङ्घाः स्थावरैर्मोहमास्थिताः ।
नद्यो नदाः स्थिरीभूताः पर्वता द्रवतां गताः ॥ ७
तत्पादचिह्नसंयुक्ता गिरिः कामवनेऽभवत् ।
तस्य दर्शनमात्रेण नरो याति कृतार्थताम् ।। ८
अथ गोपीगणैः साकं श्रीकृष्णो राधिकापतिः ।
नन्दीश्वरबृहत्सानुतटे रासं चकार ह ।। ९
तत्र गोप्योऽतिमानिन्यो बभूवुर्मैथिलेश्वर ।
तास्त्यक्त्वा राधया सार्द्धं तत्रैवान्तर्दधे हरिः ।। १०

गोप्यश्च सर्वा विरहातुरा भृशं
कृष्णं विना मैथिल निर्जने वने ।
ता बभ्रमुश्चाश्रुकलाकुलाक्ष्यो
यथा हरिण्यश्चकिता इतस्ततः ।। ११

कृष्णं ह्यपश्यन्त्य इति व्यथां गता
यथा करिण्यः करिणं वने वने ।
यथा कुरर्यः कुररं ब्रजाङ्गनाः
सर्वा रुदन्त्यो विरहातुरा भृशम् ॥ १२
उन्मत्तवद् वृक्षलताकदम्बकं
सर्वा मिलित्वा च पृथक् पृथग् वने
पप्रच्छुरारान्नृप नन्दनन्दनं
कुत्र स्थितं तं वदताशु भूरुहाः ॥ १३
श्रीकृष्णकृष्णेति गिरा वदन्त्यः
श्रीकृष्णपादाम्बुजलग्नमानसाः ।
श्रीकृष्णरूपास्तु बभूवुरङ्गना-
श्चित्रं न पेशस्कृतमेत्य कीटवत् ॥ १४
श्रीपादुकाधःस्थलगापि गोप्यः
श्रीपादुकाग्रं शरणं प्रपन्नाः ॥ १५
ततस्तु तत्प्रसादेन तत्पादार्चनदर्शनात् ।
ददृशुर्गां तदा गोप्यो भगवत्पादचिह्निताम् ॥ १६

बहुलाश्व उवाच

राधेशो राधया सार्धं हित्वा गोपीर्ययौ क भोः ।
तद्दर्शनं कथं जातं गोपीनां वद मे प्रभो ॥ १७

नारद उवाच

श्रीकृष्णो राधया सार्द्धं सङ्केतवटमाविशत् ।
प्रियायाः कबरीपुष्परचनां स चकार ह ॥ १८
श्रीकृष्णकुन्तले नीले वक्रत्वं राधिकाकरोत् ।
चित्रपत्रावलीं कृष्णपूर्णेन्दुमुखमण्डले ॥ १९
एवं कृष्णो भद्रवनं खदिराणां वनं महत् ।
बिल्वानाञ्च वन पश्यन् कोकिलाख्यं वनं गतः ॥ २०

गोप्यः कृष्णं विचिन्वन्त्यो ददृशुस्तत्पदानि च ।
यवचक्रध्वजच्छत्रैः स्वस्तिकाङ्कुशजम्बुभिः ॥ २१
अष्टकोणेन वज्रेण पद्मेनाभियुतानि च ।
तिलशङ्खघटैर्मत्स्यत्रिकोणेषूर्ध्वधारकैः ॥ २२
धनुर्गोखुरचन्द्रार्द्धशोभितानि महात्मनः ।
तत्पदान्यनुसारेण व्रजन्त्यो गोपिकास्ततः ॥ २३
तद्रजः सततं नीत्वा धृत्वा मूर्ध्नि व्रजाङ्गनाः ।
पदान्यन्यानि ददृशुरन्यचिह्नान्वितानि च ॥ २४
केतुपद्मातपत्रैश्च यवेनाथोर्ध्वरेखया ।
चक्रचन्द्रार्द्धाङ्कुशैश्च बिन्दुभिः शोभितानि च ॥ २५
लवङ्गलतिकाभिश्च विचित्राणि विदेहराट् ।
गदापाठीनशङ्खैश्च गिरिराजेन शक्तिभिः ॥ २६
सिंहासनरथाभ्याञ्च बिन्दुद्वययुतानि च ।
वीक्ष्य प्राहु राधिकया गतोऽसौ नन्दनन्दनः ॥ २७
पश्यन्त्यस्तत्पादचिह्नं कोकिलाख्यं वनं गताः ।
गोपीकोलाहलं श्रुत्वा राधिकां प्राह माधवः ॥ २८
कोटिचन्द्रप्रतीकाशे राधे सर्प त्वरं प्रिये ।
आगता गोपिकाः सर्वास्त्वांनेष्यन्ति हि सर्वतः ॥ २९
तदा मानवती राधा भूत्वा प्राह रमापतिम् ।
रूपयौवनकौशल्यशीलगर्वसमन्विता ॥ ३०

राधोवाच

चलितुं न समर्थाहं मन्दिरान्नविनिर्गता ।
सुकुमारी स्वेदयुक्ता कथं मां नयसि प्रिय ॥ ३१

नारद उवाच

इति वाक्यं ततः श्रुत्वा श्रीकृष्णो रसिकेश्वरः ।
पीताम्बरेण दिव्येन वायुं तस्यै चकार ह ॥ ३२

हस्तं गृहीत्वा तामाह गच्छ राधे यथासुखम् ।
श्रीकृष्णेनापि तदपि प्रोक्ता नययुतेन वै ॥ ३३
पृष्ठं दत्वाथ हरये तूष्णीभूता स्थिता पुनः ।
प्रियां मानवती राधां प्राह कृष्णः सतां प्रियः ॥ ३४

भगवानुवाच

विहाय गोपीरिह कामयाना
भजाम्यहं मानिनि चेतसा त्वाम् ।
यत्ते प्रियं तत्प्रकरोमि राधे
मे स्कन्धमारुह्य सुख व्रजाशु ॥ ३५

नारद उवाच

एवं प्रियां प्रियतमः स्कन्धयानेप्सितां नृप ।
विहायान्तर्दधे कृष्णः स्वच्छन्दगतिरीश्वरः ॥ ३६
गतमाना कीर्तिसुता भगवद्विरहातुरा ।
उच्चै रुरोद राजेन्द्र कोकिलाख्ये वने परे ॥ ३७
तदैव यूथाः सम्प्राप्ता गोपीनां मैथिलेश्वर ।
तद्रोदनं दुःखतरं श्रुत्वा जग्मुस्त्रपातुराः ॥ ३८
काश्चित्तां मकरन्दैश्च स्नापयाञ्चक्रुरीश्वरीम् ।
चन्दनागुरुकस्तूरीकुङ्कुमद्रवसीकरैः ॥ ३९
वायुं चक्रुस्तदङ्गेषु व्यजनान्दोलचामरैः ।
आश्वास्य वाग्भिः परमं नानानुनयकोविदाः ॥ ४०
तन्मुखान्मानतो यानं श्रुत्वा कृष्णस्य गोपिकाः ।
मानवत्यो मैथिलेन्द्र विस्मयं परमं ययुः ॥४१

इति श्रीगर्गसंहितायां वृन्दावनखण्डे रासक्रीडायां कामवनकोकिलवनविहारे मानलीलावर्णनं नाम अष्टादशोऽध्यायः ॥ १८

नारद उवाच

अथ कृष्णगुणान् रम्यान् समेताः सर्वयोषितः ।
जगुस्तालस्वरै रम्यैः कृष्णागमनहेतवे ॥ १

गोप्य ऊचुः

लोकाभिराम जनभूषण विश्वदीप
कन्दर्पमोहन जगद्वृजिनार्तिहारिन् ।
आनन्दकन्द यदुनन्दन नन्दसूनो
स्वच्छन्दपद्ममकरन्द नमो नमस्ते ॥ २
गोविप्रसाधुविजयध्वज देववन्द्य
कंसादिदैत्यवधहेतुकृतावतार ।
श्रीनन्दराजकुलपद्मदिनेश देव
दत्तादिमुक्तजनदर्पण ते जयोऽस्तु ॥ ३
गोपालसिन्धुपरमौक्तिकरूपधारिन्
गोपालवंशगिरिनीलमणे परात्मन् ।
गोपालमण्डलसरोवरकञ्जमूर्ते
गोपालचन्दनवने कलहंसमुख्य ॥ ४
श्रीराधिकावदनपङ्कजषट्पदस्त्वं
श्रीराधिकावदनचन्द्रचकोररूपः ।
श्रीराधिकाहृदयसुन्दरचन्द्रहारः
श्रीराधिकामधुलताकुसुमाकरोऽसि ॥ ५
यो रासरङ्गनिजवैभवभूरिलीलो
यो गोपिकानयनजीवनमूलरूपः ।
मानं चकार रहसा किल मानवत्यां
सोऽयं हरिर्भवतु नो नयनाग्रगामी ॥ ६

यो गोपिकासकलयूथमलञ्चकार
वृन्दावनञ्च निजपादरजोभिरद्रिम् ।
यः सर्वलोकविभवाय बभूव भूमौ
तं भूरिलीलमुरगेन्द्रभुजं भजामः ॥ ७
चन्द्रं प्रतप्तकिरणं ज्वलनं प्रसादं
सर्वं वनान्तमसिपत्रवनं परेश ।
बाणं प्रभञ्जनमतीव सुमन्दयानं
मन्यामहे किल भवन्तमृते व्यथार्ताः ॥ ८
सौदासराजमहिषीविरहादतीव
जातं सहस्रगुणितं नलपट्टराज्ञ्याः ।
तस्मात्तु कोटिगुणितं जनकात्मजाया-
स्तस्मादनन्तमतिदुःखमलं हरे नः ॥ ९
श्रीउद्धवः सकलभक्तशिरोमणीश-
स्त्वत्पादपद्मवरमुख्यधिकारकारी ।
तस्माद् वयञ्च चरणौ शरणं गताः स्मः
श्रीमन् कृपां कुरु शरण्यपदे शरण्ये ॥ १०

नारद उवाच

इत्थं राजन् रुदन्तीनां गोपीनां कमलेक्षणः ।
आविर्बभूव सहसा स्वयमर्थमिवात्मनः ॥ ११
स्फुरत्किरीटकेयूरकुण्डलाङ्गदभूषणम् ।
स्निग्धामलसुगन्धाढ्यं नीलकुञ्चितकुन्तलम् ॥ १२
आगतं वीक्ष्य युगपत् समुत्तस्थुर्व्रजाङ्गनाः ।
तन्मात्रानि च यं दृष्ट्वा यथा ज्ञानेन्द्रियाणि वै ॥ १३
हरिर्ननर्त तन्मध्ये वंशीवादनतत्परः ।
राधया सहितो राजन् यथा रत्या रतीश्वरः ॥ १४

यावत्यो गोपिकाः सर्वास्तावद्रूपधरो हरिः ।
गच्छंस्ताभिर्व्रजे रेमे स्वावस्थाभिर्मनो यथा ॥ १५
वनोद्देशे स्थितं कृष्णं गतदुःखा व्रजाङ्गनाः ।
कृताञ्जलिपुटा ऊचुर्गिरा गद्गदया हरिम् ॥ १६

गोप्य ऊचुः

क्व गतस्त्वं वद हरे त्यक्त्वा गोपीगणं महत् ।
सर्वं जगत्तृणीकृत्य त्वत्पादे प्राप्तमानसम् ॥ १७

भगवानुवाच

हे गोप्यः पुष्करद्वीपे हंसो नाम महामुनिः ।
समुद्रे दधिमण्डोदे ततापान्तर्गतस्तपः ॥ १८
चकाराहैतुकीं भक्तिं मम ध्यानपरायणः ।
व्यतीतं तस्य तपतो गोप्यो मन्वन्तरद्वयम् ॥ १९
तमद्यैवाग्रसन्मत्स्यो योजनार्द्धवपुर्धरः ।
तन्निर्जगार पौण्ड्रस्तु मत्स्यरूपधरोऽसुरः ॥ २०
एवं सम्प्राप्तकष्टस्य हंसस्यापि मुनेरहम् ।
गत्वाथ शीघ्रेण तयोः शिरश्छित्वारिणा (!) मुनिम् ॥ २१
मोचयित्वाथ गतवाञ्छ्वेतद्वीपं व्रजाङ्गनाः ।
क्षीराब्धौ शेषपर्यङ्के शयनन्तु मया कृतम् ॥ २१
दुःखिता भवतीर्ज्ञात्वा निद्रां त्यक्त्वा ततः प्रियाः ।
सहसा भक्तवश्योऽहं पुनरागतवानिह ॥ २३

जानन्ति सन्तः समदर्शिनो ये
दान्ता महान्तःकिल नैरपेक्ष्याः ।
ते नैरपेक्ष्यं परमं सुखं मे
ज्ञानेन्द्रियादीनि यथा रसादीन् ॥ २४

गोप्य ऊचुः

क्षीराब्धौ शेषपर्यङ्के यद्रूपञ्च त्वया धृतम् ।
तद्रूपदर्शनं देहि यदि प्रीतोऽसि माधव ॥ २५

नारद उवाच

तथास्तु चोक्त्वा भगवान् गोपीव्यूहस्य पश्यतः ।
दधाराष्टभुजं रूपं राधाश्रीरूपमेव च ॥ २६
तत्र क्षीरसमुद्रोऽभूल्लोलकल्लोलमण्डितः ।
दिव्यानि रत्नसौधानि बभूवुर्मङ्गलानि च ॥ २७
तत्र शेषो बिसश्वेतः कुण्डलीभूत संस्थितः ।
बालार्कमौलिसाहस्रफणाछत्रविराजितः ॥ २८
तस्मिन् वै शेषपर्यङ्के सुखं सुष्वाप माधवः ।
तस्य श्रीरूपिणी राधा पादसेवां चकार ह ॥ २९
तद्रूपं सुन्दरं दृष्ट्वा कोटिमार्तण्डसन्निभम् ।
नत्वा गोपीगणाः सर्वे विस्मयं परमं गताः ॥ ३०
गोपीभ्यो दर्शनं दत्तं यत्र कृष्णेन मैथिल ।
तत्र क्षेत्रं महापुण्यं जातं पापप्रणाशनम् ॥ ३१
अथ गोपीगणैः सार्धं यमुनामेत्य माधवः ।
कालिन्दीजलवेगेषु जलकेलिं चकार ह ॥ ३२
राधाकराल्लक्षदल पद्मं नीत्वाम्बरं तथा ।
धावन् जलेषु गतवान् प्रहसन् माधवः स्वयम् ॥ ३३
राधा हरेः पीतपटं वंशीवेत्रं स्फुरत्प्रभम् ।
गृहीत्वा प्रहसन्ती सा गच्छती यमुनाजले ॥ ३४
वंशीं देहीति वदतः श्रीकृष्णस्य महात्मनः ।
राधा जगाद कमलं वासो देहीति माधव ॥ ३५
कृष्णो ददौ राधिकायै पद्ममम्बरमेव च ।
राधा ददौ पीतपटं वेत्रं वंशीं महात्मने ॥ ३६

अथ कृष्णः कलं गायन् मालामाजानुलम्बिताम् ।
वैजयन्तीं दधानः श्रीभाण्डीरञ्च जगाम ह ॥ ३७
प्रियायास्तत्र शृङ्गारं चकार कुशलेश्वरः ।
पत्रावलीयावकाद्यः पुष्पैः कज्जलकुङ्कुमैः ॥ ३८
चन्दनागुरुकस्तूरीकेसराद्यैर्हरेर्मुखे ।
पत्रं चकार शृङ्गारे मनोज्ञं कीर्तिनन्दिनी ॥ ३६

इति श्रीगर्गसंहितायां वृन्दावनखण्डे नारदबहुलाश्वसंवादे
रासक्रीडायां भाण्डीरवनविहारो नाम
एकोनविंशोऽध्यायः ॥ १६

नारद उवाच

अथ कृष्णो गोपिकाभिर्लोहजङ्घवनं ययौ ।
वसन्तमाधवीभिश्च लताभिः सङ्कुलं नृप ॥ १
तत्पुष्पदामनिचयैः स्फुरत्सौगन्धिशालिभिः ।
सर्वासां हरिणा तत्र कबर्यो गुम्फितास्ततः ॥ २
भ्रमरध्वनिसंयुक्ते सुगन्धानिलवासिते ।
कालिन्दीनिकटे कृष्णो विचचार प्रियान्वितः ॥ ३
करीरैः पीलुभिः श्यामैस्तमालैः सङ्कुलं द्रुमैः ।
महावनं पुण्यतमं ययौ रासेश्वरो हरिः ॥ ४
तत्र रासं समारेभे रासेश्वर्या समन्वितः ।
गीयमानश्च गोपीभिरप्सरोभिः स्वराडिव ॥ ५
तत्र चित्रमभूद्राजन् शृणु त्वं तन्मुखान्मम ।
शङ्खचूडो नाम यक्षो धनदानुचरो बली ॥ ६
भूतले तत्समो नास्ति गदायुद्धविशारदः ।
मन्मुखादौग्रसेनेश्च बलं श्रुत्वा महोद्भटम् ॥ ७
लक्षभारमयीं गुर्वीं गदामादाय यक्षराट् ।
स्वसकाशान्मधुपुरीमाययौ चण्डविक्रमः ॥ ८
सभायामास्थितं कंसं नत्वा प्राह मदोद्धतः ।
गदायुद्धं देहि मह्यं त्रैलोक्यविजयी भवान् ॥ ९
अहं दासो भवेयं ते भवांश्च विजयी यदि ।
अहं जयी चेद्भवन्तं दास शीघ्रं करोम्यहम् ॥ १०
तथास्तु चोक्त्वा कंसस्तु गृहीत्वा महतीं गदाम् ।
शङ्खचूडेन युयुधे रङ्गभूमौ विदेहराट् ॥ ११
तयोश्च गदया युद्धं घोररूपं बभूव ह ।
ताडनाच्चट्चटाशब्दं कालमेघतडिद्ध्वनि ॥ १२

शुशुभाते रङ्गमध्ये मल्लौ नाट्ये नटाविव ।
इभेन्द्राविव दीर्घाङ्गौ मृगेन्द्राविव चोद्भटौ ॥ १३
द्वयोश्च युद्ध्यतो राजन् परस्परजिगीषया ।
विस्फुलिङ्गान् क्षरन्त्यौ द्वे गदे चूर्णीबभूवतुः ॥ १४
कंसः प्रकुपितं यक्षं मुष्टिनाभिजघान ह ।
शङ्खचूडोऽपि तं कंसं मुष्टिना संतताड च ॥ १५
मुष्टामुष्टिस्तयोरासीद्दिनानां सप्तविंशतिः ।
द्वयोरक्षीणबलयोर्विस्मयं गतयोस्ततः । १६
शङ्खचूडं सङ्गृहीत्वा कंसो दैत्याधिपो बली ।
बलाच्चिक्षेप सहसा व्योम्नि तं शतयोजनम् ॥ १७
शङ्खचूडः प्रपतितः किञ्चिद्व्याकुलमानसः ।
कंसं गृहीत्वा नभसि चिक्षेपायुतयोजनम् ॥१८
आकाशात् पतितः कंसः किञ्चिद्व्याकुलमानसः ।
यक्षं गृहीत्वा सहसा पातयामास भूतले ॥१९
शङ्खचूडस्तं गृहीत्वा पोथयामास भूतले ।
एवं युद्धे सम्प्रवृत्ते चकम्पे भूमिमण्डलम् ॥२०
मुनीन्द्रः सर्ववित् साक्षाद् गर्गाचार्यः समागतः ।
रङ्गेषु वन्दितस्ताभ्यां कंसं प्राहोर्ज्जया गिरा ॥२१

गर्ग उवाच

युद्धं मा कुरु राजेन्द्र विफलोऽयं रणोऽत्र वै ।
त्वत्समानो ह्ययं वीरः शङ्खचूडो महाबलः ॥२२
तव मुष्टिप्रहारेण भृशमैरावतो गजः ।
जानुभ्यां धरणीं स्पृष्ट्वा कश्मलं परमं ययौ ॥२३
अन्येऽपि बलिनो दैत्या मुष्टिना ते मृतिं गताः ।
शङ्खचूडो न पतति सन्देहो नास्ति तच्छृणु ॥२४

परिपूर्णतमो यो वै सोऽपि त्वां घातयिष्यति ।
तथैनं शङ्खचूडाख्यं शिवस्यापि वरोर्जितम् ॥२५
तस्मात् प्रेम प्रकर्तव्यं शङ्खचूडे यदूत्तम ।
यक्षराट् च त्वया कंसे कर्तव्यं प्रेम निश्चयम् ॥२६

नारद उवाच

गर्गेणोक्तौ तदा तौ द्वौ मिलित्वाथ परस्परम् ।
परमां चक्रतुः प्रीतिं शङ्खचूडयदूद्वहौ ॥२७
अथ कंसमनुज्ञाप्य गृहं गन्तुं समुद्यतः ।
गच्छन् मार्गेऽशृणोद्रात्रौ रासगानं मनोहरम् ॥२८
तालशब्दानुसारेण सम्प्राप्तो रासमण्डले ।
रासेश्वर्या समं रासेऽपश्यद्रासेश्वरं हरिम् ॥२९

श्रीराधयालङ्कृतवामबाहुं
स्वच्छन्दवक्रीकृतदक्षिणाङ्घ्रिम् ।
वंशीधरं सुन्दरमन्दहासं
भ्रूमण्डलैर्मोहितकामराशिम् ॥३०
व्रजाङ्गनायूथपतिं व्रजेश्वरं
सुसेवितं चामरछत्रकोटिभिः ।
विज्ञाय कृष्णं ह्यतिकोमलं शिशुं
गोपीं समाहर्तुमलं मनोऽकरोत् ॥ ३१

बहुलाश्व उवाच

किं बभूव ततो रासे शङ्खचूडे समागते ।
एतन्मे ब्रूहि विप्रेन्द्र त्वं परावरवित्तमः ॥३२

नारद उवाच

व्याघ्राननं कृष्णवर्णं तालवृक्षदशोच्छ्रितम् ।
भयङ्करं ललज्जिह्वं दृष्ट्वा गोप्यो वितत्रसुः ॥३३

दुद्रुवुः सर्वतो गोप्यो महान् कोलाहलोऽभवत् ।
हाहाकारस्तदैवासीच्छङ्खचूडे समागते ॥३४
शतचन्द्राननां गोपीं गृहीत्वा यक्षराट् खलः ।
दुद्रावाशूत्तरामाशां निःशङ्कः कामपीडितः ॥३५
रुदन्तीं कृष्ण कृष्णेति क्रोशन्तीं भयविह्वलाम् ।
तमन्वधावच्छ्रीकृष्णः शालहस्तो रुषा भृशम् ॥३६
यक्षो वीक्ष्य तमायान्तं कृतान्तमिव दुर्जयम् ।
गोपीं त्यक्त्वा जीवितेच्छुः प्राद्रवद्भयविह्वलः । ३७
यत्र यत्र गतो धावन् शङ्खचूडो महाखलः ।
तत्र तत्र गतः कृष्णः शालहस्तो भृशं रुषा ॥३८
हिमाचलतटं प्राप्य शालमुत्पाट्य यक्षराट् ।
तस्थौ तत्सम्मुखे राजन् युद्धकामो विशेषतः ॥३९
तस्मै चिक्षेप भगवान् शालवृक्षं भुजौजसा ।
तेन घातेन पतितो वृक्षो वातहतो यथा ॥४०
पुनरुत्थाय वैकुण्ठं मुष्टिनाभिजघान ह ।
जगर्ज सहसा दुष्टो नादयन् मण्डलं दिशाम् ॥४१
गृहीत्वा तं हरिर्दोर्भ्यां भ्रामयित्वा भुजौजसा ।
पातयामास भूपृष्ठे वातः पद्ममिवोद्धृतम् ॥४२
शङ्खचूडस्तं गृहीत्वा पोथयामास भूतले ।
एवं युद्धे सम्प्रवृत्ते चकम्पे भूमिमण्डलम् ॥४३
मुष्टिना तच्छिरश्छित्वा तस्माच्चूडामणिं हरिः ॥
जग्राह माधवः साक्षात् सुकृती शेवधिं यथा ॥४४
तज्ज्योतिर्निर्गतं दीर्घं द्योतयन् मण्डलं दिशाम् ।
श्रीदाम्नि श्रीकृष्णसखे लीनं जातं व्रजे नृप ॥४५

एवं हत्वा शङ्खचूडं भगवान् मधुसूदनः ।
मणिपाणिः पुनः शीघ्रमाययौ रासमण्डलम् ॥४६
चन्द्राननायै च मणिं दत्वा तं दीनवत्सलः ।
पुनर्गोपीगणैः सार्द्धं रास चक्रे हरिः स्वयम् ॥३७

इति श्रीगर्गसंहितायां वृन्दावनखण्डे रासक्रीडायां
लोहजङ्घमहावनविहारे शङ्खचूडवधो नाम
विंशोऽध्यायः ॥२०

नारद उवाच

अथ गोपीगणैः सार्द्धं पश्यन् श्रीयमुनातटम् ।
विहर्तुमाययौ कृष्णो वृन्दारण्यं मनोहरम् ॥१

वृन्दावने चौषधयो लता जाता हरेर्वरात् ।
ताः सर्वाश्चाङ्गना भूत्वा यूथीभूत्वा समाययुः ॥२

लतागोपीसमूहेन चित्रवर्णेन मैथिल ।
रेमे वृन्दावने राजन् हरिर्वृन्दावनेश्वरः ॥३

कलिन्दनन्दिनीतीरे कदम्बाच्छादिते शुभे ।
त्रिविधेन समीरेण सर्वतः सुरभीकृते ॥ ४

विलसत् पुलिने रम्ये वंशीवटविराजिते ।
स्थितोऽभूद्राधया सार्द्धं रासश्रमसमन्वितः ॥ ५

वीणातालमृदङ्गादिमुरुयष्टियुतानि च ।
वादित्राण्यम्बरे नेदुः सुरैर्गोपीगणैः सह ॥ ६

देवेषु पुष्पं वर्षत्सु जयध्वनियुतेषु च ।
तोषयन्त्यो हरिं गोप्यो जगुस्तद्यश उत्तमम् ॥ ७

काश्चिद्वै मेघमल्लारं दीपकञ्च तथापराः ।
मालकोशं भैरवञ्च श्रीरागञ्च तथैव च ॥ ८

हिन्दोलनं जगुः काश्चिद्राजन् सप्तस्वरैः सह ।
काश्चित्तासान्तु मुग्धाश्च काश्चिन्मध्याः स्त्रियो नृप ॥ ९

काश्चित् प्रौढाः प्रेमपराः श्रीकृष्णे लग्नमानसाः ।
जारधर्मेण गोविन्दं काश्चिद् गोप्यो भजन्ति हि ॥ १०

काश्चिच्छ्रीकृष्णसहिताः कन्दुकक्रीडने रताः ।
काश्चित् पुष्पैश्च हरिणा क्रीडां चक्रुः परस्परम् ॥ ११

काश्चिल्लतासु धावन्त्यः क्वणन्नूपुरमेखलाः ।
काश्चित् पिबन्ति सततं बलात् कृष्णाधरामृतम् ॥ १२
काश्चिद्भुजाभ्यां श्रीकृष्णं योगिनामपि दुर्लभम् ।
सङ्गृह्य प्रहस्याशु चक्रुरालिङ्गनं महत् ॥ १३
मनोजिद् यदुराजस्तु गोपीनां भगवान् हरिः ।
काश्मीरमुद्रितो रेमे वने वृन्दावनेश्वरः ॥ १४
काश्चिद्वीणां वादयन्त्यः समं वंशीधरेण वै ।
मृदङ्गं वादयत्येका गायन्त्यो भगवद्गुणम् ॥ १५
काश्चिद्वै मधुरं तालं ताडयन्त्यो हरेः पुरः ।
मुरयष्टिं सङ्गृह्य हरिणा माधवीतले ॥ १६
गायन्त्यः सुस्थिरा भूमौ विस्मृत्य जगतः सुखम् ।
काश्चिल्लतासु श्रीकृष्णभुजे बाहुं निधाय च ॥ १७
पश्यन्तो वृन्दकारण्ये शोभां राजन् इतस्ततः ।
लताजालैः संवलितं गोपीनां हारसञ्चयम् ॥ १८
पृथक् चकार गोविन्दः स्पृष्ट्वा तासामुरःस्थलम् ।
गोपीनां नासिकामुक्तावलिं तत्कुन्तलं स्वयम् ॥ १९
शनैः शनैः शोभनं तच्चक्रे श्रीनन्दनन्दनः ।
कृष्णचर्विततांबूलमर्द्धं नीत्वाथ गोपिकाः ॥ २०
चर्वयन्त्यः सुगन्धाढ्यमहो तासां तपो महत् ।
काश्चिच्छ्यामकपोलेषु द्व्यङ्गुलेन शनैः शनैः ॥ २१
हसन्त्यस्ताडयन्त्यस्ताः कदम्बेषु बलात् पृथक् ।
पुंवेषनायकाः काश्चिन्मौलिकुण्डलमण्डिताः ॥२२
नृत्यन्त्यः कृष्णपुरतः श्रीकृष्ण इव मैथिल ।
राधावेषधरा गोप्यः शतचन्द्राननप्रभाः ॥ २३
तोषयन्त्यश्च राधां तां तथा राधापतिं जगुः ।
काश्चित्ताः सात्त्विकैर्भावैः संयुक्ताः प्रेमविह्वलाः ॥ २४

योगीव चास्थिता भूमौ परमानन्दसंप्लुताः ।
काश्चिल्लतासु वृक्षेषु भूम्यां खे विदिशासु च ॥ २५
पश्यन्त्यः श्रीपतिं देवं स्वस्मिन् वा मौनमास्थिताः ।
एवं रासे गोपवध्वः सर्वाः पूर्णमनोरथाः ॥ २६
बभूवुरेत्य गोविन्दं सर्वेशं भक्तवत्सलम् ।
यत्प्रसादस्तु गोपीनां प्राप्तो राजन् महामते ॥ २७
ज्ञानिनामपि नास्त्येवं कर्मिणान्तु कुतश्च सः ।
एवं श्रीकृष्णचन्द्रस्य हरे राधापतेः प्रभोः ॥ २८
रासे चित्रं यद्बभूव तच्छृणुष्व महामते ।
मुनीन्द्र आसुरिर्नाम श्रीकृष्णेष्टो महातपाः ॥ २९
नारदाद्रौ तपस्तेपे हरिध्यानपरायणः ।
हृत्पुण्डरीके श्रीकृष्णं ज्योतिर्मण्डलमास्थितम् ॥ ३०
मनोज्ञं राधया सार्द्धं नित्यं ध्याने ददर्श ह ।
एकदा ध्यानमध्ये तु रात्रौ कृष्णो न चागतः ॥ ३१
वारं वारं कृतं ध्यानं जातः खिन्नमना मुनिः ।
ध्यानादुत्थाय स मुनिः कृष्णदर्शनलालसः ॥ ३२
नारायणाश्रमं प्रागाद्बदरीखण्डमण्डितम् ।
न ददर्श हरिं देवं नरनारायणं मुनिः ॥ ३३
तदातिविस्मितो विप्रो लोकालोकं गिरिं ययौ ।
सहस्रशिरसं देवं न ददर्श स तत्र वै ॥ ३४
पप्रच्छ पार्षदांस्तत्र क्व गतो भगवानितः ।
न विद्मो भो वयं चोक्तो मुनिः खिन्नमनास्तदा ॥ ३५
श्वेतद्वीपं ययौ दिव्यं क्षीरसागरशोभितम् ।
तत्रापि शेषपर्यङ्के न ददर्श हरिं पुनः ॥ ३६
तदासुरिः खिन्नमनाः प्रेम्णा पुलकिताननः ।
पप्रच्छ पार्षदांस्तत्र क्व गतो भगवानितः ॥ ३७

न विघ्नो भो वयं चोक्तो मुनिश्चिन्तापरायणः ।
किं करोमि क्व गच्छामि दर्शनं तत्कथं भवेत् ॥ ३८

एवं ब्रुवन् मनोयायी वैकुण्ठं प्राप्तवांस्ततः ।
नापश्यत्तत्र देवेशं रमावैकुण्ठमाविशत् ॥ ३९

न दृष्टस्तत्र भक्तेशो मुनिनासुरिणा नृप ।
ततो मुनीन्द्रो योगीन्द्रो गोलोकं स जगाम ह ॥ ४०

वृन्दावने निकुञ्जेऽपि न ददर्श परात्परम् ।
तदा मुनिः खिन्नमनाः श्रीकृष्णविरहातुरः ॥ ४१

पप्रच्छ पार्षदांस्तत्र क्व गतो भगवानितः ।
ऊचुस्तं पार्षदा गोपा वामनाण्डे मनोहरे ॥ ४२

पृश्निगर्भो यत्र जातस्तत्र वै भगवान् स्वयम् ।
इत्युक्त आसुरिस्तस्मादस्मिन्नण्डे समागतः ॥ ४३

हरिं ह्यपश्यन् प्रचलन् कैलास प्राप्तवान् मुनिः ।
तत्र स्थित महादेवं कृष्णध्यानपरायणम् ।
नत्वा पप्रच्छ तद्रात्रौ खिन्नचेता महामुनिः ॥ ४४

आसुरिरुवाच

भगवन् सर्वब्रह्माण्डं मया दृष्टमितस्ततः ।
आवैकुण्ठाच्च गोलोकाद्भ्रमता तद्दिदृक्षुणा ॥ ४५

कुत्रापि देवदेवस्य दर्शनं न बभूव मे ।
कुत्रास्ते भगवानद्य वद सर्वविदां वर ॥ ४६

महादेव उवाच

धन्यस्त्वमासुरे ब्रह्मन् कृष्णभक्तोऽस्यहैतुकः ।
दिदृक्षुणा त्वयायासं कृतं वेद्मि महामुने ॥ ४७

कर्मेन्द्रियाणीह यथा रसादीं
स्तथा सकामा मुनयः सुखं यत्।
मनाङ् न जानन्ति हि नैरपेक्ष्यं
गूढं परं निर्गुणलक्षणं तत् ॥ ४८

हंसं मुनिं दुःखगतं महोदधौ
यः सर्वतो मोचयितुं गतस्त्वरम्।
सोऽद्यैव वृन्दाविपिने सखीजनैः
करोति रासं रसिकेश्वरः स्वयम् ॥ ४९

षाण्मासिकी चाद्य कृता निशीथिनी
स्वमायया देववरेण भो मुने।
अहं गमिष्यामि तदेव द्रष्टुं
त्वमेव गच्छाशु मनोरथं यथा ॥ ५०

इति श्रीगर्गसंहितायां वृन्दावनखण्डे नारदबहुलाश्व-
संवादे रासक्रीडायामासुरिमुन्युपाख्यानं नाम
एकविंशोऽध्यायः ॥ २१

नारद उवाच

एवं विचिन्त्य मनसा मुनिनासुरिणा शिवः ।
तौ कृष्णदर्शनार्थाय जग्मतुर्व्रजमण्डलम् ॥ १

दिव्यद्रुमलताकुञ्जतोलिकापुञ्जशोभिताम् ।
पश्यन्तौ तौ दिव्यभूमिं कालिन्दीनिकटे गतौ ॥ २

गोलोकवासिन्यो नार्यो वेत्रहस्ता महाबलाः ।
चक्रुर्बलात्तन्निषेधं मार्गस्था द्वारपालिकाः ॥ ३

तावूचतुश्चागतौ स्वः कृष्णदर्शनलालसौ ।
तावाहुर्नृपशार्दूल मार्गस्था द्वारपालिकाः ॥ ४

द्वारपालिका ऊचुः

सर्वतो वृन्दकारण्यं कोटिशः कोटिशो वयम् ।
रासरक्षां सदा कुर्मो न्यस्ताः कृष्णेन भो द्विजौ ॥ ५

एकोऽस्ति पुरुषः कृष्णो निर्जने रासमण्डले ।
अन्यो न याति रहसि गोपीयूथं विना क्वचित् ॥ ६

चेद्दिदृक्षू युवां तस्य स्नानं मानसरोवरे ।
कुरुतं तत्र गोपीत्वं प्राप्याशु व्रजतं मुनी ॥७

नारद उवाच

इत्युक्तौ तौ मुनिशिवौ स्नात्वा मानसरोवरे ।
गोपीत्वं प्राप्य सहसा जग्मतू रासमण्डले ॥८

सौवर्णप्रखचित्पद्मरागभूमिमनोहरे ।
माधवीलतिकावृन्दकदम्बाच्छादिने शुभे ॥९

वसन्तचन्द्रकौमुद्या प्रदीप्ते सर्वकौशले ।
यमुनारत्नसोपानतोलकाभिविराजिते ॥१०

मयूरहंसदात्यूहकोकिलैः कूजिते परे ।
यमुनानिललोलैजत्तरुपल्लवशोभिते ॥११

अद्यैव देव परिपूर्णतमस्तु साक्षाद्
भूभूरिभारहरणाय सतां शुभाय ।
प्राप्तोऽसि नन्दभवने परतः परस्त्वं
कृत्वा हि सर्वनिजलोकमशेषशून्यम् ॥२३

अंशांशकांशककलाभिरुताभिराम
मावेशपूर्णनिचयाभिरतीव युक्तः ।
विश्वं बिभर्षि रसरासमलङ्करोषि
वृन्दावनञ्च परिपूर्णतमः स्वयं त्वम् ॥२४

गोलोकनाथ गिरिराजपते परेश
वृन्दावनेश कृतनित्यविहारलील ।
राधापते व्रजवधूजनगीतकीर्ते
गोविन्द गोकुलपते किल ते जयोऽस्तु ॥२५

श्रीमन्निकुञ्जलतिकाकुसुमाकरस्त्वं
श्रीराधिकाहृदयकण्ठविभूषणस्त्वम् ।
श्रीरासमण्डलपतिर्व्रजमण्डलेशो
ब्रह्माण्डमण्डलमहीपरिपालकोऽसि ॥२६

नारद उवाच

तदा प्रसन्नो भगवान् राधया सहितो हरिः ।
मन्दस्मितो मुनी प्राह मेघगम्भीरया गिरा ॥२७

भगवानुवाच

षष्टिर्वर्षसहस्राणि युवयोस्तपतोस्तपः ।
मद्दर्शनं तेन जातं सर्वतो नैरपेक्ष्ययोः ॥२८
निष्किञ्चनो यः शान्तश्चाजातशत्रुः स मत्सखा ।
तस्माद्युवाभ्यां मनसा व्रियतामीप्सितो वरः ॥२९

शिवासुरी ऊचतुः

मनोऽस्तु भूमन् युवयोः पदाब्जे
सदैव वृन्दावनमध्यवासः।
न रोचते नोऽन्यमतस्त्वदङ्गे
र्नमो युवाभ्यां हरिराधिकाभ्याम् ॥३०

नारद उवाच

तथास्तु चोक्त्वा भगवान् वृन्दारण्ये वनोत्तमे।
कालिन्दीनिकटे राजन् रासमण्डलमण्डिते ॥३१
निकुञ्जपार्श्वे पुलिने वंशीवटसमीपतः।
शिवस्य चासुरिमुनेर्नित्यं वासं चकार ह ॥३२
अथ कृष्णो रासलीलां चक्रे पद्माकरे वने।
पतत्सुगन्धिरजसि गोपीभिर्भ्रमराकुले ॥३३
एवं षाण्मासिकी रात्रिः कृता कृष्णेन मैथिल।
गोपीनां रासलीलायां व्यतीता क्षणवत् सुखैः ॥३४
अरुणोदयवेलायां स्वगृहान् व्रजयोषितः।
यूथीभूत्वा ययू राजन् सर्वाः पूर्णमनोरथाः ॥३५
श्रीनन्दमन्दिरं साक्षात् प्रययौ नन्दनन्दन.।
वृषभानुपुरं प्रागाद्वृषभानुसुता त्वरम् ॥३६
एवं श्रीकृष्णचन्द्रस्य रासाख्यानं मनोहरम्।
सर्वपापहरं पुण्यं कामदं मङ्गलायनम् ॥३७
त्रिवर्गदं जनानान्तु मुमुक्षूणां सुमुक्तिदम्।
मया तवाग्रे कथितं किं भूयः श्रोतुमिच्छसि ॥३८

इति श्रीगर्गसंहितायां वृन्दावनखण्डे रासक्रीडायां
शिवासुरिमुनिवरप्राप्तिवर्णनं नाम
द्वाविंशोऽध्यायः ॥२२

बहुलाश्व उवाच

अघासुरादिदैत्यानां ज्योतिः कृष्णे समाविशत् ।
श्रीदाम्नि शङ्खचूडस्य कस्माल्लीनं बभूव ह ॥१
एतद्वद महाबुद्धे त्वं परावरवित्तमः ।
अहो श्रीकृष्णचन्द्रस्य चरितं परमाद्भुतम् ॥ २

नारद उवाच

पुरा गोलोकवृत्तान्तं नारायणमुखाच्छ्रुतम् ।
सर्वपापहरं पुण्यं शृणु राजन् महामते ॥ ३
राधा श्री विरजा भूश्चतस्रः पत्न्योऽभवन् हरेः ।
तासां राधा प्रियातीव श्रीकृष्णस्य महात्मनः ॥ ४
राधिकासमया राजन् कोटिचन्द्रप्रकाशया ।
कुञ्जे विरजया रेमे एकान्ते चैकदा प्रभुः ॥ ५
सपत्नीसहितं कृष्णं राधा श्रुत्वा सखीमुखात् ।
अतीव विमना जाता सपत्नीसौख्यदुःखिता ॥ ६
शतयोजनविस्तारं शतयोजनमूर्ध्वगम् ।
कोट्यांश्वनीसमायुक्तं कोटिसूर्यसमप्रभम् ॥ ७
विचित्ररत्नसौवर्णमुक्तादामाविलम्बितम् ।
पताकाहेमकलशैः कोटिभिर्मण्डितं रथम् ॥ ८
समारुह्य सखीनां सा वेत्रहस्तैर्दशार्बुदैः ।
हरिं द्रष्टुं जगामाशु श्रीराधा भगवत्प्रिया ॥ ९
तन्निकुञ्जे द्वारपालं श्रीदामानं महाबलम् ।
हरिन्यस्तं समालोक्य तं निर्भर्त्स्य सखीजनैः ॥ १०
वेत्रैः सन्ताड्य सहसा द्वारि गन्तुं समुद्यता ।
सखीकोलाहलं श्रुत्वा हरिरन्तरधीयत ॥ ११

राधाभयाच्च विरजा नदीभूत्वावहत्तदा ।
कोटियोजनमायामं गोलोकं सर्वतो नदी ॥ १२
सहस्रकुण्डलीं कृत्वा शुशुभेऽब्धिरिवावनम् ।
रत्नपुष्पैर्विचित्राङ्गा यथोष्णिङ्मुद्रिता नृप ॥ १३
हरिं गतं तं विज्ञाय नदीभूताञ्च तां तथा ।
आलोक्य तन्निकुञ्जञ्च स्वकुञ्जं राधिका ययौ ॥ १४
अथ कृष्णो नदीभूतां विरजां विरजां वराम् ।
सविग्रहां चकाराशु स्ववरेण नृपेश्वर ॥ १५
पुनर्विरजया सार्द्धं विरजातीरजे वने ।
निकुञ्जे वृन्दकारण्ये चक्रे रासं हरिः स्वयम् ॥ १६
विरजायां सप्तसुता बभूवुः कृष्णतेजसा ।
निकुञ्जं ते ह्यलञ्चक्रुः शिशवो बाललीलया ॥ १७
एकदा तैः कलिरभूल्लघुर्ज्येष्ठैश्च ताडितः ।
पलायमानो भयभृन्मातुः क्रोडे जगाम ह ॥ १८
तल्लालनं समारेभे समाश्वास्य सुतं सती ।
तदा वै भगवान् साक्षात्तत्रैवान्तरधीयत ॥ १९
रुषा सुतं शशापेयं श्रीकृष्णविरहातुरा ।
त्वं जलं भव दुर्बुद्धे कृष्णविच्छेदकारकः ॥ २०
कदापि त्वज्जलं मर्त्या न पिबन्तु कदाचन ।
ज्येष्ठान् शशाप व्रजत मेदिनीं कलिकारकाः ॥ २१
जलरूपाः पृथग् याना न समेता भविष्यथ ।
नैमित्तिके च भवतां मेलनं स्यात् सदा लये ॥ २२

नारद उवाच

इत्थं ते मातृशापेन धरणीं वै समागताः ।
प्रियव्रतरथाङ्गानां परिखासु समास्थिताः ॥ २३

लवणेक्षुसुरासर्पिर्दधिदुग्धजलार्णवाः ।
बभूवुः सप्त ते राजन् अक्षोभ्याश्च दुरत्यया: ॥ २४
दुर्विगाह्याश्च गम्भीरा आयामं लक्षयोजनात् ।
द्विगुणं द्विगुणं जातं द्वीपे द्वीपे पृथक् पृथक् ॥ २५
अथ पुत्रेषु यातेषु पुत्रस्नेहातिविह्वलाम् ।
स्वप्रियां तां विरहिणीमेत्य कृष्णो वरं ददौ ॥ २६
कदापि ते न विच्छेदो मया भीरु भविष्यति ।
स्वतेजसा स्वपुत्राणां सदा रक्षां करिष्यसि ॥ २७
अथ राधां विरहिणीं ज्ञात्वा कृष्णो हरिः स्वयम् ।
श्रीदाम्ना सह वैदेह तन्निकुञ्जं समाययौ ॥ २८
निकुञ्जद्वारि सम्प्राप्तं ससखं प्राणवल्लभम् ।
वीक्ष्य मानवती भूत्वा राधा प्राह हरिं वचः ॥ २९

राधोवाच

तत्रैव गच्छ यत्राभूत् स्नेहस्ते नूतनो हरे ।
नदीभूता हि विरजा नदो भवितुमर्हसि ॥ ३०
कुरु वासं तन्निकुञ्जे मया ते किं प्रयोजनम् ।

नारद उवाच

इति श्रुत्वाथ भगवान् स्वं निकुञ्जं जगाम ह ।
श्रीकृष्णमित्रः श्रीदामा राधां प्राह रुषा वचः ॥ ३१

श्रीदामोवाच

परिपूर्णतमः साक्षाच्छ्रीकृष्णो भगवान् स्वयम् ॥
असंख्यब्रह्माण्डपतिर्गोलोकेशः परात्परः ॥ ३२
त्वादृशीः कोटिशः शक्तीः कर्तुं शक्तः परात्परः ।
तं विनिन्दसि राधे त्वं मानं मा कुरु मा कुरु ।
वरिष्यसि विहारार्थं राधे सा त्वमसंशयम् ॥ ३३

राधोवाच

हे मूढ पितरं स्तुत्वा मातरं मां विनिन्दसि ।
राक्षसो भव दुर्बुद्धे गोलोकाच्च बहिर्भव ॥ ३४

श्रीदामोवाच

अनुकूलेन कृष्णेन जातो मानः शुभे तव ।
तस्माद्भुवि परात् कृष्णात् परिपूर्णतमात् प्रभोः ।
शतवर्षं ते वियोगो भविष्यति न संशयः ॥ ३५

नारद उवाच

एवं परस्परं शापात् स्वकृताद्भयभीतयोः ।
अतीव चिन्तां गतयोराविरासीत् स्वयं प्रभुः ॥ ३६

भगवानुवाच

वचनं वै स्वनिगमं दूरीकर्तुं क्षमोऽस्म्यहम् ।
भक्तानां वचनं राधे दूरीकर्तुं न च क्षमः ॥ ३७
मा शोकं कुरु कल्याणि वरं मे शृणु राधिके ।
मासं मासं वियोगे ते दर्शनं मे भविष्यति ॥ ३८
भुवो भारावताराय कल्पे वाराहसंज्ञके ।
भक्तानां दर्शनं दातुं गमिष्यामि त्वया सह ॥ ३९
श्रीदामन् शृणु मे वाक्यमंशेन त्वसुरो भव ।
वैवस्वतान्तरे रासे हेलनं मे करिष्यसि ॥ ४०
मद्धस्तेन च ते मृत्युर्भविष्यति न संशयः ।
पुनः स्वविग्रहं पूर्वं प्राप्स्यसि त्वं वरान्मम ॥ ४१

नारद उवाच

एवं शापेन श्रीदामा पुरा पुण्यजनालये ।
सुधनस्य गृहे जन्म लेभे राजन् महातपाः ॥ ४२
शङ्खचूड इति ख्यातो धनदानुचरोऽभवत् ।
तस्माच्छ्रीदाम्नि तज्ज्योतिर्लीनं जातं विदेहराट् ॥ ४३

स्वात्मारामो लीलया सर्वकार्यं
स्वस्मिन् धाम्नि ह्यद्वितीयः करोति ।
यः सर्वेशः सर्वरूपो महात्मा
चित्रं नेदं नौमि कृष्णाय तस्मै ॥ ४४
इदं मया ते कथितं मनोहरं
वैदेह वृन्दावनखण्डमग्रतः ।
शृणोति चैतच्चरितं नरो वरः
परं पदं पुण्यतमं प्रयाति सः ॥ ४५

इति श्रीगर्गसंहितायां वृन्दावनखण्डे नारदबहुलाश्वसंवादे शङ्खचूडोपाख्याने विरजानदीसमुद्रोत्पत्तिवर्णनं नाम त्रयोविंशोऽध्यायः ॥ २३

इति द्वितीयः वृन्दावनखण्डः समाप्तः ॥

गर्गसंहितायां वृन्दावनखण्डे पाठान्तरादिप्रदर्शनम् ।

अत्र खण्डे ख घ आदर्शयोरभावोऽवगन्तव्यः ।

१।४ ०वृद्धान् सहायान् तानुवाच० इति ग० पु० ।
नन्द उवाच इति मु० पु० ।
०कर्त्तव्यं तु वदत० इति मु० पु० ।

१।५ ०गोपो वृद्धो० इति मु० पु० ।

१।६ सनन्द उवाच इति ग० पु० ।

१।८ ह्यवक्ष्यशकटे० इति ग० पु० ।

१।१० ०वृन्दावन व्रजे । इति ग० पु० ।

१।१२ ०सार्द्धञ्च योजनेन वै । इति ग० पु० ।

१।२७ ०भगवान् × कलेश्वरः ॥ इति ग० पु० ।

१।३३ ०राजमानं तीर्थराज० इति ग० पु० ।
०उवाच ह ॥ इति नास्ति ग० पु० ।

१।३४ नारद उवाच इति नास्ति ग० पु० ।
श्लोकादितो-स्त्वं वै तीर्थराज० इति नास्ति ग० पु० ।

१।३८ ०माथुरं मण्डलं विना ॥ इति ग० पु० ।

१।४० ०गृहस्यापि कृतो राट् च० इति मु० पु० ।

१।४२ ०साक्षान्मण्डलं मे० इति ग० पु० ।

१।४७ दष्ट्राग्रे० इति ग० पु० ।

१।४८ पृथ्वी उवाच इति ग० पु० ।

१।४९ वृत्ताः प्रदृश्या हि भवत्योर्द्धं गया जले । इति ग० पु० ।

१।५० ०धरणीरहं हि० इति मु० पु० ।

१।५३ गोलोकभूमिसंयुक्त० इति ग० मु० पु० ।

२।४ ०जनानां नोऽनुशृण्वताम् । इति ग० पु० ।

२।८ ०सुधाम्नः श्रीहरिः० इति मु० पु० ।

२।१३ ०गोगर्यौयुक्ते गोपीगोपाल संयुते ॥ इति ग० पु० ।

२।१७ ०तीर्थयायी च० इति मु० पु० ।
२।१८ निकरैर्नादितं० इति ग० पु० ।
२।२५ तत्रैव स्थाप० इति मु० पु० ।
०यत्रैको न च पर्वतः ॥ इति ग० पु० ।
२।२८ ०वदान्येनं महा० इति मु० पु० ।
२।२९ ०कर्म के शुभे । इति मु० पु० ।
२।३२ ०मे करिष्यति । इति ग० पु० ।
२।३३ ०शपथस्ते मया पथि॥ इति ग० पु० ।
२।४० ०भूमिभारं ददौ० इति ग० पु० ।
२।४१ ०शङ्कां कर्त्तुमसौ० इति मु० पु० ।
२।४२ ०गिरिंगोवर्द्धनं गिरिम् ॥ इति ग० पु० ।
२।४३ तोलितं भूरि० इति ग० पु० ।
२।४६ मुनेऽत्र मे न दोषो० इति मु० पु० ।
०त्वया मे शपथः कृतः ॥ इति ग० पु० ।
२।४७ ०विगतोषमः (?) ॥ इति ग० पु० ।
२।४९ ०पुलस्त्यर्षौ त्वयं० इति मु० पु० ।
२।५१ ०सुमुक्तिदं श्रीरुचिरं न चित्रम् ॥ इति ग० पु० ।

३।३ ०विदुर्बुधाः ॥ इति ग० पु० ।
३।४ ०निकुञ्जद्वारनिर्गता ॥ इति मु० पु० ।
३।८ ०लोकादत्रोकं जगाम ह ॥ इति ग० पु० ।
३।११ ०कालिन्दं प्राप्य० इति मु० पु० ।
३।१२ ०कालिन्दप्रभवा० इति मु० पु० ।
०कालिन्दगिरिसानू० इति मु० पु० ।
३।१३ ०सा वै वाडवे वने ॥ इति ग० पु० ।
३।१७ ०चन्द्रवासार्थं निज० इति मु० पु० ।
३।१८ अथ व्रजा० इति मु० पु० ।
३।१९ ततस्तु वारिवेगेन० इति ग० पु० ।

०गत्वाथो व्रजमण्डलम्। इति ग० पु०।
०नत्वाथो व्रज० इति मु० पु०।
०तीर्थसङ्गमम्॥ इति ग० पु०।

३।२० ०क्षीराब्धि सा० इति मु० पु०।
देवाश्च वर्षा पुष्पानां चक्रुर्दिग्विजयध्वनिम्॥ इति ग० पु०।

३।२३ त्वत्समानं हि दिव्यं हि न भूतो न भविष्यति॥ इति ग० पु०।
त्वत्समाना हि दिव्या च न भूता न० इति मु० पु०।

३।२४ ०गङ्गां तस्मा० इति मु० पु०।

३।२६ ०सर्वलोकैकवन्दिता। इति मु० पु०।
परिपूर्णतमस्यासि० इति ग० पु०।

३।२८ ०शुभम्। इति मु० पु०।
०वियोगातुराहं वै यानं कर्त्तुं न च क्षमा॥ इति क० मु० पु०।

३।३२ ०वेगवत्तदा॥ इति ग० पु०।

३।३३ ततो मूर्ध्नि न्यपपात सुरावजलधारया (?)। इति ग० पु०।
०स्फुरासज्जल० इति मु० पु०।

३।३४ ०सा प्रययौ स्वर्गनाकिना। इति ग० पु०।

३।३७ ०नवचरित्र० इति मु० पु०।
०यदि पाठितं० इति क० मु० पु०।
०पठेच्च यो नित्यशः० इति क० मु० पु०।
०लीलायुतम्॥ इति मु० पु०।

४।७ ०परिकरैः साकं० इति क० पु०।
०मुदा वृन्दावनं ययुः॥ इति ग० पु०।

४।६ ०सप्तद्वारसमन्वितम्॥ इति ग० मु० पु०।

४।१० नास्ति ग० मु० पु०।
०समद्वारसमन्वितम्॥ इति क० पु०।

४।१६ पीतवासाः परिकरौ० इति

क० ग० पु० ।

४।१६ ०स्तत्राजगाम ह ॥ इति क० पु० ।

४।२३ विस्मितेषु च गोपेषु० इति क० पु० ।

४।२५ ०श्रीप्रपूर्णो० इति ग० मु० पु० ।

५।३ श्लोकपूर्वार्द्धं नास्ति क० मु० पु० ।

५।५ श्लोकोऽयं नास्ति ग० पु० ।

५।७ ०जघान नदन् मुहुः ॥ इति क० पु० ।

५।१० ०रुग्णातां प्रागात्० इति क० पु० ।

५।१३ ०महाबलम् ॥ इति क० पु० ।

५।१४ ०महाबलम् ॥ इति क० पु० ।

५।१५ ०नाभवद्दैत्यो० इति ग० पु० ।

५।१६ ०महापापश्छिन्नो० इति ग० मु० पु० ।

०न्न मृतश्चवै। इति मु० पु० ।

०भद्रकाली सरस्वती ॥ इति ग० पु० ।

५।१७ ०महाखलः ॥ इति मु० पु० ।

५।१८ तयैकपादो भग्नोऽभू० इति मु० पु० ।

तदैकपादभग्नो० इति ग० पु० ।

५।१९ ०तीक्ष्णाया तुण्डया मृधे ॥ इति ग० पु० ।

०तीक्ष्णाया तुण्डया नृप ॥ इति क० पु० ।

५।२२ ०तरसा च्तकण्ठो० इति ग० पु० ।

५।२६ ०संश्लिष्य सर्वतः । इति मु० पु० ।

०संस्पृश्य सर्वतः । इति ग० पु० ।

५।२७ ०राजमन्दिरे ॥ इति ग० मु० पु० ।

५।३८ ०मैन्द्रं योगपद० इति क० पु० ।

०मैन्द्रयोगापद्दं० इति ग० पु० ।

५।३९ ०त्रैवर्ग्यं किमभूज्जनैः । इति मु० पु० ।

०त्रैवर्ग्यं किमु भूजौ । इति ग० पु० ।

०पूर्णाभ्रमात्र० इति ग० पु० ।

६।१ ०निकटे दिव्ये० इति क०

पु० ।
०चकार ह ॥ इति ग० मु० पु० ।

६।३ ०कृत्वा करध्वनिम् ॥ इति मु० पु० ।

६।५ हाहाशब्दं सुराणान्तु दैत्यानां० इति ग० पु० ।

६।६ तरसा रोधगाः प्राणाः० इति ग० पु० ।

६।८ श्लोकापरार्द्धं नास्ति क० ग० पु० ।

६।९ ०दैत्यो हरिं गतः ॥ इति मु० पु० ।

६।११ ०जहास तं सद्यः० इति ग० पु० ।

६।१२ ०महादुष्टं त्वं० इति ग० मु० पु० ।

६।१४ यदागतः सर्पं० इति क० ग० पु० ।

६।१५ ०योगैश्च दुर्लभम् ॥ इति ग० पु० ।
अतः परं मुद्रित पुस्तके षष्ठाध्याय समाप्तिर्वर्त्तते। ततश्च ७, ८, ९ अध्याया अपि अधिकाः सन्ति। ये खलु अध्यारभेदेनात्र मुद्रिताः।
क० ग० पुस्तकयोस्तु षष्ठाध्याय एवानुवर्त्तत इति ज्ञेयम्।
अस्माभिरपि मुद्रितपुस्तक दशमाध्यायारम्भे च षष्ठाध्यायानुवृत्तिज्ञापिका १६ संख्यैव श्लोकान्ते दत्ता। तत्पुस्तकदशमाध्यायान्ते च पुष्पिकायां षष्ठाध्याय समाप्तिरेव प्रदर्शितास्माभिरिति मन्तव्यम्।

६।१८ ०वृषभानुव्रजेषु षट्। इति क० ग० पु० ।

६।१९ ०रिष्टान्यागच्छन्ति० इति क० मु० पु० ।

६।२४ ०सुगर्गवाक्यैर्धर्मार्थं० इति मु० पु० ।
०सुवत्सवाक्यै० इति ग० पु० ।

६।२७ स्वालङ्कारञ्च० इति क० पु० ।

६।२८ ०नन्दो दानं ददौ० इति मु० पु० ।

७।२ अग्रे पृष्ठे तदा गावश्चर-

न्त्यः० इति मु० पु० ।

०पृष्ठे तथा गाव० इति ग० पु० ।

०पश्यन्त्यः सुन्दरं० इति ग० मु० पु० ।

७।४ ०मालाजालैर्विराजिता ॥ इति मु० पु० ।

७।६ ०पीतपुच्छा०इति मु० पु०।

०रक्तपुच्छा० इति ग०पु० ।

७।७ कुम्भोघ्न्यः पाटलाः काश्चिद् गच्छन्त्यो० इति क० पु० ।

७।१० शादूल कोमल कान्तं० इति मु० पु० ।

७।११ ०श्यामलैर्वनम् । इति मु० पु० ।

०प्रियालैः पनसै० इति क० पु० ।

०श्यामलैः पनसै० इति ग० पु० ।

७।१२ कदलैः कोविदारै० इति मु० पु० ।

असनैश्च कपित्थैश्च० इति क० पु० ।

७।१३ ०चिप्तं चैत्ररथं० इति मु० पु० ।

०चिपंश्चैत्ररथं० इति ग० पु० ।

७।१६ परितो जालकुञ्जाढ्याः शालैरिन्द्र० इति ग० पु० ।

करिल्लजालकुञ्जाढ्यः० इति क० पु० ।

७।२१ ०तीरे महावने । इति क० पु० ।

७।२२ मयूरपिच्छभृन्मौली० इति मु० पु० ।

७।२३ रागैः संशब्दयन् वंशीं श्रीनन्दगृह० इति ग० पु० ।

७।२४ वेणुवंशीध्वनिकुला० इति मु० प० ।

वेणुवंशीध्वनिकलं० इति ग० पु० ।

८।१ ०तालवनं नवम् ॥ इति मु० पु० ।

८।४ गगर्ज निर्भयः० इति क० पु० ।

गर्जन्ति निर्भय ० इति ग० पु० ।

८।७ ०खरशब्दश्च० इति ग०पु० ।

८।८ ०भग्नश्च तालोऽपि० इति मु० पु० ।

०तालानन्यान् स्थितान्०

इति ग० पु० ।

८।२४ नास्ति ग० पु० ।

८।३७ यस्य शापेन विश्वोऽयं कम्पितः० इति क०ग०पु० ।

९।२ कालीयस्य फणीन्द्रस्य जलं विषविदूषितम् । इति क० पु० ।

९।६ ०महाबलम् ॥ इति क० पु० ।

९।१२ ०विगतस्मयः ॥ इति क० पु० ।

९।१५ वादयन् सुमहावीणानक० इति ग० पु० ।
वादयन् समुदा वीणा० इति मु० पु० ।

९।१६ ०फणान् सोज्ज्वलान्० इति मु० पु० ।
०कालियस्य महात्मनः ॥ इति मु० पु० ।

९।२५ ०सकला जनाः ॥ इति ग० पु० ।

९।२६ ०मुमुदिरे जनाः । इति मु० पु० ।

९।२८ ०गोपीगोपगणैः सह ॥ इति ग० मु० पु० ।

९।३० नत्वा कृताञ्जलिं कृत्वा० इति ग० मु० पु० ।

९।३१ ०शरणागतवत्सल । इति ग० मु० पु० ।
०वने कष्टात्० इति ग० मु० पु० ।

१०।३ श्लोकोत्तरार्द्धं नास्ति ग० पु० ।

१०।४ श्लोकपूर्वार्द्धं नास्ति ग० पु० ।

१०।५ ०सुखदं नहि । इति मु० पु० ।

१०।८ ०सर्प इव त्वं० इति क० मु० पु० ।
सदा सर्पो० इति क० मु० पु० ।

१०।९ ०महद्भमः । इति क० पु० ।
०महान् मदः । इति ग० पु० ।
०भव सदा ॥ इति क० पु० ।
०त्वं काक इव० इति ग० पु० ।
०सुदुर्मते ॥ इति ग० पु० ।

१०।१० ०रित्थन्तु शपतो० इति क० पु० ।
स्वशापसदुःखितयोः० इति

क० पु० ।

१०।१४ ०सद्ज्ञान भविष्यति० इति क० पु० ।

०सज्ञानं० इति ग० पु० ।

०संयोग योग० इति क० पु० ।

१०।२० ० कांश्चिद्दुःसहांश्चशता ० इति मु० पु० ।

कांश्चित् कांश्चिद् दश-शता० इति ग० पु० ।

१०।२३ ०समुद्धर ॥ इति क० मु० पु० ।

१०।२४ ०यतोऽनन्त० इति मु० पु० ।

१०।२५ ०धराधारस्य मे० इति ग० पु० ।

१०।२७ तदाभूद् भारमुत्तार्य स्वफग्रात्व० इति क० पु० ।

०स्वफग्रात्व सुखी० इति ग० पु० ।

१०।२८ आधारोऽहं० इति मु० पु० ।

१०।२९ महाभारमयीं० इति क० मु० पु० ।

०कुरुमत्सखे ॥ इति मु० पु० ।

०कुरुतात्सुखे ॥ इति क० पु० ।

१०।३४ केभ्यस्तु० इति क० ग० पु० ।

११।२ ०जघान ह । इति मु० पु० ।

०गतत्तुब्धं चैक० इति मु० पु० ।

११।३ ०यदा सर्वान्० इति क० पु० ।

११।४ ०मासि मासि पृथक् पृथक् । इति ग० पु० ।

११।५ ०गृहाद् गृहात् । इति क० पु० ।

०बलिं तं वकवत्परम् ॥ इति ग० पु० ।

११।६ गोपीनाथात्मनो० इति क० पु० ।

११।८ ०वेगतः कालियोपरि । इति मु० पु०

११।११ ०दिव्यवाहनः । इति ग० मु० पु० ।

११।१७ ०द्वीपान् सप्तखण्डान्० इति मु० पु० ।

११।२० ०न सुखं जातं० इति ग० पु० ।

०योऽपि भयातुरः । इति मु० पु० ।

११।२६ ०तनुजाद्ध शत् ॥ इति ग० पु० ।

११।३२ निर्भयस्ते भयं० इति मु०

पु० ।

१२।२ यथा नरः सुधां० इति ग० पु० ।
०तथालिः पद्म० इति क० ग० पु० ।

१२।५ ०मनोरथमहात्मनः। इति ग० पु० ।

१२।१७ ०कौशल्यगुणाश्रयां पराम् । इति क० पु० ।
०सुप्रययौ० इति क० पु० ।

१२।२० ०सर्वमधिकृष्णोऽस्ति० इति ग० पु० ।
सर्वमाधिकृतेऽस्ति० इति क० पु० ।

१२।२७ ०विम्बं विषकुम्भ० इति ग० पु० ।
तस्यै स्वदर्शनं० इति ग० पु० ।
०दुःखनाशन ॥ इति क० ग० पु० ।

१२।२८ ०भजते परेश्वरः ॥ इति मु० पु० ।

१२।३० ०मनसः परात्परं० इति मु० पु० ।
०भावञ्च परस्परं सदा न ह्यर्कतो भामिनि जायते तमः। इति ग० पु० ।

१२।३१ ०भाण्डीरवटे० इति क० पु० ।
अहैतुकं प्रेम च भक्तिराश्रितं० इति ग० पु० ।

१२।३२ नास्ति ग० पु० ।

१२।३३ ०जना भुवि । इति मु० पु० ।
०कालसूत्रं प्रपतन्ति० इति क० ग० पु० ।

१२।३४ ०श्रुत्वा वचः कृत्स्नं० इति ग० मु० पु० ।

१२।३६ ०वाञ्छित० इत्यन्तरं ३७ श्लोकोत्तरार्द्धं लिखितमस्ति ग० पु ।
नारद उवाच इति नास्ति क० ग० पु० ।

१२।३७ श्लोकपूर्वार्द्धंनास्ति ग० पु०।
श्लोकोत्तरार्द्धं च चन्द्राननां इत्यपि नास्ति ग० पु० ।

१२।३८ ०न जाने वद कस्यचित् ॥ इति ग० पु० ।

१३।३ यदा स्पृष्टा० इति मु० पु० ।
श्लोकोऽयं त्रुटितः ग० पु० ।
०तुलसीदलै ॥इति मु०पु० ।

१३।६ ०जाता गतास्ते वै सुरालये। इति मु० पु०।

१३।१० ०न यान्ति यमकिङ्कराः॥ इति मु० पु०।

१३।१४ ०मुक्तं पापशतै० इति ग० पु०।

१३।१७ ०मादिदेवश्चतुर्मुखः। इति मु० पु०।

१३।१८ नास्ति क० मु० पु०।

१३।२२ ०सुमण्डितम्॥ इति मु० पु०।

१३।२४ एतादृशन्तु० इति ग० पु०। ०मन्दिरन्तु मनोहरम्। इति ग० पु०।

१३।२७ ०तथाचैवेक्षुसेवनैः। इति ग० पु०। ०बहुमिश्रया॥ इति मु० पु०।

१३।२८ उद्यापनसमारम्भं० इति मु० पु०।

१३।३३ ०रङ्गवल्लीं० इति क० पु०।

१३।३५ ०कीर्त्तिनायकः॥ इति ग० पु०।

१४।३ ०प्रीतिं परीक्ष्य० इति मु० पु०।

१४।४ ०घन उङ्कारनूपरम्। इति ग० पु०।

१४।६ ०कुन्तलसन्निभम्। इति ग० मु० पु०। ०मन्दिरं प्रददर्श ह॥ इति क० पु०।

१४।७ ०द्वारिभिः सुमनोहरम्॥ इति ग० पु०।

१४।८ ०चामरसंयुक्तं० इति ग० मु० पु०।

१४।९ ०यत्र गायन्ते० इति ग० मु० पु०।

१४।१० वृषभानुपुरस्यै० इति मु० पु०।

१४।१२ पुष्पयष्टि० इति मु० पु०।

१४।१३ ०पुरे दिव्यं० इति मु० पु०। ०निम्बून्नतद्रूमा० इति मु० पु०। ०निम्बनूतद्रूमा० इति क० पु०।

१४।१४ ०निकुञ्जोऽति० इति क० पु०। ०सुगन्धिमत्॥ इति ग० पु०।

१४।१६ ०सारसाः शुभाः॥ इति क० पु०।

१४।१७ ०मधुरं नादं० इति मु० पु० ।
पुष्पप्राप्य० (?) इति ग०
पु० ।

१४।१८ ०स्फुरत्कारा० इति मु० पु० ।
०स्फुरद्धारा० इति ग० पु० ।
०वस्त्रा वराननाः ॥ इति
क० मु० पु० ।

१४।१६ ०भ्रमन्ति० इति क० पु० ।

१४।२० ०सूक्ष्मवस्तु० इति क० पु० ।
०राकुलपूरके ॥ इति ग० पु० ।

१४।२१ ०चालयन्ती च कोमलम् ॥
इति मु० पु० ।

१४।२७ गत्याकृत्याशुभैर्दन्तैर्वश्यते०
इति मु० पु० ।

१४।२८ ०मे व्रजति स्तवार्थे नोचेत्
स्व० इति ग० पु० ।

१४।२६ अधि त्वदात्मा० इति मु०
पु० ।
अयं त्वदात्मा० इति ग०
पु० ।
०प्रियो मे० इति मु० पु० ।
०स्त्वयानयेदेहमिमं ददामि
तम् ॥ इति क० पु० ।

१४।३२ ०त्वद्गेह चागतास्म्यहम् ॥
इति क० पु० ।

१४।३३ ०मोदिनीनां० इति क० पु० ।
०लतिकास्फुटप्रेमयुक्तानित्यं
निकुञ्ज० इति ग० पु० ।
०श्रुत न वचनं तव कञ्ज०
इति ग० पु० ।

१४।३४ ०मेलन तद्वभूव० इति मु०
पु० ।
श्लोकोत्तरार्द्धं नास्ति ग०
पु० ।

१४।३५ नास्ति ग० पु० ।

१४।३८ ०प्रोवाह सद्यो० इति क०
पु० ।
०प्रोवाच सद्यो० इति ग०
पु० ।

१४।३६ ०गणास्त्वरं सुवीजयन्त्यो०
इति मु० पु० ।

१४।४० प्रभात आगमिष्यामि० इति
क० ग० पु० ।
०न्चागतः ॥ इति ग०
पु० ।
०न्चेदतः ॥ इति क० पु० ।

१५।३ ०दुःखिता भृशं० इति ग०
पु० ।
०वस्तु यत् । इति ग० पु० ।
पूर्वं सपथ्यस्य० इति ग०
पु० ।

१५।६ भर्त्री यात्रा ननन्दा वा श्वश्रू० इति क० पु० ।
भ्राता भर्त्ता ननन्दा वा श्वश्रा० इति ग० पु० ।
१५।६ ०मृते देवि प्रियं केनापि चेत् कृतम् । इति ग० पु० ।
कथ्यतां तं घ (?) रम्भोरु० इति ग० पु० ।
१५।११ अन्तिमं पादद्वयं नास्ति क० पु० ।
१५।१८ ०वीरो न विशालरूपः । इति ग० पु० ।
०निर्मोहनमद्य कृष्णाम् ॥ इति मु० पु० ।
१५।१६ ०वाक्यपर सरस्वती० इति ग० पु० ।
१५।२० ०निजलोकरीत्या । इति ग० पु० ।
०रजो भजन्ति ॥ इति ग० पु० ।
१५।२१ ०भुवि दुर्विनीते ॥ इति ग०
१५।२२ ०गङ्गां स्पृशन्ति० इति ग० पु० ।
०गवां चाङ्गानि स्पृशन्ति० इति मु० पु० ।
१५।२३ ०विलसत्सुकृत० इति ग० पु० ।
०तल्लग्नमानमनसः सुसुख० इति ग० पु० ।
१५।२४ श्लोकपूर्वार्द्धं नास्ति ग० पु० ।
१५।२६ भक्तास्तु योनमजितः पुरुषोत्तमस्य ।
शम्भ्वात्मभूर्नच रमा न च रौहिणेयः ॥ इति ग० पु० ।
१५।२७ ०ददाति कनकापि० इति मु० पु० ।
१५।२७ ०यदाथ हरिः० इति मु० पु०
०तदातिवचनं इति मु० पु० ।
१५।३३ ०नव सुयौवन० इति मु० पु० ।
१५।३५ ०सुरी सुरवधू. किल० इति मु० पु० ।
१५।३७ ०स कृतार्थो न संशयः ॥ इति ग० पु० ।
०भवेन्नरः ॥ इति मु० पु० ।
१६।७ ०स्वर्णश्रृङ्गस्फुरद्युतिः । इति क० पु० ।
१६।१० ०पुष्पसङ्घैः० इति क० पु० ।
१६।१५ पार्षदाख्याः सव्यजनाः० इति क० मु० पु० ।

१६।१७ ०यूथाश्च जग्मु श्रीकृष्णा सन्निधिम् ॥ इति मु० पु० ।
१६।१६ ०श्वेतवर्णा मुक्ता० इति मु० पु० ।
१६।२७ ०रासे रत्येव मकरध्वज. । इति क० पु० ।
१६।३३ तया ह्रो हेमवल्ल्ये० इति क० पु० ।
१६।३८ ०यथास्मि मुद्रिका यथा ॥ इति ग० पु० ।
०मुद्रिता नृप ॥ इति क० पु० ।
१६।३६ ०मनोरथाश्चलल्लसत्प्रसूना हरिय।० इति मु० पु० ।

१७।३ ०रम्ये तस्थतुः० इति मु० पु० ।
१७।७ ललिनाश्च कम्बुमणि० इति ग० पु० ।
१७।८ ०रत्नानि मया तस्यै ददौ पुनः। इति क० पु० ।
०रत्नानि ददुरन्याश्च गोपिकाः । इति ग० पु० ।
१७।१० आनन्दाद्या सखी० इति ग० पु० ।
१७।११ तासां मौक्तिकमालोकं ददौ० इति ग० पु० ।
१७।१३ नास्ति ग० पु० ।
१७।२१ ०शीतलो वायुर्ववौ गन्ध-मनोहरः । इति मु० पु० ।
तेन गोपीगणाः सर्वे० इति मु० पु० ।
१७।२६ ०वृन्द समाकुलम् । इति क० पु० ।
१७।३० श्लोकपूर्वार्द्धं नास्ति क० मु० पु० ।
१७।३२ मोहनी मालती० इति ग० पु० ।
१७।३५ ०मुरयष्टिसुकांस्यकैः ॥ इति क० पु० ।
०सुयष्टिवसुकांस्यकैः ॥ इति ग० पु० ।
१७।३६ ०मालकौशकम् ॥ इति ग० मु० पु० ।
१७।३७ ०हिण्डोल० इति ग० पु० ।
१७।४१ विकचन्माधवी० इति क० मु० पु० ।

१८।२ ०बकुलानां वने नृप । इति ग० पु० ।
१८।५ ०जातास्तत्र देव व्रजाङ्गनाः ॥ इति ग० पु० ।
१८।१४ ०पेशस्कृतमेय कीट० इति

क० पु० ।
०नित्यं नयेशस्कृतमेत्य कीट० इति ग० पु० ।
१८।१५ नास्ति क० पु० ।
१८।१६ नास्ति क० पु० ।
०भगवत्पादचिह्निताः॥ इति ग० पु० ।
१८।१८ ०सङ्केतवन० इति ग० पु० ।
१८।२१ ०कुशविन्दुभिः ॥ इति ग० पु० ।
१८ २२ नीलशङ्ख० इति मु० पु० ।
१८।२८ ०पादपद्मं कोकिला० इति मु० पु० ।
१८।२९ ०स्त्वा मां नेष्यन्ति सर्वत.॥ इति क० ग० पु० ।
१८।३१ ०खेदयुक्ता० इति मु० पु० ।
०नयसि प्रियाम्॥ इति ग० पु० ।
१८।३२ ०राधिकेश्वरः। इति ग० मु० पु० ।
१८।३६ ०स्कन्धयाने स्थितां० इति मु० पु० ।
१८।४१ ०न्मानिनो यानं० इति ग० पु० ।

१९।३ तापादिमुक्तजन० इति ग० पु० ।
देवादिमुक्तजन० इति मु० पु० ।
१९।८ ०भृशार्त्ताः॥ इति ग० पु० ।
१९।१० नास्ति क० मु० पु० ।
०शरण्य पट्टं शरण्यम्॥ इति ग० पु० ।
१९।१३ ०ज्ञानेद्रियायवे॥ इति क० पु० ।
१९।१५ उत्तरार्द्धं नास्ति ग० पु० ।
१९।२३ श्लोकपूर्वार्द्धं नास्ति ग० पु० ।
१९।२६ ०श्रीराधारूपमेवच॥ इति मु० पु० ।
१९।२७ तदा चीरसमुद्रोऽभूल्लहरि-लोल० इति ग० पु० ।
१९।२८ नास्ति ग० पु०
१९।३२ कालिन्दीजलकेलिञ्च चकार हरिमाधवः॥ इति ग० पु० ।
०जलवेगेषु कलाकेलिं चकार ह॥ इति मु० पु० ।
१९।३७ वैजयन्तीमादधान.० इति मु० पु० ।

२०।४ करीलै विल्वभि० इति ग० पु० ।

०तालेश्च सङ्कुलं० इति ग० मु० पु० ।

२०।४ महत्पुण्यवनं कृष्णो ययौ० इति ग० मु० पु० ।

२०।२३ क्रमव्यत्ययेन वर्त्तते ग० पु० ।

२०।२६ ०यदूद्वह । इति ग० मु० पु० ।

यज्ञेन्द्र च त्वया० इति ग० पु० ।

०प्रेमनिश्चितम् ॥ इति मु० पु० ।

२०।३३ ०ज्वलज्जिह्वं० इति ग० पु० ।

०गोप्यऽतितत्रसुः ॥ इति मु० पु० ।

२०।३६ क्रमव्यत्ययेन वर्त्तते ग० पु० ।

२०।३९ ०तटं प्राप्तः० इति क० मु० पु० ।

०शालमुद्यम्य० इति ग० मु० पु० ।

२०।४० ०वृत्तो वाणाहतो० इति ग० पु० ।

२०।४१ ०मुष्टिना तं जघान० इति ग० मु० पु० ।

२०।४३ नास्ति क० ग० पु० ।

२०।४६ ०मणिपाणियुतः० इति ग० पु० ।

२१।२ ०लीना जाता० इति मु० पु० ।

२१।६ ०गोपीगणैरिह ॥ इति क० पु० ।

२१।८ मालकंसं भैरवञ्च० इति मु० पु० ।

२१।९ हिण्डोलनं० इति ग० पु० ।
हिन्दोलञ्च० इति मु० पु० ।

२१।१४ मनोजो यदुराजानां० इति ग० पु० ।

मनोजोद्यदुराजानां० इति क० पु० ।

२१।१५ मृदङ्गं वादयन्त्यस्ता० इति मु० पु० ।

०वादयन्त्यः का गायन्तो० इति क० पु० ।

२१।२० ०शनैः शोभमानं चक्रे० इति ग० पु० ।

०शनैः शोधनं तच्चक्रे० इति क० पु० ।

२१।२२ पुंवेशनायकाः० इति क० ग० पु० ।

२१।३० ०हरौ ध्यान० इति मु० पु० ।
हृत्पुण्डरीकं श्री० इति क० पु० ।

२१।३२ ०जातः खिन्नो महामुनिः । इति ग० पु० ।
०खिन्नो जातो महामुनिः । इति मु० पु० ।

२१।३४ ०स यत्र वै ॥ इति क० पु० ।

२१।३५ क्रमव्यत्ययेन वर्त्तते ग० पु० ।

२१।३७ तदा मुनिः खिन्न० इति मु० पु० ।

२१।३७ श्लोकोत्तरार्द्धं नास्ति ग० पु० ।

२१।३८ श्लोकपूर्वार्द्धं नास्ति ग० पु० ।

२१।३९ ०रमां वैकुण्ठवासिनीम् ॥ इति मु० पु० ।

२१।४० न दृष्टस्तत्र भक्तेषु० इति मु० पु० ।
०मुनीन्द्रो गोलोकं सर्वोत्कृष्टं० इति ग० पु० ।

२१।४८ त एव जानन्ति हि नैरपेक्ष्यं० इति ग० पु० ।
०जानन्ति जनैरपेक्ष्यं० इति मु० पु० ।

२१।५० ब्रह्मात्मिका चाद्य कृता निशीथिनी० इति ग० पु० ।

२२।१ ०शिवश्चासुरिणा सह । इति ग० पु० ।
०शिवोऽथासुरिणा सह । इति मु० पु० ।

२२।४ नास्ति ग० पु० ।

२२।११ ०निलनीलैजत्तरु० इति मु० पु० ।
०निललीनैश्चतरु० इति ग० पु० ।

२२।१२ सदा मण्डप० इति मु० पु० ।
सनामण्डप० इति ग० पु० ।

२२।१३ ०मधुरध्वनैः ॥ इति मु० पु० ।
०मधुरस्वनैः ॥ इति ग० पु० ।

२२।१६ ०प्रतीकाशं मौलिनं० इति मु० पु० ।
०प्रतीकाशं मौलिनं नन्दने वनम् । इति ग० पु० ।

२२।२५ ०गोविन्द कुञ्जपतये किल० इति ग० पु० ।

२२।२७ ०मुनिं प्राह० इति ग० मु०

पु० ।

२२।२९ ०मनसोन्नीयतामीप्सितो० इति ग० पु० ।

२२।३० नमोऽस्तु भूमन्० इति मु० पु० ।

न रोचतेऽन्योन्यतमत्वदं० इति मु० पु० ।

न रोचतेऽन्योन्यमतस्त्वदं० इति ग० पु० ।

२२।३१ ०वृन्दारण्ये मनोहरे । इति मु० पु० ।

२२।३२ शिवोऽपि चासुरिमुनिर्नित्यं० इति मु० पु० ।

०नित्यवासं० इति ग० पु० ।

२२।३४ एव ब्रह्मात्मिका रात्रि·० इति ग० पु० ।

२२।३७ पुण्यकामप्रदं चैव श्रोतृणां० इति ग० पु० ।

२३।४ ०भूश्च तिस्रः पत्न्यो० इति क० मु० पु० ।

रासेश्वरी प्रिया० इति ग० पु० ।

२३।६ अतीव विमुखा जाता० इति क० पु० ।

२३।७ कोलश्विनी समा० इति क० पु० ।

२३।१० ०सा निर्भर्त्स्य० इति ग० पु० ।

२३।१२ ०योजनमायामं इति मु० पु० ।

०सहसा नदी ॥ इति ग० मु० पु० ।

२३।१३ सहसा कुण्डली० इति क० मु० पु० ।

०मुद्रिता तथा ॥ इति मु० पु० ।

२३।१७ ०शिवो बालकलीलया ॥ इति ग० पु० ।

२३।२२ नैमित्तिकञ्च० इति मु० पु० ।

२३।२५ ०लक्षयोजनम् । इति ग० पु० ।

२३।२७ कदा तव न विच्छेदो मया० इति ग० पु० ।

कदा न ते मे विच्छेदो मह्य० इति मु० पु० ।

२३।३१ ०तन्निकुञ्ज० इति मु० पु० ।

०गोलोकेशो विराजते ॥ इति मु० पु० ।

२३।३३ अन्तिमं पादद्वयं मत्कल्पितम्। नास्ति क० मु० पु०।

रविष्यति विहारार्थं राधसे ह्यत्र त्वं स्वयम्॥ इति ग० पु०।

२३।३८ ०वियोगान्ते० इति मु० पु०।

श्रीगणेशाय नमः

गर्गसंहिता

(गिरिराजखण्डः)

बहुलाश्व उवाच

कथं दधार भगवान् गिरिं गोवर्द्धनं वरम् ।
उच्छिलीन्ध्रं यथा बालो हस्तेनैकेन लीलया ॥ १
परिपूर्णतमस्यास्य श्रीकृष्णस्य महात्मनः ॥
वदैतत् चरितं दिव्यमद्भुतं मुनिसत्तम ॥ २

नारद उवाच

वार्षिक्यं हि करं राज्ञे यथा शक्राय वै तथा ।
बलिं ददुः प्रावृडन्ते गोपाः सर्वे कृषीवलाः ॥ ३
महेन्द्रयागसम्भारचयं दृष्ट्वैकदा हरिः ।
नन्दं पप्रच्छ सदसि बल्लवानाञ्च शृण्वताम् ॥ ४

भगवानुवाच

शक्रस्य पूजनं ह्येतत् किं फलञ्चास्य विद्यते ।
लौकिकं वा वदन्त्येतदथवा पारलौकिकम् ॥ ५

नन्द उवाच

शक्रस्य पूजनं ह्येतद्भुक्तिमुक्तिकरं परम् ।
एतद्विना नरो भूमौ जायते न सुखी क्वचित् ॥ ६

भगवानुवाच

शक्रादयो देवगणाश्च सर्वतो
भुञ्जन्ति ये स्वर्गसुखं स्वकर्मभिः ।

विशन्ति ते मर्त्यपदं शुभक्षये
तत्सेवनं विद्धि न मुक्तिकारणम् ॥ ७
भयं भवेद्वै परमेष्ठिनो यतो
वार्ता तु का कौ किल तत्कृतात्मनाम् ।
तस्मात् परं कालमलं तमेव हि
सदा बलिष्ठं सुबुधा विदुः परे ॥ ८
ततस्तमाश्रित्य सुकर्मभिः परं
भजेद्धरिं यज्ञपतिं सुरेश्वरम् ।
विसृज्य सर्वं मनसा कृतेः फलं
व्रजेत् परं मोक्षमसौ नचान्यथा ॥ ९
गोविप्रसाध्वग्निसुराः श्रुतिस्तथा
धर्मश्च यज्ञाधिपतेर्विभूतयः ।
धिष्ण्येषु चैतेषु हरिं भजन्ति ये
सदा त्विहामुत्र सुखं व्रजन्ति ते ॥ १०
समुत्थितोऽसौ हरिवक्षसो गिरि
र्गोवर्धनो नाम गिरीन्द्रराजराट् ।
समागतो ह्यत्र पुलस्त्यतेजसा
यद्दर्शनाज्जन्म पुनर्न विद्यते ॥ ११
सम्पूज्य गोविप्रसुरान् महाद्रये
दातव्यमद्यैव परं ह्युपायनम् ।
एष प्रियो मे मखराज एव हि
नचेद्यथेच्छास्ति कुरु व्रजेश्वर ॥ १२

नारद उवाच

तेषां मध्येऽथ सन्नन्दो गोपो वृद्धोऽतिनीतिवित् ।
अतिप्रसन्नः श्रीकृष्णमाह नन्दस्य शृण्वतः ॥ १३

सन्नन्द उवाच

हे नन्दसूनो हे तात त्वं साक्षाज्ज्ञानशेवधिः ।
कर्तव्या केन विधिना पूजाद्रेर्वद तत्वतः ॥ १४

भगवानुवाच

आलिप्य गोमयेनापि गिरिराजभुवं ह्यध. ।
धृत्वाथ सर्वसम्भारं भक्तियुक्तो जितेन्द्रियः ॥ १५
सहस्रशीर्षा मन्त्रेणाद्रये स्नानञ्च कारयेत् ।
गङ्गाजलेन यमुनाजलेनापि द्विजैः सह ॥ १६
शुक्लगोदुग्धधाराभिस्ततः पञ्चामृतैर्गिरिम् ।
स्नापयित्वा गन्धपुष्पैः पुनः कृष्णाजलेन वै ॥ १७
वस्त्रं दिव्यञ्च नैवेद्यमासनं सर्वतोऽधिकम् ।
मालालङ्कारनिचयं धृत्वा दीपावलिं पराम् ॥ १८
ततः प्रदक्षिणां कुर्यान्नमस्कुर्यात्ततः परम् ।
कृताञ्जलिपुटो भूत्वा त्विदमेवमुदीरयेत् ॥ १९
नमो वृन्दावनाङ्काय तुभ्यं गोलोकमौलिने ।
पूर्णब्रह्मातपत्राय नमो गोवर्द्धनाय च ॥ २०
पुष्पाञ्जलिं ततः कुर्यान्नीराजनमतःपरम् ।
घण्टाकांस्यमृदङ्गाद्यैर्वादित्रैर्मधुरस्वनैः ॥ २१
वेदाहमेतं मन्त्रेण वर्षं लाजैः समाचरेत् ।
तत्समीपे चान्नकूटं कुर्याच्छ्रद्धासमन्वितः ॥ २२
कचोलानां चतुःषष्टिपञ्चपङ्क्तिसमन्वितम् ।
तुलसीदलमिश्रैश्च श्रीगङ्गायमुनाजलैः ॥ २३
षट्पञ्चाशत्तमैर्भोगैः कुर्यात् सेवां समाहितः ।
ततोऽग्नीन् ब्राह्मणान् पूज्य गाः सुरान् गन्धपुष्पकैः ॥ २४
भोजयित्वा द्विजवरान् सौगन्धैर्मिष्टभोजनैः ।
अन्येभ्यश्चाश्वपाकेभ्यो दद्याद्भोजनमुत्तमम् ॥ २५

गोपीगोपालवृन्दैश्च गवां नृत्यञ्च कारयेत् ।
मङ्गलैर्जयशब्दैश्च कुर्याद् गोवर्द्धनोत्सवम् ॥ २६

यत्र गोवर्द्धनाभावस्तत्र पूजाविधिं शृणु ।
गोमयैर्गोवर्द्धनं कुर्यात्तदाकारं परोन्नतम् ॥ २७

पुष्पव्यूहैर्लताजालैरीषिकाभिः समन्वितः ।
पूजनीयः सदा मर्त्यैर्गिरिर्गोवर्द्धनो भुवि ॥ २८

शिलासमानं पुरटं क्षिप्त्वाद्रौ तच्छिलां नयेत् ।
गृह्णीयाद् यो विना स्वर्णं स महारौरवं व्रजेत् ॥ २९

शालग्रामस्येव तस्याः सेवनं कारयेत् सदा ।
पातकं न स्पृशेत्तं वै पद्मपत्रं यथा जलम् ॥ ३०

गिरिराजशिलासेवां यः करोति द्विजोत्तमः ।
सप्तद्वीपमहीतीर्थावगाहफलमेति सः ॥ ३१

गिरिराजमहापूजां वर्षे वर्षे करोति यः ।
इह सर्वसुखं भुक्त्वाऽमुत्र मोक्षं प्रयाति सः ॥ ३२

इति श्रीगर्गसंहितायां गिरिराजखण्डे नारदबहुलाश्व-
संवादे गिरिराजपूजाविधिवर्णनं नाम
प्रथमोऽध्यायः ॥ १

नारद उवाच

श्रुत्वा वचो नन्दसुतस्य साक्षा
च्छ्रीनन्दसन्नन्दवरा व्रजेशाः ।
सुविस्मिताः पूर्वकृतं विहाय
प्रचक्रिरे श्रीगिरिराजपूजाम् ॥ १
नीत्वा बलीन् मैथिल नन्दराजः
सुतौ समानीय च रामकृष्णौ ।
यशोदया श्रीगिरिपूजनार्थं
समाययौ गर्गयुतः प्रसन्नः ॥ २
त्वरं समारुह्य महोन्नतं गजं
विचित्रवर्णं धृतहेमशृङ्खलम् ।
गोवर्द्धनान्तं प्रययौ गवां गणैः
शरद्घनैः शक्र इव प्रियायुतः ॥ ३
नन्दोपनन्दा वृषभानवश्च
पुत्रैश्च पौत्रैश्च सहाङ्गनाभिः ।
समाययुः श्रीगिरिराजपार्श्वं
सर्वं समानीय च यज्ञभारम् ॥ ४
सहस्रबालार्कपरिस्फुरद्द्युति
मारुह्य राधा शिबिकां सखीगणैः ।
शचीव दिव्याम्बररत्नभूषणा
बभौ चकोरी भ्रमरीसमाकुला ॥ ५
समागते पार्श्वगते स्वलङ्कृते
राजन् सखीकोटिसमावृते परे ।
सख्यौ विभाते ललिताविशाखे
चन्द्रानने चालितचारुचामरे ॥ ६

एवं रमा वै विरजा च माधवी
माया च कृष्णा नृप जह्नुनन्दिनी ।
द्वात्रिंशदष्टौ च तथाहि षोडश
सख्यश्च तासां किल यूथ आगताः ॥ ७
श्रीमैथिलानां किल कोशलानां
तथा श्रुतीनामृषिरूपकाणाम् ।
तथा त्वयोध्यापुरवासिनीनां
श्रीयज्ञसीतावनवासिनीनाम् ॥ ८
रमादिवैकुण्ठनिवासिनीनां
तथोर्ध्ववैकुण्ठनिवासिनीनाम् ।
महोज्ज्वलद्वीपनिवासिनीनां
ध्रुवादिलोकाचलवासिनीनाम् ॥ ९
समुद्रजादिव्यगुणत्रयाणा
मदिव्यवैमानिकजौषधीनाम् ।
जालन्धरीणाञ्च समुद्रकन्या-
बर्हिष्मतीजासुतलस्थितानाम् ॥ १०
तथाप्सरःसर्वफणीन्द्रजाना
मासाञ्च यूथा व्रजवासिनीनाम् ।
समाययुः श्रीगिरिराजपार्श्वे
स्वलङ्कृताः पाणिबलिप्रदीपाः ॥ ११
गोपाश्च वृद्धाः शिशवो युवानः
पीताम्बरोष्णीषकबर्हमण्डिताः ।
श्रीहारगुञ्जावनमालिकाभी
रेजुः समेता नवयष्टिवेणुभिः ॥ १२
श्रुत्वोत्सवं शैलवरस्य मन्मुखाद्
गङ्गाधरो बद्धकपर्दमण्डलः ।

कपालभृन्नस्थिजभस्मभूषितः
सर्पालिमालावलयैर्विभूषितः ॥ १३
धत्तूरभङ्गाविषपानविह्वलो
हिमाद्रिपुत्रीसहितो गणावृतः ।
आरुह्य नन्दीश्वरमादिवाहनं
समाययौ श्रीगिरिराजमङ्गलम् ॥ १४
राजर्षिविप्रर्षिसुरर्षयश्च
सिद्धेशयोगेश्वरहंसमुख्याः ।
आजग्मुराराद् गिरिदर्शनार्थं
सहस्रशो विप्रगणाः समेताः ॥ १५
गोवर्द्धनो रत्नशिलामयोऽभूत्
सुवर्णशृङ्गैः परितः स्फुरद्भिः ।
मत्तालिभिर्निर्झरसुन्दरैभि
र्दरीभिरुच्चाङ्कुरीव राजन् ॥ १६
तदैव शैलाः किल मूर्तिमन्तः
सोपायना मेरुहिमाचलाद्याः ।
नेमुर्गिरिं मङ्गलपाणयस्तं
गोवर्द्धनं रूपधरं गिरीन्द्राः ॥ १७
द्विजैश्च गोवर्द्धनदेवपूजनं
कृत्वाच्युतोक्तं द्विजवह्निगोधनम् ।
सम्पूज्य धृत्वा सुधनं महाधनं
बलिं ददौ श्रीगिरये व्रजेश्वरः ॥ १८
नन्दोपनन्दैर्वृषभानुभिश्च
गोपीगणैर्गोपजनैः प्रहर्षितैः ।
गायद्भिरानर्तनवाद्यतत्परै
श्चकार कृष्णोऽद्रिवरप्रदक्षिणाम् ॥ १९

देवेषु वर्षत्सु च पुष्पवर्षं
जनेषु वर्षत्सु च लाजसङ्घम् ।
रेजे महाराज इवाध्वरे जयै
र्गोवर्द्धनो नाम गिरीन्द्रराजराट् ॥ २०
कृष्णोऽपि साक्षाद् व्रजशैलमध्याद्
धृत्वातिदीर्घं किल चान्यरूपम् ।
शैलोऽस्मि लोकानिति भाषयन् सन्
जघास सर्वं कृतमन्नकूटम् ॥ २१
गोपालगोपीगणवृन्दमुख्या
ऊचुः स्म संवीक्ष्य गिरेः प्रभावम् ।
दातुं वरं तत्र समुद्यतं तं
सुविस्मिता हर्षितमानसास्ते ॥ २२
ज्ञातोऽसि गोपैर्गिरिराजदेवः
प्रदर्शितो नन्दसुतेन साक्षात् ।
नो गोधनं वा किल बन्धुवर्गो
वृद्धिं समायातु दिने दिने कौ ॥ २३
तथास्तु चोक्त्वा गिरिराजराजो
गोवर्द्धनो दिव्यवपुर्दधानः ।
किरीटकेयूरमनोहराङ्गः
क्षणेन तत्रान्तरधीयतारात् ॥ २४
नन्दोपनन्दा वृषभानवश्च
बलः सुचन्द्रो वृषभानुराजः ।
श्रीनन्दराजश्च हरिश्च गोपा
गोप्यश्च सर्वा निजगोधनैश्च ॥ २५
द्विजाश्च योगेश्वरसिद्धसङ्घाः
शिवादयश्चान्यजनाश्च सर्वे ।

नत्वाथ सम्पूज्य गिरिं प्रसन्नाः
स्वं स्वं गृहं जग्मुरनिच्छया च ॥ २६
श्रीकृष्णचन्द्रस्य परं चरित्रं
गिरीन्द्रराजस्य महोत्सवञ्च ।
मया तवाग्रे कथितं विचित्रं
नृणां महापापहरं पवित्रम् ॥ २७

इति श्रीगर्गसंहितायां गिरिराजखण्डे नारदबहुलाश्व-
संवादे गिरिराजमहोत्सववर्णनं नाम
द्वितीयोऽध्यायः ॥ २

नारद उवाच

अथ मन्मुखतः श्रुत्वा स्वात्मयागस्य नाशनम् ।
गोवर्द्धनोत्सवं जातं कोपं चक्रे पुरन्दरः ॥ १
सांवर्तकं नाम गणं प्रलये मुक्तबन्धनम् ।
इन्द्रो व्रजविनाशाय प्रेषयामास सत्वरम् ॥ २
अथ मेघगणाः क्रुद्धा ध्वनन्तश्चित्रवर्णिनः ।
कृष्णाभाः पीतभाः केचित् केचिच्च हरितप्रभाः ॥ ३
इन्द्रगोपनिभाः केचित् केचित् सिन्दूरसन्निभाः ।
केचित् कर्पूरभा मेघा नीलपङ्कजसुप्रभाः ॥ ४
हस्तितुल्यान् वारिबिन्दून् ववृषुस्ते मदोद्धताः ।
हस्तिशुण्डासमाभिश्च धाराभिश्चञ्चलाश्च ये ॥ ५
निपेतुः कोटिशश्चाद्रिकूटतुल्योपला भृशम् ।
वाता वबुः प्रचण्डाश्च क्षेपयन्तस्तरून् गृहान् ॥ ६
प्रचण्डवज्रपातानां मेघानामन्तकारिणाम् ।
महाशब्दोऽभवद्भूमौ मैथिलेन्द्र भयङ्करः ॥ ७
ननाद तेन ब्रह्माण्डं सप्तलोकैर्बिलैः सह ।
विचेलुर्दिग्गजास्तारा पजङ्कू खण्डमण्डलम् ॥ ८
भयभीता गोपमुख्याः सकुटुम्बा जिजीविषः ।
शिशून् स्वान् स्वान् पुरस्कृत्य नन्दमन्दिरमाययुः ॥ ९
श्रीनन्दनन्दनं नत्वा सबलं परमेश्वरम् ।
ऊचुर्व्रजौकसः सर्वे भयार्ताः शरणं गताः ॥ १०

गोपा ऊचुः

राम राम महाबाहो कृष्ण कृष्ण व्रजेश्वर ।
पाहि पाहि महाकष्टादिन्द्रदत्तान्निजान् जनान् ॥ ११

हित्वेन्द्रयागं त्वद्वाक्यात् कृतो गोवर्द्धनोत्सवः ।
अद्य शक्रे प्रकुपिते कर्तव्यं किं वदाशु नः ॥ १२

नारद उवाच

व्याकुलं गोकुलं वीक्ष्य गोपीगोपालसङ्कुलम् ।
सगोधनं गोकुलेशो गोपानाह निराकुलः ॥ १३

भगवानुवाच

मा भैष्ट यातादितटं सर्वैः परिकरैः सह ।
वः पूजा प्रहृता येन स रक्षां संविधास्यति ॥ १४

नारद उवाच

इत्युक्त्वा स्वजनैः सार्द्धमेत्य गोवर्धनं हरिः ।
समुत्पाट्य दधाराद्रिं हस्तेनैकेन लीलया ॥ १५

यथोच्छिलीन्ध्रं शिशुरश्रमो गजः
स्वपुष्करेणेव च पुष्करं गिरिम् ।
धृत्वा बभौ श्रीव्रजराजनन्दनः
कृपाकरोऽसौ करुणामयः प्रभुः ॥ १६
अथाह गोपान् विशताद्रिगर्तं
हे तात मातर्व्रजवल्लवेशाः ।
सोपस्करैः सर्वधनैश्च गोभि
रत्रैव शक्रस्य भयं न किञ्चित् ॥ १७

इत्थं हरेर्वचः श्रुत्वा गोपा गोधनसंयुताः ।
सकुटुम्बोपस्करैश्च विविशुः श्रीगिरेस्तलम् ॥ १८
वयस्या बालकाः सर्वे कृष्णोक्ताः सबला नृप ।
स्वान् स्वांश्च लगुडानद्रेरवष्टम्भान् प्रचक्रिरे ॥ १९
जलौघमागतं वीक्ष्य भगवांस्तद्गिरेरधः ।
सुदर्शनं तथा शेषं मनसाज्ञां चकार ह ॥ २०

कोटिसूर्यप्रभं चाद्रेरूर्ध्वं चक्रं सुदर्शनम् ।
धाराासंपातमपिबदगस्त्य इव मैथिल ॥ २१
अधोऽधस्तं गिरिं शेषः कुण्डलीभूत आस्थितः ।
रुरोध तज्जलं दीर्घं यथा वेला महोदधिम् ॥ २२
सप्ताहं सुस्थिरस्तस्थौ गोवर्द्धनधरो हरिः ।
पश्यन्तः श्रीकृष्णचन्द्रं चकोरा इव ते स्थिताः ॥ २३
मत्तमैरावतं नागं समारुह्य पुरन्दरः ।
ससैन्यः क्रोधसंयुक्तो व्रजमण्डलमाययौ ॥ २४
दूराच्चिक्षेप वज्रं स्वं नन्दगोष्ठजिघांसया ।
स्तम्भयामास शक्रस्य सवज्रं माधवो भुजम् ॥ २५
भयभीतस्तदा शक्रः सांवर्तकगणै सह ।
दुद्राव सहसा देवैर्यथेभः सिंहताडितः ॥ २६
तदैवार्कोदयो जातो गता मेघा इतस्ततः ।
वाता उपरताः सद्यो नद्यः स्वल्पजला नृप ॥ २७
विपङ्कं भूतलं जातं निर्मलं खं बभूव ह ।
चतुष्पदाः पक्षिणश्च सुखमापुस्ततस्ततः ॥ २८
हरिणोक्तास्तदा गोपा निर्ययुर्गिरिगर्ततः ।
स्वं स्वं धनं गोधनञ्च समादाय शनैः शनै ॥ २९
निर्यातेति वयस्यांश्च प्राह गोवर्द्धनोद्धरः ।
ते तमाहुश्च निर्गच्छ धारयामोऽद्रिमोजसा ॥ ३०
इति वादपरान् गोपान् गोवर्द्धनधरो हरिः ।
तदर्द्धञ्च गिरेर्भारं प्रादात्तेभ्यो महामनाः ॥ ३१
पतितास्तेन भारेण गोपबालाश्च निर्बलाः ॥ ३२
करेण तान् समुत्थाप्य स्वस्थाने पूर्ववद् गिरिम् ।
सर्वेषां पश्यतां कृष्णः स्थापयामास लीलया ॥ ३३

नारद उवाच

अथ देवगणैः सार्द्धं शक्रस्तत्र समागतः ।
गतमानो गिरौ कृष्णं रहसि प्रणनाम ह ॥ १

इन्द्र उवाच

त्वं देवदेवः परमेश्वरः प्रभुः
पूर्णः पुराणः पुरुषोत्तमोत्तमः ।
परात्परस्त्वं प्रकृतेः परो हरि
र्मां पाहि पाहि द्युपते जगत्पते ॥ २
दशावतारो भगवांस्त्वमेव
रिरक्षया धर्मगवां श्रुतेश्च ।
अद्यैव जातः परिपूर्णदेवः
कंसादिदैत्येन्द्रविनाशनाय ॥ ३
त्वन्मायया मोहितचित्तवृत्ति
मदोद्धतं हेलनभाजनं माम् ।
पितेव पुत्र द्युपते क्षमस्व
प्रसीद देवेश जगन्निवास ॥ ४

ॐनमो गोवर्द्धनोद्धरणाय गोविन्दाय गोकुलनिवासाय गोपालाय गोपालपतये गोपीजनभर्त्रे गिरिराजोद्धर्त्रे करुणानिधये जगद्विधये जगन्मङ्गलाय जगन्निवासाय जगन्मोहनाय कोटिमन्मथमन्मथाय वृषभानुसुतावराय श्रीनन्दराजकुलप्रदीपाय श्रीकृष्णाय परिपूर्णतमाय असङ्ख्यब्रह्माण्डपतये गोलोकधामधिषणाधिपतये स्वयं भगवते सबलाय नमस्ते नमस्ते ॥ ५

नारद उवाच

इति शक्रकृतं स्तोत्रं प्रातरुत्थाय यः पठेत् ।
सर्वसिद्धिर्भवेत्तस्य सङ्कटान्न भयं भवेत् ॥ ६
इति स्तुत्वा हरिं देवं सर्वैर्देवगणैः सह ।
कृताञ्जलिपुटो नम्रः प्रणनाम पुरन्दरः ॥ ७
अथ गोवर्द्धने रम्ये सुरभिर्गौः समुद्वजा ।
स्नापयामास गोपेशं दुग्धधाराभिरात्मनः ॥ ८
शुण्डादण्डैश्चतुर्भिश्च द्युगङ्गाजलपूरितैः ।
श्रीकृष्णं स्नापयामास मत्त ऐरावतो गजः ॥ ९
ऋषयः श्रुतिभिः सर्वे देवा गन्धर्वकिन्नराः ।
तुष्टुवुः श्रीहरिं राजन् हर्षिताः पुष्पवर्षिणः ॥ १०
कृष्णाभिषेके सञ्जाते गिरिर्गोवर्द्धनो महान् ।
द्रवीभूतोऽवहद्राजन् हर्षानन्दादितस्ततः ॥ ११
प्रसन्नो भगवांस्तस्मिन् कृतवान् हस्तपङ्कजम् ।
तद्धस्तचिह्नमद्यापि दृश्यते तद्गिरौ नृप ॥ १२
तत्तीर्थञ्च परं भूतं नराणां पापनाशनम् ।
तत्रैव पादचिह्नं स्यात्तत्तीर्थं विद्धि मैथिल ॥ १३
ऐरावतस्य तत्रैव पादचिह्नं बभूव ह ।
सुरभेः पादचिह्नानि बभूवुस्तत्र मैथिल ॥ १४
द्युगङ्गाजलपातेन कृष्णस्नानेन मैथिल ।
तेन वै मानसीगङ्गा गिरौ जाताघनाशिनी ॥ १५
सुरभेर्दुग्धधाराभिर्गोविन्दस्नानतो नृप ।
जातो गोविन्दकुण्डोऽद्रौ महापापहरः परः ॥ १६
कदाचित्तस्मिन् दुग्धस्य स्वादुत्वं प्रतिपद्यते ।
तत्र स्नात्वा नरः साक्षाद् गोविन्दपदमाप्नुयात् ॥ १७

प्रदक्षिणीकृत्य हरिं प्रणम्य वै
दत्वा बलीस्तत्र पुरन्दरादयः ।
जयध्वनिं कृत्य सुपुष्पवर्षिणो
ययुः सुराः सौख्ययुतास्त्रिविष्टपम् ॥ १८

कृष्णाभिषेकस्य कथां शृणोति यो
दशाश्वमेधावभृथाधिकं फलम् ।
प्राप्नोति राजेन्द्र स एव भूयसः
परं पदं याति परस्य वेधसः ॥ १९

इति श्रीगर्गसंहितायां गिरिराजखण्डे नारद-
बहुलाश्वसंवादे श्रीकृष्णाभिषेको नाम
चतुर्थोऽध्यायः ॥ ४

नारद उवाच

एकदा सर्वगोपाला गोप्यो नन्दसुतस्य तत्।
अद्भुतं चरितं दृष्ट्वा नन्दमाहुर्यशोमतीम् ॥ १

गोपा ऊचुः

हे गोपराज त्वद्वंशे कोऽपि जातो न चाद्रिधृक्।
न क्षमस्त्वं शिलां धर्त्तुं सप्ताहं हे यशोमति ॥ २
क्व सप्तहायनो बालः क्वाद्रिराजस्य धारणम्।
तेन नो जायते शङ्का तव पुत्रे महाबले ॥ ३
अयं बिभ्रद् गिरिवरं पङ्कजं गजराडिव।
उच्छिलीन्ध्रं यथा बालो हस्तेनैकेन लीलया ॥ ४
गौरवर्णा यशोदे त्वं नन्द त्वं गौरवर्णधृक्।
अयं कृष्णः कुतो जातः एतत्कुलविलक्षणम् ॥ ५
यद्वास्तु क्षत्रियाणान्तु बाल एतादृशो यथा।
बलभद्रे न दोषः स्याच्चन्द्रवंशसमुद्भवे ॥ ६
ज्ञातेस्त्यागं करिष्यामो यदि सत्यं न भाषसे।
गोपेषु चास्य वोत्पत्ति वद चेन्न कलिर्भवेत् ॥ ७

नारद उवाच

श्रुत्वा गोपालवचनं यशोदा भयविह्वला।
नन्दराजस्तदा प्राह गोपालान् क्रोधपूरितान् ॥ ८

नन्द उवाच

गर्गस्य वाक्य हे गोपा वदिष्यामि समाहितः।
येन गोपगणा यूयं भवताशु गतव्यथाः ॥ ९
ककारः कमलाकान्त ऋकारो राम इत्यपि।
षकारः षड्गुणपतिः श्वेतद्वीपनिवासकृत् ॥ १०

णकारो नारसिंहोऽयमकारो ह्यक्षरोऽग्निभुक् ।
विसर्गश्च तथा ह्येतौ नरनारायणावृषी ॥ ११
सम्प्रलीनाश्च षट्पूर्णा यस्मिञ्छुद्धे महात्मनि ।
परिपूर्णतमे साक्षात्तेन कृष्णः प्रकीर्तितः ॥ १२
शुक्लो रक्तस्तथा पीतो वर्णोऽस्यानुयुगं धृतः ।
द्वापरान्ते कलेरादौ बालोऽयं कृष्णतां गतः ॥ १३
तस्मात् कृष्ण इति ख्यातो नाम्नायं नन्दनन्दनः ।
वसवश्चेन्द्रियाणीति तद्देवश्चित्त एव हि ॥ १४
तस्मिन् यश्चेष्टते सोऽपि वासुदेव इति स्मृतः ॥ १५
वृषभानुसुता राधा या जाता कीर्तिमन्दिरे ।
तस्याः पतिरयं साक्षात्तेन राधापतिः स्मृतः ॥ १६
परिपूर्णतमः साक्षाच्छ्रीकृष्णो भगवान् स्वयम् ।
असङ्ख्यब्रह्माण्डपतिर्गोलोके धाम्नि राजते ॥ १७
सोऽयं तव शिशुर्जातो भारावतरणाय च ।
कंसादीनां वधार्थाय भक्तानां पालनाय च ॥ १८
अनन्तान्यस्य नामानि वेदगुह्यानि भारत ।
लीलाभिश्च भविष्यन्ति तत्कर्मसु न विस्मयः ॥ १९
इति श्रुत्वात्मजे गोपाः सन्देहं न करोम्यहम् ।
वेदवाक्यं ब्रह्मवचः प्रमाणं हि महीतले ॥ २०

गोपा ऊचुः

यद्यागतस्तव गृहे गर्गाचार्यो महामुनिः ।
तत्क्षणे नामकरणे नाहूता ज्ञातयस्त्वया ॥ २१
स्वगृहे नामकरणं भवता च कृतं शिशोः ।
तव चैतादृशी रीतिर्गुप्तं सर्वं गृहेऽपि यत् ॥ २२

नारद उवाच

एवं वदन्तस्ते गोपा निर्गता नन्दमन्दिरात् ।
वृषभानुपुरं जग्मुः क्रोधपूरितविग्रहाः ॥ २३
वृषभानुवरं साक्षान्नन्दराजसहायकम् ।
प्राहुर्गोपगणाः सर्वे ज्ञातेर्भेदसमन्विताः ॥ २४

गोपा ऊचुः

वृषभानुवरस्त्वं वै ज्ञातिमुख्यो महामनाः ।
नन्दराजं त्यज ज्ञाते हे गोपेश्वर भूपते ॥ २५

वृषभानुवर उवाच

को दोषो नन्दराजस्य ज्ञातेस्तं संत्यजाम्यहम् ।
गोपेष्टो ज्ञातिमुकुटो नन्दराजो मम प्रियः ॥ २६

गोपा ऊचुः

न चेत्त्यजसि तं राजंस्त्यजामस्त्वां व्रजौकसः ।
त्वद्गृहे वर्द्धिता कन्योद्वाहयोग्या महामते ॥ २७
भवता ज्ञातिमुख्येन सम्पदुन्मदशालिना ।
न दत्ता वरमुख्याय कलुषं तव विद्यते ॥ २८
अद्य त्वां ज्ञातिसंभ्रष्टं पृथङ् मन्यामहे नृप ।
न चेच्छीघ्रं नन्दराजं त्यज त्यज महामते ॥ २९

वृषभानुवर उवाच

गर्गस्य वाक्यं हे गोपा वदिस्यामि समाहितः ।
येन गोपगणा यूयं भवताशु गतव्यथाः ॥ ३०
असङ्ख्यब्रह्माण्डपतिर्गोलोकेशः परात्परः ।
तस्मात् परो वरो नास्ति जातो नन्दगृहे शिशुः ॥ ३१

भुवो भारावताराय कंसादीनां वधाय च ।
ब्रह्मणा प्रार्थितः कृष्णो बभूव जगतीतले ॥ ३२
श्रीकृष्णपट्टराज्ञी या गोलोके राधिकाभिधा ।
त्वद्गेहे सापि सञ्जाता त्वं न जानासि तां पराम् ॥ ३३
अहं न कारयिष्यामि विवाहमनयोर्नृप ।
तयोर्विवाहो भविता भाण्डीरे यमुनातटे ॥ ३४
वृन्दावनसमीपे च निर्जने सुन्दरे स्थले ।
परमेष्ठी समागत्य विवाहं कारयिष्यति ॥ ३५
तस्माद्राधां गोपवर विद्ध्यर्द्धाङ्गीं परस्य च ।
लोकचूडामणेः साक्षाद्राज्ञीं गोलोकमन्दिरे ॥ ३६
यूयं सर्वेऽपि गोपाला गोलोकादागता भुवि ।
तथा गोपीगणा गावो गोकुले राधिकेच्छया ॥ ३७
एवमुक्त्वा गते साक्षाद्गर्गाचार्ये महामुनौ ।
तद्दिनादथ राधायां सन्देहं न करोम्यहम् ॥ ३८
वेदवाक्यं ब्रह्मवचः प्रमाणं हि महीतले ।
इति वः कथितं गोपाः किं भूयः श्रोतुमिच्छथ ॥ ३९

इति श्रीगर्गसंहितायां गिरिराजखण्डे नारद-
बहुलाश्वसंवादे गोपविवादो नाम
पञ्चमोऽध्यायः ॥ ५

नारद उवाच

वृषभानुवरस्येदं वचः श्रुत्वा व्रजौकसः ।
पुनरूचुः शान्तिगता विस्मिता मुक्तसंशयाः ॥ १

गोपा ऊचुः

समीचीनं वचो राजन् राधेयन्तु हरिप्रिया ।
तत्प्रभावेण ते दीर्घं वैभवं दृश्यते भुवि ॥ २
सहस्रशो गजा मत्ताः कोटिशोऽश्वाश्च चञ्चलाः ।
रथाश्च देवधिष्ण्याभाः शिबिकाः कोटिशः शुभाः ॥ ३
कोटिशः कोटिशो गावो हेमरत्नमनोहराः ।
मन्दिराणि विचित्राणि रत्नानि विविधानि च ॥ ४
सर्वसौख्यं भोजनाढ्यं दृश्यते साम्प्रतं तव ।
कंसोऽपि धर्षितो जातो दृष्ट्वा ते बलमद्भुतम् ॥ ५
कान्यकुब्जपतेः साक्षाद् भलन्दननृपस्य च ।
जामाता त्वं महावीरः कुबेर इव कोशवान् ॥ ६
त्वत्समं वैभवं नास्ति नन्दराजगृहे क्वचित् ।
कृषीवलो नन्दराजो गोपतिर्दीनमानसः ॥ ७
यदि नन्दसुतः साक्षात् परिपूर्णतमो हरिः ।
सर्वेषां पश्यतां नस्तत् परीक्षां कारय प्रभो ॥ ८

नारद उवाच

तेषां वाक्यं ततः श्रुत्वा वृषभानुवरो महान् ।
चकार नन्दराजस्य वैभवस्य परीक्षणम् ॥ ९
कोटि दामानि मुक्तानां स्थूलानां मैथिलेश्वर ।
एकैका येषु मुक्ताश्च कोटिमौल्याः स्फुरत्प्रभाः ॥ १०

निधाय तानि पात्रेषु वृणानैः कुशलैर्जनैः ।
प्रेषयामास नन्दाय सर्वेषां पश्यतां नृप ॥ ११
नन्दराजसभां गत्वा वृणानाः कुशला भृशम् ।
निधाय दामपात्राणि नन्दमाहुः प्रणम्य तम् ॥ १२

वृणाना ऊचुः

विवाहयोग्यां नवकञ्जनेत्रां
कोटीन्दुबिम्बद्युतिमादधानाम् ।
विज्ञाय राधां वृषभानुमुख्य
श्चक्रे विचारं सुवरं विचिन्वन् ॥ १३
तवाङ्गजं दिव्यमनङ्गमोहन
गोवर्द्धनोद्धारणदोःसमुद्भटम् ।
संवीक्ष्य चास्मान् वृषभानुर्वन्दितः
संप्रेषयामास विशाम्पते प्रभो ॥ १४
वरस्य चाङ्के भरणाय पूर्वं
मुक्ताफलानां निचयं गृहाण ।
इतश्च कन्यार्थमलं प्रदेहि
सैषा हि चास्मत्कुलजा प्रसिद्धिः ॥ १५

नारद उवाच

दृष्ट्वा द्रव्यं परं नन्दो विस्मितोऽपि विचारयन् ।
प्रष्टुं यशोदां तत्तुल्यं नीत्वा चान्तःपुरं ययौ ॥ १६
चिरं दध्यौ तदा नन्दो यशोदा च यशस्विनी ।
एतन्मुक्तासमानन्तु द्रव्यं नास्ति गृहे मम ॥ १७
लोके लज्जा गताः सर्वा हासः स्याच्चेद्धनोद्धृते ।
किं कर्तव्यं तत्प्रतियच्छ्रीकृष्णोद्वाहकर्मणि ॥ १८
ततोऽयोग्यं तद्ग्रहणं पश्चात् कार्यं धनागमे ।
एवं चिन्तयतस्तस्य नन्दस्यैव यशोदया ॥ १९

अलक्ष्य आगतस्तत्र भगवान् वृजिनार्दनः ।
नीत्वा दामशतं तेषु बहिःक्षेत्रेषु सर्वतः ॥ २०
मुक्ताफलानि चैकैकं प्राक्षिपत् स्वकरेण वै ।
यथा बीजानि चान्नानां स्वक्षेत्रेषु कृषीवलः ॥ २१
अथ नन्दोऽपि गणयन् गुलिकानिचयं पुनः ।
शतन्यूनञ्च तं दृष्ट्वा सन्देहं स जगाम ह ॥ २२

नन्द उवाच

नास्ति पूर्वं यत्समानं तत्रापि न्यूनतां गतम् ।
अहो कलङ्को भविता ज्ञातिषु स्वेषु सर्वतः ॥ २३
अथवा क्रीडनार्थं हि कृष्णो यदि गृहीतवान् ।
बलदेवोऽथवा बालस्तौ पृच्छे दीनमानसः ॥२४

नारद उवाच

इत्थं विचार्य नन्दोऽपि कृष्णं पप्रच्छ सादरम् ।
प्रहसन् भगवान् नन्दं प्राह गोवर्द्धनोद्धरः ॥ २५

भगवानुवाच

कृषीवला वयं गोपाः सर्वबीजप्ररोहकाः ।
क्षेत्रे मुक्ताप्रबीजानि विकीर्णीकृतवानहम् ॥ २६

नारद उवाच

श्रुत्वाथ स्वात्मजेनोक्तं तं निर्भर्त्स्य व्रजेश्वरः ।
तानि नेतुं तत्सहितस्तत्क्षेत्राणि जगाम ह ॥ २७
तत्र मुक्ताफलानान्तु शाखिनः शतशः शुभाः ।
दृश्यन्ते दीर्घवपुषो हरित्पल्लवशोभिताः ॥ २८
मुक्तानां स्तबकानान्तु कोटिशः कोटिशो नृप ।
सङ्घा विलम्बिता रेजुर्ज्योतींषीव नभःस्तले ॥ २९
तदातिहर्षितो नन्दो ज्ञात्वा कृष्णं परेश्वरम् ।
मुक्ताफलानि दिव्यानि पूर्वस्थूलसमानि च ॥ ३०

तेषान्तु कोटिभाराणि निधाय शकटेषु च ।
ददौ तेभ्यो वृणानेभ्यो नन्दराजो व्रजेश्वरः ॥ ३१
ते गृहीत्वाथ तत्सर्वं वृषभानुपुरं गताः
सर्वेषां शृण्वतां नन्दवैभवं प्रजगुर्नृप ॥ ३२
तदातिविस्मिताः सर्वे ज्ञात्वा नन्दसुतं हरिम् ।
वृषभानुवरं नेमुर्निःसन्देहा व्रजौकसः ॥ ३३
राधा हरेः प्रिया ज्ञाता राधायाश्च प्रियो हरिः ।
ज्ञातो व्रजजनैः सर्वैस्तद्दिनान्मैथिलेश्वर ॥ ३४
मुक्ताक्षेत्रः कृतो यत्र हरिणा नन्दसूनुना ।
मुक्तासरोवरस्तत्र जातो मैथिल तीर्थराट् ॥ ३५
एकमुक्ताफलस्यापि दानं तत्र करोति यः ।
लक्षमुक्तादानफलं समाप्नोति न संशय ॥ ३६
एवं ते कथितो राजन् गिरिराजमहोत्सवः ।
भुक्तिमुक्तिप्रदो नृणां किं भूयः श्रोतुमिच्छसि ॥ ३७

इति श्रीगर्गसंहितायां गिरिराजखण्डे नारद-
बहुलाश्वसंवादे हरिपरीक्षणं नाम
षष्ठोऽध्यायः ॥ ६

बहुलाश्व उवाच

कति मुख्यानि तीर्थानि गिरिराजे महात्मनि ।
एतद् ब्रूहि महायोगिन् साक्षात्त्वं दिव्यदर्शनः ॥ १

नारद उवाच

राजन् गोवर्द्धनः सर्वः सर्वतीर्थवरः स्मृतः ।
वृन्दावनाङ्को गोलोकमुकुटोऽद्रिप्रपूजितः ॥ २
गोपगोपीगवां रक्षाप्रदः कृष्णप्रियो महान् ।
पूर्णब्रह्मातपत्रो यस्तस्मात्तीर्थवरस्तु कः ॥ ३
इन्द्रयागं विनिर्भत्स्य सर्वैर्निजजनैः सह ।
यत्पूजनं समारेभे भगवान् भुवनेश्वरः ॥ ४
परिपूर्णतमः साक्षाच्छ्रीकृष्णो भगवान् स्वयम् ।
असङ्ख्यब्रह्माण्डपतिर्गोलोकेशः परात्परः ॥ ५
यस्मिन् स्थितः सदा क्रीडामर्भकैः सह मैथिल ।
करोति तस्य माहात्म्यं वक्तुं नालं चतुर्मुखः ॥ ६
यत्र वै मानसीगङ्गा महापापौघनाशिनी ।
गोविन्दकुण्डो विशदः शुभश्चन्द्रसरोवरः ॥ ७
राधाकुण्डः कृष्णकुण्डो ललिताकुण्ड एव च ।
गोपालकुण्डस्तत्रैव कुसुमाकर एव च ॥ ८
श्रीकृष्णमौलिसंस्पर्शान्मौलिचिह्ना शिलाऽभवत् ।
तस्या दर्शनमात्रेण देवमौलिर्भवेज्जनः ॥ ९
यस्यां शिलायां कृष्णेन चित्राणि लिखितानि च ।
अद्यापि चित्रिता पुण्या नाम्ना चित्रशिला गिरौ ॥ १०
यां शिलामर्भकैः कृष्णो वादयन् क्रीडने रतः ।
वादिनी सा शिला जाता महापापौघनाशिनी ॥ ११

यत्र श्रीकृष्णचन्द्रेण गोपालैः सह मैथिल ।
कृता वै कन्दुकक्रीडा तत्क्षेत्रं कन्दुकं स्मृतम् ॥ १२

दृष्ट्वा शक्रपदं याति नत्वा ब्रह्मपदञ्च तत् ।
विलुण्ठन् यस्य रजसां साक्षाद्विष्णुपदं व्रजेत् ॥ १३

गोपानामुष्णिहो यत्र चोरयामास माधवः ।
औष्णिहं नाम तत्तीर्थं महापापहरं गिरौ ॥ १४

तत्रैकदा वै दधिविक्रयार्थं
विनिर्गतो गोपवधूसमूहः ।
श्रुत्वा क्वणन्नूपुरशब्दमाराद्
रुरोध तन्मार्गमनङ्गमोही ॥ १५
वंशीधरो वेत्रवरेण गोपैः
पुरःश्च तासां विनिधाय पादम् ।
मह्यं करादानधनाय दानं
देहीति गोपीर्निजगाद मार्गे ॥ १६

गोप्य ऊचुः

वक्रस्त्वमेवासि समास्थितः पथि
गोपार्भकैर्गोरसलम्पटो भृशम् ।
मात्रा च पित्रा सह कारयामो
बलाद्भवन्तं किल कंसबन्धने ॥१७

भगवानुवाच

कंसं हनिष्यामि महोग्रदण्ड
सबान्धवं मे शपथो गवाञ्च ।
एवं करिष्यामि यदोः पुरे बलाद्
दानी सदाहं गिरिराजभूमौ ॥ १८

नारद उवाच

इत्युक्त्वा दधिपात्राणि बालैर्नीत्वा पृथक पृथक् ।
भूपृष्ठे पातयामास सानन्दं नन्दनन्दनः ॥१६
अहो एष परं धृष्टो निर्भयो नन्दनन्दनः ।
निरङ्कुशो भाषणीयो वने वीरः पुरेऽबलः ॥२०
ब्रुवामहे यशोदायै नन्दाय च किलाद्य वै ।
एवं वदन्त्यस्ता गोप्यः सस्मिताः प्रययुगृ हान् ॥२१
नीपपालाशपत्राणि कृत्वा द्रोणानि माधवः ।
जघास बालकैः सार्द्धं पिच्छिलानि दधीनि च ॥२२
द्रोणाकाराणि पत्राणि बभूवुः शाखिनां तदा ।
तत्क्षेत्रञ्च महापुण्यं द्रोणं नाम नृपेश्वर ॥२३
दधिदानं तत्र कृत्वा पीत्वा पत्रधृतं दधि ।
नमस्कुर्यान्नरस्तस्य गोलोकान्न च्युतिर्भवेत् ॥२४
नेत्रे आच्छाद्य यत्रैव लीनोऽभून्माधवोऽर्भकैः ।
तत्र तीर्थं लौकिकञ्च जातं पापप्रणाशनम् ॥२५
कदम्बखण्डतीर्थञ्च लीलायुक्तं हरेः सदा ।
तस्य दर्शनमात्रेण नरो नारायणो भवेत् ॥ २६
यत्र वै राधया रासे शृङ्गारोऽकारि मैथिल ।
तत्र गोवर्द्धने जातं स्थलं शृङ्गारमण्डलम् ॥ २७
येन रूपेण कृष्णेन धृतो गोवर्द्धनो गिरिः ।
तद्रूप विद्यते तत्र नृप शृङ्गारमण्डलम् ॥ २८
अब्दाश्चतुःसहस्राणि तथा चाष्टौ शतानि च ।
गतास्तत्र कलेरादौ क्षेत्रे शृङ्गारमण्डले ॥ २६
गिरिराजगुहामध्यात् सर्वेषां पश्यतां नृप ।
स्वतः सिद्धञ्च तद्रूपं हरेः प्रादुर्भविष्यति ॥ ३०

श्रीनाथं देवदमनं तं वदिष्यन्ति सज्जनाः ।
गिरिराजे गिरौ राजन् सदा लीलां करोति यः ॥ ३१
ये करिष्यन्ति नेत्राभ्यां तस्य रूपस्य दर्शनम् ।
ते कृतार्था भविष्यन्ति मैथिलेन्द्र कलौ जनाः ॥ ३२
जगन्नाथो रङ्गनाथो द्वारकानाथ एव च ।
बद्रिनाथश्चतुष्कोणे भारतस्यापि वर्तते ॥ ३३
मध्ये गोवर्द्धनस्यापि नाथोऽयं वर्तते नृप ।
पवित्रे भारते वर्षे पञ्चनाथाः सुरेश्वराः ॥ ३४
सद्धर्ममण्डपस्तम्भा आर्तत्राणपरायणाः ।
तेषान्तु दर्शनं कृत्वा नरो नारायणो भवेत् ॥ ३५
चतुर्णां भुवि नाथानां कृत्वा यात्रां नरः सुधीः ।
न पश्येद्देवदमनं स न यात्राफल लभेत् ॥ ३६
श्रीनाथं देवदमनं पश्येद् गोवर्द्धने गिरौ ।
चतुर्णां भुवि नाथानां यात्रायाः फलमाप्नुयात् ॥ ३७
ऐरावतस्य सुरभेः पादचिह्नानि यत्र वै ।
तत्र नत्वा नरः पापी वैकुण्ठं याति मैथिल ॥ ३८
हस्तचिह्नं पादचिह्नं श्रीकृष्णस्य महात्मनः ।
दृष्ट्वा नत्वा नरः कश्चित् साक्षात् कृष्णपदं व्रजेत् ॥ ३९
एतानि नृप तीर्थानि कुण्डाद्यायतनानि च ।
अङ्गानि गिरिराजस्य किं भूयः श्रोतुमिच्छसि ॥ ४०

इति श्रीगर्गसंहितायां गिरिराजखण्डे नारदबहुलाश्व-
संवादे गिरिराजतीर्थवर्णनं नाम
सप्तमोऽध्यायः ॥ ७

बहुलाश्व उवाच

केषु केषु तदङ्गेषु किं किं तीर्थं समाश्रितम् ।
वद देव महाभाग त्वं परावरविदुत्तमः ॥ १

नारद उवाच

यत्र यस्य प्रसिद्धिः स्यात्तदङ्गं परमं विदुः ।
क्रमतो नास्त्यङ्गचयो गिरिराजस्य मैथिल ॥ २
यथा सर्वगतं ब्रह्म सर्वाङ्गानि च तस्य वै ।
विभूतेर्भावतः शश्वत् तथा वक्ष्यामि मानद ॥ ३
शृङ्गारमण्डलस्याधो मुखं गोवर्द्धनस्य च ।
यत्रान्नकूटं कृतवान् भगवान् व्रजवासिभिः ॥ ४
नेत्रे वै मानसीगङ्गा नासा चन्द्रसरोवरः ।
गोविन्दकुण्डो ह्यधरौ चिबुकं कृष्णकुण्डकः ॥ ५
राधाकुण्डस्तस्य जिह्वा कपोलौ ललितासरः ।
गोपालकुण्डः कर्णौ च कर्णान्त. कुसुमाकरः ॥ ६
मौलिचिह्ना शिला तस्य ललाटं विद्धि मैथिल ।
शिरश्चित्रशिला तस्य ग्रीवा वै वादनीशिला ॥ ७
कान्दुकं पार्श्वदेशं सदौष्णिषं कटिरुच्यते ।
द्रोणतीर्थं पृष्ठदेशे लौकिकं चोदरे स्मृतम् ॥ ८
कदम्बखण्डमुरसि जीवः शृङ्गारमण्डलम् ।
श्रीकृष्णपादचिह्ने तु मनस्तस्य महात्मनः ॥ ९
हस्तचिह्ने तथा बुद्धिरैरावतपदे पदः ।
सुरभेः पादचिह्नेषु पक्षौ तस्य महात्मनः ॥ १०
पुच्छकुण्डे तथा पुच्छं वत्सकुण्डे बलं स्मृतम् ।
रुद्रकुण्डे तथा क्रोधः कामः शक्रसरोवरे ॥ ११

कुबेरतीर्थे चोद्योगं ब्रह्मतीर्थे प्रसन्नताम् ।
यमतीर्थे ह्यहङ्कारं वदन्तीत्थं पुराविदः ॥ १२
एवमङ्गानि सर्वत्र गिरिराजस्य मैथिल ।
कथितानि मया तुभ्यं सर्वपापहराणि च ॥ १३
गिरिराजविभूतिन्तु यः शृणोति नरोत्तमः ।
स गच्छेद्धाम परमं गोलोकं योगिदुर्लभम् ॥ १४
समुत्थितोऽसौ हरिवक्षसो गिरि
र्गोवर्द्धनो नाम गिरीन्द्रराजराट् ।
समागतो ह्यत्र पुलस्त्यतेजसा
यद्दर्शनाज्जन्म पुनर्न विद्यते ॥ १५

इति श्रीगर्गाचार्यसंहितायां गिरिराजखण्डे नारदबहुलाश्व-
संवादे गिरिराजविभूतिवर्णनं नाम
अष्टमोऽध्यायः ॥ ८

बहुलाश्व उवाच

अहो गोवर्द्धनः साक्षाद्गिरिराजो हरिप्रियः।
तत्समानं न तीर्थं हि विद्यते भूतले दिवि ॥ १
कदा बभूव श्रीकृष्णवक्षसोऽयं गिरीश्वरः।
एतद्वद महाबुद्धे त्वं साक्षाद्धरिमानसः ॥ २

नारद उवाच

गोलोकोत्पत्तिवृत्तान्तं शृणु राजन् महामते।
चतुष्पदार्थदं नृणामाद्यलीलासमन्वितम् ॥ ३
अनादिरात्मा पुरुषो निर्गुणः प्रकृतेः परः।
परिपूर्णतमः साक्षाच्छ्रीकृष्णो भगवान् प्रभुः ॥ ४
प्रत्यग्धामा स्वयंज्योतीरममाणो निरन्तरम्।
यत्र कालः कलयतामीश्वरो धाममानिनाम् ॥ ५
राजन्न प्रभवेन् माया न महांश्च गुणाः कुतः।
न विशन्ति क्वचिद्राजन्मनश्चित्तो मतिर्ह्यहम् ॥ ६
स्वधाम्नि ब्रह्म साकारमिच्छया व्यरचीकरत्।
प्रथमं चाभवच्छेषो विसश्वेतो बृहद्वपुः ॥ ७
तदुत्सङ्गे महालोको गोलोको लोकवन्दितः।
यं प्राप्य भक्तिसंयुक्तः पुनरावर्तते नहि ॥ ८
असङ्ख्यब्रह्माण्डपतेर्गोलोकाधिपतेः प्रभोः।
पुनः पादाब्जसम्भूता गङ्गा त्रिपथगामिनी ॥ ९
पुनर्वामांसतस्तस्य कृष्णाभूत् सरितां वरा।
रेजे शृङ्गारकुसुमैर्यथोष्णिङ्मुद्रिता नृप ॥ १०
श्रीरासमण्डलं दिव्यं हेमरत्नसमन्वितम्।
नानाशृङ्गारपटलं गुल्फाभ्यां श्रीहरेः प्रभोः ॥ ११

सभाप्राङ्गणवीथीभिर्मण्डपैः परिवेष्टितः ।
वसन्तमाधुर्यधरः कूजत्कोकिलसारसः ॥ १२
मयूरैः षट्पदैर्व्याप्तः सरोभिः परिसेवितः ।
जातो निकुञ्जो जङ्घाभ्यां श्रीकृष्णस्य महात्मनः ॥१३
वृन्दावनञ्च जानुभ्यां राजन् सर्ववनोत्तमम् ।
लीलासरोवरः साक्षादूरुभ्यां परमात्मनः ॥१४
कटिदेशात् स्वर्णभूमिर्दिव्यरत्नखचित्प्रभा ।
उदरे रोमराजेश्च माधव्यो विस्तृता लता. ॥१५
नानापक्षिगणैर्व्याप्ता ध्वनद्भ्रमरभूषिताः ।
सुपुष्पफलभारैश्च नताः सत्कुलजा इव ॥१६
श्रीनाभिपङ्कजात्तस्य पङ्कजानि सहस्रशः ।
सरःसु हरिलोकस्य तानि रेजुरितस्ततः ॥१७
त्रिवलीप्रान्ततो वायुर्मन्दगाऽयतिशीतलः ।
जत्रुदेशाच्छुभा जाता मथुरा द्वारकापुरी ॥१८
भुजाभ्यां श्रीहरेर्जाताः श्रीदामाद्यष्टपार्षदाः ।
नन्दाश्च मणिबन्धाभ्यामुपनन्दाः कराग्रतः ॥१९
श्रीकृष्णबाहुमूलाभ्यां सर्वे वै वृषभानवः ।
कृष्णरोमसमुद्भूताः सर्वे गोपगणा नृप ॥२०
श्रीकृष्णमनसो गावो वृषा धर्मधुरन्धराः ।
बुद्धेर्यवसगुल्मानि बभूवुर्मैथिलेश्वर ॥२१
तद्वामांसात् समुद्भूतं गौरं तेजः स्फुरत्प्रभम् ।
लीला श्रीर्भूश्च विरजा तस्माज्जाता हरेः प्रियाः ॥२२
लीलातीव प्रिया तस्य तां राधान्तु विदुः परे ।
श्रीराधाया भुजाभ्यान्तु विशाखा ललिता सखी ॥२३
सहचर्यस्तथा गोप्यो राधारोमोद्भवा नृप ।
एवं गोलोकरचनां चकार मधुसूदनः ॥२४

विधाय सर्वं निजलोकमित्थं
श्रीराधया तत्र रराज राजन् ।
असङ्ख्यलोकाण्डपतिः परात्मा
परः परेशः परिपूर्णदेवः ॥ २५

तत्रैकदा सुन्दररासमण्डले
स्फुरत्क्वणन्नूपुरशब्दसङ्कुले ।
सुच्छत्रमुक्ताफलदामजावृत
स्रवद्बृहद्बिन्दुविराजिताङ्गणे ॥ २६

श्रीमालतीनां मुदितानजालतः
स्वतः स्रवत्सन्मकरन्दगन्धिते ।
मृदङ्गतालध्वनिवेणुनादिते
सुकण्ठगीतादिमनोहरे परे ॥ २७

श्रीसुन्दरी रासरसे मनोरमे
मध्यस्थितं कोटिमनोजमोहनम् ।
जगाद राधा परिमूर्जया गिरा
कृत्वा कटाक्षं रसदानकौशलम् ॥ २८

राधोवाच

यदि रासे प्रसन्नोऽसि मम प्रेम्णा जगत्पते ।
तदाहं प्रार्थनां त्वत्तः करोमि मनसि स्थिताम् ॥ २९

भगवानुवाच

इच्छां वरय वामोरु या ते मनसि वर्त्तते ।
न देयं यदि यद्वस्तु प्रेम्णा दास्यामि तत् प्रिये ॥ ३०

राधोवाच

वृन्दावने दिव्यनिकुञ्जपार्श्वे
कृष्णातटे रासरसाय योग्यम् ।

रहःस्थलं त्वं कुरुतात् मनोज्ञ
मनोरथोऽयं मम देवदेव ॥ ३१

नारद उवाच

तथास्तु चोक्त्वा भगवान् रहोयोग्यं विचिन्तयन् ।
नेत्राभ्यां पङ्कजाभाभ्यां हृदयं सददर्श ह ॥ ३२
तदैव कृष्णहृदयाद्गोपीव्यूहस्य पश्यतः ।
निर्गतं सजलं तेजोऽनुरागस्येव चाङ्कुरम् ॥ ३३
पतितं रासभूमौ तद्ववृधे पर्वताकृति ।
रत्नधातुमयं दिव्यं सुनिर्झरदरीवृतम् ॥ ३४
कदम्बबकुलाशोकलताजालमनोहरम् ।
मन्दारकुन्दवृन्दाढ्यं सुपक्षिगणसङ्कुलम् ॥ ३५
क्षणमात्रेण वैदेह लक्षयोजनविस्तृतम् ।
शतकोटियोजनानां लम्बितं शेषवत् पुनः ॥ ३६
ऊर्ध्वं समुन्नतं जातं पञ्चाशत्कोटियोजनम् ।
करीन्द्रवत् स्थितं शश्वत् पञ्चाशत्कोटिविस्तृतम् ॥ ३७
कोटियोजनदीर्घाङ्गैः शृङ्गाणां शतकैः स्फुरत् ।
उच्चकैः स्वर्णकलशैः प्रासादमिव मैथिल ॥ ३८
गोवर्द्धनाख्यं तच्चाहुः शतशृङ्गं तथा परे ।
एवं भूत तु तदपि वर्द्धितु मनसोत्सुकम् ॥ ३९
कोलाहले तदा जाते गोलोके भयविह्वले ।
वीक्ष्योत्थाय हरिः साक्षाद्धस्तेनाशु तताड तम् ॥ ४०
किं वर्द्धसे भो अच्छिन्नं लोकमाच्छाद्य तिष्ठसि ।
किंवा नचैते वसितुं तच्छान्तिमकरोद्धरिः ॥ ४१
संवीक्ष्य तं गिरिवरं प्रसन्ना भगवत्प्रिया ।
तस्मिन् रहःस्थले राजन् रराज हरिणा सह ॥ ४२

सोऽयं गिरिवरः साक्षाच्छ्रीकृष्णेन प्रणोदितः ।
सर्वतीर्थमयः श्यामो घनश्यामसुतः प्रियः ॥ ४३

भारतात् पश्चिमदिशि शाल्मलीद्वीपमध्यतः ।
गोवर्द्धनो जन्म लेभे पत्न्यां द्रोणाचलस्य च ॥ ४४

पुलस्त्येन समानीतो भारते व्रजमण्डले ।
वैदेह तस्यागमनं मया तुभ्यं पुरोदितम् ॥ ४५

यथा पुरा वर्धितुमुत्सुकोऽयं
तथा पिधानं भविता भुवो वा ।
विचिन्त्य शापं मुनिना परेशो
द्रोणात्मजायेति ददौ क्षयार्थम् ॥ ४६

इति श्रीगर्गसंहितायां गिरिराजखण्डे नारदबहुलाश्व-
संवादे गिरिराजोत्पत्तिवर्णनं नाम
नवमोऽध्यायः ॥ ९

नारद उवाच

अत्रैवोदाहरन्तीममितिहासं पुरातनम्।
यस्य श्रवणमात्रेण महापापं प्रणश्यति ॥ १

विजयो ब्राह्मणः कश्चिद्गौतमीतीरवासकृत्।
आययौ स्वमृणं नेतुं मथुरां पापनाशिनीम् ॥ २

कृत्वा कार्यं गृहं गच्छन् गोवर्द्धनतटीं गतः।
वर्तुलं तत्र पाषाणं चैकं जग्राह मैथिल ॥ ३

शनैश्शनैर्वनोद्देशे निर्गतो व्रजमण्डलात्।
अग्रे ददर्श चायातं राक्षसं घोररूपिणम् ॥ ४

हृदये च मुखं यस्य त्रयः पादा भुजाश्च षट्।
हस्तत्रयश्च स्थूलौष्ठौ नासा हस्तसमुन्नता ॥ ५

सप्तहस्ता ललज्जिह्वा कण्टकाभास्तनूरुहाः।
अरुणे अक्षिणी दीर्घे दन्ता वक्रा भयङ्कराः ॥ ६

तं दृष्ट्वा ब्राह्मणो राजन् कम्पितावयवो भृशम्।
तत्रास्थितोऽभूद्रुदितो न समर्थः पलायितुम् ॥ ७

राक्षसो घुर्घुरं शब्दं कृत्वा चापि बुभुक्षितः।
आययौ सम्मुखे राजन् ब्राह्मणस्य स्थितस्य च ॥ ८

गिरिराजोद्भवेनासौ पाषाणेन जघान तम्।
गिरिराजशिलास्पर्शात् त्यक्त्वासौ राक्षसीं तनुम् ॥९

पद्मपत्रविशालाक्षः श्यामसुन्दरविग्रहः।
वनमाली पीतवासा मुकुटी कुण्डलान्वितः ॥ १०

वंशीधरो वेत्रहस्तः कामदेव इवापरः।
भूत्वा कृताञ्जलिर्विप्रं प्रणनाम मुहुर्मुहुः ॥ ११

सिद्ध उवाच

धन्यस्त्वं ब्राह्मणश्रेष्ठ परत्राणपरायण: ।
त्वया विमोचितोऽहं वै राक्षसत्वान्महामते ।। १२
पाषाणस्पर्शमात्रेण कल्याणं मे बभूव ह ।
न कोऽपि मां मोचयितुं समर्थो हि त्वया विना ।। १३

ब्राह्मण उवाच

विस्मितस्तव वाक्येऽह न त्वां मोचयितुं क्षमः ।
पाषाणस्पर्शेऽपि फलं न जाने वद सुव्रत ।। १४

सिद्ध उवाच

गिरिराजो हरे रूप: श्रीमान् गोवर्द्धनो गिरिः ।
तस्य दर्शनमात्रेण नरो याति कृतार्थताम् ॥ १५
गन्धमादन यात्रायां यत्फलं लभते नरः ।
तस्मात् कोटिगुण पुण्यं गिरिराजस्य दर्शने ।। १६
पञ्चवर्षसहस्राणि केदारे यत्तप: फलम् ।
तच्च गोवर्द्धने विप्र क्षणेन लभते नर: ।। १७
मलयाद्रौ स्वर्णभारदानस्यापि च यत् फलम् ।
तस्मात् कोटिगुणं पुण्यं गिरिराजे हि माशिकम् ।। १८
पर्वते मङ्गलप्रस्थे यो दद्याद्धेमदक्षिणाम् ।
स याति विष्णुसारूप्यं युक्तः पापशतैरपि ॥ १९
तत्पदं हि नरो याति गिरिराजस्य दर्शनात् ।
गिरिराजसमं पुण्यमन्यत्तीर्थे न विद्यते ।। २०
ऋषभाद्रौ कूटकाद्रौ कोल्लकाद्रौ तथा नरः ।
सुवर्णशृङ्गयुक्तानां गवां कोटीर्ददाति यः ।। २१
महापुण्यं लभेत् सोऽपि विप्रान् सम्पूज्य यत्नतः ।
तस्माल्लक्षगुणं पुण्यं गिरौ गोवर्द्धने द्विज ॥ २२

ऋष्यमूकस्य सह्यस्य तथा देवगिरेः पुनः ।
यात्रायां लभते पुण्यं समस्ताया भुवः फलम् ॥ २३
गिरिराजस्य यात्रायां तस्मात् कोटिगुणं फलम् ।
गिरिराजसमं तीर्थं न भूतं न भविष्यति ॥ २४
श्रीशैले दशवर्षाणि कुण्डे विद्याधरे नरः ।
स्नानं करोति सुकृती शतयज्ञफलं लभेत् ॥ २५
गोवर्धने पुच्छकुण्डे दिनैकं स्नानकृन्नरः ।
कोटियज्ञफलं साक्षात् पुण्यमेति न संशयः ॥ २६
वेङ्कटाद्रौ वारिधारे महेन्द्रे विन्ध्यपर्वते ।
यज्ञं कृत्वा ह्यश्वमेधं नरो नाकपतिर्भवेत् ॥ २७
गोवर्द्धनेऽस्मिन् यो यज्ञं कृत्वा दत्वा सुदक्षिणाम् ।
नाके पदं संविधाय स विष्णोः पदमाव्रजेत् ॥ २८
चित्रकूटे पयस्विन्यां श्रीरामनवमीदिने ।
पारियात्रे तृतीयायां वैशाखस्य द्विजोत्तम ॥ २९
कुकुभाद्रौ च पूर्णायां नीलाद्रौ द्वादशीदिने ।
इन्द्रकीले च सप्तम्यां स्नानं दानं तपः क्रियाः ॥ ३०
तत्सर्वं कोटिगुणितं भवतीत्थं हि भारते ।
गोवर्द्धने तु तत् सर्वमनन्तं जायते द्विज ॥ ३१
गोदावर्यां गुरौ सिंहे मायापुर्यान्तु कुम्भगे ।
पुष्करे पुष्यनक्षत्रे कुरुक्षेत्रे रविग्रहे ॥ ३२
चन्द्रग्रहे तु काश्यां वै फाल्गुने नैमिषे तथा ।
एकादश्यां शूकरे च कार्त्तिक्यां गणमुक्तिदे ॥ ३३
जन्माष्टम्यां मधोः पुर्यां खाण्डवे द्वादशीदिने ।
कार्त्तिक्यां पूर्णिमायान्तु वटेश्वरमहावटे ॥ ३४
मकरार्के प्रयागे तु बर्हिष्मत्यां हि वैधृतौ ।
अयोध्यासरयूतीरे श्रीरामनवमीदिने ॥ ३५

एवं शिवचतुर्दश्यां वैजनाथवने शुभे ।
तथा दर्शे सोमवारे गङ्गासागरसङ्गमे ॥ ३६
दशम्यां सेतुबन्धे च श्रीरङ्गे सप्तमीदिने ।
एषु दानं तपः स्नानं जपं देवद्विजार्चनम् ॥ ३७
तत्सर्वं कोटिगुणितं भवतीह द्विजोत्तम ।
तत्तुल्यं पुण्यमाप्नोति गिरौ गोवर्द्धने वरे ॥ ३८
गोविन्दकुण्डे विशदे यः स्नाति कृष्णमानसः ।
प्राप्नोति कृष्णसारूप्यं मैथिलेन्द्र न संशयः ॥ ३९
अश्वमेधसहस्राणि राजसूयशतानि च ।
मानसीगङ्गया तुल्यं न भवन्ति गिरौ वरे ॥ ४०
त्वया विप्र कृतं साक्षाद् गिरिराजस्य दर्शनम् ।
स्पर्शनञ्च ततः स्नानं न त्वत्तोऽप्यधिको भुवि ॥ ४१
न मन्यसे चेन्मां पश्य महापातकिनं परम् ।
गोवर्द्धनशिलास्पर्शात् कृष्णसारूप्यतां गतम् ॥ ४२

इति श्रीगर्गसंहितायां गिरिराजखण्डे नारदबहुंलाश्व-
संवादे गिरिराजमाहात्म्यवर्णनं नाम
दशमोऽध्यायः ॥ १०

नारद उवाच

इति श्रुत्वा सिद्धवाक्यं ब्राह्मणो विस्मयं गतः ।
पुनः पप्रच्छ तं राजन् गिरिराजप्रभाववित् ॥ १

ब्राह्मण उवाच

पुरा जन्मनि कस्त्वं भोस्त्वया किं कलुषं कृतम् ।
सर्वं वद महाभाग त्वं साक्षाद्दिव्यदर्शनः ॥ २

सिद्ध उवाच

पुरा जन्मनि वैश्योऽहं धनी वैश्यसुतो महान् ।
आबाल्याद्द्यूतनिरतो विटगोष्ठीविशारदः ॥ ३
वेश्यारतः कुकर्माहं मदिरामदविह्वलः ।
मात्रा पित्रा भार्ययापि भर्त्सितोऽहं सदा द्विज ॥ ४
एकदा तु मया विप्र पितरौ गरदानतः ।
मारितौ च तथा भार्या खड्गेन पथि मारिता ॥ ५
गृहीत्वा तद्धनं सर्वं वेश्यया सहितः खलः ।
दक्षिणाशाञ्च गतवान् दस्युकर्मातिनिर्दय ॥ ६
एकदा तु मया वेश्या निःक्षिप्ता ह्यन्धकूपके ।
दस्युना हि मया पाशैर्मारिताः शतशो नराः ॥ ७
धनलोभेन भो विप्र ब्रह्महत्याशतं कृतम् ।
क्षत्रहत्यावैश्यहत्याः शूद्रहत्याः सहस्रशः ॥ ८
एकदा मांसमानेतुं मृगान् हन्तुं वने गतम् ।
सर्पोऽदशत् पदा स्पृष्टो दुष्टं मां निधनं गतम् ॥ ६
संताड्य मुद्गरैर्घोरैर्यमदूता भयङ्कराः ।
बद्ध्वा मां नरकं निन्युर्महापातकिनं खलम् ॥ १०

मन्वन्तरन्तु पतितः कुम्भीपाके महाखले ।
कल्पैकं तप्तभूमौ च महादुःखं गतः खलः ॥ ११
चतुरशीतिलक्षाणां नरकाणां पृथक् पृथक् ।
वर्षं वर्षं निपतितो निर्गतोऽहं यमेच्छया ॥ १२
ततस्तु भारते वर्षे प्राप्तोऽहं कर्मवासनाम् ।
दशवारं सूकरोहं व्याघ्रोऽहं सप्तजन्मसु ॥ १३
उष्ट्रोऽहं जन्मशतक महिषः शतजन्मसु ।
सर्पोऽहं जन्मसाहस्रं मारितो दुष्टमानवैः ॥ १४
एवं वर्षायुतान्ते तु निर्जले विपिने द्विज ।
राक्षसश्चेदृशो जातो विकरालो महाखलः ॥ १५
कस्य शूद्रस्य देहं वै समारुह्य व्रजं गतः ।
वृन्दावनस्य निकटे यमुनानिकटाच्छुभात् ॥ १६
समुत्थिता यष्टिहस्ताः श्यामलाः कृष्णपार्षदाः ।
तैस्ताडितो धर्षितोऽहं व्रजभूमौ पलायितः ॥ १७
बुभुक्षितो बहुदिनैस्त्वां खादितुमिहागतः ।
तावत्त्वया ताडितोऽहं गिरिराजाश्मना मुने ॥ १८
श्रीकृष्णकृपया साक्षात् कल्याणं मे बभूव ह ।

नारद उवाच

एवं प्रवदतस्तस्य गोलोकाच्च महारथः ॥ १९
सहस्रादित्यसङ्काशो हयायुतसमन्वितः ॥ २०
सहस्रचक्रध्वनिभृल्लक्षपार्षदमण्डितः ।
मञ्जीरकिङ्किणीजाली मनोयायी समागतः ॥ २१
पश्यतस्तस्य विप्रस्य तमानेतुं विदेहराट् ।
तमागतं रथं दिव्यं नेमतुर्विप्रनिर्जरौ ॥ २२

ततः समारुह्य रथं स सिद्धो
विरञ्जयन् मैथिल मण्डलं दिशाम् ।

श्रीकृष्णलोकं प्रययौ परात्परं
निकुञ्जलीलाललितं मनोहरम् ।। २३
विप्रोऽपि तस्मात् पुनरागतो गिरिं
गोवर्द्धनं सर्वगिरीन्द्रदैवतम् ।
प्रदक्षिणीकृत्य पुनः प्रणम्य तं
ययौ गृह मैथिल तत्प्रभाववित् ।। २४
इदं मया ते कथितं प्रचण्डं
सुमुक्तिदं श्रीगिरिराजखण्डम् ।
श्रुत्वा: जनः पापपरोऽपि चण्डं
स्वप्ने न पश्येद् यममुग्रदण्डम् ।। २५
यः शृणोति गिरिराजयशस्य
गोपराजनवकेलिरहस्यम् ।
देवराज इव सोऽत्र समेति
नन्दराज इव शान्तिममुत्र ।। २६

इति श्रीगर्गसंहितायां गिरिराजखण्डे नारदबहुलाश्व-
संवादे गिरिराजप्रभाववर्णने सिद्धमोक्षो नाम
एकादशोऽध्यायः ।। ११

इति तृतीयः गिरिराजखण्डः समाप्तः ।।

गर्गसंहितायां गिरिराजखण्डे पाठान्तरादिप्रदर्शनम्

अत्र च ख पुस्तकाभावोऽवगन्तव्यः

१।२ तदेव चरितं इति मु० पु० ।

१।३ वार्षिक हि० इति मु० पु० ।

१।७ ०गणाश्च सर्वे भुञ्जन्ति० इति मु० पु० ।

१।८ ०कालमनन्तमेव हि० इति मु० पु० ।

१।१२ ०थेच्छास्ति तथा कुरु व्रज ॥ इति क० मु० पु० ।

१।१६ ०मन्त्रेण ह्रदे स्नानं० इति मु० पु० ।

१।१८ ०निचयं दत्त्वा दीपा० इति मु० पु० ।

१।२७ गोमयैर्गोधनः कार्यस्तदाकारः परोन्नतः ॥ इति क० ग० पु० ।

१।३० शालग्रामस्य देवस्य सेवनं० इति मु० पु०

२।२ ०समुत्सुको गर्गयुतः० इति मु० पु० ।

२।३ क्रमव्यत्यासेन श्लोकोऽयं मु० पुस्तके वर्त्तते तथैवचात्र स्थापितोऽस्माभिः ।

२।१३ ०शैलवरस्य सम्मुखा० इति मु० पु० ।

कपालभिन्नास्थि० इति मु० पु० ।

०मालागरलैर्विभूषितः ॥ इति क० ग० पु० ।

२।१४ ०गिरिराजमण्डलम् ॥ इति मु० पु० ।

२।१६ ०रूप्याङ्कुरीव० इति ग० पु० ।

०रुक्ष्याङ्करीव० इति क० पु० ।

२।१६ ०गोपगणैः प्रहर्षितैः । इति मु० पु० ।

२।२० ०इवाध्वरे जपै० इति मु० पु० ।

०इवाध्वरे तपै० इति ग० पु० ।

२।२२ ऊचुः स्वयं वीक्ष्य० इति मु० पु० ।

०मानसान्ताः ॥ इति ग० पु० ।

०मानसास्ताः ॥ इति क० पु०।

२।२३ जातोऽसि गोपै० इति ग० पु०।

२।२६ ०रनिच्छया ते ॥ इति ग० पु०।

३।१ ०यागस्य शासनम्। इति क० पु०।

३।४ ०केचित्कर्पूरवत्प्रभाः। इति मु० पु०।
नानाविधाश्च ये मेघा० इति मु० पु०।
०केचिन्नीलपङ्कज० इति ग० मु०।

३।५ ०श्चञ्चला च याः ॥ इति क० ग० पु०।

३।७ ०वज्राघाताना० इति ग० पु०।

३।८ ०ह्य जद् भूखण्ड० इति मु० पु०

३।६ ०सकुटुम्बा जिगीषवः। इति सवत्रादर्शे दृश्यते। परन्तु प्रकरणानुरोधेनात्र ०कुटुम्बैर्जिजीविषवः। इति भवितुमर्हति।

३।१३ सवत्सकं गोकुलञ्च गोपानाह० इति मु० पु०।

३।१६ ०स्वपुष्करेणैव च० इति मु० पु०।

३।१७ ०व्रजवल्लभेशाः। इति ग० पु०।

३।१९ ०श्च लकुटान० इति क० ग० पु०।

३।३४ ०ज्ञात्वापर० इति मु० पु०।

४।५ गद्यभागे–०गोपालाय० इति नास्ति ग० मु० पु०।
०मन्मथ० इति नास्ति ग० पु०।
०तुभ्यं० इति नास्ति क० ग० पु०।

४।७ ०भूत्वा प्रणनाम० इति मु० पु०।

४।११ ०भूत्तोऽभवद्० इति क० पु०।
०हर्ष्यानन्दा० इति क० ग० पु०।

४।१३ तदेव पाद० इति मु० पु०।

४।१५ तत्र वै मानसी० इति मु० पु०।

४।१८ ०वै० इति नास्ति क० ग० पु०।

५।१ ०माहुर्यशोदयम् ॥ इति मु०

पु० ।

५।४ ०कमलं गज० इति मु० पु० ।

५।५ अयं जातः कृष्णवर्णा एतन्० इति मु० पु० ।

५।७ ०चास्य चोत्पत्ति० क० ग० पु० ।

५।८ ०गोपान् क्रोधप्रपूरितान् ॥ इति ग० मु० पु० ।

५।११ विसर्गौ च० इति क० ग० पु० ।

५।१६ ०तस्मात् राधापतिः० इति० क० पु० ।

५।२४ ०ज्ञातेर्मदसमन्विता.॥ इति नास्ति ग० पु० ।

तत्स्थले च ज्ञाते हे गोपेश्वर भूपते । इति ५।२५ श्लोकान्तिमांशः वर्त्तते ।

५।२५ गोपा ऊचुः इति नास्ति क० ग० पु० ।

श्लोकपूर्वार्द्धं नास्ति ग० पु० ।

श्लोकोत्तरार्द्धस्थं नन्दराजं त्यज० इत्यन्तोभागः नास्ति ग० पु० ।

५।२८ भवनाख्याति० इति ग० पु० ।

५।२९ अद्यस्त्वां० इति क० ग० पु० ।

अद्य त्वं० इति मु० पु० ।

५।३७ ०राधिकाज्ञया ॥ इति मु० पु० ।

६।१ ऊचु पुनःशान्ति० इति मु० पु० ।

६।६ नारद उवाच इति नास्ति ग० पु० ।

६।१० एकैकायसमु०१० इति मु० पु० ।

०येपु भक्ता च० इति क० पु० ।

६।१३ ०विचारन्तु वरं० इति ग० पु० ।

६।२६ ०नभः स्थले ॥ इति मु० पु० ।

६।३० ०नन्दो नत्वा० इति ग० पु० ।

७।२ ०वनञ्च गोलोक० इति मु० पु० ।

७।१२ ०कन्दुकं स्मृतम् ॥ इति मु० पु० ।

७।१४ मुष्णिषायत्र० इति मु० पु० ।

औष्णीषं नाम० इति मु० पु० ।

७।१८ ०बलान्नेष्ये सदा० इति मु० पु० ।

०गिरिराजभूमेः ॥ इति क० मु० पु० ।

७।१६ ०पोथयामास० इति मु० पु० ।

७।२२ ०पत्राणां कृत्वा० इति मु० पु० ।

७।२३ ०द्रोणमासीन्नृपे० इति ग० पु० ।

७।३१ गोवर्द्धने गिरौ० इति मु० पु० ।

८।५ नेत्रे वै० इति मु० पु० ।

८।६ राधाकुण्डे० इति क० पु० ।

८।८ ०देशाश्च औष्णीषं० इति मु० पु० ।

८।६ ०चिह्नन्तु० इति मु० पु० ।

८।१० ०चिह्नं० इति मु० पु० ।

०पदं पदम् । इति मु० पु० ।

८।११ ०क्रोधं कामं० इति क० ग० पु० ।

६।३ ०त्पत्तिवदतां० इति ग० पु० ।

६।५ ०रममाणो निरन्तरम् । इति मु० पु० ।

६ ७ ०त्रिश्वश्वेतो० इति मु० पु० ।

६।११ ०पटलगुल्फाभ्यां० इति मु० पु० ।

६।१२ ०कोकिलसङ्कुलः ॥ इति मु० पु० ।

६।१५ ०रोमराजिभ्यो० इति मु० पु० ।

६।२० ०वाहुस्कन्धाभ्यां० इति क० पु० ।

६।२२ ०वामांससमु० इति ग० पु० ।

६।२३ लीलावती प्रिया० इति मु० पु० ।

६।२६ ०न्नूपुरराससङ्कुले । इति क० ग० पु० ।

०दामजामृत० इति क० ग० पु० ।

६।२६ ०त्वां तु करोमि० इति मु० पु० ।

०मनसोत्थिताम् ॥ इति क० ग० पु० ।

६।३० ०कुरु तन्मनोज्ञं० इति मु० पु० ।

६।३२ स्त्रनेत्रपङ्कजाभ्यान्तु० इति मु० पु० ।

६।३५ मन्दारकन्द० इति मु० पु० ।

९।३७ ०सञ्चारात्कोटिविस्तृतम् ॥ इति ग० पु० ।

९।३९ ०वर्द्धितं मनसो० इति मु० पु० ।

९।४० नास्ति ग० पु० ।

९।४१ ०भो· प्रच्छिन्न० इति मु० पु० ।

९।४३ ०घनश्याम सुरप्रियः ॥ इति मु० पु० ।

९।४५ वैदेह चास्या० इति ग० पु० ।

१०।१४ ०स्पर्शनफलं० इति मु० पु० ।

१०।१८ ०हि मासिकम् ॥ इति क० मु० पु० ।

१०।२० ०मन्यत्तीर्थेन० इति क० पु० ।

१०।२१ ०कोलकाद्रौ० इति मु० पु० ।

१०।२८ गोवर्द्धने तु० इति ग० पु० ।
नाकेशपदसंविष्णो श्री०इति ग० पु० ।
नाके पदं संविधार्य्य० इति क० पु० ।

१०।३० श्लोकस्य पूर्वोत्तरार्द्धे व्यत्ययेन वर्तेते क० ग० पु० ।

१०।३२ ०पूर्यान्तु कुम्भके । इति मु० पु० ।

१०।३६ नास्ति ग० पु० ।

१०।३७ पूर्वार्द्धं नास्ति ग० पु० ।

१०।३९ ०स्नात्वा कृष्णमानसः । इति क० ग० पु० ।

११।३ ०विटवैखगोष्टी० इति ग० पु० ।

११।४ ०कुमार्गोऽहं० इति मु०पु० ।

११।७ ०महापाशैर्मा० इति क० ग० पु० ।

११।११ ०तप्तसूर्मौ च० इति मु० पु० ।
०दुःखमतस्त्वलम् ॥ इति ग० पु० ।

११।१२ चतुराशीति० इति क० ग० पु० ।

११।१३ ०हं शतजन्मसु । इति मु० पु० ।

११।१४ पूर्वार्द्धं नास्ति क० ग० पु० ।

११।१७ ०व्रजभूमौ पलायितः ॥ इति नास्ति क० ग० पु० ।

११।१८ पूर्वार्द्धं नास्ति क० ग० पु० ।
उत्तरार्द्धेऽपि तावत्त्वया ताडितोऽहं० इत्यन्तो भागः नास्ति क० ग० पु० ।

११।२१ ०किङ्किणीजाली० इति मु० पु० ।

श्रीगणेशाय नमः ।

गर्गसंहिता

(माधुर्य खण्डः)

अतसीकुसुमोपमेयकान्ति
र्यमुनाकूलकदम्बमूलवर्ती ।
नवगोपबधूविलासशाली
वनमाली वितनोतु मङ्गलानि ॥ १
परिकरीकृतपीतपटं हरिं
शिखिकिरीटनतीकृतकन्धरम् ।
लकुटवेणुकरं चलकुण्डलं
पटुतरं नटवेषधरं भजे ॥ २

बहुलाश्व उवाच

श्रुतिरूपादयो गोप्यो भूतपूर्वाद्वरान्मुने ।
कथं श्रीकृष्णचन्द्रेण जाताः पूर्णमनोरथाः ॥ ३
गोपालकृष्णचरितं पवित्रं परमाद्भुतम् ।
एतद्वद महाबुद्धे त्वं परावरवित्तमः ॥ ४

नारद उवाच

श्रुतिरूपाश्च या गोप्यो गोपानां सुकुले व्रजे ।
लेभिरे जन्म वैदेह शेषशायिवराच्छ्रुतात् ॥ ५
कमनीयं नन्दसूनुं वीक्ष्य वृन्दावने च ताः ।
वृन्दावनेश्वरीं वृन्दां भेजिरे तद्वरेच्छया ॥ ६

वृन्दादत्ताद्वराद् यासु प्रसन्नो भगवान् हरिः ।
नित्यं तासां गृहे याति रासार्थं भक्तवत्सलः ॥ ७
एकदा तु निशीथिन्या व्यतीते प्रहरद्वये ।
रासार्थं भगवान् कृष्णः प्राप्तवांस्तद्गृहान् नृप ॥ ८
तदा उत्कण्ठिता गोप्यः कृत्वा तत्पूजनं परम् ।
पप्रच्छुः परया भक्त्या गिरा मधुरया प्रभुम् ॥ ९

गोप्य ऊचुः

कथं नचागतः शीघ्रं नो गृहान् वृजिनार्दन ।
उत्कण्ठितानां गोपीनां त्वयि चन्द्रे चकोरवत् ॥ १०

भगवानुवाच

यो यस्य चित्ते वसति न स दूरे कदाचन ।
खे सूर्यं कमलं भूमौ दृष्ट्वेदं स्फुटति प्रियाः ॥ ११
भाण्डीरे मे गुरुः साक्षाद्दुर्वासा भगवान् मुनिः ।
आगतोऽद्य प्रियास्तस्य सेवार्थं गतवानहम् ॥ १२
गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः ।
गुरुः साक्षात्परं ब्रह्म तस्मै श्रीगुरवे नमः ॥ १३
अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया ।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥ १४
स्वगुरुं मां विजानीयान्नावमन्येत कर्हिचित् ।
न मर्त्यबुद्ध्या सेवेत सर्वदेवमयो गुरुः ॥ १५
तस्मात्तत्पूजनं कृत्वा नत्वा तत्पादपङ्कजम् ।
आगतोऽहं विलम्बेन भवतीनां गृहान् प्रियाः ॥ १६

नारद उवाच

श्रुत्वा तत्परमं वाक्यं गोप्यः सर्वास्तु विस्मिताः ।
कृताञ्जलिपुटा ऊचुः श्रीकृष्णं नम्रकन्धराः ॥ १७

मुनिरुवाच

गोप्यः परमहंसोऽहं गतकृत्यो हि निष्क्रियः ।
तस्मान्मुखे मे दातव्यं स्वं स्वं चाप्यशनं करैः ॥ २६

नारद उवाच

एवं विदारिते तेन मुखे गोप्योऽतिहर्षिताः ।
षट्पञ्चाशत्तमान् भोगान् स्वान् स्वान् सर्वाः समाक्षिपन् ॥३०
क्षिपन्तीनाञ्च गोपीनां पश्यन्तीनां मुनीश्वरः ।
जग्रास कोटिशो भारान् भोगान् सर्वान् क्षुधातुरः ॥ ३१
विस्मितानाञ्च गोपीनां पश्यन्तीनां परस्परम् ।
इत्थं शून्यानि पात्राणि बभूवुर्नृपसत्तम ॥ ३२
अथ गोप्यो मुनिं शान्तं नत्वा तं भक्तवत्सलम् ।
विस्मिताः प्रणताः प्राहुः सर्वाः पूर्णमनोरथाः ॥ ३३

गोप्य ऊचुः

मुने आगमने पूर्वं कृष्णोक्तवचसा नदीम् ।
तीर्त्वागतास्त्वत्समीपं दर्शनार्थं शुभेच्छया ॥ ३४
इतः कथं गमिष्यामः सन्देहोऽयं महानभूत् ।
तद्विधेहि नमस्तुभ्यं येन पन्था लघुर्भवेत् ॥ ३५

मुनिरुवाच

सुखेनातः प्रगन्तव्यं भवतीभिर्यदा स्वतः ।
यमुनामेत्य चैतद्वै वक्तव्यं मार्गहेतवे ॥ ३६
यदि दूर्वारसं पीत्वा दुर्वासाः केवलं क्षितौ ।
व्रती निरन्नो निर्वारिर्वर्तते पृथिवीतले ॥ ३७
तर्हि नो देहि मार्गं वै कालिन्दि सरितां वरे ।
इत्युक्ते वचने कृष्णा मार्गं वो दास्यति स्वतः ॥ ३८

नारद उवाच

इति श्रुत्वा वचो गोप्यो नत्वा तं मुनिपुङ्गवम् ।
यमुनामेत्य मुन्युक्त चोक्त्वा तीर्त्वा नदीं नृप ॥
श्रीकृष्णपार्श्वमाजग्मुर्विस्मिता मङ्गलायनाः ॥ ३९
अथ रासे गोपवध्वः सन्देहं मनसोत्थितम् ।
पप्रच्छुः श्रीहरिं वीक्ष्य रहः पूर्णमनोरथाः ॥ ४०

गोप्य ऊचुः

दुर्वाससो दर्शनं भोः कृतमस्माभिरग्रतः ।
युवयोर्वाक्यतश्चात्र सन्देहोऽयं प्रजायते ॥ ४१
यथा गुरुस्तथा शिष्यो मृषावादी न संशयः ।
जारस्त्वमसि गोपीनां रसिको बाल्यतः प्रभो ॥ ४२
कथं बालयतिस्त्वं वै वदताद् वृजिनार्दन ।
कथं दूर्वारसं पीत्वा दुर्वासा बहुभुङ्मुनिः ॥
नो जात एष सन्देहः पश्यन्तीनां व्रजेश्वर ॥ ४३

भगवानुवाच

निर्ममो निरहङ्कारः समानः सर्वगः परः ।
सदा वैषम्यरहितो निर्गुणोऽहं न संशयः ॥ ४४
तथापि भक्तान् भजतो भजेऽहं वै यथा तथा ।
तथैव साधुर्ज्ञानी च वैषम्यरहितः सदा ॥ ४५
न बुद्धिभेदं जनयेदज्ञानां कर्मसङ्गिनाम् ।
जोषयेत् सर्वकर्माणि विद्वान् युक्तः समाचरन् ॥ ४६
यस्य सर्वे समारम्भाः कामसङ्कल्पवर्जिताः ।
ज्ञानाग्निदग्धकर्माणं तमाहुः पण्डितं बुधाः ॥ ४७
निराशीर्यतचित्तात्मा त्यक्तसर्वपरिग्रहः ।
शारीरं केवलं कर्म कुर्वन्नाप्नोति किल्बिषम् ॥ ४८

नहि ज्ञानेन सदृशं पवित्रमिह विद्यते ।
तत् स्वयं योगसंसिद्धः कालेनात्मनि विन्दति ॥ ४६
ब्रह्मण्याधाय कर्माणि सङ्गं त्यक्त्वा करोति यः ।
लिप्यते न स पापेन पद्मपत्रमिवाम्भसा ॥ ५०
तस्मान्मुनिस्तु दुर्वासा बहुभुक् त्वद्धिते रतः ।
न तस्य भोजनेच्छा स्याद् दूर्वारसमिताशिनः ॥ ५१

नारद उवाच

इति श्रुत्वा वचो गोप्यः सर्वास्ताश्छिन्नसंशयाः ।
श्रुतिरूपा ज्ञानमय्यो बभूवुर्मैथिलेश्वर ॥ ५२

इति श्रीगर्गसंहितायां माधुर्यखण्डे नारदबहुलाश्व-
संवादे श्रुतिरूपोपाख्यान नाम
प्रथमोऽध्यायः ॥ १

नारद उवाच

गोपीनामृषिरूपाणामाख्यानं शृणु मैथिल ।
सर्वपापहरं पुण्यं कृष्णभक्तिविवर्धनम् ॥ १
वङ्गेषु मङ्गलो नाम गोप आसीन्महामना ।
लक्ष्मीवाञ्छितसम्पन्नो नवलक्षगवां पतिः ॥ २
भार्याः पञ्चसहस्राणि बभूवुस्तस्य मैथिल ।
कदाचिद्दैवयोगेन धनं सर्वं क्षयं गतम् ॥ ३
चौरैर्नीतास्तस्य गावः काश्चिद्राज्ञा हृता बलात् ।
एवं दैन्ये च सम्प्राप्ते दुःखितो मङ्गलोऽभवत् ॥ ४
तदा श्रीरामस्य वराद् दण्डकारण्यवासिनः ।
ऋषयः स्त्रीत्वमापन्ना बभूवुस्तस्य कन्यकाः ॥ ५
दृष्ट्वा कन्यासमूहं स दुःखी गोपोऽथ मङ्गलः ।
उवाच दैन्यदुःखाढ्य आधिव्याधिसमाकुलः ॥ ६

मङ्गल उवाच

किं करोमि क्व गच्छामि को मे दुःखं व्यपोहति ।
श्रीर्न भूतिर्नाभिजनो न बलं मेऽस्ति साम्प्रतम् ॥ ७
धनं विना कथञ्चासां विवाहो हा भविष्यति ।
भोजने यत्र सन्देहो धनाशा तत्र कीदृशी ॥ ८
सति दैन्ये कन्यकाः स्युः काकतालीयवद् गृहे ।
तस्मात् कस्यापि राज्ञस्तु धनिनो बलये त्वहम् ।
दास्याम्येताः कन्यकाश्च कन्यानां सौख्यहेतवे ॥ ९

नारद उवाच

कदर्थीकृत्य ताः कन्या एवं बुद्ध्या स्थितोऽभवत् ।
तदैव माथुराद्देशाद् गोपश्चैकः समागतः ॥ १०

तीर्थयायी जयो नाम वृद्धो बुद्धिमतां वरः ।
तन्मुखान्नन्दराजस्य श्रुतं वैभवमद्भुतम् ॥ ११
नन्दराजस्य बलये मङ्गलो दैन्यपीडितः ।
विचिन्त्य प्रेषयामास कन्यकाश्चारुलोचनाः ॥ १२
ता नन्दराजस्य गृहे कन्यका रत्नभूषिताः ।
गवां गोमयहारिण्यो बभूवुर्गोव्रजेषु च ॥ १३
श्रीकृष्णं सुन्दरं दृष्ट्वा कन्या जातिस्मराश्च ताः ।
कालिन्दीसेवनं चक्रुर्नित्यं श्रीकृष्णहेतवे ॥ १४
अथैकदा श्यामलाङ्गा कालिन्दी दीर्घलोचना ।
ताभ्यः स्वदर्शनं दत्त्वा वरं दातुं समुद्यता ॥ १५
ता वव्रिरे व्रजेशस्य पुत्रो भूयात् पतिश्च नः ।
तथास्तु चोक्त्वा कालिन्दी तत्रैवान्तरधीयत ॥ १६
ताः प्राप्ता वृन्दकारण्ये कार्त्तिक्यां रासमण्डले ।
ताभिः सार्द्धं हरी रेमे सुरीभिः सुरराडिव ॥ १७

इति श्रीगर्गसंहितायां माधुर्यखण्डे नारद-
बहुलाश्वसंवादे ऋषिरूपोपाख्यानं नाम
द्वितीयोऽध्यायः ॥ २

नारद उवाच

मैथिलानां गोपिकानामाख्यानं शृणु मैथिल ।
दशाश्वमेधतीर्थस्य फलदं भक्तिवर्द्धनम् ॥ १
श्रीरामस्य वराज्जाता नवनन्दगृहेषु याः ।
कमनीयं नन्दसूनुं दृष्ट्वा ता मोहमास्थिताः ॥ २
मार्गशीर्षे शुभे मासि चक्रुः कात्यायनीव्रतम् ।
उपचारैः षोडशभिः कृत्वा देवीं महीमयीम् ॥ ३
अरुणोदयवेलायां स्नाताः श्रीयमुनाजले ।
नित्यं समेता आजग्मुर्गायन्त्यो भगवद्गुणान् ॥ ४
एकदा ताः स्ववस्त्राणि तीरे न्यस्य व्रजाङ्गनाः
विजह्रुर्यमुनातोये कराभ्यां सिञ्चतीर्मिथः ॥ ५
तासां वासांसि संनीत्वा भगवान् प्रातरागतः ।
त्वरं कदम्बमारुह्य चौरवन् मौनमास्थितः ॥ ६
ता न वीक्ष्य स्ववासांसि विस्मिता गोपकन्यकाः ।
नीपस्थितं विलोक्याथ सलज्जा जहसुर्नृप ॥ ७
प्रतीच्छन्तु स्ववासांसि सर्वा आगत्य चात्र वै ।
अन्यथा नहि दास्यामि वृक्षात् कृष्ण उवाच ह ॥ ८
मज्जन्त्यस्ताः शीतजले हसन्त्यः प्राहुरानताः ॥ ९

गोप्य ऊचुः

हे नन्दनन्दन मनोहर गोपरत्न
गोपालवंशनवहंस महार्तिहारिन् ।
श्रीश्यामसुन्दर तवोदितमद्यवाक्यं
कुर्मः कथं विवसनाः किल तेऽपि दास्यः ॥ १०

गोपाङ्गनावसनमुट् नवनीतहारी
जातो व्रजेऽतिरसिकः किल निर्भयोऽसि ।
वासांसि देहि नहि चेन्मथुराधिपाय
वक्ष्यामहेऽनयमतीव कृतं त्वयात्र ॥ ११

भगवानुवाच

दास्यो ममैव यदि सुन्दरमन्दहासा
इच्छन्तु वैत्य किल चात्र कदम्बमूले ।
नो चेत् समस्तवसनानि नयामि गेहां
स्तस्मात् करिष्यथ ममैव वचोऽविलम्बात् ॥ १२

नारद उवाच

तदा ता निर्गताः सर्वा जलाद्दोष्योऽतिवेपिताः ।
आनता योनिमाच्छाद्य पाणिभ्यां शीतकर्शिता. ॥ १३
कृष्णदत्तानि वासांसि दधुः सर्वा व्रजाङ्गनाः ।
मोहिताश्च स्थितास्तत्र कृष्णे लज्जायितेक्षणाः ॥ १४
ज्ञात्वा तासामभिप्रायं परमं प्रेमलक्षणम् ।
प्राह मन्दस्मितः कृष्णः समन्ताद्वीक्ष्य ता वचः ॥ १५

भगवानुवाच

भवतीभिर्मार्गशीर्षे कृतं कात्यायनीव्रतम् ।
मदर्थं तच्च सफलं भविष्यति न संशयः ॥ १६
परश्वोऽहनि चाटव्यां कृष्णातीरे मनोहरे ।
युष्माभिश्च करिष्यामि रासं पूर्णमनोरथम् ॥ १७
इत्युक्त्वाथ गते कृष्णे परिपूर्णतमे हरौ ।
प्राप्तानन्दा मन्दहासा गोप्यः सर्वा गृहान् ययुः ॥ १८

इति श्रीगर्गसंहितायां माधुर्यखण्डे नारद-
बहुलाश्वसंवादे मैथिल्युपाख्यानं नाम
तृतीयोऽध्यायः ॥ ३

नारद उवाच

कौशलानां गोपिकानां वर्णनं शृणु मैथिल ।
सर्वपापहरं पुण्यं श्रीकृष्णचरितामृतम् ॥ १
नवोपनन्दगेहेषु जाता रामवराद् व्रजे ।
परिणीता गोपजनै रत्नभूषणभूषिताः ॥ २
पूर्णचन्द्रप्रतीकाशा नवयौवनसंयुताः ।
पद्मिन्यो हंसगमनाः पद्मपत्रविलोचनाः ॥ ३
जारधर्मेण सुस्नेहं सुदृढं सर्वतोऽधिकम् ।
चक्रुः कृष्णे नन्दसुते कमनीये महात्मनि ॥ ४
ताभिः सार्द्धं सदा हास्यं व्रजवीथीषु माधवः ।
स्मितैः पीतपटादानैः वर्षणैः स चकार ह ॥ ५
दधिविक्रयार्थं यान्त्यस्ताः कृष्णकृष्णेति चाब्रुवन् ।
कृष्णे हि प्रेमसंयुक्ता भ्रमन्त्यः कुञ्जमण्डले ॥ ६
खे वायौ चाग्नौ सलिले मह्यां ज्योतिर्दिशासु च ।
द्रुमेषु जनवृन्देषु तासां कृष्णो हि लक्ष्यते ॥ ७
प्रेमलक्षणसंयुक्ताः श्रीकृष्णहृतमानसाः ।
अष्टभिः सात्विकैर्भावैः सम्पन्नास्ताश्च योषितः ॥ ८
प्रेम्णा परमहंसानां पदवीं समुपागताः ।
कृष्णानन्दाः प्रधावन्त्यो व्रजवीथीषु ता नृप ॥ ९
जडाजडं न जानन्त्यो जडोन्मत्तपिशाचवत् ।
अब्रुवन्त्यो ब्रुवन्त्यो वा गतलज्जा गतव्यथाः ॥ १०
एवं कृतार्थतां प्राप्तास्तन्मया याश्च गोपिकाः ।
बलादाकृष्य कृष्णस्य चुचुम्बुर्मुखपङ्कजम् ॥ ११

तासां तपः किं कथयामि राजन्
पूर्णे परे ब्रह्मणि वासुदेवे ।
याश्चक्रिरे प्रेम हृदिन्द्रियाद्यै
र्विसृज्य लोकव्यवहारमार्गम् ॥ १२
या रासरङ्गे विनिधाय बाहू
कृष्णांसयोः प्रेमविभिन्नचित्ताः ।
चक्रुर्वशे कृष्णमलं तपस्तद्
वक्तुं न शक्तो वदनैः फणीन्द्रः ॥ १३
योगेन साङ्ख्येन शुभेन कर्मणा
न्यायादिवैशेषिकतत्त्वविक्तमैः ।
यत्प्राप्यते तच्च पदं विदेहराट्
सम्प्राप्यते केवलभक्तिभावतः ॥ १४
भक्त्यैव वश्यो हरिरादिदेवः
सदा प्रमाणं किल चात्र गोप्यः ।
साङ्ख्यश्च योगं न कृत कदाभिः
प्रेम्णैव यस्य प्रकृतिं गताः स्युः ॥ १५

इति श्रीगर्गसंहितायां माधुर्यखण्डे नारद-
बहुलाश्वसंवादे कौशलोपाख्यानं नाम
चतुर्थोऽध्यायः ॥ ४

नारद उवाच

अयोध्यावासिनीनान्तु गोपीनां वर्णनं शृणु ।
चतुःपदार्थदं साक्षात् कृष्णप्राप्तिकरं परम् ॥ १
सिन्धुदेशेषु नगरी चम्पका नाम मैथिल ।
बभूव तस्यां विमलो राजा धर्मपरायणः ॥ २
कुबेर इव कोशाढ्यो मनस्वी मृगराडिव ।
विष्णुभक्तः प्रशान्तात्मा प्रह्लाद इव मूर्तिमान् ॥ ३
भार्याणां षट्सहस्राणि बभूवुस्तस्य भूपतेः ।
रूपवत्यः कञ्जनेत्रा वन्ध्यात्वं ताः समागताः ॥ ४
अपत्यं केन पुण्येन भूयान्मे प्रवदन् नृप ।
एवं चिन्तयतस्य बहवो वत्सरा गता. ॥ ५
एकदा याज्ञवल्क्यस्तु मुनीन्द्रस्तमुपागतः ।
तं नत्वाभ्यर्च्य विधिवन्नृपस्तत्सम्मुखे स्थितः ॥ ६
चिन्ताकुलं नृपं वीक्ष्य याज्ञवल्क्यो महामुनिः ।
सर्वज्ञः सर्वविच्छान्तः प्रत्युवाच नृपोत्तमम् ॥ ७

याज्ञवल्क्य उवाच

राजन् कृशोऽसि कस्मात्त्वं का चिन्ता ते हृदि स्थिता ।
सप्तस्वङ्गेषु कुशलं दृश्यते साम्प्रतं तव ॥ ८

विमल उवाच

ब्रह्मंस्त्वं किं न जानासि तपसा दिव्यचक्षुषा ।
तथाप्यहं वदिष्यामि भवतो वाक्यगौरवात् ॥ ९
आनपत्येन दुःखेन व्याप्तोऽहं मुनिसत्तम ।
किं करोमि तपो दानं वद येन भवेत् प्रजा ॥ १०

नारद उवाच

इति श्रुत्वा याज्ञवल्क्यो ध्यानस्तिमितलोचनः ।
दीर्घं दध्यौ मुनिश्रेष्ठो भूतं भव्यं विचिन्तयन् ॥ ११

याज्ञवल्क्य उवाच

अस्मिन् जन्मनि राजेन्द्र पुत्रो नैवच नैवच ।
पुत्र्यस्तव भविष्यन्ति कोटिशो नृपसत्तम ॥ १२

राजोवाच

पुत्रं विना पूर्वऋणान्न कोऽपि
प्रमुच्यते भूमितले मुनीन्द्र ।
सदा ह्यपुत्रस्य गृहं वृथा स्यात्
परं त्विहामुत्र सुखं न किञ्चित् ॥ १३

याज्ञवल्क्य उवाच

मा खेदं कुरु राजेन्द्र पुत्र्यो देयास्त्वया खलु ।
श्रीकृष्णाय भविष्याय परं दायादिकैः सह ॥ १४
तेनैव कर्मणा त्वं वै देवर्षिपितृणामृणात् ।
विमुक्तो नृपशार्दुल परं मोक्षमवाप्स्यसि ॥ १५

नारद उवाच

तदातिहर्षितो राजा श्रुत्वा वाक्यं महामुनेः ।
पुनः पप्रच्छ सन्देहं याज्ञवल्क्यं महामुनिम् ॥ १६

राजोवाच

कस्मिन् कुले कुत्र देशे भविष्यः श्रीहरिः स्वयम् ।
कीदृग्रूपश्च किं वर्णो वर्षैश्च कतिभिर्गतैः ॥ १७

याज्ञवल्क्य उवाच

द्वापरस्य युगस्यास्य तव राज्यान्महाभुज ।
अवशेषे वर्षशते तथा पञ्चदशे नृप ॥ १८

तस्मिन् वर्षे यदुकुले मथुरायां यदोः पुरि ।
भाद्रे बुधे कृष्णपक्षे धातृक्षे हर्षणे वृषे ॥ १६
बवेऽष्टम्यामर्द्धरात्रे नक्षत्रेशमहोदये ।
अन्धकारावृते काले देवक्यां शौरिमन्दिरे ॥ २०
भविष्यति हरिः साक्षादरण्यामध्वरेऽग्निवत् ।
श्रीवत्साङ्को घनश्यामो वनमाल्यतिसुन्दरः ॥ २१
पीताम्बरः पद्मनेत्रो भव्यमूर्त्तिश्चतुर्भुजः ।
तस्मै देया त्वया कन्या आयुस्तेऽस्ति न संशयः ॥ २२

इति श्रीगर्गसंहितायां माधुर्यखण्डे नारदबहुलाश्व-
संवादे अयोध्यापुरवासिन्युपाख्यानं नाम
पञ्चमोऽध्यायः ॥ ५

नारद उवाच

एवमुक्त्वा गते साक्षाद्याज्ञवल्क्ये महामुनौ ।
अतीव हर्षमापन्नो विमलश्चम्पकापतिः ॥ १
अयोध्यापुरवासिन्यः श्रीरामस्य वराच्च याः ।
बभूवुस्तस्य भार्यासु ताः सर्वाः कन्यकाः शुभाः ॥ २
विवाहयोग्यास्ता दृष्ट्वा चिन्तयंश्चम्पकापतिः ।
याज्ञवल्क्यवचः स्मृत्वा दूतमाह नृपेश्वरः ॥ ३

विमल उवाच

मथुरां गच्छ दूत त्वं गत्वा शौरिगृहं शुभम् ।
दर्शनीयस्त्वया पुत्रो वसुदेवस्य सुन्दरः ॥ ४
श्रीवत्साङ्को घनश्यामो वनमाली चतुर्भुजः ।
यदि स्यात्तर्हि दास्यामि तस्मै सर्वास्तु कन्यकाः ॥ ५

नारद उवाच

इति वाक्य ततः श्रुत्वा दूतोऽसौ मथुरां गतः ।
पप्रच्छ सर्वाभिप्रायं माथुरांश्च महाजनान् ॥ ६
तद्वाक्यं माथुराः श्रुत्वा कंसभीताः सुबुद्धयः ।
रहसि प्राहुस्तं दूत कर्णान्ते मन्दवाग् यथा ॥ ७

माथुरा ऊचुः

वसुदेवस्य ये पुत्रा कंसेन बहवो हताः ।
एकावशिष्टावरजा कन्या सापि दिवं गता ॥ ८
वसुदेवोऽस्ति चात्रैव ह्यपुत्रो दीनमानसः ।
इदं न कथनीयं हि त्वया कंसभयं पुरे ॥ ९
शौरिसन्तान वार्ता यो वक्ति चेन्मथुरापुरे ।
तं दण्डयति कंसोऽसौ शौर्यष्टमशिशो रिपुः ॥ १०

नारद उवाच

जनवाक्यं ततः श्रुत्वा दूतो वै चम्पकापुरीम् ।
गत्वाथ कथयामास राज्ञे कारणमद्भुतम् ॥ ११

दूत उवाच

मथुरायामस्ति शौरिरनपत्योऽतिदीनवत् ।
तत्पुत्रास्तु परं जाताः कंसेन निहताः श्रुतम् ॥ १२
एकावशिष्टा कन्यापि खं गता कंसहस्ततः ।
एवं श्रुत्वा यदुपुरान्निर्गतोऽहं शनैः शनैः ॥ १३
चरन् वृन्दावने रम्ये कालिन्दीनिकटे शुभे ।
अकस्माल्लतिकावृन्दे दृष्टः कश्चिच्छिशुर्मया ॥ १४
तल्लक्षणसमो राजन् गोगोपगणमध्यत ।
श्रीवत्साङ्को घनश्यामो वनमाल्यतिसुन्दरः ॥ १५
द्विभुजो गोपसूनुश्च परं त्वेतद्विलक्षणम् ।
त्वया चतुर्भुजश्चोक्तो वसुदेवात्मजो हरिः ॥ १६
किं कर्त्तव्यं वद नृप मुनिवाक्यं मृषा नहि ।
यत्र तत्र यथेच्छा ते तत्र मां प्रेषय प्रभो ॥ १७

नारद उवाच

इति चिन्तयतस्तस्य विस्मितस्य नृपस्य च ।
गजाह्वयात् सिन्धुदेशान् जेतुं भीष्मः समागतः ॥ १८
तं पूज्य विमलो राजा दत्वा तस्मै बलिं बहु ।
पप्रच्छ सर्वाभिप्रायं भीष्मं धर्मभृतां वरम् ॥ १९

विमल उवाच

याज्ञवल्क्येन पूर्वोक्तो मथुरायां हरिः स्वयम् ।
वसुदेवस्य देवक्यां भविष्यति न संशयः ॥ २०

२

न जातो वसुदेवस्य सकाशेऽद्य हरिः परः ।
ऋषिवाक्यं मृषा न स्यात् कस्मै दास्यामि कन्यकाः ॥ २१
महाभागवतः साक्षात्त्वं परावरवित्तमः ।
जितेन्द्रियो बाल्यभावाद्धीरो धन्वी वसूत्तमः ॥ २२
एतद्वद महाबुद्धे किं कर्त्तव्यं मयात्र वै ।

नारद उवाच

विमलं प्राह गाङ्गेयो महाभागवतः कविः ॥ २३
दिव्यदृग् धर्मतत्त्वज्ञः श्रीकृष्णस्य प्रभाववित् ॥ २४

भीष्म उवाच

हे राजन् गुप्तमाख्यानं वेदव्यासमुखाच्छ्रुतम् ।
सर्वपापहरं पुण्यं शृणु हर्षविवर्द्धनम् ॥ २५
देवानां रक्षणार्थाय दैत्यानां हि वधाय च ।
वसुदेवगृहे जातः परिपूर्णतमो हरिः ॥ २६
अर्धरात्रे कंसभयान्नीत्वा शौरिश्च तं त्वरम् ।
गत्वा च गोकुले पुत्रं निधाय शयने नृप ॥ २७
यशोदानन्दयोः पुत्रीं मायां नीत्वा पुरं ययौ ।
ववृधे गोकुले कृष्णो गुप्तो ज्ञातो न कैर्नृभिः ॥ २८
सोऽद्यैवं वृन्दकारण्ये हरिर्गोपालवेषधृक् ।
एकादशसमास्तत्र गूढो वासं करिष्यति ॥
दैत्यं कंसं घातयित्वा प्रकटः स भविष्यति ॥ २९
अयोध्यापुरवासिन्यः श्रीरामस्य वराच्च याः ।
ताः सर्वास्तव भार्यासु बभूवुः कन्यकाः शुभाः ॥३०
गूढाय देवदेवाय देयाः कन्यास्त्वया खलु ।
न विलम्बः क्वचित् कार्यो देहः कालवशो ह्ययम् ॥ ३१

इति श्रीगर्गसंहितायां माधुर्यखण्डे नारदबहुलाश्व-
संवादे अयोध्यापुरवासिन्युपाख्यानं नाम
षष्ठोऽध्यायः ॥ ६

नारद उवाच

अथ दूतः सिन्धुदेशात् माथुरान्पुनरागतः ।
चरन् वृन्दावने कृष्णातीरे कृष्णं ददर्श ह ॥ १
कृष्णं प्रणम्य रहसि कृताञ्जलिपुटः शनैः ।
प्रदक्षिणीकृत्य दूतो विमलोक्तमुवाच ह ॥ २

दूत उवाच

स्वयं परं ब्रह्म परः परेशः
परैरदृश्यः परिपूर्णदेवः ॥
यः पुण्यसङ्घैः सततं हि दूर
स्तस्मै नमः सज्जनगोचराय ॥ ३
गोविप्रदेवश्रुतिसाधुधर्म
रक्षार्थमद्यैव यदोः कुलेजः ।
जातोऽसि कंसादिवधाय योऽसौ
तस्मै नमोऽनन्तगुणार्णवाय ॥ ४
अहो परं भाग्यमलं व्रजौकसां
धन्यं कुलं नन्दवरस्य ते पितुः ।
धन्यो व्रजो धन्यमरण्यमेतद्
यत्रैव साक्षात् प्रकटः परो हरिः ॥ ५
यद्राधिकासुन्दरकण्ठरत्नं
यद्गोपिकाजीवनमूलरूपम् ।
तदेव मन्ने त्रपथि प्रजातं
किं वर्णये भाग्यमतः स्वकीयम् ॥ ६
गुप्तो व्रजे गोपमिषेण चासि
कस्तूरिकामोद इव प्रसिद्धः ।

यशश्च ते निर्मलमाशु शुक्लो-
करोति सर्वत्र गतं त्रिलोकीम् ॥ ७
जानासि सर्वं जनचैत्य भावं
क्षेत्रज्ञ आत्मा कृतिवृन्दसाक्षी ।
तथापि वक्ष्ये नृपवाक्यमुक्त
परं रहस्यं रहसि स्वधर्मम् ॥ ८
या सिन्धुदेशेषु पुरी प्रसिद्धा
श्रीचम्पका नाम शुभा यथैन्द्री ।
तत्पालकोऽसौ विमलो नृपेन्द्र
स्त्वत्पादपद्मे कृतचित्तवृत्तिः ॥ ९
सदा कृतं यज्ञशतं त्वदर्थं
दानं तपो ब्राह्मणसेवनञ्च ।
तीर्थं जपं येन सुसाधनेन
तस्मै परं दर्शनमेव देहि ॥ १०
तत्कन्यकाः पद्मविशालनेत्राः
पूर्णं पतिं त्वां मृगयन्त्य आरात् ।
सदा त्वदर्थं नियमव्रतस्था
स्त्वत्पादसेवाविमलीकृताङ्गाः ॥ ११
गृहाण तासां व्रजदेव पाणीन्
दत्त्वा परं दर्शनमद्भुतं स्वम् ।
गच्छाशु सिन्धून् विशदीकुरु त्वं
विमृश्य कर्तव्यमिदं त्वया हि ॥ १२

नारद उवाच

दूतवाक्यञ्च तच्छ्रुत्वा प्रसन्नो भगवान् हरिः ।
क्षणमात्रेण गतवान् सदूतश्चम्पकां पुरीम् ॥ १३

विमलस्य महायज्ञे वेदध्वनिसमाकुले ।
सदूतः कृष्ण आकाशात् सहसावततार ह ॥ १४
श्रीवत्साङ्कं घनश्यामं सुन्दरं वनमालिनम् ।
पीताम्बरं पद्मनेत्रं यज्ञवाटागतं हरिम् ॥ १५
तं दृष्ट्वा सहसोत्थाय विमलः प्रेमविह्वलः ।
पपात चरणोपान्ते रोमाञ्ची सन् कृताञ्जलिः ॥ १६
संस्थाप्य पीठके दिव्ये रत्नहेमखचित्पदे ।
स्तुत्वा सम्पूज्य विधिवद्राजा तत्सम्मुखे स्थितः ॥ १७
गवाक्षेभ्यः प्रपश्यन्ती. सुन्दरीर्वीक्ष्य माधवः ।
उवाच विमलं कृष्णो मेघगम्भीरया गिरा ॥ १८

भगवानुवाच

महामते वरं ब्रूहि यत्ते मनसि वर्त्तते ।
याज्ञवल्क्यस्य वचसा जातं मद्दर्शनं तव ॥ १९

विमल उवाच

मनो मे भ्रमरीभूतं सदा त्वत्पादपङ्कजे ।
वासं कुर्याद्देवदेव नान्येच्छा मे कदाचन ॥ २०

नारद उवाच

इत्युक्त्वा विमलो राजा सर्वं कोशं धनं महत् ।
द्विपवाजिरथैः सार्धं चक्रे चात्मनिवेदनम् ॥ २१
समर्प्य विधिना सर्वाः कन्यका हरये नृप ।
नमश्चकार कृष्णाय विमलो भक्तितत्परः ॥ २२
तदा जयजयारावो बभूव जनमण्डले ।
ववृषुः पुष्पवर्षाणि देवता गगनस्थिताः ॥ २३
तदैव कृष्णसारूप्यं प्राप्तोऽनङ्गस्फुरद्द्युतिः ।
शतसूर्यप्रतीकाशो द्योतयन् मण्डलं दिशाम् ॥ २४

वैनतेयं समारुह्य नत्वा श्रीगरुडध्वजम् ।
सभार्यः पश्यतां नृणां वैकुण्ठं विमलो ययौ ॥ २५
दत्त्वा मुक्तिं नृपतये श्रीकृष्णो भगवान् स्वयम् ।
तत्सुताः सुन्दरीर्नीत्वा व्रजमण्डलमाययौ ॥ २६
तत्र कामवने रम्ये दिव्यमन्दिरसंयुते ।
क्रीडन्त्यः कन्दुकैः सर्वास्तस्थुः कृष्णप्रियाः शुभाः ॥ २७
यावतीश्च प्रिया मुख्यास्तावद्रूपधरो हरिः ।
रराज रासे व्रजराड् रञ्जयंस्तन्मनः प्रभुः ॥ २८
रासे विमलपुत्रीणामानन्दजलबिन्दुभिः ।
च्युतैर्विमलकुण्डोऽभूत्तीर्थानां तीर्थमुत्तमम् ॥ २९
दृष्ट्वा पीत्वा च तं स्नात्वा पूजयित्वा नृपेश्वर ।
छित्त्वा मेरुसमं पापं गोलोकं याति मानवः ॥ ३०
अयोध्यावासिनीनान्तु कथां यः शृणुयान्नरः ।
स व्रजेद्धाम परमं गोलोकं योगिदुर्लभम् ॥ ३१

इति श्रीगर्गसंहितायां माधुर्यखण्डे नारदबहुलाश्व-
संवादे अयोध्यापुरवासिन्युपाख्यानं नाम
सप्तमोऽध्यायः ॥७

नारद उवाच

गोपीनां यज्ञसीतानामाख्यानं शृणु मैथिल ।
सर्वपापहरं पुण्यं कामदं मङ्गलायनम् ॥ १
उशीनरो नाम देशो दक्षिणस्यां दिशि स्थितः ।
एकदा यत्र पर्जन्यो न ववर्ष समा दश ॥ २
धनवन्तस्तत्र गोपा अनावृष्टिभयातुराः ।
सकुटुम्बा गोधनैश्च व्रजमण्डलमाययुः ॥ ३
पुण्ये वृन्दावने रम्ये कालिन्दीनिकटे शुभे ।
नन्दराजसहायेन वासं ते चक्रिरे नृप ॥ ४
तेषां गृहेषु सञ्जाता यज्ञसीताश्च गोपिकाः ।
श्रीरामस्य वराद्दिव्या दिव्ययौवनभूषिताः ॥ ५
श्रीकृष्णं सुन्दरं दृष्ट्वा मोहितास्ता नृपेश्वर ।
व्रतं कृष्णप्रसादार्थं प्रष्टुं राधां समाययुः ॥ ६

गोप्य ऊचुः

वृषभानुसुते दिव्ये हे राधे कञ्जलोचने ।
श्रीकृष्णस्य प्रसादार्थं वद किञ्चिद् व्रत शुभे ॥ ७
तव वश्यो नन्दसूनुर्देवैरपि सुदुर्गमः ।
त्वं जगन्मोहिनी राधे सर्वशास्त्रार्थपारगा ॥ ८

राधोवाच

श्रीकृष्णस्य प्रसादार्थं कुरुतैकादशीव्रतम् ।
तेन वश्यो हरिः साक्षाद्भविष्यति न संशयः ॥ ९

गोप्य ऊचुः

संवत्सरस्यैकादश्या नामानि वद राधिके ।
मासे मासे व्रतं तस्याः कर्तव्यं केन भावतः ॥ १०

राधोवाच

मार्गशीर्षे कृष्णपक्षे उत्पन्ना विष्णुदेहतः ।
मुरदैत्यवधार्थाय तिथिरेकादशी वरा ॥ ११
मासे मासे पृथग्भूता सैव सर्वव्रतोत्तमा ।
तस्याः षड्विंशतिं नाम्नां वक्ष्यामि हितकाम्यया ॥ १२
उत्पत्तिश्च तथा मोक्षा सफला च ततः परम् ।
पुत्रदा षट्तिला चैव जया च विजया तथा ॥ १३
आमर्दकी ततः पश्चान्नाम्ना वै पापमोचनी ।
कामदा च ततः पश्चात् कथिता वै वरूथिनी ॥ १४
मोहिनी चापरा प्रोक्ता निर्जला कथिता ततः ।
योगिनी देवशयनी कामिका च ततः परम् ॥ १५
पवित्रा चाप्यजा पद्मा चेन्दिरा च ततः परम् ।
पापाङ्कुशा रमा चैव ततः पश्चात् प्रबोधिनी ॥ १६
सर्वसम्पत्प्रदा चैव द्वे प्रोक्ते मलमासजे ।
एवं षट्विंशतिं नाम्नामेकादश्याः पठेच्च यः ।
संवत्सरद्वादशीनां फलमाप्नोति सोऽपि हि ॥ १७
एकादश्याश्च नियमं शृणुताथ व्रजाङ्गनाः ।
भूमिशायी दशम्यान्तु चैकभुक्तो जितेन्द्रियः ॥ १८
एकवारं जलं पीत्वा धौतवस्त्रोऽति निर्मलः ।
ब्राह्मे मुहूर्त उत्थाय चैकादश्यां हरौ नतः ॥ १९
अधमं कूपिकास्नानं वाप्यां स्थानन्तु मध्यमम् ।
तडागे चोत्तमं स्नानं नद्यां स्नानं ततः परम् ॥ २०
एव स्नात्वा नरवरः क्रोधलोभविवर्जितः ।
नालापेत्तद्दिने नीचांस्तथा पाखण्डिनो नरान् ॥ २१
मिथ्यावादरतांश्चैव तथा ब्राह्मणनिन्दकान् ।
अन्यांश्चैव दुराचारानगम्यागमने रतान् ॥ २२

परद्रव्यापहारांश्च परदाराभिगामिनः।
दुर्वृत्तान् भिन्नमर्यादान्नालपेत् स व्रती नरः॥ २३
केशवं पूजयित्वा तु नैवेद्यं तत्र कारयेत्
दीपं दद्याद्गृहे तत्र भक्तियुक्तेन चेतसा॥ २४
कथां श्रुत्वा ब्राह्मणेभ्यो दद्यात् सद्दक्षिणां पुनः।
रात्रौ जागरणं कुर्याद् गायन् कृष्णपदानि च॥ २५
कांस्यं मांसं मसूरांश्च कोद्रवं चणकं तथा।
शाकं मधु परान्नञ्च पुनर्भोजनमैथुनम्॥ २६
वैष्णवे व्रतकर्तव्ये दशम्यां दश वर्जयेत्॥
द्यूतं क्रीडाञ्च निद्राञ्च ताम्बूलं दन्तधावनम॥ २७
परापवादं पैशुन्यं स्तेय हिंसां तथा रतिम्।
क्रोधाढ्यं ह्यनृतं वाक्यमेकादश्यां विवर्जयेत्॥ २८
कांस्यं मांस सुरां क्षौद्रं तैलं वितथभाषणम्।
व्यायामञ्च प्रवासञ्च पुनर्भोजनमैथुनम्॥ २९
षष्टिपुष्टिमसूरांश्च द्वादश्यां परिवर्जयेत्।
अनेन विधिना कुर्याद् द्वादशीव्रतमुत्तमम्॥ ३०

गोप्य ऊचुः

एकादशीव्रतस्यास्य कालं वद महामते।
किं फलं वद तस्यास्तु माहात्म्य वद तत्त्वतः॥ ३१

राधोवाच

दशमी पञ्चपञ्चाशद्घटिकाश्चेत् प्रदृश्यते।
तर्हि चैकादशी त्याज्या द्वादशीं समुपोषयेत्॥ ३२
दशमी पलमात्रेण त्याज्या चैकादशीतिथिः।
मदिराबिन्दुपातेन त्याज्यं गाङ्गघटं यथा॥ ३३
एकादशी यदा वृद्धि द्वादशी वा यदा गता।
तदा परा ह्युपोष्या स्यात् पूर्वा वै द्वादशीव्रते॥ ३४

एकादशीव्रतस्यास्य फलं वक्ष्ये व्रजाङ्गनाः ।
यस्य श्रवणमात्रेण वाजपेयफलं लभेत् ॥ ३५
अष्टाशीतिसहस्राणि द्विजान् भोजयते तु यः ।
तत्कृतं फलमाप्नोति द्वादशीव्रतकृन्नरः ॥ ३६
ससागरवनोपेतां यो ददाति वसुन्धराम् ।
तत्सहस्रगुणं पुण्यमेकादश्या महाव्रते ॥ ३७
ये संसारार्णवे मग्नाः पापपङ्कसमाकुले ।
तेषामुद्धरणार्थाय द्वादशीव्रतमुत्तमम् ॥ ३८
रात्रौ जागरणं कृत्वा द्वादशीव्रतकृन्नर ।
न पश्यति यमं रौद्रं युक्तः पापशतैरपि ॥ ३९
पूजयेद् यो हरिं भक्त्या द्वादश्यां तुलसीदलैः ।
लिप्यते न स पापेन पद्मपत्रमिवाम्भसा ॥ ४०
अश्वमेधसहस्राणि राजसूयशतानि च ।
एकादश्युपवासस्य कलां नार्हन्ति षोडशीम् ॥ ४१
दश वै मातृके पक्षे तथा वै दश पैतृके ।
प्रियाया दश पक्षे तु पुरुषानुद्धरेन्नरः ॥ ४२
यथा शुक्ला तथा कृष्णा द्वयोश्च सदृश फलम् ।
धेनुः श्वेता तथा कृष्णा उभयोः सदृशं पयः ॥ ४३
मेरुमन्दरमात्राणि पापानि शतजन्मसु
एका चैकादशी गोप्यो दहते तूलराशिवत् ॥ ४४
विधिवद्विधिहीनं वा द्वादश्यां दानमेव च ।
स्वल्पं वा सुकृतं गोप्यो मेरुतुल्य भवेच्च तत् ॥ ४५
एकादशीदिने विष्णोः शृणुते यो हरेः कथाम् ।
सप्तद्वीपवतीदाने तत्फलं लभते च सः ॥ ४६
शङ्खोद्धारे नरः स्नात्वा दृष्ट्वा देवं गदाधरम् ।
एकादश्युपवासस्य कलां नार्हति षोडशीम् ॥ ४७

प्रभासे च कुरुक्षेत्रे केदारे बद्रिकाश्रमे ।
काश्याञ्च शूकरक्षेत्रे ग्रहणे चन्द्रसूर्ययोः ॥ ४८
सङ्क्रान्तीनां चतुर्लक्षे दानं दत्तं च यन्नरैः ।
एकादश्युपवासस्य कलां नार्हति षोडशीम् ॥ ४९
नागानाञ्च यथा शेषः पक्षीणां गरुडो यथा ।
देवानाञ्च यथा विष्णुर्वर्णानां ब्राह्मणो यथा ॥ ५०
वृक्षाणाञ्च यथाश्वत्थः पत्राणां तुलसी यथा ।
व्रतानाञ्च तथा गोप्यो वरा चैकादशीतिथिः ॥ ५१
दशवर्षसहस्राणि तपस्तप्यति यो नरः ।
तत्तुल्यं फलमाप्नोति द्वादशीव्रतकृन्नरः ॥ ५२
इत्थमेकादशीनाञ्च फलमुक्तं व्रजाङ्गनाः ।
कुरुताशु व्रतं यूयं किं भूयः श्रोतुमिच्छथ ॥ ५३

इति श्रीगर्गसंहितायां माधुर्यखण्डे नारदबहुलाश्वसंवादे
यज्ञसीतोपाख्याने एकादशीमाहात्म्यं नाम
अष्टमोऽध्यायः ॥ ८

गोप्य ऊचुः

वृषभानुसुते सुभ्रूः सर्वशास्त्रार्थपारगे ।
विडम्बयन्ती त्वं वाचा वाचं वाचस्पतेर्मुनेः ॥ १
एकादशीव्रतं राधे केन केन पुरा कृतम् ।
तद् ब्रूहि नो विशेषेण त्वं साक्षाज्ज्ञानशेवधिः ॥ २

राधोवाच

आदौ देवैः कृतं गोप्यो वरमेकादशीव्रतम् ।
भ्रष्टराज्यस्य लाभार्थं दैत्यानां नाशनाय च ॥ ३
वैखानसेन राज्ञा वै कृतमेकादशीव्रतम् ।
स्वपितुस्तारणार्थाय यमलोकगतस्य च ॥ ४
अकस्माल्लुम्पकेनापि ज्ञातित्यक्तेन पापिना ।
एकादशी कृता तेन राज्यं लेभे स लुम्पकः ॥ ५
भद्रावत्यां केतुमता कृतमेकादशीव्रतम् ।
पुत्रहीनेन सद्वाक्यात् पुत्रं लेभे स मानवः ॥ ६
ब्राह्मण्यै देवपत्नीभिर्दत्तमेकादशीव्रतम् ।
तेन लेभे स्वर्गसौख्यं धनधान्यञ्च मानुषी ॥ ७
पुष्पदन्ती माल्यवन्तौ शक्रशापात् पिशाचताम् ।
प्राप्तौ कृतं व्रतं ताभ्यां पुनर्गन्धर्वतां गतौ ॥ ८
पुरा श्रीरामचन्द्रेण कृतमेकादशीव्रतम् ।
समुद्रे सेतुबन्धार्थं रावणस्य वधाय च ॥ ९
लयान्ते च समुत्पन्नाः धातृवृक्षतले सुराः ।
एकादशीव्रतं चक्रुः सर्वकल्याणहेतवे ॥ १०
व्रतं चकार मेधावी द्वादश्याः पितृवाक्यतः ।
अप्सरःस्पर्शदोषेण मुक्तोऽभून्निर्मलद्युतिः ॥ ११

गन्धर्वो ललितः पत्न्यां गतः शापात् स रक्षताम् ।
एकादशीव्रतेनापि पुनर्गन्धर्वतां गतः ॥ १२
एकादशीव्रतेनापि मान्धाता स्वर्गतिं गतः ।
सगरश्च ककुत्स्थश्च मुचुकुन्दो महामतिः ॥ १३
धुन्धुमारादयश्चान्ये राजानो बहवस्तथा ।
ब्रह्मकपालनिर्मुक्तो बभूव भगवान् भवः ॥ १४
धृष्टबुद्धिर्वैश्यपुत्रो ज्ञातित्यक्तो महाखल ।
एकादशीव्रतं कृत्वा वैकुण्ठं स जगाम ह ॥ १५
राज्ञा रुक्माङ्गदेनापि कृतमेकादशीव्रतम् ।
तेन भूमण्डलं भुक्त्वा वैकुण्ठं सपुरो ययौ ॥ १६
अम्बरीषेण राज्ञापि कृतमेकादशीव्रतम् ।
नास्पृशद् ब्रह्मशापोऽपि यो न प्रतिहतः क्वचित् ॥ १७
हेममाली नाम यक्षः कुष्ठी धनदशापतः ।
एकादशीव्रतं कृत्वा चन्द्रतुल्यो बभूव ह ॥ १८
महीजिता नृपेणापि कृतमेकादशीव्रतम् ।
तेन पुत्रं शुभं लब्ध्वा वैकुण्ठं स जगाम ह ॥ १९
हरिश्चन्द्रेण राज्ञापि कृतमेकादशीव्रतम् ।
तेन लब्ध्वा महीराज्यं वैकुण्ठं सपुरो ययौ ॥ २०

श्रीशोभनो नाम पुरा कृते युगे
जामातृकोऽभून्मुचुकुन्दभूभृतः ।
एकादशीं यः समुपोष्य भारते
प्राप्तः स देवैः किल मन्दराचले ॥ २१
अद्यापि राज्यं कुरुते कुबेरवद्
राज्ञ्या युतोऽसौ किल चन्द्रभागया ।
एकादशीं सर्वतिथीश्वरीं परां
जानीथ गोप्यो नहि तत्समान्या ॥ २२

नारद उवाच

इति राधामुखाच्छ्रुत्वा यज्ञसीताश्च गोपिकाः ।
एकादशीव्रतं चक्रुर्विधिवत् कृष्णलालसाः ॥ २३
एकादशीव्रतेनापि प्रसन्नः श्रीहरिः स्वयम् ।
मार्गशीर्षे पूर्णिमायां रासं ताभिश्चकार ह ॥ २४

इति श्रीगर्गसंहितायां माधुर्यखण्डे नारदबहुलाश्वसंवादे
यज्ञसीतोपाख्याने एकादशीमाहात्म्यवर्णनं नाम
नवमोऽध्याय. ॥ ९

नारद उवाच

पुलिन्दकानां गोपीनां करिष्ये वर्णनं ह्यतः ।
सर्वपापहरं पुण्यमद्भुतं भक्तिवर्द्धनम् ॥ १
पुलिन्दा उद्भटाः केचिद्विन्ध्याद्रिवनवासिनः ।
विलुम्पन्तो राजवसु दीनानां न कदाचन ॥ २

कुपितस्तेषु बलवान् विन्ध्यदेशाधिपो बली ।
अक्षौहिणीभ्यां तान् सर्वान् पुलिन्दान् स रुरोध ह ॥ ३
युयुधुस्तेऽपि खड्गैश्च कुन्तैः शूलैः परश्वधैः ।
शक्त्यर्ष्टिभिर्भुशुण्डीभिः शरैः कति दिनानि च ॥ ४

पत्रं ते प्रेषयामासुः कंसाय यदुभूभृते ।
कंसप्रणोदितो दैत्यः प्रलम्बो बलवांस्तदा ॥ ५
योजनद्वयमुच्चाङ्गं कालमेघसमद्युतिम् ।
किरीटकुण्डलधरं सर्पहारविभूषितम् ॥ ६

पादयोः शृङ्खलायुक्तं गदापाणिं कृतान्तवत् ।
ललज्जिह्वं घोररूपं पातयन्तं गिरीन् द्रुमान् ॥ ७
कम्पयन्तं भुवं वेगात् प्रलम्बं युद्धदुर्मदम् ।
दृष्ट्वा प्रधर्षितो राजा ससैन्यो रणमण्डलम् ॥ ८

त्यक्त्वा दुद्राव सहसा सिंहं वीक्ष्य गजो यथा ।
प्रलम्बस्तान् समानीय मथुरामाययौ पुनः ॥ ९
पुलिन्दास्तेऽपि कसस्य भृत्यत्वं समुपागताः ।
सकुटुम्बा. कार्मागरौ वास चक्रुर्नृपेश्वर ॥ १०

तेषां गृहेषु सञ्जाताः श्रीरामस्य वरात् परात् ।
पुलिन्द्यः कन्यका दिव्या रूपिण्यः श्रीरिवाचिताः ॥ ११

तद्दर्शनस्मररुजः पुलिन्द्यः प्रेमविह्वलाः ।
श्रीमत्पादरजो धृत्वा ध्यायन्त्यस्तमहर्निशम् ॥ १२
ताश्चापि रासे सम्प्राप्ताः श्रीकृष्णं परमेश्वरम् ।
परिपूर्णतमं साक्षाद्गोलोकाधिपतिं प्रभुम् ॥ १३
श्रीकृष्णचरणाम्भोजरजो देवैः सुदुर्लभम् ।
अहो भाग्यं पुलिन्दीनां तासां प्राप्तं विशेषतः ॥ १४

यः पारमेष्ठ्यमखिलं न महेन्द्रधिष्ण्यं
नो सार्वभौममनिशं न रसाधिपत्यम् ।
नो योगसिद्धिमभितो न पुनर्भवं वा
वाञ्छत्यलं परमपादरज स भक्तः ॥ १५
निष्किञ्चनाः स्वकृतकर्मफलैर्विरागा
यत्तत्पदं हरिजना मुनयो महान्तः ।
भक्ता जुषन्ति हरिपादरजः प्रसक्ता
अन्ये विदन्ति न सुखं किल नैरपेक्ष्यम् ॥ १६

इति श्रीगर्गसंहितायां माधुर्यखण्डे नारदबहुलाश्व-
संवादे पुलिन्दकोपाख्यानं नाम
दशमोऽध्यायः ॥ १०

नारद उवाच

अन्यासाञ्चैव गोपीनां वर्णनं शृणु मैथिल ।
सर्वपापहरं पुण्यं हरिभक्तिविवर्द्धनम् ॥ १
नीतिविन्मार्गदः शुक्लः पतङ्गो दिव्यवाहनः ।
गोपेष्टश्च व्रजे राजन् जाताः षड् वृषभानवः ॥ २
तेषां गृहेषु सञ्जाता लक्ष्मीपतिवरात् प्रजाः ।
रमावैकुण्ठवासिन्यः श्वेतद्वीपसखीजनाः ॥ ३
ऊर्ध्ववैकुण्ठवासिन्यस्तथाजितपदाश्रिताः ।
श्रीलोकाचलवासिन्यः श्रीसख्योऽपिसमुद्रजाः ॥ ४
श्रीकृष्णस्य प्रसन्नार्थं ताभिर्माघव्रतं कृतम् ।
चिन्तयन्त्यः सदा श्रीमद्गोविन्दचरणाम्बुजम् ॥ ५
माघस्य शुक्लपञ्चम्यां वसन्तादौ हरिः स्वयम् ।
यासां प्रेमपरीक्षार्थं कृष्णस्तासां गृहान् गतः ॥ ६
व्याघ्रचर्माम्बरं बिभ्रज्जटामुकुटमण्डितः ।
विभूतिधूसरो वेणुं वादयन् मोहयन् जगत् ॥ ७
तासां वीथीषु सम्प्राप्तं वीक्ष्य गोप्योऽपि सर्वतः ।
आययुर्दर्शनं कर्तुं मोहिताः प्रेमविह्वलाः ॥ ८
अतीवसुन्दरं दृष्ट्वा योगिनं गोपकन्यकाः ।
ऊचुः परस्परं सर्वाः प्रेमानन्दसमाकुलाः ॥ ९

गोप्य ऊचुः

कोऽयं शिशुर्नन्दसुताकृतिर्वा
कस्यापि पुत्रो धनिनो नृपस्य ।
नारीकुबाग्बाणविभिन्नमर्मा
जातो विरक्तो गतकृत्यकर्मा ॥ १०

अतीव रम्यः सुकुमारदेहो
मनोजवद् विश्वमनोहरोऽयम् ।
अहो कथं जीवति चास्य माता
पिता च भार्या भगिनी विनैनम् ॥ ११
एवं यं सर्वतो यूथीभूत्वा सर्वा व्रजाङ्गनाः ।
पप्रच्छुस्तं योगिवरं विस्मिताः प्रेमविह्वलाः ॥ १२

गोप्य ऊचुः

कस्त्वं योगिन् नाम किं ते कुत्र वासस्तु ते मुने ।
का वृत्तिस्तव का सिद्धिर्वद नो वदतां वर ॥ १३

सिद्ध उवाच

योगेश्वरोऽहं मे वासः सदा मानसरोवरे ।
नाम्नास्वयं प्रकाशोऽहं निरन्नः स्वबलात् सदा ॥ १४
सार्धं परमहंसानां याम्यहं हे व्रजाङ्गनाः ।
भूतं भव्यं वर्तमानं वेद्म्यहं दिव्यदर्शनः ॥ १५
उच्चाटनं मारणञ्च मोहनं स्तम्भनं तथा ।
जानामि मन्त्रविद्याभिर्वशीकरणमेव च ॥ १६

गोप्य ऊचुः

यदि जानासि योगिंस्त्वं वार्तां कालत्रयोद्भवाम् ।
किं वर्तते नो मनसि वद तर्हि महामते ॥ १७

सिद्ध उवाच

भवतीनाञ्च कर्णान्ते कथनीयमिदं वचः ।
त्वदाज्ञया वा वक्ष्येऽहं सर्वेषां शृण्वतामिह ॥ १८

गोप्य ऊचुः

सत्यं योगेश्वरोऽसि त्वं त्रिकालज्ञो न संशयः ।
वशीकरणमन्त्रेण सद्यः पठनमात्रतः ॥ १९

यदि सोऽत्रैव चायाति चिन्तितो यस्तु नो मुने।
तदा मन्यामहे त्वां वै मन्त्रिणां प्रवरं परम् ॥ २०

सिद्ध उवाच

दुर्लभो दुर्घटो भावो युष्माभिर्गदितः स्त्रियः।
तथाप्यहं करिष्यामि वाक्यं न चलते सताम् ॥ २१
निमीलयत नेत्राणि मा शोचं कुरुत स्त्रियः।
भविष्यति न सन्देहो युष्माकं कार्यमेव च ॥ २२

नारद उवाच

तथेति मिलिताक्षीषु गोपीषु भगवान् हरिः।
विहाय तद् योगिरूपं बभौ श्रीनन्दनन्दनः ॥ २३
नेत्राण्युन्मील्य ददृशुः सानन्दं नन्दनन्दनम्।
विस्मितास्तत्प्रभावज्ञा हर्षिता मोहमागताः ॥ २४
माघमासे महारासे पुण्ये वृन्दावने वने।
ताभिः सार्द्धं हरी रेमे सुरीभिः सुरराडिव ॥ २५

इति श्रीगर्गसहितायां माधुर्यखण्डे नारदबहुलाश्वसंवादे
रमावैकुण्ठश्वेतद्वीपोर्ध्ववैकुण्ठाजितपदश्रीलोकाचलवासिनी-
श्रीसखीनामुपाख्यानं नाम
एकादशोऽध्यायः ॥ ११

नारद उवाच

इदं मया ते कथितं गोपीनां चरितं शुभम् ।
अन्यासाञ्चैव गोपीनां वर्णनं शृणु मैथिल ॥ १
वीतिहोत्रोऽग्निभुक् साम्बः श्रीकरो गोपतिः श्रुतः ।
व्रजेशः पावनः शान्त उपनन्दा व्रजे भवाः ॥ २
धनवन्तो रूपवन्तः पुत्रवन्तो बहुश्रुताः ।
शीलादिगुणसम्पन्नाः सर्वे दानपरायणाः ॥ ३
तेषां गृहेषु सञ्जाताः कन्यका देववाक्यतः ।
काश्चिद्दिव्या अदिव्याश्च तथा त्रिगुणवृत्तयः ॥ ४
भूमिगोप्यश्च सञ्जाताः पुण्यैर्नानाविधैः कृतैः ।
राधिकासहचर्यस्ताः सख्योऽभूवन् विदेहराट् ॥ ५
एकदा मानिनीं राधां ताः सर्वा व्रजगोपिकाः ।
ऊचुर्वीक्ष्य हरिं प्राप्तं होलिकाया महोत्सवे ॥ ६

गोप्य ऊचुः

रम्भोरु चन्द्रवदने मधुमानिनीशे
राधे वचः सुललितं ललने शृणु त्वम् ।
श्रीहोलिकोत्सवविहारमलं विधातु-
मायाति ते पुरवरे व्रजभूषणोऽयम् ॥ ७
श्रीयौवनोन्मदविघूर्णितलोचनोऽसौ
नीलालकालिकलितांसकपोलगोलः ।
सत्पीतकञ्चुकघनान्तमशेषमारा-
दाचालयन् ध्वनिमता स्वपदारुणेन ॥ ८
बालार्कमौलिविमलाङ्गदहारमुद्यद्
विद्युत्क्षिपन्मकरकुण्डलमादधानः ।

पीताम्बरेण जयति द्युतिमण्डलोऽसौ
भ्रूमण्डले सधनुषेव घनो दिविस्थः ॥ ९
आबीरकुङ्कुमरसैश्च विलिप्तदेहो
हस्तगृहीतनवसेचनयन्त्र आरात् ।
प्रेक्षंस्तवाशु सखि वाटमतीव राधे
त्वद्रासरङ्गरसकेलिरतः स्थितः सः ॥ १०
निर्गच्छ फाल्गुनमिषेण विहाय मानं
दातव्यमद्य च यशः किल होलिकायै ।
कर्तव्यमाशु निजमन्दिररङ्गवारि
पाटीरपङ्कमकरन्दचयश्च तूर्णम् ॥ ११
उत्तिष्ठ गच्छ सहसा निजमण्डलीभि-
र्यत्रास्ति सोऽपि किल तत्र महामते त्वम् ।
एतादृशोऽपि समयो न कदापि लभ्यः
प्रक्षालितुं करतलं विदितं प्रवाहे ॥ १२

नारद उवाच

अथ मानवती राधा मानं त्यक्त्वा समुत्थिता ।
सखीसङ्घैः परिवृता प्रकर्तुं होलिकोत्सवम् ॥ १३
श्रीखण्डागुरुकस्तूरीहरिद्राकुङ्कुमद्रवैः ।
पूरिताभिर्दृतीभिश्च संयुक्तास्ता व्रजाङ्गनाः ॥ १४
डफहस्ताः पीतवस्त्राः कूजन्नूपुरमेखलाः ।
गायन्त्यो होलिकागीतीर्गालीभिर्हास्यसन्धिभिः ॥ १५
आबीरारुणचूर्णानां मुष्टिभिस्ता इतस्ततः ।
कुर्वन्त्यश्चारुणां भूमिं दिगन्तं चाम्बरं तथा ॥ १६
कोटिशः कोटिशस्तत्र स्फुरन्त्याबीरमुष्टयः ।
सुगन्धारुणचूर्णानां कोटिशः कोटिशस्तथा ॥ १७

सर्वतो जगृहुः कृष्णं कराभ्यां व्रजगोपिकाः ।
यथा मेघञ्च दामिन्यः सन्ध्यायां श्रावणस्य च ॥ १८
तन्मुखञ्च विलिम्पन्त्योऽथाबीरारुणमुष्टिभिः ।
कुङ्कुमाक्तदृतीभिस्तमार्द्रीचक्रुर्विधानतः ॥ १६
भगवानपि तत्रैव यावतीर्व्रजयोषितः ।
धृत्वा रूपाणि तावन्ति विजहार नृपेश्वर ॥ २०
राधया शुशुभे तत्र होलिकाया महोत्सवे ।
बर्षासन्ध्याक्षणे कृष्णः सौदामिन्या घनो यथा ॥ २१

कृष्णोऽपि तद्धस्तकृताक्तनेत्रो
दत्त्वा स्वकीयं नवमुत्तरीयम् ।
ताभ्यो ययौ नन्दगृह परेशो
देवेषु वर्षत्सु च पुष्पवर्षम् ॥ २२

इति श्रीगर्गसंहितायां माधुर्यखण्डे नारदबहुलाश्वसंवादे होलिकोत्सवे दिव्यत्रिगुणवृत्तिभूमिगोप्युपाख्यानं नाम द्वादशोऽध्यायः ॥ १२

नारद उवाच

अथ देवाङ्गनानाञ्च गोपीनां वर्णनं शृणु ।
चतुःपदार्थदं नृणां भक्तिवर्धनमुत्तमम् ॥ १
बभूव मालवे देशे गोपो नन्दो दिवस्पतिः ।
भार्यासहस्रसंयुक्तो धनवान् नीतिवित् परः ॥ २
तीर्थयात्राप्रसङ्गेन मथुरायां समागतः ।
नन्दराजं व्रजाधीशं श्रुत्वा श्रीगोकुलं ययौ ॥ ३
मिलित्वा गोपराज स दृष्ट्वा वृन्दावनप्रियम् ।
नन्दराजाज्ञया तत्र वासं चक्रे महामनाः ॥ ४
योजनद्वयमाश्रित्य घोषान् चक्रे गवां पुनः ।
मुदं प्राप व्रजे राजन् ज्ञातिभिः स दिवस्पतिः ॥ ५
तस्य देवलवाक्येन सर्वा देवजनस्त्रियः ।
जाताः कन्या महादिव्या ज्वलदग्निशिखोपमाः ॥ ६
श्रीकृष्णं सुन्दरं दृष्ट्वा मोहिताः कन्यकाश्च ताः ।
दामोदरस्य प्राप्त्यर्थं चक्रुर्माघव्रतं परम् ॥ ७
अर्धोदयेऽर्के यमुनां नित्यं स्नात्वा व्रजाङ्गनाः ।
उच्चैर्जगुः कृष्णलीलां प्रेमानन्दसमाकुलाः ॥ ८
तासां प्रसन्नः श्रीकृष्णो वरं ब्रूतेत्युवाच ह ।
ता ऊचुस्तत्पदं नत्वा कृताञ्जलिपुटाः शनैः ॥ ९

गोप्य ऊचुः

योगीश्वराणां किल दुर्लभस्त्वं
सर्वेश्वरः कारणकारणोऽसि ।
त्वं नेत्रगामी भवतात् सदा नो
वंशीधरो मन्मथमन्मथाङ्ग ॥ १०

तथास्तु चोक्त्वा हरिरादिदेव
स्तासान्तु यो दर्शनमाततान।
भूयात् सदा ते हृदि नेत्रमार्गे
तथा स आहूत इवाशु चित्ते॥११

परिपूर्णतमः साक्षाच्छ्रीकृष्णो नान्य एव हि।
एककार्यार्थमागत्य कोटिकार्यं चकार ह॥ १२

परिकरीकृतपीतपटं हरि
शिखिकिरीटनतीकृतकन्धरम्।
लकुटवेणुकरं चलकुण्डलं
पटुतरं नटवेषधरं भजे॥ १३

भक्त्यैव वश्यो हरिरादिदेवः
सदा प्रमाणं किल चात्र गोप्यः।
साङ्ख्यञ्च योगं न कृतं कदाभिः
प्रेम्णैव यस्य प्रकृतिं गताः स्युः॥१४

इति श्रीगर्गसंहितायां माधुर्यखण्डे नारदबहुलाश्व-
संवादे देवजनस्त्र्युपाख्यानं नाम
त्रयोदशोऽध्यायः॥ १३

शत्रुभिश्छिन्नकवचश्छिन्नधन्वा हतस्वकः
पुरमेत्य मृधं चक्रे रङ्गोजिः कतिभिर्दिनैः ॥ १२
अनाथः शरणं चेच्छन् कंसाय यदुभूभृते ।
दूतं स्वं प्रेषयामास रङ्गोजिर्भयपीडितः ॥ १३
दूतस्तु मथुरामेत्य सभां गत्वा नताननः ।
कृताञ्जलिश्चौग्रसेनिं नत्वा प्राह गिरार्द्रया ॥ १४

दूत उवाच

रङ्गोजिनामा नृप रङ्गपत्तने
गोपोऽस्ति नीतिज्ञवरः पुराधिपः ।
स्वशत्रुसंरुद्धपुरो महाधिभृद्
अलब्धनाथः शरणं गतस्तव ॥ १५
त्वं दीनदुःखातिहरो महीतले
भौमादिसङ्गीतगुणो महाबलः ।
सुरासुरानुद्भटभूमिपालकान्
विजित्य युद्धे सुरराडिव स्थितः ॥ १६
चन्द्रं चकोरश्च रविं कुशेशयं
यथा शरच्छीकरमेव चातकः ।
क्षुधातुरोऽन्नञ्च जलं तृषातुरः
स्मरत्यसौ शत्रुभये तथा त्वाम् ॥ १७

नारद उवाच

इत्थं श्रुत्वा वचस्तस्य कंसो वै दीनवत्सलः ।
दैत्यकोटिसमायुक्तो मनो गन्तुं समादधे ॥ १८
गोमूत्रचयसिन्दूरकस्तूरीपत्रभृन्मुखम् ।
विन्ध्याद्रिसदृशं श्यामं मदनिर्झरसंयुतम् ॥ १९
पादेषु शृङ्खलाजालं नदन्तं घनवद्भृशम् ।
द्विपं कुवलयापीडं समारुह्य मदोत्कटः ॥ २०

चाणूरमुष्टिकाद्यैश्च केशिव्योमवृषासुरैः ।
सहसा दंशितः कंसः प्रययौ रङ्गपत्तनम् ॥ २१
यदूनाञ्च कुरूणाञ्च वलयोस्तु परस्परम् ।
बाणैः खड्गैस्त्रिशूलैश्च घोरं युद्धं बभूव ह ॥ २२
बाणान्धकारे सञ्जाते कंसो नीत्वा महागदाम् ।
विवेश कुरुसेनासु वने वैश्वानरो यथा ॥ २३
कांश्चिद्वीरान् सकवचान् गदया वज्रकल्पया ।
पातयामास भूपृष्ठे वज्रेणेन्द्रो यथा गिरीन् ॥ २४
रथान् ममर्द पादाभ्यां पार्ष्णिघातेन घोटकान् ।
गजे गजं ताडयित्वा गजान् प्रोन्नीय चाङ्घ्रिषु ॥ २५
स्कन्धयोः कक्षयोर्धृत्वा सनीडान् रत्नकम्बलान् ।
कांश्चिद्बलाद् भ्रामयित्वा चिक्षेप गगने बली ॥ २६
गजान् शुण्डासु चोन्नीय लोलघण्टासमावृतान् ।
चिक्षेप स्वमुखे राजन् मृधे व्योमासुरो बली ॥ २७
रथान् गृहीत्वा साश्वांश्च शृङ्गाभ्यां भ्रामयन् मुहुः ।
चिक्षेप दिक्षु बलवान् दैत्यो दुष्टो वृषासुरः ॥ २८
बलात् पश्चिमपादाभ्यां वीरानश्वानितस्ततः ।
पातयामास राजेन्द्र केशी दैत्याधिपो बली ॥ २९
एवं भयङ्करं युद्धं दृष्ट्वा वै कुरुसैनिकाः ।
शेषा भयातुरा वीरा जग्मुस्तेऽपि दिशो दश ॥ ३०
रङ्गोजि सकुटुम्बं तं नीत्वा कंसोऽथ दैत्यराट् ।
मथुरां प्रययौ वीरो नादयन् दुन्दुभीन् शनैः ॥ ३१
श्रुत्वा पराजयं स्वस्य कौरवाः क्रोधमूर्च्छिताः ।
दैत्यानां समयं दृष्ट्वा सर्वे वै मौनमास्थिताः ॥ ३२
पुरं बर्हिषदं नाम व्रजसीम्नि मनोहरम् ।
रङ्गोजये ददौ कंसो दैत्यानामधिपो बली ॥ ३३

वासं चकार तत्रैव रङ्गोजिर्गोपनायकः ।
बभूवुस्तस्य भार्यासु जालन्धर्यो हरेर्वरात् ॥ ३४
परिणीता गोपजनै रूपयौवनभूषिताः ।
जारधर्मेण सुस्नेहं श्रीकृष्णे ताः प्रचक्रिरे ॥ ३५
चैत्रमासे महारासे ताभिः साकं हरिः स्वयम् ।
पुण्ये वृन्दावने रम्ये रेमे वृन्दावनेश्वरः ॥ ३६

इति श्रीगर्गसंहितायां माधुर्यखण्डे नारदबहुलाश्व-
संवादे जालन्धर्युपाख्यानं नाम
चतुर्दशोऽध्यायः ॥ १४

नारद उवाच

व्रजे शोणपुराधीशो गोपो नन्दो धनी महान् ।
भार्याः पञ्चसहस्राणि बभूवुस्तस्य मैथिल ॥ १
जाता मत्स्यवरात्तासु समुद्रे गोपकन्यकाः ।
तथान्याश्चात्रिवाचापि पृथिवीदोहनान्नृप ॥ २
बर्हिष्मतीपुरन्ध्र्योऽपि जाता जातिस्मराः पराः ।
तथान्याप्सरसोऽभूवन् वरान्नारायणस्य च ॥ ३
तथा सुतलवासिन्यो वामनस्य वरात् स्त्रियः ।
तथा नागेन्द्रकन्याश्च जाताः शेषवरात् परात् ॥ ४
ताभ्यो दुर्वाससा दत्तं कृष्णापञ्चाङ्गमद्भुतम् ।
तेन सम्पूज्य यमुनां वव्रिरे श्रीपतिं वरम् ॥ ५
एकदा श्रीहरिस्ताभिर्वृन्दारण्ये मनोहरे ।
यमुनानिकटे दिव्ये पुंस्कोकिलरुतव्रते ॥ ६
मधुपध्वनिसंयुक्ते कूजत्कोकिलसारसे ।
मधुमासे मन्दवायौ वसन्तलतिकावृते ॥ ७
दोलोत्सवं समारेभे हरिर्मदनमोहनः ।
कदम्बवृक्षे रहसि कल्पवृक्षे मनोहरे ॥ ८
कालिन्दीजलकल्लोलकोलाहलसमाकुले ।
तद्दोलाखेलनं चक्रुस्ता गोप्यः प्रेमविह्वलाः ॥ ९
राधया कीर्तिसुतया चन्द्रकोटिप्रकाशया ।
रेजे वृन्दावने कृष्णो यथा रत्या रतीश्वरः ॥ १०
एवं प्राप्ताश्च याः सर्वाः श्रीकृष्णं नन्दनन्दनम् ।
परिपूर्णतमं साक्षात्तासां किं वर्ण्यते तपः ॥ ११

नागेन्द्रकन्यकाः सर्वाश्चैत्रमासे मनोहरे ।
बलभद्रं हरिं प्राप्ताः कृष्णातीरे तु ताः शुभाः ॥ १२
इदं मया ते कथितं गोपीनां चरितं शुभम् ।
सर्वपापहरं पुण्यं किं भूयः श्रोतुमिच्छसि ॥ १३

बहुलाश्व उवाच

यमुनायाश्च पञ्चाङ्गं दत्तं दुर्वाससा मुने ।
गोपीभ्यो येन गोविन्दः प्राप्तस्तद् ब्रूहि मां प्रभो ॥ १४

नारद उवाच

अत्रैवोदाहरन्तीममितिहासं पुरातनम् ।
यस्य श्रवणमात्रेण पापहानिः परं भवेत् ॥ १५
अयोध्याधिपतिः श्रीमान् मान्धाता राजसत्तमः ।
मृगयां विचरन् प्राप्तः सौभरेराश्रमं शुभम् ॥ १६
वृन्दावने स्थितं साक्षात् कृष्णातीरे मनोहरे ।
नत्वा जामातरं राजा सौभरिं प्राह मानदः ॥ १७

मान्धातोवाच

भगवन् सर्ववित् साक्षात्त्वं परावरवित्तमः ।
लोकानां तमसोऽन्धानां दिव्यसूर्य इवापरः ॥ १८
इहलोके भवेद्राज्यं सर्वसिद्धिसमन्वितम् ।
अमुत्र कृष्णसारूप्यं येन स्यात्तद्वदाशु मे ॥ १९

सौभरिरुवाच

यमुनायाश्च पञ्चाङ्गं वदिष्यामि तवाग्रतः ।
सर्वसिद्धिकरं शश्वत् कृष्णसारूप्यकारणम् ॥ २०

यावत् सूर्य उदेति स्म यावच्च प्रतितिष्ठति ।
तावद्राज्यप्रद चात्र श्रीकृष्णवशकारकम् ।। २१
कवचञ्च स्तवं नाम्नां सहस्रं पटलं तथा ।
पद्धतिं सूर्यवंशेन्द्र पञ्चाङ्गानि विदुर्बुधाः ॥ २२

इति श्रीगर्गसंहितायां माधुर्यखण्डे नारदबहुलाश्व-
संवादे सुतलवासिनीनागेन्द्रकन्योपाख्यान नाम
पञ्चदशोऽध्यायः ।। १५

मान्धातोवाच

यमुनायाः कृष्णराज्ञ्याः कवचं सर्वतोऽमलम् ।
देहि मह्यं महाभाग धारयिष्याम्यहं सदा ॥ १

सौभरिरुवाच

यमुनायाश्च कवचं सर्वरक्षाकरं नृणाम् ।
चतुःपदार्थदं साक्षात् शृणु राजन् महामते ॥ २
कृष्णां चतुर्भुजां श्यामां पुण्डरीकदलेक्षणाम् ।
रथस्थां सुन्दरीं ध्यात्वा धारयेत् कवचं ततः ॥ ३
स्नातः पूर्वमुखो मौनी कृतसन्ध्यः कुशासने ।
कुशैर्बद्धशिखो विप्रः पठेद्वै स्वस्तिकासनः ॥ ४
यमुना मे शिरः पातु कृष्णा नेत्रद्वयं सदा ।
श्यामा भ्रूभङ्गदेशञ्च नासिकां नाकवासिनी ॥ ५
कपोलौ पातु मे साक्षात् परमानन्दरूपिणी ।
कृष्णवामांससम्भूता पातु कर्णद्वयं मम ॥ ६
अधरौ पातु कालिन्दी चिबुकं सूर्यकन्यका ।
यमस्वसा कन्धरञ्च हृदयं मे महानदी ॥ ७
कृष्णप्रिया पातु पृष्ठं तटिनी मे भुजद्वयम् ।
श्रोणीतटञ्च सुश्रोणी कटिं मे चारुदर्शना ॥ ८
ऊरुद्वयन्तु रम्भोरूर्जानुनी अङ्घ्रिभेदिनी ।
गुल्फौ रासेश्वरी पातु पादौ पापप्रहारिणी ॥ ९
अन्तर्बहिरधश्चोर्ध्वं दिशासु विदिशासु च ।
समन्तात् पातु जगतः परिपूर्णतमप्रिया ॥ १०
इदं श्रीयमुनायाश्च कवचं परमाद्भुतम् ।
दशवारं पठेद्भक्त्या निर्धनो धनवान् भवेत् ॥ ११

त्रिभिर्मासैः पठेद्धीमान् ब्रह्मचारी मिताशनः ।
सर्वराज्याधिपत्यञ्च प्राप्यते नात्र संशयः ॥ १२
दशोत्तरशतं नित्यं त्रिमासावधि भक्तितः ।
यः पठेत् प्रयतो भूत्वा तस्य किं किं न जायते ॥ १३
यः पठेत् प्रातरुत्थाय सर्वतीर्थफलं लभेत् ।
अन्ते व्रजेत् परं धाम गोलोकं योगिदुर्लभम् ॥ १४

इति श्रीगर्गसंहितायां माधुर्यखण्डे सौभरिमान्धातृ-
संवादे यमुनाकवचं नाम
षोडशोऽध्यायः ॥ १६

मान्धातोवाच

यमुनायाः स्तवं दिव्यं सर्वसिद्धिकरं परम् ।
सौभरे मुनिशार्दूल वद मां कृपया त्वरम् ॥ १

सौभरिरुवाच

मार्तण्डकन्यकायास्तु स्तवं शृणु महामते ।
सर्वसिद्धिकरं भूमौ चातुर्वर्ग्यफलप्रदम् ॥ २
कृष्णवामांससंभूतायै कृष्णायै सततं नमः ।
नमः श्रीकृष्णरूपिण्यै कृष्णे तुभ्यं नमो नमः ॥ ३

यः पापपङ्काम्बुकलङ्ककुत्सितः
कामी कुधीः सत्सु कलिं करोति हि ।
वृन्दावनं धाम ददाति तस्मै
नदन्मिलिन्दादिकलिन्दनन्दिनी ॥ ४
कृष्णे साक्षात् कृष्णरूपा त्वमेव
वेगावर्ते वर्तते मत्स्यरूपी ।
ऊर्मावूर्मौ कूर्मरूपी सदा ते
बिन्दौ बिन्दौ भाति गोविन्ददेवः ॥ ५

वन्दे लीलावतीं त्वां सघनघननिभां कृष्णवामांसभूतां
वेगं वै वैरजाख्यं सकलजलचयं खण्डयन्तीं बलात् स्वात् ।
छित्त्वा ब्रह्माण्डमारात् सुरनगरनगान् गण्डशैलादिदुर्गान्
भित्त्वा भूखण्डमध्ये तटिनिधृतवतीमूर्मिमालां प्रयान्तीम् ॥ ६
दिव्यं कौ नामधेयं श्रुतमथ यमुने दण्डयत्यद्रितुल्यं
पापव्यूहं त्वखण्डं वसतु मम गिरां मण्डलेऽनुक्षणं तत् ।
दण्ड्यांश्चाकार्यदण्ड्यान् सकृदपि वचसा खण्डितं यद्गृहीतं
भ्रातुर्मार्तण्डसूनोरटति पुरि दृढस्ते प्रचण्डोऽतिदण्डः ॥ ७

रज्जुर्वा विषयान्धकूपतरणे पापाखुदर्वीकरी
वेणुष्णिक्च विराजमूर्तिशिरसो माला विचित्रास्ति वा ।
धन्यं भाग्यमतः परं भुवि नृणां यत्रादिकृद्वल्लभा
गोलोकेऽप्यतिदुर्लभातिसुभगा भात्यद्वितीया नदी ॥ ८

गोपीगोकुलगोपकेलिकलिते कालिन्दि कृष्णप्रभे
त्वत्कूले जललोलगोलविचलत्कल्लोलकोलाहलः ।
त्वत्कान्तारकुतूहलालिकुलकृञ्भङ्कारकेकाकुलः
कूजत्कोकिलसङ्कुलो व्रजलतालङ्कारभृत् पातु माम् ॥९

भवन्ति जिह्वास्तनुरोमतुल्या
गिरो यदा भूसिकता इवासु ।
तदप्यलं याति न ते गुणान्तं
सन्तो महान्तः किल शेषतुल्याः ॥१०

कलिन्दगिरिनन्दिनीस्तव उषस्ययं वा परः
श्रुतश्च यदि पाठितो भुवि तनोति सन्मङ्गलम् ।
जनोऽपि यदि धारयेत् किल पठेच्च यो नित्यशः
स याति परमं पदं निजनिकुञ्जलीलावृतम् ॥११

इति श्रीगर्गसंहितायां माधुर्यखण्डे सौभरि-
मान्धातृसंवादे यमुनास्तवो नाम
सप्तदशोऽध्यायः ॥ १७

मान्धातोवाच

कृष्णायाः पटलं पुण्यं कामदं पद्धतिं तथा ।
वद मां मुनिशार्दूल त्वं साक्षाज्ज्ञानशेवधिः ॥१

सौभरिरुवाच

पटलं पद्धतिं वक्ष्ये यमुनाया महामते ।
कृत्वा श्रुत्वाथ जप्त्वा वा जीवन्मुक्तो भवेन्नरः ॥२
प्रणवं पूर्वमुद्धृत्य मायाबीजं ततः परम् ।
रमाबीजं ततः कृत्वा कामबीजं विधानतः ॥३
कालिन्दीति चतुर्थ्यन्तं देवीपदमतः परम् ।
नमः पश्चात्संविधाय जपेन्मन्त्रमिमं नरः ॥४
जप्त्वैकादशलक्षाणि मन्त्रसिद्धिर्भवेद्भुवि ।
जनैः प्रार्थ्याश्च ये कामाः सर्वे प्राप्याः स्वतश्च ते ॥५
विधाय षोडशदलं पद्मं सिंहासने शुभे ।
कर्णिकायाञ्च कालिन्दीं न्यसेच्छ्रीकृष्णसंयुताम् ॥६
जाह्नवीं विरजां कृष्णां चन्द्रभागां सरस्वतीम् ।
गोमतीं कौशिकीं वेणीं सिन्धुं गोदावरीं तथा ॥७
वेदस्मृतिं वेत्रवतीं शतद्रूं सरयूं तथा ।
पूजयेन्मानवश्रेष्ठ ऋषिकुल्यां ककुद्मिनीम् ॥८
पृथक् पृथक् तद्दलेषु नामोच्चार्य्य विधानतः ।
वृन्दावनं गोवर्द्धनं वृन्दाञ्च तुलसीं तथा ॥९
चतुर्दिक्षु विधायाशु पूजयेन्नामभिः पृथक् ॥१०

ॐ नमो भगवत्यै कलिन्दनन्दिन्यै सूर्यकन्यकायै यमभगिन्यै
श्रीकृष्णप्रियायै यूथीभूतायै स्वाहा ।

अनेन मन्त्रेणावाहनादिषोडशोपचारान्
समाहित उपाहरेत् ।।

इत्येवं पटलं विद्धि तुभ्यं वक्ष्यामि पद्धतिम् ।
यावत् सम्पूर्णतां यांति पुरश्चरणमेवहि ॥११
तावद्भवेद् ब्रह्मचारी जपेन्मौनव्रती द्विजः ।
यवभोजी भूमिशायी पत्रभुक् जितमानसः ॥१२
कामं क्रोधं तथा लोभं मोहं द्वेष विसृज्य सः ।
भक्त्या परमया राजन् वर्तमानस्तु देशकः ।।१३
ब्राह्मे मुहूर्त उत्थाय ध्यात्वा देवी कलिन्दजाम् ।
अरुणोदयवेलायां नद्यां स्नानं समाचारेत् ॥१४
मध्याह्ने चापि सन्ध्यायां सन्ध्यावन्दनतत्परः ।
समाप्ते नियमे राजन् कालिन्दीतीरमास्थितः ॥१५
दशलक्षं ब्राह्मणानां सपुत्राणां महात्मनाम् ।
पूजयित्वा गन्धपुष्पैर्दत्वा तेभ्यः सुभोजनम् ।।१६
वस्त्रभूषणसौवर्णपात्राणि प्रस्फुरन्ति च ।
दक्षिणाश्च शुभा दद्यात्ततः सिद्धिर्भवेत् खलु ॥१७
इति ते पद्धतिः प्रोक्ता मया राजन् महामते ।
कुरु त्वं नियमं सर्वं किं भूयः श्रोतुमिच्छसि ।।१८

इति श्रीगर्गसंहितायां माधुर्यखण्डे सौभरि-
मान्धातृसंवादे पटलपद्धतिवर्णनं नाम
अष्टादशोऽध्यायः ।।१८

मान्धातोवाच

नाम्नां सहस्रं कृष्णायाः सर्वसिद्धिकरं परम् ।
वद मां मुनिशार्दूल त्वं सर्वज्ञो निरामयः ॥१

सौभरिरुवाच

नाम्नां सहस्रं कालिन्द्या मान्धातस्ते वदाम्यहम् ।
सर्वसिद्धिकरं दिव्यं श्रीकृष्णवशकारकम् ॥२

ॐ अस्य श्रीकालिन्दीसहस्रनामस्तोत्रमन्त्रस्य
सौभरिऋषिः श्रीयमुनादेवता अनुष्टुप् छन्दः
मायाबीजमिति कीलकम् रमाबीजमिति शक्तिः
श्रीकलिन्दनन्दिनीप्रसादसिद्ध्यर्थे जपे विनियोगः ।

अथ ध्यानम्

श्यामामम्भोजनेत्रां सघनघनरुचिं रत्नमञ्जीरकूजत्
काञ्चीकेयूरयुक्तां कनकमणिमये बिभ्रतीं कुण्डले द्वे ।
भ्राजच्छ्रीनीलवस्त्रां स्फुरदमलचलद्धारभारां मनोज्ञां
ध्यायेन्मार्तण्डपुत्रीं तनुकिरणचयोद्दीप्तदीपाभिरामाम् ॥३

इति ध्यानम्

ॐ कालिन्दी यमुना कृष्णा कृष्णरूपा सनातनी ।
कृष्णवामांससम्भूता परमानन्दरूपिणी ॥४
गोलोकवासिनी श्यामा वृन्दावनविनोदिनी ।
राधासखी रासलीला रासमण्डलमण्डना ॥५
निकुञ्जमाधवीवल्ली रङ्गवल्ली मनोहरा ।
श्रीरासमण्डलीभूता यूथीभूता हरिप्रिया ॥६
गोलोकतटिनी दिव्या निकुञ्जतलवासिनी ।
दीर्घोर्मिवेगगम्भीरा पुष्पपल्लववाहिनी ॥७

घनश्यामा मेघमाला बलाका पद्ममालिनी ।
परिपूर्णतमा पूर्णा पूर्णब्रह्मप्रिया परा ॥८
महावेगवती साक्षान्निकुञ्जद्वाविनिर्गता ।
महानदी मन्दगतिविरजावेगभेदिनी ॥९
अनेकब्रह्माण्डगता ब्रह्मद्रवसमाकुला ।
गङ्गामिश्रा निर्मलाभा निर्मला सरितां वरा ॥१०
रत्नबद्धोभयतटी हंसपद्मादिसङ्कुला ।
नदी निर्मलपानीया सर्वब्रह्माण्डपावनी ॥११
वैकुण्ठपरिखीभूता परिखा पापहारिणी ।
ब्रह्मलोकागता ब्राह्मी स्वर्गा स्वर्गनिवासिनी ॥१२
उल्लसन्ती प्रोत्पतन्ती मेरुमाला महोज्ज्वला ।
श्रीगङ्गाम्भःशिखरिणी गण्डशैलविभेदिनी ॥१३
देशान् पुनन्ती गच्छन्ती वहन्ती भूमिमध्यगा ।
मार्तण्डतनुजा पुण्या कलिन्दगिरिनन्दिनी ॥१४
यमस्वसा मन्दहासा सुद्विजारचिताम्बरा ।
नीलाम्बरा पद्ममुखी चरन्ती चारुदर्शना ॥ १५
रम्भोरूः पद्मनयना माधवी प्रमदोत्तमा ।
तपश्चरन्ती सु ोणी कूजन्नूपुरमेखला ॥ १६
जलस्थिता श्यामलाङ्गी खाण्डवाभाविहारिणी ।
गाण्डीविभाषिणी वन्या श्रीकृष्णं वरमिच्छती ॥ १७
द्वारकागमना राज्ञी पट्टराज्ञी परङ्गता ।
महाराज्ञी रत्नभूषा गोमतीतीरचारिणी ॥ १८
स्वकीया स्वसुखा स्वार्था स्वीयकार्यार्थसाधिनी ।
नवलाङ्गा बला मुग्धा वराङ्गा वामलोचना ॥ १९
अज्ञातयौवना दीना प्रभा कान्तिर्द्युतिश्छविः ।
शोभा भा परमा कीर्तिः कुशला ज्ञातयौवना ॥ २०

नवोढा मध्यागा मध्या प्रौढिः प्रौढा प्रगल्भका।
धीराऽधीरा धैर्य्यधरा ज्येष्ठा श्रेष्ठा कुलाङ्गना ॥ २१
क्षणप्रभा चञ्चलार्चा विद्युत् सौदामिनी तडित्।
स्वाधीनपतिका लक्ष्मीः पुष्टा स्वाधीनभर्तृका ॥ २२
कलहान्तरिता भीरुरिच्छाप्रोत्कण्ठिताकुला।
कशिपुस्था दिव्यशय्या गोविन्दहृतमानसा ॥ २३
खण्डिताखण्डशोभाढ्या विप्रलब्धाभिसारिका।
विरहार्ता विरहिणी नारी प्रोषितभर्तृका ॥ २४
मानिनी मानदा प्राज्ञा मन्दारवनवासिनी।
झङ्कारिणी झणत्कारी रणन्मञ्जीरनूपुरा ॥ २५
मेखला मेखलाकाञ्ची श्रीकाञ्ची काञ्चनामयी।
कञ्चुकी कञ्चुकमणिः श्रीकण्ठाढ्या महामणिः ॥ २६
श्रीहारिणी पद्महारा मुक्ता मुक्ताफलार्चिता।
रत्नकङ्कणकेयूरा स्फुरदङ्गुलिभूषणा ॥ २७
दर्पणा दर्पणीभूता दुष्टदर्पविनाशिनी।
कम्बुग्रीवा कम्बुधरा ग्रैवेयकविराजिता ॥ २८
ताटङ्किनी टङ्कधरा हेमकुण्डलमण्डिता।
शिखाभूषा भालपुष्पा नासामौक्तिकशोभिता ॥ २९
मणिभूमिगता देवी रैवताद्रिविहारिणी।
वृन्दावनगता वृन्दा वृन्दारण्यनिवासिनी ॥ ३०
वृन्दावनलता माधवी वृन्दारण्यविभूषणा।
सौन्दर्यलहरी लक्ष्मीर्मथुरातीर्थवासिनी ॥ ३१
विश्रान्तवासिनी काम्या रम्या गोकुलवासिनी।
रमणस्थलशोभाढ्या महावनमहानदी ॥ ३२
प्रणता प्रोन्नता पुष्टा भारती भरतार्चिता।
तीर्थराजगतिर्गोत्रा गङ्गासागरसङ्गमा ॥ ३३

सप्ताब्धिभेदिनी लोला सप्तद्वीपगता बलात् ।
लुठन्ती शैलभिद्यन्ती स्फुरन्ती वेगवत्तरा ॥ ३४
काञ्चनी काञ्चनीभूमिः काञ्चनीभूमिभाविता ।
लोकदृष्टिर्लोकलीला लोकालोकाचलार्चिता ॥ ३५
शैलोद्गता स्वर्गगता स्वर्गार्चा स्वर्गपूजिता ।
वृन्दावनी वनाध्यक्षा रक्षा कक्षा तटी पटी ॥ ३६
असिकुण्डगता कच्छा स्वच्छन्दोच्छलितादिजा ।
कुहरस्था रयप्रस्था प्रस्था शान्ततरातुरा ॥ ३७
अम्बुच्छटा सीकराभा दर्दुरा दर्दुरी दरा ।
पापाङ्कुशा पापसिंही पापद्रुमकुठारिणी ॥ ३८
पुण्यसङ्घा पुण्यकीर्तिः पुण्यदा पुण्यवर्द्धिनी ।
मधोर्वननदीमुख्या तुला तालवनस्थिता ॥ ३९
कुमुद्वननदी कुब्जा कुमुदाम्भोजवर्द्धिनी ।
प्लवरूपा वेगवती सिंहसर्पादिवाहिनी ॥ ४०
बहुली बहुदा बह्वी बहुलावनवन्दिता ।
राधाकुण्डकलाराध्या कृष्णकुण्डजलाश्रिता ॥ ४१
ललिताकुण्डगा घण्टा विशाखाकुण्डमण्डिता ।
गोविन्दकुण्डनिलया गोपकुण्डतरङ्गिणी ॥ ४२
श्रीगङ्गा मानसीगङ्गा कुसुमौषरभाविनी ।
गोवर्द्धनी गोधनाढ्या मयूरी वरवर्णिनी ॥ ४३
सारसी नीलकण्ठाभा कूजत्कोकिलपोतकी ।
गिरिराजप्रसूर्भूरिरातपत्रातपत्रिणी ॥ ४४
गोवर्द्धनाङ्का गोदन्ती दिव्यौषधिनिधिः श्रुतिः ।
पारदी पारदमयी नारदी शारदा भृतिः ॥ ४५
श्रीकृष्णचरणाङ्कस्था कामा कामवनाञ्चिता ।
कामाटवीर्नन्दिनी च नन्दग्राममहीधरा ॥ ४६

बृहत्सानुद्युतिः प्रोता नन्दीश्वरसमन्विता ।
ककिली कोकिलमयी भाण्डीरकुशकौशला ॥ ४७
लोहार्गलप्रदा कारा काश्मीरवसनावृता ।
बर्हिषदी शोणपुरी शूरक्षेत्रपुराधिका ॥ ४८
नानाभरणशोभाढ्या नानारत्नसमन्विता ।
नानानारीकदम्बाढ्या नानावस्त्रविराजिता ॥ ४९
नानालोकगतावर्चिर्नानाजलसमन्विता ।
स्त्रीरत्नं रत्ननिलया ललना रत्नरञ्जिनी ॥ ५०
रङ्गिणी रङ्गभूम्याढ्या रङ्गारङ्गमहीरुहा ।
राजविद्या राजगुह्या जगत्कीर्त्तिर्घनाघना ॥ ५१
विलोलघण्टा कृष्णाङ्गा कृष्णदेहसमुद्भवा ।
नीलपङ्कजवर्णाभा नीलपङ्कजहारिणी ॥ ५२
नीलाभा नीलपद्माढ्या नीलाम्भोरुहवासिनी ।
नागवल्ली नागपुरी नागवल्लीदलार्चिता ॥ ५३
ताम्बूलचर्चिता चर्चा मकरन्दमनोहरा ।
सकेसरा केसरिणी केशपाशाभिशोभिता ॥ ५४
कज्जलाभा कज्जलाक्ता कज्जलीकलिताञ्जना ।
अलक्तचरणा ताम्रा लाक्षाताम्रकृताम्बरा ॥ ५५
सिन्दूरिता लिप्तगाणिः सुश्रीः श्रीखण्डमण्डिता ।
पाटीरपङ्कवसनी जटामांसीरुचाम्बरा ॥ ५६
आगर्य्यगुरुगन्धाक्ता तगराश्रितमारुता ।
सुगन्धितैलरुचिरा कुन्तलालिः सुकुन्तला ॥ ५७
शकुन्तलाऽपांसुलास्वा पातिव्रत्यपरायणा ।
सूर्यप्रभा सूर्यकन्या सूर्यदेहसमुद्भवा ॥ ५८
कोटिसूर्य्यप्रतीकाशा सूर्यजा सूर्यनन्दिनी ।
संज्ञा संज्ञासुता स्वेच्छासंज्ञामोदप्रदायिनी ॥ ५९

संज्ञापत्री स्फुरच्छाया तपन्ती तापकारिणी ।
सावर्ण्यनुभवा वेदी वडवासौख्यदायिनी ॥ ६०
शनैश्चरानुजा कीला चन्द्रवंशविवर्द्धिनी ।
चन्द्रवंशवधूश्चन्द्रा चन्द्रावलिसहायिनी ॥ ६१
चन्द्रावली चन्द्रलेखा चन्द्रकान्तानुगांशुला ।
भैरवी पिङ्गला शङ्की लीलावत्यागरीमयी ॥ ६२
धनश्रीर्देवगान्धारी स्वर्मणिर्गुणवर्द्धिनी ।
व्रजमल्लार्यन्धकारी विचित्रा जयकारिणी ॥ ६३
गान्धारी मञ्जरी टोडी गुर्ज्जर्य्यासावरी जया ।
कर्णाटी रागिणी गौडी वैराटी गौरवाटिका ॥ ६४
चतुश्चन्द्रकला हेरी तैलङ्गी विजयावती ।
ताली तालस्वरा गाना क्रियामानप्रकाशिनी ॥ ६५
बैशाखी मचला चारुम्राचारी घूंघटी घटा ।
वैहागरी सोरठीशा कैदारी जलधारिका ॥ ६६
कामाकरश्रीः कल्याणी गौडकल्याणमिश्रिता ।
रामसञ्जीविनी हेला मन्दारी कामरूपिणी ॥ ६७
सारङ्गी मारुती होढा सागरी कामवादिनी ।
वैभासी मङ्गला चान्द्री रासमण्डलमण्डना ॥ ६८
कामधेनुः कामलता कामदा कमनीयका ।
कल्पवृक्षस्थली स्थूला सुधासौधनिवासिनी ॥ ६९
गोलोकवासिनी सुभ्रूर्यष्टिभृद्द्वारपालिका ।
शृङ्गारप्रकरा शृङ्गा स्वच्छा शय्योपकारिका ॥ ७०
पार्षदा सुमुखीसेव्या श्रीवृन्दावनपालिका ।
निकुञ्जभृत्कुञ्जपुञ्जा गुञ्जाभरणभूषिता ॥ ७१
निकुञ्जवासिनी प्रोष्या गोवर्द्धनतटीभवा ।
विशाखा ललिता रामा विरजा मधुमाधवी ॥ ७२

एकानेकसखी शुक्ला सखीमध्या महामनाः ।
श्रुतिरूपा ऋषिरूपा मैथिलाः कौशलाः स्त्रियः ॥ ७३
अयोध्यापुरवासिन्यो यज्ञसीताः पुलिन्दकाः ।
रमावैकुण्ठवासिन्यः श्वेतद्वीपसखीजनाः ॥ ७४
ऊर्ध्ववैकुण्ठवासिन्यो दिव्याजितपदाश्रिताः ।
श्रीलोकाचलवासिन्यः श्रीसख्यः सागरोद्भवाः ॥ ७५
दिव्या अदिव्या दिव्याङ्गा व्याप्तास्त्रिगुणवृत्तयः ।
भूमिगोप्यो देवनार्यो लता औषधि वीरुधः ॥ ७६
जालन्धर्य्यः सिन्धुसुताः पृथुबर्हिष्मतीभवाः ।
दिव्याम्बरा अप्सरसः सौतलानागकन्यकाः ॥ ७७
परंधाम परंब्रह्म पौरुषी प्रकृतिः परा ।
तटस्था गुणभूर्गीता गुणागुणमयी गुणा ॥ ७८
सिद्धनासदसन्माला द्रष्ट्री दृश्या गुणाकरी ।
महत्तत्त्वमहङ्कारो मनो बुद्धिः प्रचेतना ॥ ७९
चेतोवृत्तिः स्वान्तरात्मा चतुर्द्धा चतुरक्षरा ।
चतुर्व्यूहश्चतुर्मूर्तिर्व्योमवायुरदोजलम् ॥ ८०
मही शब्दो रसो गन्धः स्पर्शो रूपमनेकधा ।
कर्मेन्द्रियं कर्ममयी ज्ञानं ज्ञानेन्द्रियं द्विधा ॥ ८१
त्रिधाधिभूतमध्यात्ममधिदैवमधिस्थितम् ।
ज्ञानशक्तिः क्रियाशक्तिः सर्वदेवाधिदेवता ॥ ८२
तत्त्वसङ्घा विराण्मूर्तिर्धारणा धारणामयी ।
श्रुतिः स्मृतिर्वेदमूर्तिः संहिता गर्गसंहिता ॥ ८३
पाराशरीशा वासिष्ठी पारहंसीविधातृका ।
याज्ञवल्की भागवती श्रीमद्भागवतार्चिता ॥ ८४
रामायणमयी रम्या पुराणपुरुषप्रिया ।
पुराणमूर्तिः पुण्याङ्गा शास्त्रमूर्तिर्महोन्नता ॥ ८५

मनीषा धिषणा बुद्धिर्वाणी धीः शेमुषी मतिः ।
गायत्री वेदसावित्री ब्रह्माणी ब्रह्मलक्षणा ॥ ८६
दुर्गापर्णा सती सत्या पार्वती चण्डिकाम्बिका ।
आर्या दाक्षायणी दाक्षी दक्षयज्ञविघातिनी ॥ ८७
पुलोमजा शचीन्द्राणी देवी देववरार्पिता ।
वयुनाधारिणी धन्या वायवी वायुवेगगा ॥ ८८
यमानुजा संयमनी संज्ञाच्छाया स्फुरद्द्युतिः ।
रत्नदेवी रत्नवृन्दा तारा तरणिमण्डला ॥ ८९
रुचिः शान्तिः क्षमा शोभा दया दक्षद्युतिस्त्रपा ।
तलतुष्टिर्विभा पुष्टिः सन्तुष्टिः सुष्ठुभावना ॥ ९०
चतुर्भुजा चारुनेत्रा द्विभुजाऽष्टभुजा बला ।
शङ्खहस्ता पद्महस्ता चक्रहस्ता गदाधरा ॥ ९१
निषङ्गधारिणी चर्मखड्गपाणिर्धनुर्धरा ॥
धनुष्टङ्कारिणी योद्ध्री दैत्योद्भटविनाशिनी ॥ ९२
रथस्था गरुडारूढा श्रीकृष्णहृदयस्थिता ।
वंशीधरा कृष्णवेषा स्रग्विणी वनमालिनी ॥ ९३
किरीटधारिणी याना मन्दमन्दगतिर्गतिः ।
चन्द्रकोटिप्रतीकाशा तन्वी कोमलविग्रहा ॥ ९४
भैष्मी भीष्मसुता भीमा रुक्मिणी रुक्मरूपिणी ।
सत्यभामा जाम्बवती सत्या भद्रा सुदक्षिणा ॥ ९५
मित्रवृन्दा सखीवृन्दा वृन्दारण्यध्वजोर्ध्वगा ।
शृङ्गारकारिणी शृङ्गा शृङ्गभूः शृङ्गदाखुगा ॥ ९६
तितिक्षेक्षा स्मृतिः स्पर्धा स्पृहा श्रद्धा स्वनिर्वृतिः ।
ईशा तृष्णाभिदा प्रीतिर्हिंसा याच्ञा क्लमा कृषिः ॥ ९७
आशा निद्रा योगनिद्रा योगिनी योगदा युगा ।
निष्ठा प्रतिष्ठा शमितिः सत्वप्रकृतिरुत्तमा ॥ ९८

तमः प्रकृतिदुर्मर्षी रजः प्रकृतिरानतिः ।
क्रियाऽक्रिया कृतिग्लीनिः सात्त्विक्याध्यात्मिकी वृषा ॥ ६६
सेवा शिखामणिर्वृद्धिराहूतिः सुमतिर्द्युभूः ।
रज्जुर्द्विदाम्नी षड्वर्गा संहिता सौख्यदायिनी ॥ १००
उक्तिः प्रोक्तिर्देशभाषा प्राकृतिः पिङ्गलोद्भवा ।
नागभाषा नागभूषा नागरी नगरी नगा ॥ १०१
नौर्नौका भवनौर्भाव्या भवसागरसेतुका ।
मनोमयी दारुमयी सैकती सिकतामयी ॥ १०२
लेख्या लेप्या मणिमयी प्रतिमा हेमनिर्मिता ।
शैली शैलभवा शीला शीकराभा चलाचला ॥ १०३
अस्थिता स्वस्थिता तूली वैदिकी तान्त्रिकी विधिः ।
सन्ध्या सन्ध्याभ्रवसना वेदसन्धिः सुधामयी ॥ १०४
सायन्तनीशिखा वेध्या सूक्ष्मा जीवकलाकृतिः ।
आत्मभूता भाविताऽण्वी प्रह्वी कमलकर्णिका ॥ १०५
नीराजनी महाविद्या कन्दली कार्यसाधिनी ।
पूजा प्रतिष्ठा विपुला पुनन्ती पारलौकिकी ॥ १०६
शुक्ला शुक्तिर्मौक्तिकाभा प्रतीतिः परमेश्वरी ।
विराजोष्णिग् विराट्वेणी वेणुका वेणुनादिनी ॥ १०७
आवर्त्तिनी वार्तिकदा वार्त्ता वृत्तिर्विमानगा ।
रासाढ्या रासिनी रासी रासमण्डलमण्डली ॥ १०८
गोपगोपेश्वरी गोपी गोपीगोपालवन्दिता ।
गोचारिणी गोपनदी गोपानन्दप्रदायिनी ॥ १०६
पशव्यदा गोपसेव्या कोटिशो गोगणावृता ।
गोपानुगा गोपवती गोविन्दपदपादुका ॥ ११०
वृषभानुसुता राधा श्रीकृष्णवशकारिणी ।
कृष्णप्राणाधिका शश्वद्रसिका रसिकेश्वरी १११

अवटोदा ताम्रपर्णी कृतमाला विहायसी ।
कृष्णा वेणी भीमरथी तापी रेवा महापगा ॥ ११२
वैयासकी च कावेरी तुङ्गभद्रा सरस्वती ।
चन्द्राभागा वेत्रवती ऋषिकुल्या ककुद्मती ॥ ११३
गौतमी कौशिकी सिन्धुर्बाणगङ्गातिसिद्धिदा ।
गोदावरी रत्नमाला गङ्गा मन्दाकिनी बला ॥ ११४
स्वर्णदी जाह्नवी वेला वैष्णवी मङ्गलालया ।
बाला विष्णुपदी प्रोक्ता सिन्धुसागरसङ्गता ॥ ११५
गङ्गासागरशोभाढ्या सामुद्री रत्नदा धुनी ।
भागीरथी स्वर्धुनीभूः श्रीवामनपदच्युता ॥ ११६
लक्ष्मी रमा रामणीया भार्गवी विष्णुवल्लभा ।
सीतार्चिर्जानकीमाता कलङ्करहिता कला ॥ ११७
कृष्णपादाब्जसम्भूता सर्वा त्रिपथगामिनी ।
धरा विश्वम्भरानन्ता भूमिर्धात्री क्षमामयी ११८
स्थिरा धरित्री धरणिरुर्वी शेषफणस्थिता ।
अयोध्या राघवपुरी कौशिकी रघुवंशजा ॥ ११९
मथुरा माथुरी पन्था यादवी ध्रुवपूजिता ।
मायापूर्बिल्वनीलाद्रिर्गङ्गाद्वारविनिर्गता ॥ १२०
कुशावर्तमयी ध्रौव्या ध्रुवमण्डलमध्यगा ।
काशी शिवपुरी शैवा वैन्ध्या वाराणसी शिवा ॥ १२१
अवन्तिका देवपुरी प्रोज्ज्वलोज्जयिनीजिता ।
द्वारावती द्वारकामा कुशभूता कुशस्थली ॥ १२२
महापुरी सप्तपुरी नन्दिग्रामस्थलस्थिता ।
शालग्रामशिलादित्या शम्भलग्राममध्यगा ॥ १२३
वंशगोपालिनी क्षिप्रा हरिमन्दिरवर्तिनी ।
बर्हिष्मती हस्तिपुरी शक्रप्रस्थनिवासिनी ॥ १२४

दाण्डकी सैन्धवी जम्बूः पौष्करी पुष्करप्रसूः ।
उत्पलावर्तगमना नैमिषी नैमिषावृता ॥ १२५
कुरुजाङ्गलभूः काली हैमवत्यार्बुदी बुधा ।
शूकरक्षेत्रविदिता श्वेतवाराहधारिता ॥ १२६
सर्वतीर्थमयी तीर्था तीर्थानां तीर्थकारिणी ।
हारिणी सर्वदोषाणां दायिनी सर्वसम्पदाम् ॥ १२७
वर्द्धिनी तेजसां साक्षाद्गर्भवासनिकृन्तनी ।
गोलोकधामधनिनी निकुञ्जनिजमञ्जरी ॥ १२८
सर्वोत्तमा सर्वपुण्या सर्वसौन्दर्यशृङ्खला ।
सर्वतीर्थोपरिगता सर्वतीर्थाधिदेवता ॥ १२९
नाम्नां सहस्रं कालिन्द्याः कीर्तिदं कामदं परम् ।
महापापहरं पुण्यमायुर्वर्द्धनमुत्तमम् ॥ १३०
एकवारं पठेद्रात्रौ चौरेभ्यो न भयं भवेत् ।
द्विवारं प्रपठेन्मार्गे दस्युभ्यो न भयं क्वचित् ॥ १३१
द्वितीयान्तु समारभ्य पठेत् पूर्णावधिं द्विजः ।
दशवारमिदं भक्त्या ध्यात्वा देवीं कलिन्दजाम् ॥ १३२
रोगी रोगात् प्रमुच्येत बद्धो मुच्येत बन्धनात् ।
गुर्विणी जनयेत् पुत्रं विद्यार्थी पण्डितो भवेत् ॥ १३३
मोहनं स्तम्भनं शश्वद्वशीकरणमेव च ।
उच्चाटनं घातनञ्च शोषणं दीपनं तथा ॥ १३४
उन्मादनं तापनञ्च निधिदर्शनमेव च ।
यद्यद्वाञ्छति चित्तेन तत्तत् प्राप्नोति मानवः ॥ १३५
ब्राह्मणो ब्रह्मवर्चस्वी राजन्यो जगतीपतिः ।
वैश्यो निधिपतिर्भूयाच्छूद्रः श्रुत्वा तु निर्मलः ॥ १३६
पूजाकाले तु यो नित्यं पठते भक्तिभावतः ।
लिप्यते न स पापेन पद्मपत्रमिवाम्भसा ॥ १३७

शतवारं पठेन्नित्यं वर्षावधिमतः परम् ।
पटलं पद्धतिं कृत्वा स्तवञ्च कवचं तथा ॥ १३८
सप्तद्वीपमहीराज्यं प्राप्नुयान्नात्र संशयः ॥ १३९
निष्कारणं पठेद् यस्तु यमुनाभक्तिसंयुतः ।
त्रैवर्ग्यमेत्य सुकृती जीवन्मुक्तो भवेदिह ॥ १४०
निकुञ्जलीलाललितं मनोहरं
कलिन्दजाकूललताकदम्बकम् ।
वृन्दावनोन्मत्तमिलिन्दशब्दितं
व्रजेत् स गोलोकमिदं पठेच्च यः ॥ १४१

इति श्रीगर्गसंहितायां माधुर्यखण्डे सौभरिमान्धातृ-
संवादे यमुनासहस्रनामकथनं नाम
एकोनविंशोऽध्यायः ॥१९

नारद उवाच

इति कृष्णास्तवं श्रुत्वा मान्धाता नृपसत्तमः ।
अयोध्यां प्रययौ वीरो नत्वा श्रीसौभरिं मुनिम् ॥ १
इदं मया ते कथितं गोपीनां चरितं शुभम् ।
महापापहरं पुण्यं किं भूयः श्रोतुमिच्छसि ॥ २

बहुलाश्व उवाच

श्रुतं तव मुखाद् ब्रह्मन् गोपीनां वर्णनं परम् ।
यमुनायाश्च पञ्चाङ्गं महापातकनाशनम् ॥ ३
श्रीकृष्णः सबलः साक्षाद्गोलोकाधिपतिः प्रभुः ।
अग्रे चकार कां लीलां ललितां व्रजमण्डले ॥ ४

नारद उवाच

एकदा चारयन् गाः स्वाः सबलो गोपबालकैः ।
भाण्डीरे यमुनातीरे बाललीलां चकार ह ॥ ५
विहारं कारयन् बालैर्वाह्यवाहकलक्षणम् ।
विजहार वने कृष्णो दर्शयन् गा मनोहराः ॥ ६
तत्रागतो गोपरूपी प्रलम्बः कंसनोदितः ।
न ज्ञातो बालकैः सोऽपि हरिणा विदितोऽभवत् ॥ ७
विहारे विजयं रामं नेतुं कोऽपि न मन्यते ।
उवाह तं प्रलम्बोऽसौ भाण्डीराद् यमुनातटम् ॥ ८
अवरोहणतो दैत्यो मथुरां गन्तुमुद्यतः ।
दधार घनवद्रूपं गिरीन्द्र इव दुर्गमः ॥ ९
बभौ बलो दैत्यपृष्ठे सुन्दरो लोलकुण्डलः ।
आकाशस्थः पूर्णचन्द्रः सतडिज्जलदो यथा ॥ १०

दैत्यं भयङ्करं वीक्ष्य बलदेवो महाबलः ।
रुषा हन्न् मुष्टिना तं शिरस्यद्रिं यथाद्रिभित् ॥ ११
विशीर्णमस्तको दैत्यो यथा वज्रहतो गिरिः ।
पपात भूमौ सहसा चालयन् वसुधातलम् ॥ १२
तज्ज्योतिर्निर्गतं दीर्घं बले लीनं बभूव ह ।
तदैव ववृषुर्देवाः पुष्पैर्नन्दनसम्भवैः ॥
अभूज्जयजयारावो दिवि भूमौ नृपेश्वर ॥ १३
एवं श्रीबलदेवस्य चरितं परमाद्भुतम् ।
मया ते कथितं राजन् किं भूयः श्रोतुमिच्छसि ॥ १४

बहुलाश्व उवाच

कोऽयं दैत्यः पूर्वकाले प्रलम्बो रणदुर्मदः ।
बलदेवस्य हस्तेन मुक्तिं प्राप कथं मुने ॥ १५

नारद उवाच

शिवस्य पूजनार्थं हि यक्षराट् स्ववने शुभे ।
कारयामास पुष्पाणां रक्षां यक्षैरितस्ततः ॥ १६
तदण्यस्यापि जगृहुः पुष्पाणि प्रस्फुटन्ति च ।
ततः क्रुद्धो ददौ शापं यक्षराट् धनदो बली ॥ १७
ये गृह्णन्त्यस्य पुष्पाणि स्वे चान्ये सुरमानवाः ।
भवितारोऽसुराः सर्वे मच्छापात् सहसा भुवि ॥ १८
हूहूसुतोऽथ विजयो विचरंस्तीर्थभूमिषु ।
वनं चैत्ररथं प्राप्तो गायन् विष्णुगुणान् पथि ॥ १९
वीणापाणिरजानन् यो गन्धर्वः सुमनांसि च ।
गृहीत्वा सोऽसुरो जातो गन्धर्वत्वं विहाय तत् ॥ २०
तदैव शरणं प्राप्तः कुबेरस्य महात्मनः ।
नत्वा तत्प्रार्थनां चक्रे कृताञ्जलिपुटः शनैः ॥२१

तस्मै प्रसन्नो राजेन्द्र कुबेरोऽपि वरं ददौ ।
त्वं विष्णुभक्तः शान्तात्मा मा शोकं कुरु मानद ॥२२
द्वापरान्ते च ते मुक्तिर्बलदेवस्य हस्ततः ।
भविष्यति न सन्देहो भाण्डीरे यमुनातटे ॥२३

नारद उवाच

हूहूसुतः स गन्धर्वः प्रलम्बोऽभून्महाऽसुरः ।
कुबेरस्य वराद्राजन् परं मोक्षं जगाम ह ॥२४

इति श्रीगर्गसंहितायां माधुर्यखण्डे नारदबहुलाश्व-
संवादे प्रलम्बवधो नाम
विंशोऽध्यायः ॥२०

नारद उवाच

अथ क्रीडाप्रसक्तेषु गोपेषु सबलेषु च ।
तृणलोभेन विविशुर्गावः सर्वा महद्वनम् ॥१
ता आनेतुं गोपबाला. प्राप्ता मुञ्जाटवीं पराम् ।
सम्भूतस्तत्र दावाग्निः प्रलयाग्निसमो महान् ॥२
गोभिर्गोपाः समेतास्ते श्रीकृष्णं सबलं हरिम् ।
वदन्तः पाहि पाहीति भयार्ताः शरणं गताः ॥३
वीक्ष्य वह्निभयं स्वानां कृष्णो योगेश्वरेश्वरः ।
न्यमीलयत मा भैष्ट लोचनानीत्यभाषत ॥४
तथाभूतेषु गोपेषु तमग्निं भयकारकम् ।
अपिबद् भगवान् देवो देवानां पश्यतां नृप ॥५
एवं पीत्वा महावह्निं नीत्वा गोपालगोगणम् ॥
प्राप्तोऽभूद् यमुनापारं शुभाशोकवने हरिः ॥६
तत्र क्षुत्पीडिता गोपाः श्रीकृष्णं सबलं हरिम् ।
कृताञ्जलिपुटा ऊचुः क्षुधार्ताः स्मो वयं प्रभो ॥७
तदा तान् प्रेषयामास यज्ञ आङ्गिरसे हरिः ।
ते गत्वा तं यज्ञवरं नत्वोचुर्विमलं वचः ॥८

गोपा ऊचुः

गोपालबालैः सबलः समागतो
गाश्चारयञ्छ्रीव्रजराजनन्दनः ।
क्षुत्संयुतेऽस्मै समणाय भूसुराः
प्रयच्छताश्वन्नमनङ्गमोहिने ॥९

नारद उवाच

न किञ्चिदूचुस्ते सर्वे वचः श्रुत्वा द्विजा नृप ।
गोपा निराशा आगत्य प्रत्यूचुः सबलं हरि म्॥१०

गोपा ऊचुः

त्वमस्यधीशो व्रजमण्डले बली
श्रीगोकुले नन्दपुरोग्रदण्डधृक् ।
न वर्तते दण्डमलं मधोः पुरि
प्रचण्डचण्डांशुमहस्तव स्फुरत् ॥११

नारद उवाच

पुनस्तान् प्रेषयामास तत्पत्नीभ्यो हरिः स्वयम् ।
यज्ञवाटं पुनर्गत्वा नत्वा विप्रप्रियास्तदा ॥१२
कृताञ्जलिपुटा ऊचुर्गोपाः कृष्णप्रणोदिताः ॥१३

गोपा ऊचुः

गोपालबालैः सबलः समागतो
गाश्चारयञ्श्रीव्रजराजनन्दनः ।
क्षुत्संयुतेऽस्मै सगणाय चाङ्गनाः
प्रयच्छताश्वन्नमनङ्गमोहिने ॥१४

नारद उवाच

कृष्णं समागतं श्रुत्वा कृष्णदर्शनलालसाः ।
चतुर्विधान्नं पात्रैश्च नीत्वा सर्वद्विजाङ्गनाः ॥१५
त्यक्त्वा सद्यो लोकलज्जां कृष्णपार्श्वं समाययुः ।
अशोकानां वने रम्ये कृष्णातीरे मनोहरे ॥ १६
यथाश्रुतं तथा दृष्टं श्रीहरे रूपमद्भुतम् ।
प्राप्यानन्दं गताः सर्वास्तुरीयं योगिनो यथा ॥ १७

भगवानुवाच

धन्या यूयं दर्शनार्थमागता हे द्विजाङ्गनाः ।
प्रतियात गृहान् शीघ्रं निःशङ्का भूमिदेवताः ॥ १८
युष्माकन्तु प्रभावेण पतयो वो द्विजातयः ।
सद्यो यज्ञफलं प्राप्य युष्माभिः सह निर्मलाः ॥ १९

गमिष्यन्ति परं धाम गोलोकं प्रकृतेः परम् ।

नारद उवाच

अथ नत्वा हरिं सर्वा आजग्मुर्यज्ञमण्डलम् ।। २०

ता दृष्ट्वा ब्राह्मणाः सर्वे स्वात्मानं धिक् प्रचक्रिरे ।

दिदृक्षवस्ते श्रीकृष्णं कंसाद्भीता नचागताः ॥ २१

भुक्त्वान्नं सबलः कृष्णो गोपालैः सह मैथिल ।

गाः पालयन् आजगाम वृन्दारण्यं मनोहरम् ॥ २२

इति श्रीगर्गसंहितायां माधुर्यखण्डे नारदबहुलाश्व-
संवादे दावाग्निमोक्षविप्रपत्नीदर्शनं नाम
एकविंशोऽध्यायः ॥ २१

नारद उवाच

एकदा नन्दराजोऽसौ कृत्वा चैकादशीव्रतम्।
द्वादश्यां यमुनां स्नातुं गोपालैर्जलमाविशत्॥ १
तं गृहीत्वा पाशिभृत्यः पाशिलोकं जगाम ह।
तदा कोलाहले जाते गोपानां मैथिलेश्वर॥ २
आश्वास्य सर्वान् भगवान् गतवान् वारुणीं पुरीम्।
भस्मीचकार सहसा पुरीदुर्गं हरिः स्वयम्॥ ३
कोटिमार्तण्डसङ्काशं दृष्ट्वा प्रकुपितं हरिम्।
नत्वा कृताञ्जलिः पाशी परिक्रम्याह धर्षितः॥ ४

वरुण उवाच

नमः श्रीकृष्णचन्द्राय परिपूर्णतमाय च।
असङ्ख्यब्रह्माण्डभृते गोलोकपतये नमः॥ ५
चतुर्व्यूहाय महसे नमस्ते सर्वतेजसे।
नमस्ते सर्वभावाय परस्मै ब्रह्मणे नमः॥ ६

केनापि मूढेन ममानुगेन
कृतं परं हेलनमद्य देव।
तत्क्षम्यतां भो शरणागतं मां
परेश भूमन् परिपाहि पाहि॥७

नारद उवाच

इति प्रसन्नो भगवान् नन्दं नीत्वा सुपूजितः।
सौख्यं प्रकाशयन् बन्धून् व्रजमण्डलमाययौ॥ ८
नन्दराजमुखाच्छ्रुत्वा प्रभावं श्रीहरेर्महत्।
गोपीगोपगणा ऊचुः श्रीकृष्णं नन्दनन्दनम्॥ ९
यदि त्वं भगवान् साक्षाल्लोकपालैः सुपूजितः।
दर्शयाशु परं लोकं वैकुण्ठं तर्हि नः प्रभो॥ १०

नीत्वा सर्वांस्ततः कृष्ण एत्य वैकुण्ठमन्दिरम् ।
दर्शयामास रूप स्वं ज्योतिर्मण्डलमध्यगम् ॥ ११
सहस्रभुजसंयुक्तं किरीटकटकोज्ज्वलम् ।
शङ्खचक्रगदापद्मवनमालाविराजितम् ॥ १२
असङ्ख्यकोटिमार्तण्डसङ्काशं शेषसंस्थितम् ।
चामरान्दोलदिव्याभं ब्रह्माद्यैः परिसेवितम् ॥ १३
तदैव तान् गोपगणान् पार्षदास्ते गदाधराः ।
ऋजुं कृत्वा नतिं धृत्वा दूरे स्थाप्य प्रयत्नतः ॥ १४
चकितानिव तान् वीक्ष्य प्रोचुस्ते पार्षदा गिरा ।
रे रे तूष्णीं प्रभवत मा वक्तव्यं वनेचराः ॥ १५
भाषणं मा प्रकुरुत न दृष्टा किं सभा हरेः ।
वेदा वदन्ति चात्रैव साक्षाद्देवे स्थिते प्रभौ ॥ १६
इति शिक्षां गता गोपा हर्षिता मौनमास्थिताः ।
मनस्यूचुरयं कृष्ण उच्चसिंहासनस्थितः ॥ १७
अस्मान् दूरादधः कृत्वास्माभिर्वक्ति न कर्हिचित् ।
तस्माद् व्रजाद्वरं नास्ति कोऽपि लोको न सौख्यदः ।
यत्रानेन स्वभ्रात्रापि वार्त्ता स्याद्धि परस्परम् ॥ १८
इति प्रवदतस्तान् वै नीत्वा श्रीभगवान् हरिः ।
व्रजमागतवान् राजन् परिपूर्णतमः प्रभुः ॥ १९

इति श्रीगर्गसंहितायां माधुर्यखण्डे नारदबहुलाश्व-
संवादे नन्दादिवैकुण्ठदर्शन नाम
द्वाविंशोऽध्यायः ॥२२

नारद उवाच

एकदा नृप गोपालाः शकटै रत्नपूरितैः ।
वृषभानूपनन्दाद्या आजग्मुश्चाम्बिकावनम् ॥ १
भद्रकालीं पशुपतिं पूजयित्वा विधानतः ।
ददुर्दानं द्विजातिभ्यः सुप्तास्तत्र सरित्तटे ॥ २
तत्रैको निर्गतो रात्रौ सर्पो नन्दं पदेऽग्रहीत् ।
कृष्ण कृष्णेति चुक्रोश नन्दोऽतिभयविह्वलः ॥ ३
तदोल्मुकैर्गोपबालास्तेऽदुराजगरं नृप ।
एवं सोऽपि न तत्याज सर्पोऽथ स्वमणिं यथा ॥ ४
तताड स्वपदा सर्पं भगवान् लोकपावनः ।
त्यक्त्वा तदैव सर्पत्वं भूत्वा विद्याधरः कृती ॥ ५
नत्वा कृष्णं परिक्रम्य कृताञ्जलिपुटोऽवदत् ।

सुदर्शन उवाच

अहं सुदर्शनो नाम विद्याधरवरः प्रभो ।
अष्टावक्रं मुनिं दृष्ट्वा हसितोऽस्मि महाखलः ॥ ६
मह्यं शापं ददौ सोऽपि त्वं सर्पो भव दुर्मते ।
तच्छापादद्य मुक्तोऽहं कृपया तव माधव ॥ ७

त्वत्पादपद्ममकरन्दरजःकणानां
स्पर्शेन दिव्यपदवीं सहसा गतोऽस्मि ।
तस्मै नमो भगवते भुवनेश्वराय
यो भूरिभारहरणाय भुवोऽवतारः ॥ ८

नारद उवाच

इति नत्वा हरिं कृष्णं राजन् विद्याधरस्तु सः ।
जगाम वैष्णवं लोकं सर्वोपद्रववर्जितम् ॥ ९

नन्दाद्या विस्मिताः सर्वे ज्ञात्वा कृष्णं परेश्वरम् ।
अम्बिकावनतः शीघ्रमाययुर्व्रजमण्डलम् ॥ १०
इदं मया ते कथितं श्रीकृष्णचरितं शुभम् ।
सर्वपापहरं पुण्यं किं भूयः श्रोतुमिच्छसि ॥ ११

बहुलाश्व उवाच

अहो श्रीकृष्णचन्द्रस्य चरितं परमाद्भुतम् ।
श्रुत्वा मनो मे तच्छ्रोतुमतृप्तं पुनरिच्छति ॥ १२
अग्रे चकार कां लीलां लीलया व्रजमण्डले ।
हरिर्व्रजेशः परमो वद देवर्षिसत्तम ॥ १३

इति श्रीगर्गसंहितायां माधुर्यखण्डे नारदबहुलाश्व-
संवादे सुदर्शनोपाख्यानं नाम
त्रयोविंशोऽध्यायः ॥ २३

नारद उवाच

एकदा शैलदेशेषु सबलो भगवान् हरिः।
कृत्वा निलायनक्रीडां चौरपालकलक्षणाम् ॥ १
तत्र व्योमासुरो दैत्यो बालान् मोषायितान् बहून्।
नीत्वा नीत्वाद्रिदर्याञ्च विनिःक्षिप्य पुनः पुनः ॥ २
शिलया पिदधे द्वार मयपुत्रो महाबलः।
सत्यचौरञ्च त ज्ञात्वा भगवान् मधुसूदनः।
गृहीत्वा पातयामास भुजाभ्यां भूमिमण्डले ॥ ३
तदा मृत्यु गतो दैत्यस्तज्ज्योतिर्निर्गत स्फुरत्।
दशदिक्षु भ्रमद् राजन् श्रीकृष्णे लीनतां गतम् ॥ ४
तदा जय जयारावो दिवि भूमौ बभूव ह।
पुष्पाणि ववृषुर्देवाः परमानन्दसंवृताः ॥ ५

बहुलाश्व उवाच

कोऽयं पूर्वं कुशलकृद् व्योमो नामाथ तद्वद।
येन कृष्णे घनश्यामे लीनोऽभूद्दामिनी यथा ॥ ६

नारद उवाच

आस त् काश्यां भीमरथो राजा दानपरायणः।
यज्ञकृन् मानदो धन्वी विष्णुभक्तिपरायणः ॥ ७
राज्ये पुत्रं सन्निवेश्य जगाम मलयाचलम्।
तपस्तत्र समारेभे वर्षाणां लक्षमेव हि ॥ ८
तस्याश्रमे पुलस्त्योऽसौ शिष्यवृन्दैः समागत.।
तं दृष्ट्वा नोत्थितो मानी राजर्षिर्न नतोऽभवत् ॥ ९
शापं ददौ पुलस्त्योऽपि दैत्यो भव महाखल।
ततस्तच्चरणोपान्ते पतितं शरणागतम् ॥ १०

उवाच मुनिशार्दूलः पुलस्त्यो दीनवत्सलः ।
द्वापरान्ते माथुरे च पुण्ये श्रीव्रजमण्डले ॥ ११
यदुवंशपतेः साक्षाच्छ्रीकृष्णस्य भुजौजसा ।
ईप्सिता योगिभिर्मुक्तिर्भविष्यति न संशयः ॥ १२

नारद उवाच

सोऽयं भीमरथो राजा मयदैत्यसुतोऽभवत् ।
श्रीकृष्णभुजवेगेन मुक्तिं प्राप विदेहराट् ॥ १३
एकदा गोपघोषेषु दैत्योऽरिष्टो महाबलः ।
आगतो नादयन् खं गान् तटान् शृङ्गैर्विदारयन् ॥ १४
गोप्यो गोपा गोगणाश्च वीक्ष्य तं दुद्रुवुर्भयात् ।
भगवान् दैत्यहा देवो मा भैष्टेत्यभयं ददौ ॥ १५
गृहीत्वा त तु शृङ्गेषु नोदयामास माधवः ।
सोऽपि त नोदयामास श्रीकृष्णं योजनद्वयम् ॥ १६
पुच्छे गृहीत्वा तं कृष्णो भ्रामयित्वा भुजौजसा ।
भूपृष्ठे पोथयामास कमण्डलुमिवार्भकः ॥ १७
अरिष्टः पुनरुत्थाय क्रोधसंरक्तलोचनः ।
शृङ्गैश्च रोहितं शैलं समुत्पाट्य महाखलः ॥ १८
गर्जयन् घनवद्वीरः कृष्णोपरि समाक्षिपत् ।
कृष्णः शैलं सङ्गृहीत्वा तस्योपरि समाक्षिपत् ॥ १९
शैलस्यापि प्रहारेण किञ्चिद् व्याकुलमानसः ।
भूमौ तताड शृङ्गाग्रान्निर्गतं तैर्जलं भुवः ॥ २०
श्रीकृष्णस्तञ्च शृङ्गेषु गृहीत्वा भ्रामयन् मुहुः ।
भूपृष्ठे पातयामास वातः पद्ममिवोद्धृतम् ॥ २१
तदैव वृषरूपत्वं त्यक्त्वा विप्रवपुर्धरः ।
नत्वा श्रीकृष्णपादाब्जं प्राह गद्गदया गिरा ॥ २२

द्विज उवाच

बृहस्पतेश्च शिष्योऽहं वरतन्तुर्द्विजोत्तमः।
बृहस्पतिसमीपे च पठितुं गतवानहम् ॥ २३
पादौ कृत्वा स्थितोऽभूवं पश्यतस्तस्य सम्मुखे।
तदा रुषाह स मुनिर्वृषवत्त्वं स्थितः पुरः॥ २४
गुरुहेलनतस्तस्मात्त्वं वृषो भव दुर्मते।
तेन शापाद् वृषोऽभूवं वङ्गदेशेषु माधव ॥ २५
असुराणां प्रसङ्गेनासुरत्वं गतवानहम्।
त्वत्प्रसादाद् विमुक्तोऽहं शापतोऽसुरभावतः ॥ २६
श्रीकृष्णाय नमस्तुभ्यं वासुदेवाय ते नमः।
प्रणतक्लेशनाशाय गोविन्दाय नमो नमः॥ २७

नारद उवाच

इत्युक्त्वा श्रीहरिं नत्वा साक्षाच्छिष्यो बृहस्पतेः।
द्योतयन् भुवनं राजन् विमानेन दिवं ययौ ॥ २८
इदं मया ते कथितं खण्डं माधुर्य्यसंज्ञितम्।
सर्वपापहरं पुण्यं कृष्णप्राप्तिकरं परम् ॥ २९
कामदं पठतां शश्वत् किं भूयः श्रोतुमिच्छसि ॥ ३०

इति श्रीगर्गसंहितायां माधुर्यखण्डे नारदबहुलाश्व-
संवादे व्योमासुरारिष्टासुरवधो नाम
चतुर्विंशोऽध्यायः ॥ २४

इति श्रीगर्गसंहितायां चतुर्थं माधुर्यखण्डं सम्पूर्णम्।

२।१४ श्लोकपूर्वार्द्धं नास्ति ख० पु० ।

२।१५ ०श्यामलाङ्गी० इति क० पु० ।

०पद्मलोचना। इति ख० पु० ।

३।१ मैथिलीनां० इति मु० पु० ।

३।४ ०स्नात्वा श्रीयमुना० इति ख० पु० ।

०भगवद्गुणाम् ॥ इति क० ख० ग० पु० ।

३।८ प्रतीच्छत स्व० इति मु० पु० ।

३।६ राजन्त्यस्ताः० इति ख० मु० पु० ।

३।११ ०निर्दयोऽसि। इति क० पु० ।

३।१५ आह मन्दस्मितः० इति मु० पु० ।

४।७ ०चाग्निजलयोर्मद्ध्यां० इति मु० पु० ।

४।१३ ०विनिधाय बाहुं० इति मु० पु० ।

४।१५ ०कृतं कदापि० इति मु० पु० ।

५।२ ०चम्पिका नाम० इति क० ख० पु० ।

०चम्पको नाम० इति ग० पु० ।

५।४ भार्या च षट्० इति क० पु० ।

भार्याषट् सुसहस्रा० इति ख० पु० ।

भार्या षट् सहस्रा० इति ग० पु० ।

०वन्ध्यत्वं ताः० इति क० ख० पु० ।

५।५ ०भूयान्मेऽत्रशुभं नृप। इति मु० पु० ।

५।१० अनपत्येन दुःखेन० इति मु० पु० ।

५।११ श्लोकोऽयं नास्ति क० ख० पु० ।

याज्ञवल्क्य उवाच इत्यपि नास्ति क० ख० पु० ।

५।१५ तेनैव ते सर्वं ऋणं देवर्षि पितॄणां प्रभो। मुच्यते नृप शार्दूल० इति क० ख० ग० पु० ।

५।१७ किं वर्णः कीदृशो रूपो० इति क० ख० ग० पु० ।

५।२० बुधेऽष्टम्याम० इति ख० पु०

५।२२ ०भविष्यति चतुर्भुजः। इति ग० मु० पु०।

६।१२ ०पुत्रास्तु पुरा जाता० इति मु० पु०।

७।२ ०मुवाच सः॥ इति मु० पु०।

७।३ ०दूरे तस्मै० इति मु० पु०।

७।६ यद् गोपिका............ स्वकीयम्॥ इति नास्ति ग० पु०।

७।७ प्रथम.पादः नास्ति ग०पु०।

७।६ ०विमलो यथेन्द्र० इति ग० मु० पु०।

७।२१ ०चक्र आत्मनिवे० इति ग० मु० पु०।

७।२२ ०भक्तवत्सलः॥ इति मु० पु०।

७।२८ श्लोकापरार्द्धं नास्ति क० ख० पु०।

०तन्मनः शुभाः॥ इति ग० पु०।

८।२ ०दिशि स्वतः। इति क० ख० पु०।

८।७ ०द्भूतं शुभम्॥ इति मु० पु०।

८।१० वत्सरस्यैकादशीनां० इति मु० पु०।

८।११ सुरवेचवधा० (?) इति ख० ग० पु०।

सुरासुरवधा० इति मु० पु०।

८।१३ उत्पन्ना च तथा० इति ख० पु०।

८।१४ आमलकी ततः० इति मु० पु०।

८।१५ श्लोकापरार्द्धं नास्ति ग० पु०।

८।१६ श्लोकपूर्वार्द्धं नास्ति ग० पु०।

श्लोकापरार्द्धेऽपि पापाङ्कुशा रमा चैव इति नास्ति ग० पु०।

पाशाङ्कुशा रमा० इति मु० पु०।

८।१६ ०वक्षो विनिर्मलः। इति मु० पु०।

०हरिं नतः॥ इति मु० पु०।

८।२५ ०दद्यात् स दक्षिणां पुनः।

इति ग० मु० पु० ।

८।२६ ०भोजनमैथुने ॥ इति मु० पु० ।

८।२७ विष्णुव्रते च कर्त्तव्ये० इति मु० पु० ।

८।२८ नास्ति ग० पु० ।

८।२९ ०वितथभोजनम् । इति ख० ग० मु० पु० ।
०मैथुने ॥ इति मु० पु० ।

८।३० पिष्टापिष्टमसूरां० इति मु० पु० ।
पुष्टिषष्टि मसूरां० इति ग० पु० ।

८।३३ ०त्याज्यो गङ्गाघटो यथा ॥ इति० मु० पु० ।

८।३४ ०यथा वृद्धिं० इति मु० पु० ।

८।३७ नास्ति ग० पु० ।

८।३८ नास्ति ग० पु० ।

८।३९ ०कृत्वैकादशी० इति मु० पु० ।
श्लोकपूर्वार्द्धं नास्ति ग० पु० ।

८।४८ नास्ति ग० पु० ।

८।४९ नास्ति ग० पु० ।

९।१ विडम्बयन्ती ते० इति क० ग० पु० ।
विडम्बयन्ति ते० इति ख० पु० ।

९।४ वैषानेन पुरा राज्ञा० इति ग० पु० ।
वैशन्तेन पुरा राज्ञा० इति मु० पु० ।

९।५ ०कृता येन राज्यं० इति ख० ग० मु० पु० ।

९।६ ०समानिनः ॥ इति ख० पु० ।

९।७ ०एकादशीव्रतम् । इति मु० पु० ।

९।१० ०समुत्पन्ने० इति मु० पु० ।

९।१२ ०पत्न्था गतः० इति ग० मु० पु० ।

९।२० ०स पुरा ययौ ॥ इति मु० पु० ।

९।२१ ०प्राप्तः सदा वै० इति मु० पु० ।

९।२४ एकादशीदिनेनापि० इति ग० मु० पु० ।

१०।१५ याः पारमेष्ठ्य० इति मु० पु० ।
०रजः सुभक्तः ॥ इति मु०

पु० ।

११।३　०श्रीसख्योऽपि समुद्रजाः॥ इति मु० पु० ।

११।४　०स्तदाजनपदाश्रिताः। इति मु० पु० ।

११।५　०प्रसादार्थं० इति मु० पु० । श्लोकपूर्वार्द्धं व्यत्ययेन दृश्यते मु० पु० ।

११।६　तासां प्रेम० इति मु० पु० । ०कृष्णो वै तद्गृहान्० इति मु० पु० ।

११।१२　एवं ताः० इति मु० पु० ।

११।१८　युस्माकमाज्ञया वक्ष्ये सर्वेषां० इति मु० पु० ।

११।२०　यदिसौत्रैव० इति ख० मु० पु० ।
०योऽस्ति वै मुने। इति मु० पु०

११।२१　दुर्लभं दुर्घटं भावं० इति क० ख० ग० पु० ।

११।२३　०मिलिताद्यासु० इति क० ख० ग० पु० ।

१२।५　ता राधिका सहचर्य्यः० इति क० ख० ग० पु० ।

१२।७　०ते पुरवने व्रजभू० इति ग० मु० पु० ।

१२।६　०भूमण्डले च सधनुष्क घनोः इति मु पु० ।
०भूमण्डले सधनुषेव० इति क० ग० पु० ।

१२।१०　०हस्तागृहीत० इति मु० पु० ।

१२।१२　०प्रक्षालितं करतलं० इति ग० मु० पु० ।

१२।१५　उपहस्ता.० इति ख० ग० पु० ।
रक्तहस्ताः० इति मु० पु० ।

१३।२　०नीतिमान् मरः॥ इति मु० पु० ।

१३।५　०घोषं चक्रे० इति मु० पु० ।

१३।८　०नित्यं गत्वा० इति क० पु० ।
०प्रेमास्पदसमा० इति ग० मु० पु० ।

१३.६　०ऊचुस्तं परं० इति मु० पु० ।

१३।१४　०कृतं कदापि प्रेम्णौ० इति मु० पु० ।

१४।४　०वार्षिकं स० इति मु० पु०।

१४।५ वार्षिकन्तु करं० इति मु० पु० ।

१४।११ ताभ्यः सार्द्धं० इति क० ख० पु० ।
०दंशिना युद्धे० इति ख० पु० ।
ताभिः सार्द्धं० इति ग० पु० ।

१४।१३ ०जयकातरः ॥ इति क० ख० पु० ।
०भयकातरः ॥ इति ग० पु० ।

१४।१५ दूत उवाच इति नास्ति मु० पु० ।

१४।२० पादे च० इति मु० पु० ।

१४।२७ चिक्षेप सम्मुखे० इति मु० पु० ।

१४।३२ ०सर्वे ते मौन० इति क० पु० ।

१५।२ ०वरात् तास्तु० इति मु० पु० ।
०पृथिव्या दोहना० इति मु० पु० ।

१५।३ ०पुरन्ध्र्यो या जाता० इति ग० मु० पु० ।

१५।५ ०श्रीपतिं परम् ॥ इति ख० पु० ।

१५।६ ०रुत व्रजे ॥ इति ग० पु० ।
०मधुव्रते ॥ इति मु० पु० ।

१५।८ ०कल्पवृक्षमनोहरे ॥ इति ग० मु० पु० ।

१५।११ ०श्रीकृष्णं इत्यारभ्य श्लोकान्तं यावत् नास्ति क० ख० पु० ।

१५।१२ नागेन्द्रकन्यकाः सर्वा० इति नास्ति क० ख० पु० ।

१५।१५ ०हानिः परा० इति मु० पु० ।

१६।६ ०अधिमेदिनी । इति मु० पु० ।
०पापापहारिणी ॥ इति मु० पु० ।

१६।१२ ०राज्याधिपत्यत्वं० इति क० ख० ग० पु० ।

१६।१३ ०त्रिमासावधिमाश्रितम् । इति क० ख० ग० पु० ।

१७।५ ०कृष्णरूपं त्वमेव० इति क० ख० ग० पु० ।

१७।६ ०सुरनगरवनान्० इति क० ख० पु० ।

१७।८ ०मालास्ति वा सुन्दरी । इति

मु० पु० ।

१८।१ ०पद्धतिं यथा। इति ग० मु० पु० ।

१८।८ ०ककुद्मतीम् ॥ इति मु० पु० ।

१८।११ ०यूथीभूतायै० इति नास्ति मन्त्रशरीरे क० पु० ।

१८।१३ ०देशिकः ॥ इति मु० पु० ।

१८।१६ ०प्रादात्तेभ्यः सुभो० इति क० ख० ग० पु० ।

१६।३ ०ध्याये मार्त्तण्ड० इति ग० मु० पु० ।

१६।५ ०मण्डलमण्डिता ॥ इति मु० पु० ।

१६।७ ०पल्लववासिनी ॥ इति क० ख० पु० ।

१६।६ ०कुञ्जद्वारनिर्गता। इति मु० पु० ।

१६।१० ०मिश्रा निर्जलाभा० इति मु० पु० ।

१६।११ ०ब्रह्माण्डभाविनी ॥ इति क० ख० पु० ।

१६।१२ ०लोकगता० इति ख० ग० पु० ।

१६।१५ ०बुद्धिजा रचिताम्बरा। इति क० पु० ।

१६।१७ गाण्डिवीभा० इति क० पु० ।

०कृष्णां वर० इति मु० पु० ।

१६।१६ स्वकीय० इति क० ख० पु० ।

०स्वीया स्वीयार्थसाधिनी। इति क० ख० मु० पु० ।

१६।२० सोमाभा० इति मु० पु० ।

१६।२५ ०मानदा प्राज्ञा० इति मु० पु० ।

ओङ्कारिणी जनत्कारी० इति क० पु० ।

१६।२६ काञ्चनीमयी। इति क० ख० ग० पु० ।

१६।२७ श्रीहारिणा० इति मु० पु० ।

१६।२६ ०दन्तधरा हेम० इति मु० पु० ।

१६।३१ ०लक्ष्म्या मधुरा० इति क० ख० पु० ।

१६।३३ ०प्रोन्नता सुष्ठा० इति क० ख० पु० ।

१६।३२ ०गतिर्गात्रागङ्गा० इति क० पु० ।

१६।३६ वृन्दावनवना० इति मु०

पु० ।

१६।३७ ०प्रस्थाख्यातेतरा० इति क० पु० ।

०प्रस्था छातेतरा (?) इति ख० ग० पु० ।

१६।३८ ०दुर्दुरी धरा। इति मु० पु० ।

१६।४० प्लवारूपा० इति क० ख० पु० ।

स्नवारूपा० इति ग० पु० ।

१६।४३ ०कुसुमाम्बरभा० इति मु० पु० ।

१६।४४ ०राजप्रभूर्भूरि० इति मु० पु० ।

१६।४६ ०टवीनन्दनदी० इति क० ख० पु०

१६।४७ काकली० इति मु० पु० ।

०भाण्डारकुश० इति मु० पु० ।

१६।४६ ०नानावर्णसम० इति मु० पु० ।

१६।५१ ०रङ्गभूमाढ्या० इति मु० पु० ।

१६।५५ ताम्रालालाताम्री० इति ग० मु० पु० ।

१६।५६ ०लिप्तवाणी० इति मु० पु० ।

१६।५८ ०पांमुला च० इति मु० पु० ।

सूर्यकोटिप्रभा० इति मु० पु० ।

०सूर्यसमुद्भवा ॥ इति मु० पु० ।

१६।६० ०सावर्ण्यानुभवा० इति मु० पु० ।

१६।६२ चन्द्रावती० इति ग० मु० पु० ।

०नुगांशुका। इति मु० पु० ।

०गरिमंयी ॥ इति ख० पु० ।

०गरिमयी ॥ इति क० पु० ।

०गरीमशी ॥ इति ग० पु० ।

१६।६३ धनाश्री० इति क० पु० ।

१६।६४ ०गौरी वैराटी० इति क० ख० ग० पु० ।

१६।६५ ०गानक्रियामात्र० इति मु० पु० ।

१६।६६ वैरागरी सोरठी० इति मु० पु० ।

१६।६७ कामाकारश्रीः० इति क० पु० ।

०श्रीकल्याणी० इति मु० पु० ।
१६।६६ ०क्षुधासौध० इति ग० मु० पु० ।
१६।७२ ०वासिनी प्रौढ्या० इति क० पु० ।
०वासिनी प्रौष्या० इति ख० ग० पु० ।
०रामा नीरुजा० इति ग० मु० पु० ।
१६।७८ ०पौरुषा० इति मु० पु० ।
१६।७६ चिछनासदस० (!) इति क० ख० ग० पु० ।
०दृष्टिर्दृश्या० इति मु० पु० ।
१६।८० ०वायुरहो० इति क० ख० पु० ।
१६।८४ पराशरी सैव सृष्टिः ० इति मु० पु० ।
०द्भगवतार्चिता ॥ इति मु० पु० ।
१६।८५ ०पुण्यांशा शास्त्र० इति क० ख० पु० ।
१६।८७ नास्ति ग० पु० ।
१६।८८ पुलोमजा शचीन्द्राणी इति नास्ति ग० पु० ।

०वेदी देववरा० इति ग० मु० पु० ।
वायुना० इति मु० पु० ।
१६।६० ०दत्ता द्युतिः० इति मु० पु० ।
०पुष्टभावना ॥ इति मु० पु० ।
१६।६६ ०दाशुगा ॥ इति मु० पु० ।
१६।६७ ईर्षा० इति मु० पु० ।
०ष्णाभिधा० इति मु० पु०
१६।९६ ०दुर्मर्षा० इति क० ख० पु० ।
०रानितिः । इति मु० पु० ।
१६।१०१ मुक्ति. प्रोक्तिः० इति मु० पु० ।
०प्रकृतिः पिङ्ग० इति मु० पु० ।
नागभावा० इति मु० पु० ।
१६।१०५ ०भाविता एवी० इति ग० पु० ।
१६।१०७ ०मैक्तिका च० इति ग० मु० पु० ।
१६।१०६ गोपा गोपीश्वरी० इति क० ख० ग० पु० ।
१६।११० ०गोकोटिर्गोगणावृता । इति क० ख० पु० ।
१६।११२ ०महार्घ्यकाः ॥ इति क०

गा० पु० ।

१६।११३ वैकायसी च० इति क० पु० ।

वैहायसी च० इति ख० पु० ।

वैयासकी च० इति ग० पु० ।

१६।११५ ०पदी प्रोच्या० इति क० ख० ग० पु० ।

१६।११६ स्थिता धरित्री० इति ग० मु० पु० ।

०कौशली रघु० इति क० ख० पु० ।

१६।१२१ ०पुरी शेषा विन्ध्या० इति मु० पु० ।

१६।१२२ द्वारावरा द्वारकामा० इति क० पु० ।

१६।१२५ दाडिमी सैन्धवी० इति मु० पु० ।

गण्डकी सैन्धवी० इति ग० पु० ।

१६।१३६ ०श्रुत्वातिनिर्मलः ॥ इति क० ख० पु० ।

२०।८ विहारविजयं इति क० ख० ग० पु० ।

२०।१० आकाशस्थे० इति क० ख० ग० पु० ।

२०।१७ ०प्रस्फुरन्ति च । इति मु० पु० ।

२०।२० नास्ति ख० पु० ।

०रजानन् वै० इति मु० पु० ।

२१।६ ०यमुनापारे० इति मु० पु० ।

२१।६ क्षुत्संयुतोऽस्मै० इति क० ख० ग० मु० पु० ।

२१।१५ चक्रुस्तथान्नं पात्रेषु० इति मु० पु० ।

२२।७ ०मद्य चैवम् । इति मु० पु० ।

२२।८ ०नीत्वा सुजीवितम् । इति मु० पु० ।

२२।६ ०श्रीहरे स्तुतम् । इति मु० पु० ।

२२।१६ भाषणं माद्य० इति ख० पु० ।

२२।१८ ०द्वरो नास्ति० इति मु० पु० ।

२३।६ ०महाबलः ॥ इति ग० मु० पु० ।

२३।१२ ०रिच्छते ॥ इति क० ख० ग० पु० ।

२४।३ शिलया पिदधौ० इति मु० पु० ।

२४।१४ ०गोपवेषेषु० इति मु० पु० ।

२४।१७ श्लोकोत्तरार्द्धं नास्ति ग० पु० ।

२४।१८ नास्ति ग० पु० ।

२४।१९ श्लोकोत्तरार्द्धं नास्ति क० ख० पु० ।

२४।२१ ०पोथयामास० इति मु० पु० ।

०मिवोद्धतम् ॥ इति मु० पु० ।

२४।२४ ०पश्यतस्तस्य सम्मुखे । इति नास्ति ग० पु० ।

श्लोकोत्तरार्द्धं नास्ति ग० पु० ।

२४।२५ श्लोकपूर्वार्द्धं नास्ति ग० पु० ।

०हेलन कृत्तस्मा० इति मु० पु० ।

तेन शापाद् वृषोऽभूवं० इति नास्ति ग० पु० ।

२४।२६ ०सादाद्विनिर्मुक्तो शापतो० इति ख० पु० ।

२४।२९ ०माधुर्यमद्भुतम् । इति मु० पु० ।

——

श्रीगणेशायनमः ।

गर्गसंहिता

(मथुराखण्डः)

वसुदेवसुतं देवं कंसचाणूरमर्दनम् ।
देवकीपरमानन्दं कृष्णं वन्दे जगद्गुरुम् ॥ १

बहुलाश्व उवाच

मथुरायां किं चरित्रं कृतवान् भगवान् मुने ।
कथं जघान कंसाख्यमेतन्मे ब्रूहि तत्त्वतः ॥ २

नारद उवाच

अथैकदाहं मथुरां पुरीं परां
विलोकितुं चागतवान् नृपेश्वर ।
कर्तुं परं दैत्यवधोद्यमं हरेः
परस्य साक्षान्मनसा प्रणोदितः ॥ ३
सिंहासने च प्रहृते पुरन्दरात्
सितातपत्रे चलचारुचामरे ।
स्थितं नृपं कंसमुरङ्गदुःसहं
प्रावोचमेवं शृणु तत्प्रपूजितः ॥ ४

यशोदायाः सुता जाता या त्वद्धस्ताद्दिवं गता ।
देवक्यां कृष्ण उत्पन्नो रोहिणीनन्दनो बलः ॥ ५
स्वमित्रे नन्दराजे च न्यस्तौ पुत्रौ भवद्भयात् ।
तवारी रामकृष्णौ द्वौ वसुदेवेन दैत्यराट् ॥ ६

पूतनाद्या ह्यरिष्टान्ता दैत्या ये त्वद्भटोत्कटाः ।
याभ्यां हता वनोद्देशे ते मृत्यू तौ स्मृतौ किल ॥ ७
एवमुक्तो भोजपतिः क्रोधाच्चलितविग्रहः ।
जग्राह निशितं खड्ग शौरिं हन्तुं सभातले ॥ ८
मया निवारितः सोऽपि विस्तृतैर्निगडैर्दृढैः ।
बध्वा तं भार्यया सार्द्धं कारागारे रुरोध ह ॥ ९
इत्युक्त्वा तं मयि गते केशिनं दैत्यपुङ्गवम् ।
रामकृष्णवधार्थाय प्रेषयामास दैत्यराट् ॥ १०
चाणूरादीन् समाहूय महामात्यं द्विपस्य च ।
कार्यभारकराँल्लोकान् प्राहेदं भोजराड् बली ॥११

कंस उवाच

हे कूट हे तोशलक हे चाणूर महाबल ।
रामकृष्णौ च मे मृत्यू दर्शितौ नारदेन वै ॥ १२
भवद्भिरिह सम्प्राप्तौ हन्येतां मल्ललीलया ।
मल्लभूमिश्च संयुक्तां कुरुताशु शुभावहाम् ॥ १३
द्विपं कुवलयापीडं रङ्गद्वारि मदोत्कटम् ।
प्रस्थाप्य तेन हन्तव्यौ महामात्र ममाहितौ ॥ १४
चतुर्दश्यान्तु कर्तव्यो धनुर्यागः प्रशान्तये ।
अमावास्यादिने लोका मल्लयुद्धं भवेदिह ॥ १५

नारद उवाच

इत्युक्त्वा स्वजनान् कंसोऽक्रूरमाहूय सत्वरम् ।
रहसि प्राह राजेन्द्र मन्त्रं मन्त्रिजनप्रियम् ॥ १६

कंस उवाच

भो भो दानपते मन्त्रिन् शृणु मे परमं वचः ।
गच्छ नन्दव्रजं प्रातः कुरु कार्यं महामते ॥ १७

आसाते तत्र मे शत्रू वसुदेवसुतौ किल ।
दर्शितौ नारदेनापि देवदेवर्षिणा भृशम् ॥ १८
सोपायनैर्गोपगणैर्नन्दराजादिभिः सह ।
मथुरादर्शनमिषाद्रथेनानय मा चिरम् ॥ १९
द्विपेन वा महामल्लैर्घातयिष्यामि तौ शिशू ।
तत्पश्चान्नन्दराजञ्च वसुदेवसहायकम् ॥ २०
वृषभानुवरं पश्चान्नवनन्दोपनन्दकान् ।
पश्चाच्छौरिं हनिष्यामि देवकं तत्सहायकम् ॥ २१
उग्रसेनञ्च पितरं वृद्धं राज्यसमुत्सुकम् ।
तत्पश्चाद् यादवान् सर्वान् हनिष्यामि न संशयः ॥ २२
एते देवगणाः सर्वे जाता मन्त्रिन् महीतले ।
शकुनिर्मे महामित्रं बली चन्द्रावतीपतिः ॥ २३
भूतसन्तापनो दुष्टो वृकः शम्बर एव च ।
कालनाभो महानाभो हरिश्मश्रुस्तथैव च ॥ २४
एते मित्राणि मे सन्ति मदर्थं प्राणदा बलात् ।
श्वशुरोऽपि जरासन्धो द्विविदो मे सखा स्मृतः ॥ २५
बाणासुरश्च नरको मय्येव कृतसौहृदः ।
एतैः सर्वां मही जित्वा बध्वा देवान् सवासवान् ॥ २६
क्षिप्त्वा मेरुगुहादुर्गे कुबेरं द्रव्यनायकम् ।
त्रैलोक्यराज्यन्तु सदा करिष्यामि न संशयः ॥ २७
कवीनां त्वं कविरिव गिरां गीष्पतिवद् भुवि ।
एतत् कार्यञ्च कर्तव्यं त्वया दानपते त्वरम् ॥ २८

अक्रूर उवाच

त्वया कृतो यदुपते मनोरथमहार्णवः ।
दैवेच्छयायं भवति गोष्पदं तद्विनार्णवः ॥ २९

कंस उवाच

विसृज्य दैवं कुरुते बलिष्ठो
दैवं समाश्रित्य हि निर्बलश्च ।
कालात्मनोर्नित्यगयोः प्रभावान्
निराकुलस्तिष्ठतु कर्मयोगी ।। ३०

नारद उवाच

एवमुक्त्वा मन्त्रिवरं समुत्थाय सभास्थलात् ।
किञ्चित् प्रकुपितः कंसः शनैरन्तःपुरं ययौ ॥ ३१

इति श्रीगर्गसंहितायां मथुराखण्डे
नारदबहुलाश्वसंवादे कंसमन्त्रो नाम
प्रथमोऽध्यायः ॥ १

नारद उवाच

अथ केशी महादैत्यो हयरूपी मदोत्कटः ।
एत्य वृन्दावनं रम्यं जगर्ज घनवद्बली ॥ १
यस्य पादप्रताडेन निपेतुः शाखिनो दृढाः ।
पुच्छघातेन गगने खण्डं खण्डं ययुर्घनाः ॥ २
तं वीक्ष्य दुःसहजवं गोपगोपीगणा भृशम् ।
भयातुरा मैथिलेन्द्र श्रीकृष्णं शरणं ययुः ॥ ३
मा भैष्टेत्यभयं दत्त्वा भगवान् वृजिनार्दनः ।
कटौ पीतपटं बध्वा हन्तुं दैत्यं प्रचक्रमे ॥ ४
हरिं पश्चिमपादाभ्यां सन्तताड महासुरः ।
चालयन् पृथिवीं राजन् नादयन् व्योममण्डलम् ॥ ५
गृहीत्वा पादयोर्दैत्यं भ्रामयित्वा भुजेन खे ।
चिक्षेप योजनं कृष्णो वातः पद्ममिवोद्धृतम् ॥ ६
पुनरागतवान् सोऽपि क्रोधपूरितविग्रहः ।
पुच्छेन श्रीहरिं देवं सन्तताड व्रजाङ्गणे ॥ ७
पुच्छे गृहीत्वा तं कृष्णो भ्रामयित्वा भुजौजसा ।
योजनानां शतं राजँश्चिक्षेप गगने बलात् ॥ ८
आकाशात् पतितः सोऽपि किञ्चिद्व्याकुलमानसः ।
समुत्थाय पुनर्दैत्यो जगर्ज घनवद्बली ॥ ९
सटा विधुन्वन् रोमाणि वालं खे चालयन् मुहुः ।
महीं निर्जरयन् पादैरुत्पपात हरेः पुरः ॥ १०
तताड मुष्टिना तं वै भगवान् मधुसूदनः ।
तस्य मुष्टिप्रहारेण मूर्च्छितो घटिकाद्वयम् ॥ ११

मस्तकेन गलोद्देशे समुद्धृत्य हरिं हयः ।
भूमण्डलादुत्पपात गगने लक्षयोजनम् ॥ १२
तयोर्युद्धमभूद्घोरं गगने प्रहरद्वयम् ।
पादैर्दन्तैः सटाभिश्च पुच्छतोदणखुरैर्नृप ॥ १३
गृहीत्वा तं हरिर्दोर्भ्यां भ्रामयित्वा त्वितस्ततः ।
आकाशात् पातयामास कमण्डलुमिवार्भकः ॥ १४
विह्वलो घटिकामात्रं पुनरुत्थाय सत्वरः ।
जग्राह हस्ते श्रीकृष्णं चर्वयन् तत्तनुं शुभाम् ॥ १५
भुजं प्रवेशयामास तन्मुखे भगवान् हरिः ।
तस्योदरे गतो बाहुर्ववृधे रोगवद् भृशम् ॥ १६
तदा तु लेण्डं कृतवान् रुद्धवायुर्महासुरः ।
खण्डीभूतोदरः सद्यो ममार हयरूपधृक् ॥ १७
देहाद्विनिर्गतः सद्यो मुकुटी कुण्डलान्वितः ।
दिव्यरूपधरः कृष्णं प्राञ्जलिः प्रणनाम ह ॥ १८

कुमुद उवाच

शक्रस्यानुचरोऽहं वै कुमुदो नाम माधव ।
तेजस्वी रूपवान् वीरो जिष्णुच्छत्रभ्रमिं दधत् ॥ १९
वृत्रासुरवधे पूर्वं ब्रह्महत्याप्रशान्तये ।
यज्ञं चकार नाकेशो वाजिमेधं क्रतूत्तमम् ॥ २०
अश्वमेधहयं शुभ्रं श्यामकर्णं मनोजवम् ।
तमारुरुक्षुर्दुष्टोऽहं चोरयित्वा तलं गतः ॥ २१
ततो मरुद्गणैर्नीतं पाशबद्धं महाखलम् ।
शशाप मां बलारातिस्त्वं रक्षो भव दुर्मते ॥ २२
हयाकृतिस्ते सम्भूयाद्भूमौ मन्वन्तरद्वयम् ।
तच्छापादद्य मुक्तोऽहं सद्यस्त्वत्स्पर्शनात् प्रभो ॥ २३

किङ्करं कुरु मां देव त्वदङ्घ्रौ लग्नमानसम् ।
नमस्तुभ्यं भगवते सर्वलोकैकसाक्षिणे ॥ २४

नारद उवाच

प्रदक्षिणीकृत्य हरिं परेश्वरं
विमानमारुह्य महोज्ज्वलं परम् ।
वैकुण्ठलोकं कुमुदो ययौ त्वरं
विराजयन् मैथिल मण्डलं दिशाम् ॥ २५

इति श्रीगर्गसंहितायां मथुराखण्डे
नारदबहुलाश्वसंवादे केशिवधो नाम
द्वितीयोऽध्यायः ॥ २

नारद उवाच

अक्रूरो रथमारुह्य कर्तुं कार्यं नृपस्य वै।
प्रहर्षितो मैथिलेन्द्र प्रययौ नन्दगोकुलम्॥ १
परां भक्तिं ह्युपगतः श्रीकृष्णे पुरुषोत्तमे।
एवं विचारयन् बुद्ध्या पथि गच्छन् महामतिः॥ २

अक्रूर उवाच

किं भारते वा सुकृतं कृतं मया
निष्कारणं दानमलं क्रतूत्तमम्।
तीर्थाटनं वा द्विजसेवनं शुभं
येनाद्य द्रक्ष्यामि हरिं परेश्वरम्॥ ३
तपः सुतप्तं किमलं पुरा कृतं
सत्सेवनं भक्तियुतं मया कृतम्।
येनैव मे दर्शनमद्य दुर्लभं
श्रीकृष्णदेवस्य पुरो भविष्यति॥ ४
तेषां भवो वै सफलो महीतले
यन्नेत्रगामी भगवान् सुरेश्वरः।
कृत्वाथ तद्दर्शनमद्य दुर्लभं
सद्यः कृतार्थो भवितास्मि सर्वतः॥ ५

नारद उवाच

इत्थं सञ्चिन्तयन् कृष्णं पश्यञ्छकुनमुत्तमम्।
सन्ध्यायां गोकुलं प्राप्तो रथस्थो गान्दिनीसुतः॥ ६
कृष्णपादाब्जचिह्नानि यवाङ्कुशयुतानि च।
तद्रागयुक्परागाणि रजांसि स ददर्श कौ॥ ७

तद्दर्शनौत्सुक्यभक्तिभावानन्दसमाकुलः ।
रथात् समुत्पत्य तेषु लुठंश्चाश्रु मुमोच सः ॥ ८
येषां श्रीकृष्णदेवस्य भक्तिः स्याद् दि मैथिल ।
तेषामाब्रह्मणः सर्वं तृणवज्जगतः सुखम् ॥ ९
रथारूढस्ततोऽक्रूरः क्षणान्नन्दपुरं गतः ।
घोषेषु सबलं कृष्णमागच्छन्त ददर्श ह ॥ १०

देवौ पुराणौ पुरुषौ परेशौ
पद्मेक्षणौ श्यामलगौरवर्णौ ।
यथेन्द्रनीलध्वजवज्रशैलौ
समाश्रितौ तौ पथि रामकृष्णौ ॥ ११
बालार्कमौली वसनं तडिद्द्युती
वर्षाशरन्मेघरुचं दधानौ ।
दृष्ट्वा स तूर्णं स्वरथाद्गतोऽङ्घ्रौ
तयोर्नतो भक्तियुतः पपात ॥ १२
नताननं बाष्पकलाकुलेक्षणं
रोमाञ्चितं वीक्ष्य हरिः परेश्वरः ।
दोर्भ्यां समुत्थाप्य घृणातुरोऽश्रु
मुमोच भक्तं परिरभ्य माधवः ॥ १३
एवं मिलित्वा सबलश्च त हरिः
सद्यः समानीय वरासनं ददौ ।
निवेद्य गां चातिथये सुभोजनं
रसावृतं प्रेमयुतो ह्युपाहरत् ॥ १४
तमाह नन्दः परिरभ्य दोर्भ्यां
महो कथं जीवसि कंसराज्ये ।
गतत्रपो यो निजघान बालान्
स्वसुः कथं सोऽन्यजनेष मोही ॥ १५

गृहं गते नन्दवरे हरि स्तं
पप्रच्छ सर्वं कुशलं स्वपित्रोः ।
तथा यदूनां किल बान्धवानां
कंसस्य सर्वां विपरीतबुद्धिम् ॥ १६

अक्रूर उवाच

परश्वोऽहनि हे देव हन्तुं शौरिं समुद्यतः ।
खड्गपाणिर्भोजराजो नारदेन निवारितः ॥ १७
दुःखिता बान्धवाः सर्वे यादवा भयविह्वलाः ।
सकुटुम्बाः कंसभयाद् भूमन् देशान्तरं गताः ॥ १८
अद्यैव यादवान् हन्तुं देवान् जेतुं समुद्यतः ।
अन्यत् किमपि कौ कर्तुमिच्छते दैत्यराड् बली ॥ १९
तस्माद्भवद्भ्यां गन्तव्यं कुशलं कर्तुमव्ययम् ।
भवन्तौ हि विना कार्यं किञ्चिन्न स्यात् सतां प्रभू ॥ २०

नारद उवाच

अथ तस्य वचः श्रुत्वा सबलो भगवान् हरिः ।
नन्दराजमतेनाह गोपान् कार्यकरानिदम् ॥ २१

भगवानुवाच

नन्दराजोऽपि सबलो वृद्धैर्गोपगणैरहम् ।
नन्दा नवोपनन्दाश्च तथा षड्वृषभानवः ॥ २२
मथुरान्तु गमिष्यन्ति सर्वे प्रातः समुत्थिताः ।
सर्वन्तु गोरसं तस्माद्दधिदुग्धघृतादिकम् ॥ २३
गृहीत्वैकत्र कर्तव्यं सोपायनमतः परम् ।
रथांश्च शकटैः सार्द्धं समर्थान् कुरुताशु वै ॥ २४

नारद उवाच

इति श्रुत्वा कार्यकरा गोपाः सर्वे गृहे गृहे ।
शृण्वन्तीनां गोपिकानामूचुः सर्वं यथोदितम् ॥ २५

तच्छ्रुत्वोद्विग्नहृदया गोप्यो विरहविह्वलाः ।
परस्परं वाक्यमूचुः सर्वास्ता हि गृहे गृहे ॥ २६
प्रस्थानस्य च वार्तेयं श्रीकृष्णस्य महात्मनः ।
वृषभानुवरस्यापि गृहे प्राप्ता नृपेश्वर ॥ २७

गमिष्यतो भर्तुरतीव दुःखिता
श्रुत्वाथ वार्तां सदसि ह्यकस्मात् ।
सम्प्राप मूर्च्छां वृषभानुनन्दिनी
रम्भेव भूमौ पतिता मरुद्धता ॥ २८
काश्चित् परिम्लानमुखश्रियोऽभवन्
प्रकङ्कणीभूतकराङ्गुलीयकाः ।
सद्यः श्लथद्भूषणकेशबन्धना
श्चित्रार्पितारम्भ इवावतस्थिरे ॥ २९
श्रीकृष्ण गोविन्द हरे मुरारे
काश्चिद्वदन्त्यः स्वगृहेऽतिविह्वलाः ।
विसृज्य कर्माणि गृहस्य सर्वतो
योगीव चानन्दगता नृपेश्वर ॥ ३०
काश्चित् समर्थास्तु परस्परं वचः
समेत्य राजन् युगपत् सखीजनम् ॥
ऊचुः स्खलद्गद्गदकण्ठवाचः
स्वतः स्रवद्बाष्पकलावहद्दृशः ॥ ३१

गोप्य ऊचुः

अहोऽतिनिर्मोहि जनस्य चित्रं
परं चरित्रं गदितुं न योग्यम् ।
मुखेन चान्यद् हृदिभाव्यमन्यद्
देवो न जानाति कुतो मनुष्यः ॥ ३२

रासेऽपि यद्यद्गदितं तु तत्तद्
विहाय गन्तुं समवस्थितोऽयम् ।
गते पुरीं प्राणपतावहोऽस्मिन्
किं किं न कष्टं बत नो भविष्यत् ॥ ३३

इति श्रीगर्गसंहितायां मथुराखण्डे नारदबहुलाश्व-
संवादे अक्रूरागमनं नाम
तृतीयोऽध्यायः ॥ ३

नारद उवाच

राजन्नेवं वदन्तीनां गोपीनां विरहं परम्।
विज्ञाय भगवान् देवः शीघ्रं तासां गृहान् ययौ ॥ १
यावत्यो योषितो राजंस्तावद्रूपधरो हरिः।
स्वयं सम्बोधयामास वाग्भिः सर्वाः पृथक् पृथक् ॥ २
श्रीराधामन्दिरं गत्वा दृष्ट्वा राधाञ्च मूर्च्छिताम्।
रहः स्थितां सखीसङ्गे ननाद मुरलीकलम् ॥ ३
श्रुत्वा वंशीध्वनिं राधा सहसोत्थाय चातुरा।
नेत्र उन्मील्य ददृशे श्रीगोविन्दं समागतम् ॥ ४
पद्मिनीव गतानन्द पद्मिनी पद्मिनीपतिम्।
वीक्ष्योत्थायागतायास्मै सादरेणासनं ददौ ॥ ५
अश्रुपूर्णमुखीं दीनां राधां कमललोचनाम्।
शोचन्तीं भगवानाह मेघगम्भीरया गिरा ॥ ६

भगवानुवाच

विमनास्त्वं कथं भद्रे मा शोक कुरु राधिके।
अथवा गन्तुकामं मां श्रुत्वासि विरहातुरा ॥ ७
भुवो भारावताराय कंसादीनां वधाय च।
ब्रह्मणा प्रार्थितः साक्षाज्जातोऽहं वै त्वया सह ॥ ८
मथुरां हि गमिष्यामि हरिष्यामि भुवो भरम्।
शीघ्रमत्रागमिष्यामि करिष्यामि शुभं तव ॥ ९

नारद उवाच

इत्युक्तवन्तं जगदीश्वरं हरिं
राधा पतिं प्राह वियोगविह्वला।

दावाग्निना दावलतेव मूर्च्छिता-
श्रुकम्परोमाञ्चितभावसंवृता ॥ १०

राधोवाच

भुवो भरं हर्तुमलं पुरीं व्रज
कृतं परं मे शपथं शृणु त्वतः ।
गते त्वयि प्राणपते च विग्रहं
कदाचिदत्रैव न धारयाम्यहम् ॥ ११
यदाथ मे त्वं शपथं न मन्यसे
द्वितीयवारं कथयामि वा कथम् ।
प्राणोऽधरे गन्तुमतीविह्वलः
कर्पूरधूलेः कणवद्गमिष्यति ॥ १२

भगवानुवाच

वचनं वै स्वनिगमं दूरीकर्तुं क्षमोऽस्म्यहम् ।
भक्तानां वचनं राधे दूरीकर्तुं न च क्षमः ॥ १३
श्रीदामशापात् पूर्वस्माद्गोलोके कलहान्मम ।
शतवर्षं ते वियोगो भविष्यति न संशयः ॥ १४
मा शोकं कुरु कल्याणि वरं मे स्मर राधिके ।
मासं मासं वियोगे ते दर्शनं मे भविष्यति ॥ १५

राधोवाच

मासं प्रति वियोगं मे दातुं स्वं दर्शनं हरे ।
चेन्नागमिष्यसि तदासून् दुःखात् सन्त्यजाम्यहम् ॥ १६
लोकाभिराम जनभूषण विश्वदीप
कन्दर्पमोहन जगद्वृजिनार्तिहारिन् ।
आनन्दकन्द यदुनन्दन नन्दसूनो
अद्यागमस्य शपथं कुरु मे पुरस्त्वम् ॥ १७

भगवानुवाच

रम्भोरु मासं प्रति ते वियोगे
चेन्नागमिष्ये शपथं गवां मे ।
निःसंशयं निष्कपटं वचस्त्व
मवेहि राधे कथितं मया यत् ॥ १८

यो मित्रतां निष्कपटं करोति
निष्कारणो धन्यतमः स एव ।
विधाय मैत्रीं कपटं विदध्यात्
तं लम्पटं हेतुपटं नटं धिक् ॥ १९

कर्मेन्द्रियाणीह यथा रसादीं
स्तथा सकामा मुनयः सुखं यत् ।
मनाङ् न जानन्ति हि नैरपेक्ष्यं
गूढं परं निर्गुणलक्षणं तत् ॥ २०

जानन्ति सन्तः समदर्शिनो ये
दान्ता महान्तः किल नैरपेक्षाः ।
ते नैरपेक्ष्यं परमं सुखं मे
ज्ञानेन्द्रियादीनि यथा रसादीन् ॥ २१

सर्वं हि भावं मनसः परस्परं
न ह्येकतो भामिनि जायते ततः ।
प्रेमैव कर्तव्यमतो मयि स्वतः
प्रेम्णा समानं भुवि नास्ति किञ्चित् ॥ २२

यथाहि भाण्डीरवटे मनोरथो
बभूव राधे हि तथा भविष्यति ।
अहैतुकं प्रेम च सद्भिराश्रितं
तच्चापि सन्तः किल निर्गुणं विदुः ॥ २३

ये राधिकायां त्वयि केशवे मयि
भेदं न कुर्वन्ति हि दुग्धशौक्ल्यवत् ।
त एव मे ब्रह्मपदं प्रयान्ति तद्
अहैतुकस्फूर्जितभक्तिलक्षणाः ॥ २४
ये राधिकायां त्वयि केशवे मयि
पश्यन्ति भेदं कुधियो नरा भुवि ।
ते कालसूत्रं प्रपतन्ति दुःखिता
रम्भोरु यावत् किल चन्द्रभास्करौ ॥ २५

नारद उवाच

एवमाश्वास्य तां राधां सर्वगोपीगणं तथा ।
आययौ नन्दभवनं भगवान् नयकोविदः ॥ २६
अथ सूर्योदये जाते नन्दाद्याः शकटैर्बलिम् ।
नीत्वा रथान् समारुह्य सर्वे श्रीमथुरां ययुः ॥२७
आरुह्य रामकृष्णाभ्यां स्वरथं गान्दिनीसुतः ।
प्रयाणमकरोद् राजन् मथुरां द्रष्टुमुद्यतः ॥ २८
कोटिशः कोटिशो गोप्यो मार्गे मार्गे समास्थिताः ।
पश्यन्त्यस्तन्निर्गमनं क्रोधाढ्या मोहविह्वलाः ॥ २९
क्रूर क्रूरेति चाक्रूरं वदन्त्यः परुषं वचः ।
रुरुधुः सर्वतो यानं यथार्कं सरथं घनाः ॥ ३०
अक्रूरस्य रथं राजन् निजघ्नुर्यष्टिभिर्भृशम् ।
अश्वांस्तथा सारथिञ्च भगवद्विरहातुराः ॥ ३१
अश्वास्तत्र समुत्पेतुस्ताडितास्त इतस्ततः ।
गोपीहस्ताङ्गुलिघातेन सारथिः पतितो रथात् ॥३२
विहाय लज्जां लोकस्य समाकृष्य रथाद्बलात् ।
कङ्कणैस्तेदुरक्रूरं पश्यतोः कृष्णरामयोः ॥ ३३

गोपीयूथबलं दृष्ट्वा सबलो भगवान् हरिः ।
गोपीः सम्बोधयामास रक्षित्वा गान्दिनीसुतम् ॥ ३४
सन्ध्यायामागमिष्यामि मा शोकं कुरुताङ्गनाः ।
पश्यतश्चास्य मद्धास्यं मा कुर्वन्तु व्रजौकसः ॥ ३५

इत्येवमुक्त्वा सरथः समागतो-
ऽक्रूरेण कृष्णो बलदेवसंयुतः ।
तुरङ्गमैर्वेगमयैर्मनोहरै
र्ययौ पुरीं यादववृन्दमण्डिताम् ॥ ३६
यावद्रथः केतुरुताश्वरेणु-
रालक्ष्यते तावदतीवमोहात् ।
स्थिता ह्यभूवन् पथिचित्रवत् ताः
स्मृत्वा हरेर्वाक्यमुतागताशाः ॥ ३७

इति श्रीगर्गसंहितायां मथुराखण्डे नारदबहुलाश्व-
संवादे मथुराप्रयाणं नाम
चतुर्थोऽध्यायः ॥ ४

नारद उवाच

हरिरक्रूररामाभ्यां मथुरोपवनं गतः ।
यमुनानिकटं स्थित्वा वारि पीत्वा रथं ययौ ॥ १
अक्रूरस्तावनुज्ञाप्य स्नातुं श्रीयमुनां गतः ।
नित्यनैमित्तिकं कर्तुं विवेश विमले जले ॥ २
जले चागाधगम्भीरे महावर्तसमाकुले ।
ददर्श रामकृष्णौ तौ वदन्तौ गान्दिनीसुतः ॥ ३
विस्मितस्तौ रथेऽपश्यत् पुनर्वारिस्थितौ नृप ।
ददर्श तत्र सर्पेन्द्रं कुण्डलीभूतमास्थितम् ॥ ४
तस्योत्सङ्गे महालोकं गोलोकं लोकवन्दितम् ।
गोवर्द्धनाद्रियमुनावृन्दारण्यमनोहरम् ॥ ५
असङ्ख्यकोटिमार्तण्डज्योतिषां मण्डले प्रभुम् ।
परिपूर्णतमं साक्षाच्छ्रीकृष्णं पुरुषोत्तमम् ॥ ६
कोटिमन्मथलावण्यं रासमण्डलमध्यगम् ।
राधया सहितं देवं तत्राक्रूरो ददर्श ह ॥ ७
ज्ञात्वा कृष्णं परं ब्रह्म नत्वा नत्वा पुनः पुनः ।
कृताञ्जलिपुटोऽक्रूरः स्तुतिं चक्रेऽतिधर्षितः ॥ ८

अक्रूर उवाच

नमः श्रीकृष्णचन्द्राय परिपूर्णतमाय च ।
असङ्ख्याण्डाधिपतये गोलोकपतये नमः ॥ ९
श्रीराधापतये तुभ्यं व्रजाधीशाय ते नमः ।
नमः श्रीनन्दपुत्राय यशोदानन्दनाय च ॥ १०
देवकीसुत गोविन्द वासुदेव जगत्पते ।
यदूत्तम जगन्नाथ पाहि मां पुरुषोत्तम ॥ ११

वाणी सदा ते गुणवर्णने स्यात्
कर्णौ कथायां मम दोश्च कर्मणि ।
मनः सदा त्वच्चरणारविन्दयो-
र्दृशौ स्फुरद्धामविशेषदर्शने ॥ १२

नारद उवाच

एवं संस्तुवतस्तस्य पश्यतो विस्मितस्य च ।
तत्रैवान्तर्दधे कृष्णः सलोको भगवान् प्रभुः ॥ १३
नत्वा तञ्च तदाक्रूरः कृत्वा नैमित्तिकं विधिम् ।
ज्ञात्वा कृष्णं परं ब्रह्म विस्मितो रथमाययौ ॥ १४
दिनात्यये रामकृष्णावनयद् गान्दिनीसुतः ।
रथेन वायुवेगेन स्निग्धगम्भीरनादिना ॥ १५
पुरस्योपवने तत्र वीक्ष्य नन्दं यदूत्तमः ।
अक्रूरं प्राह विहसन् मेघगम्भीरया गिरा ॥ १६

भगवानुवाच

मथुरायां हि गन्तव्यं भवता स्वरथेन वै ।
गोपालैः सहितः पश्चादागमिष्यामि मानद ॥ १७

अक्रूर उवाच

देवदेव जगन्नाथ गोविन्द पुरुषोत्तम ।
सहाग्रजः सगोपालो गच्छ मे मन्दिरं प्रभो ॥ १८
पादारविन्दरजसा पवित्रीकुरु मद्गृहम् ।
त्वां विना न गमिष्यामि मन्दिरं स्वं जगत्पते ॥ १९

भगवानुवाच

गृहं तवागमिष्यामि हत्वा वै यादवाहितम् ।
सबलो बान्धवैः सार्द्धं करिष्यामि प्रियं तव ॥ २०

नारद उवाच

अथ तत्र स्थिते कृष्णे सोऽक्रूरो मथुरां गतः।
निवेद्य चेदं कंसाय ततः स्वभवनं ययौ॥ २१
अथापराह्णे सबलं गोविन्दं बालकैः पुरीम्।
द्रष्टुमभ्युदितं वीक्ष्य नन्दो वाक्यमथाब्रवीत्॥ २२
आर्जवेन पुरीं वीक्ष्यागन्तव्यं भवता किल।
न गोकुलं विद्धि चैनां कंसराज्ये महाभये॥ २३
तथास्तु चोक्त्वा भगवान् वृद्धैर्नन्दप्रणोदितैः।
गोपालैर्बालकैः सार्द्धं सबलो गतवान् पुरीम्॥ २४
प्रासादैर्गगनस्पर्शैर्हेमरत्नखचिद्गृहैः।
शोभितां दुर्गसंयुक्तां देवधानीमिवस्थिताम्॥ २५
कालिन्दीरत्नसोपानैश्चलदूर्मिकुतूहलैः।
अलकामिव शोभाढ्यां दिव्यनारीनरैर्युताम्॥ २६
प्रेक्षन् श्रीमथुरां कृष्णो धनिनां मन्दिराणि च।
पश्यन् गोपालकैः सार्द्धं राजमार्गं विवेश ह॥ २७

श्रुत्वागतं तं वसुदेवनन्दनं
बहुश्रुता वै मथुरापुराङ्गनाः।
त्यक्त्वाथ कर्माणि विसृज्य ताः शिशून्-
द्रष्टुं व्यधावन् उदधिं यथापगाः॥ २८

काश्चित्तु हर्म्यात् किल जालदेशात्
कुड्यात्तु काश्चित् पटतो गवाक्षात्।
विनिर्गता द्वारकपाटदेशात्
तत्रत्वरात् तं ददृशुः पुरन्ध्यः॥ २९

एकं चलत्कुन्तलमानने स्वे
किमग्रगानान्तु मनांसि हर्तुम्।

पश्चात् कृतं मौलितले दधानं
किं पृष्ठगानां हरणं द्वितीयम् ॥ ३०
पीताम्बरार्द्धं बलितं स्फुरत्कटा-
वर्द्धं तदंसे जलदे यथा तडित् ।
पद्मं करे स्वे हृदि वैजयन्तीं
स्रजं दधानं वसुदेवनन्दनम् ॥ ३१
विलोक्य सर्वा मुमुहुः पुरस्त्रियो
विलोलपाठीननवीनकुण्डलम् ।
बालार्कहेमाङ्गदबाहुमण्डलं
राजन् असङ्ख्याण्डपतिं परात्परम् ॥ ३२

पुरन्ध्र्य ऊचुः

अहो वृन्दावनं रम्यं यत्र सन्निहितो ह्ययम् ।
धन्या गोपगणाः सर्वे पश्यन्त्येनं मनोहरम् ॥ ३३
धन्या गोपरमण्यस्ता याभिः किं सुकृतं कृतम् ।
पिबन्ति या रासरङ्गे मुहुश्चास्याधरामृतम् ॥ ३४

नारद उवाच

राजमार्गे रङ्गकारं रजकं यान्तमुन्मदम् ।
गोपालानुमतेनैव प्राह तं मधुसूदनः ॥ ३५
देहि नो मित्र वासांसि रुचिराणि महामते ।
दातुस्ते हि परं श्रेयो भविष्यति न संशयः ॥ ३६
प्रज्वलन् कृष्णवाक्येन घृतेनाग्निर्यथा भृशम् ।
कंसभृत्यो महादुष्टः प्राहेदं पथि माधवम् ॥ ३७

रजक उवाच

ईदृशान्येव वस्त्राणि पितृभिर्वः पितामहैः ।
धारितानि किमुद्वृत्तास्तेन कौपीनधारकाः ॥ ३८

यताशु वन्या नगरात् सर्वे वै जीवितेच्छया ।
कारागारे कारयामि युष्मान् वस्त्राहरानहम् ॥ ३६

नारद उवाच

एवं प्रवदतस्तस्य रजकस्य यदूत्तमः ।
जहार मस्तकं सद्यः कराग्रेणैव लीलया ।
तज्ज्योतिः श्रीघनश्यामे लीनं जातं विदेहराट् ॥ ४०
सद्यस्तदनुगाः सर्वे वासः कोशान् विसृज्य वै ।
दुद्रुवुः सर्वतो राजन् शरत्काले यथा घनाः ॥ ४१
गृहीत्वात्मप्रिये वस्त्रे स्थितयो रामकृष्णयोः ।
जगृहुर्गोपबालास्ते राजमार्गजना अपि ॥ ४२
तद्धारणाविदो बाला वासांसि रुचिराणि च ।
अस्तव्यस्तं परिदधुः श्रीकृष्णस्य प्रपश्यतः ॥ ४३
वीक्ष्य तौ वायकः कश्चित् श्रीकृष्णबलदेवयोः ।
विचित्रवर्णैर्वासोभिर्दिव्यं वेषं चकार ह ॥ ४४
तथान्येषां शिशूनाञ्च यथायोग्यं विधाय सः ।
राजन् परमया भक्त्या पुनः कृष्णं ददर्श ह ॥ ४५
प्रसन्नो भगवांस्तस्मै प्रादात् सारूप्यमात्मनः ।
बलं श्रियं तथैश्वर्यं बलदेवो ददौ पुनः ॥ ४६

इति श्रीगर्गसंहितायां मथुराखण्डे नारदबहुलाश्व-
संवादे मथुरायां श्रीकृष्णप्रवेशो नाम
पञ्चमोऽध्यायः ॥ ५

नारद उवाच

अथ गोपालकैः सार्द्धं श्रीकृष्णो नन्दनन्दनः ।
गृहं जगाम सबलः सुदाम्नो दाममालिनः ॥ १
दृष्ट्वा तौ स समुत्थाय नमस्कृत्य कृताञ्जलिः ।
पुष्पसिंहासने स्थाप्य प्राह गद्गदया गिरा ॥ २

सुदामोवाच

धन्यं कुलं मे भवनञ्च जन्म
त्वय्यागते देव कुलानि सप्त ।
मातुः पितुः सप्त तथा प्रियाया
वैकुण्ठलोकं गतवन्ति मन्ये ॥ ३
भूभारमाहर्तुमलं यदोः कुले
जातौ युवां पूर्णतमौ परेश्वरौ
नमो युवाभ्यां मम दीनदीनं
गृहं गताभ्यां जगदीश्वरौ परौ ॥ ४

नारद उवाच

इत्युक्त्वा पुष्परचनालङ्कारान् मधुपध्वनीन् ।
निवेद्य मकरन्दांश्च मालाकारो ननाम ह ॥ ५
धृत्वा तत्पुष्पनिचयं सबलो भगवान् हरिः ।
दत्त्वा गोपेभ्य आरात्तं प्राह प्रहसिताननः ॥ ६
गरीयसी मत्पदाब्जे भक्तिर्भूयात् सदा तव ।
मद्भक्तानान्तु सङ्गः स्यान्मत्सारूप्यमिहैव हि ॥ ७
बलदेवो ददौ तस्मै श्रियं चान्वयवर्द्धिनीम् ।
उत्थाय तौ ततो राजन् अन्यां वीथीं प्रजग्मतुः ॥ ८

यान्तीं स्त्रियं पद्मनेत्रां पाटीरालेपभाजनम् ।
बिभ्रतीं युवतीं कुब्जां पथि पप्रच्छ माधवः ॥ ६

भगवानुवाच

का त्वं कस्य प्रिया सुभ्रूः कस्यार्थं चन्दनं त्विदम् ।
देह्यावयोर्येन तव चिरं श्रेयो भविष्यति ॥ १०

सैरन्ध्र्युवाच

दास्यस्मि सुन्दरवर कुब्जा नाम महामते ।
मद्धस्तोत्पेशि पाटीरं जातं भोजपतेः प्रियम् ॥ ११
अद्यापि कंसदास्यस्मि साम्प्रतं तव चाद्यतः ।
हस्तिशुण्डादण्डसमे भुजदण्डेऽस्ति मे मनः ॥ १२
युवां विना कोऽन्यतमोऽनुलेपं कर्तुमर्हति ।
युवयोस्तु समं रूपं त्रैलोक्ये नहि विद्यते ॥ १३

नारद उवाच

उभाभ्यां सा ददौ सान्द्रं हर्षिता ह्यनुलेपनम् ।
अथतावङ्गरागेण रामकृष्णौ विरेजतुः ॥ १४
जगृहुश्चन्दनं दिव्यं किञ्चित् किञ्चिद् व्रजार्भकाः ।
त्रिवक्रामथ तां कृष्ण ऋज्वीं कर्तुं मनो दधे ॥ १५

आक्रम्य पद्भ्यां प्रपदेऽङ्गुलिद्वयं
प्रोत्तानहस्तेन विभुः परेश्वरः ।
प्रगृह्य नृणां चिबुके प्रपश्यतां
वक्रां तनुं तामुदनीनमद्धरिः ॥ १६
तदैव सा यष्टिसमानविग्रहा
दीप्त्या च रम्भां क्षिपतीव रूपिणी ।
भूत्वा गृहीत्वाह हरिं तु वाससि
शुचिस्मिता जातमनोजविह्वला १७

सैरन्ध्युवाच

गच्छाशु हे सुन्दरवर्य मद्गृह
त्यक्तुं भवन्तं किल नोत्सहेऽहम् ।
प्रसीद सर्वज्ञ रसज्ञ मानद
त्वया भृशं प्रोन्मथितं मनो मम ॥ १८

नारद उवाच

तदैव गोपा जहसुः परस्परम्
अहो किमेतत् करतालनिःस्वनैः ।
प्रहस्य रामस्य हरिः प्रपश्यत
स्तद्याच्यमानो ह्यवदत् परं वचः ॥ १९

भगवानुवाच

अहोऽतिधन्या मथुरापुरीयं
वसन्ति यत्रैव जनास्तु सौम्याः ।
येऽज्ञातपान्थान् स्वगृहं नयन्ति
दृष्ट्वा पुरीं धाम तवागमिष्ये ॥ २०

नारदउवाच

एवमुक्त्वोत्तरीयान्तं समाकृष्य गिरार्द्रया ।
राजमार्गं व्रजन् कृष्णो वैश्यानाढ्यान् ददर्श ह ॥ २१
पुष्पताम्बूलगन्धाद्यैः फलैर्दुग्धफलैर्हरिम् ।
सम्पूज्य स्वापणे स्थाप्य नेमुरग्रधियो विशः ॥ २२

वैश्या ऊचुः

भवेच्चेदत्र ते राज्यं तावकान् स्मरतात् तदा ।
वयं तव प्रजा देव राज्ये प्राप्ते न कः स्मरेत् ॥ २३

नारद उवाच

पप्रच्छ सुस्मितो वैश्यान् कोदण्डस्थानमच्युतः ।
न ते तमूचुः सुधियः कोदण्डे भङ्गशङ्कया ।। २४
तद्रूपगुणमाधुर्यमोहिता ये च माथुराः ।
कौमार पश्यैहि धनुरित्यूचुस्तद्दिदृक्षवः ।। २५
तैर्दृष्टेन पथा कृष्णः प्रविष्टो धनुषः स्थलम् ।
मैत्रीं कुर्वन् वयस्यैश्च माथुरैः पुरबालकैः ।। २६
यथैन्द्रं हेमचित्राढ्यं कोदण्डं सप्ततालकम् ।
पुरुषैः पञ्चसाहस्रैर्नेतुं योग्यं बृहद्गुरम् ।। २७
अष्टधातुमयं क्लिष्टं लक्षभारसमं परम् ।
चतुर्दश्यां पौरजनै र्चितं यज्ञमण्डपे ।। २८
भार्गवेण पुरा दत्तं यदुराजाय माधवः ।
ददर्श कुण्डलीभूतं साक्षाच्छेषमिव स्थितम् ।। २९
वार्य्यमाणो नृभिः कृष्णः प्रसह्य धनुराददे ।
पश्यतां तत्र पौराणां सज्यं कृत्वाथ लीलया ।। ३०
आकृष्य कर्णपर्यन्तं दोर्दण्डाभ्यां हरिर्धनुः ।
बभञ्ज मध्यतो राजन् इक्षुदण्डं गजो यथा ।। ३१
भज्यमानस्य धनुषष्टङ्कारोऽभूत्तडित्स्वनः ।
ननाद तेन ब्रह्माण्डं सप्तलोकैर्बिलैः सह ।।
विचेलुर्दिग्गजास्तारा पजङ्खखण्डमण्डलम् ।। ३२
तदैव बधिरीभूता पृथिव्यां जनमण्डली ।
कंसस्य हृदयं शब्दो विददार घटीद्वयम् ।। ३३
तद्रक्षिणः प्रकुपिता उत्थिता आततायिनः ।
ग्रहीतुकामाः श्रीकृष्णं प्रत्यूचुर्बध्यतामिति ।। ३४
अथ तानागतान् वीक्ष्य सशस्त्रान् बलकेशवौ ।
कोदण्डशकले नीत्वा जघ्नतुर्दुर्मदान् भृशम् ।। ३५

यस्त्वेव सर्वाङ्गमनोहरः सखि
स एव नेत्रेण कथं समीक्ष्यते ॥ ४३
अङ्गे ह्यङ्गे सुन्दरे नन्दसूनोः
प्राप्तं प्राप्तं यत्र यत्रापि नेत्रम् ।
तस्मात्तस्मान्नाम तल्लब्धसौख्यं
लावण्याब्धौ मग्नवल्लग्नचित्तम् ॥ ४४

नारद उवाच

दृष्ट्वा दिने यं व्रजराजनन्दनं
स्वप्नेऽपि तद्वद्ददृशुः पुरस्त्रियः ।
गोप्यः कथं तं मधुरं न सस्मरु-
र्याभिः कृतं मैथिल रासमण्डलम् ॥ ४५

इति श्रीगर्गसंहितायां मथुराखण्डे नारदबहुलाश्व-
संवादे मथुरादर्शनं नाम
षष्ठोऽध्यायः ॥ ६

नारद उवाच

रजकस्य शिरश्छेदं कंसो वै रक्षिणां वधम् ।
धनुर्भङ्गं ततः श्रुत्वा परं त्रासमुपागतः ॥ १
तत्क्षणाद् दुर्निमित्तानि वामाङ्गस्फुरणानि च ।
प्रपश्यन् अङ्गभङ्गानि न निद्रां प्राप दैत्यराट् ॥ २
स्वप्ने प्रेतैः समायुक्तस्तैलाभ्यक्तो दिगम्बरः ।
जपास्रङ् महिषारूढो दक्षिणाशां जगाम सः ॥ ३
प्रातःकाले समुत्थाय कार्यभारकरान् जनान् ।
आहूय कारयामास मल्लक्रीडामहोत्सवम् ॥ ४
विशालाजिरसंयुक्ते हेमस्तम्भसमन्विते ।
सभामण्डपदेशाग्र्ये रङ्गभूमिर्बभूव ह ॥ ५
वितानैर्हेमसङ्काशैर्मुक्तादामबिलम्बिभिः ।
सोपानैर्हेममञ्चैश्च रङ्गभूमिर्बभौ नृप ॥ ६
राजमञ्चे रत्नमये मकरन्दार्चिते शुभे ।
शक्रसिंहासनं तत्र सोपबर्हणमण्डलम् ॥ ७
आतपत्रेण दिव्येन चन्द्रमण्डलचारुणा ।
हंसाभैर्व्यजनैर्युक्तं चामरैर्वज्रमुष्टिभिः ॥ ८
दशहस्तोच्छ्रितं शश्वद्विश्वकर्मविनिर्मितम् ।
तदारुह्य बभौ कंसोऽद्रिशृङ्गे मृगराडिव ॥ ९
गायकाः प्रजगुस्तत्र ननृतुर्वारयोषितः ।
नेदुर्मृदङ्गपटहतालभेर्यानकादयः ॥ १०
राजानो मण्डलेशाश्च पौरा जानपदा नृप ।
ददृशुर्मल्लयुद्धं ते मञ्चे मञ्चे समास्थिताः ॥ ११

चाणूरो मुष्टिकः कूटः शलस्तोशल एव च ।
व्यायाममुद्गरैर्युक्ता युयुधुस्ते परस्परम् ।। १२
नन्दराजादयो गोपाः कंसाहूता नताननाः।
दत्त्वा बलिं परं तस्मै एकस्मिन् मञ्च आश्रिताः ।। १३
बाणासुरजरासन्धनरकाणां पुरान्नृप ।
अन्येषां शम्बरादीनां सकाशाद्भुजां तथा ।।
बलयश्चाययू राजन् यदुराजाय तत्र वै ।। १४
अथ तौ रामकृष्णौ द्वौ मायाबालकविग्रहौ
मल्ललीलादर्शनार्थं ययतू रङ्गमण्डपम् ।। १५
गोमूत्रचयसिन्दूरकस्तूरीपत्रभृन्मुखम् ।
स्रवन्मदं महामत्तं रत्नकुण्डलमण्डितम् ॥ १६
गजं कुवलयापीडं रङ्गद्वारमवस्थितम् ।
वीक्ष्य कृष्णो महामात्र प्राह गम्भीरया गिरा ।। १७
आकर्षयाङ्ग नागेन्द्रं मार्गं कुरु ममेच्छया ।
नचेत् त्वां पातयिष्यामि सनागं भूमिमण्डले ॥ १८
महामात्रस्तदा क्रुद्धो नोदयामास तं गजम् ।
चीत्कारमुत्कटं दिक्षु कुर्वन्तं नन्दसूनवे ॥ १९
गृहीत्वा तं हरिं सद्यः शुण्डादण्डेन नागराट् ।
उज्जहार ततस्तस्मान्निर्गतो भारभृद्धरिः ॥ २०
तत्पादेषु विलीनोऽभूत् प्रभ्रम्रन् सन्नितस्ततः ।
वृन्दावननिकुञ्जेषु वृक्षेषु च यथा हरिः ।। २१
करे जग्राह तन्नागः शुण्डादण्डेन चाङ्घ्रिषु ।
निष्पीड्य शुण्डां हस्ताभ्यां हरिः पश्चाद्विनिर्गतः ।। २२
तिर्यग्भूतश्च तं नागो ग्रहीतुमुपचक्रमे ।
मुष्टिना तं घातयित्वा पुरो दुद्राव माधवः ।। २३

तमन्वधावन्नागेन्द्रो मथुरायां विदेहराट् ।
कोलाहले तदा जाते हरिस्तस्मादितो ययौ ॥ २४
पुच्छे गृहीत्वा तं नागं बलदेवो महाबलः ।
चकर्ष भुजदण्डाभ्यां फणिनं गरुडो यथा ॥ २५
प्रहसन् भगवान् कृष्णो गृहीत्वा तं करे बलात् ।
चकर्ष भुजदण्डाभ्यां कूपरज्जुं यथा नरः ॥ २६
द्वयोराकर्षणान्नागो विह्वलोऽभून्नृपेश्वर ।
महामात्रास्तदा सप्त रुरुहुस्तं गजं बलात् ॥ २७
नीता गजास्तथा चान्यैः कृष्णं हन्तुं शतत्रयम् ॥ २८
अङ्कुशास्फालनात् क्रुद्ध मत्तेभं पुनरागतम् ।
श्रीकृष्णो भगवान् साक्षाद्बलदेवस्य पश्यतः ॥ २९
शुण्डादण्डे सङ्गृहीत्वा भ्रामयित्वा त्वितस्ततः ।
पातयामास भूपृष्ठे कमण्डलुमिवार्भकः ॥ ३०
दूरे प्रपतितास्तस्य महामात्रा इतस्ततः ।
सर्वेषां पश्यतां नागः सद्यो वै निधनं गतः ॥ ३१
तज्ज्योतिः श्रीघनश्यामे लीनं जातं विदेहराट् ।
दन्तावुत्पाट्य तस्यापि रामकृष्णौ महाबलौ ।
निजघ्नतुर्महामात्रान् मृगान् केसरिणौ यथा ॥ ३२
द्विपे हतेऽपि ये चान्ये महामात्रा इतस्ततः ।
विदुद्रुवुर्यथा मेघा वर्षाकाले गते सति ॥ ३३
एवं हत्वा द्विपं गोपैः शेषैस्तैः प्रेक्षणोत्सुकैः ।
जयारावे रामकृष्णौ श्रमवारिमदाङ्कितौ ॥ ३४
परिश्रमारुणमुखौ रङ्गं विविशतुस्त्वरम् ।
दन्तपाणी महावेगौ यथाशामनिलानलौ ॥ ३५

मल्लाश्च मल्लश्च नरा नरेन्द्रं
स्त्रियः स्मरं गोपगणा व्रजेशम् ।

पिता सुतं दण्डधरं ह्यसन्तो
मृत्युश्च कंसो विबुधा विराजम् ॥ ३६
तत्त्वं परं योगिवराश्च भोजा
दैवं तदा रङ्गगतं बलेन ।
पृथक् पृथग्भावनया ह्यपश्यन्
सर्वे जनास्तं परिपूर्णदेवम् ॥ ३७
हतं द्विपं वीक्ष्य च तौ महाबलौ
कंसो मनस्वी भयभावचेताः ।
मञ्चस्थिता हर्षितमानसाश्च
चन्द्रं चकोरा इव ते सुखं ययुः ॥ ३८
कर्णे च कर्णं विनिधाय नागरा
महोत्सुकास्ते ह्यवदन् परस्परम् ।
एतौ हि साक्षात् परमेश्वरौ परौ
बभूवतुर्वै वसुदेवनन्दनौ ॥ ३९
अहोऽतिरम्यं व्रजमण्डलं परं
यत्रैष साक्षाद्विचचार माधवः ।
कृत्वा हि यद्दर्शनमद्यदुर्लभं
वयं कृतार्थास्तु भवेम सर्वतः ॥ ४०

नारद उवाच

वदत्सु पौरलोकेषु नदत्सूर्येषु मैथिल ।
चाणूरस्तावुपव्रज्य रामकृष्णावुवाच ह ॥ ४१

चाणूर उवाच

हे राम हे कृष्ण युवां महाबलौ
राज्ञः पुरो वै कुरुतं मृधं बलात् ।
प्रहर्षिते राजनि चेद् यदूत्तमे
किं किं न भद्रं भवतीह वश्च नः ॥ ४२

भगवानुवाच

पुरैव भद्रं नृपतेः प्रसादतो
बाला वयं तुल्यबलैश्च बालकैः ।
भूयान् मृधो नो बलवान् यथोचितम्
अधर्मयुद्धं किल मा भवेदिह ॥ ४३

चाणूर उवाच

भवान् न बालो न च वा किशोरो
बलश्च साक्षाद्बलिनां बलीयान् ।
सहस्रमत्तेभबल दधानो-
द्विपो भवद्भ्यां निहतः सलीलम् ॥ ४४

नारद उवाच

एव तस्य वचः श्रुत्वा भगवान् वृजिनार्दनः ।
चाणूरेणापि युयुधे मुष्टिकेन बलो बली ॥ ४५
आकर्षणं बन्धनञ्च भुजाभ्यां भुजदण्डयोः ।
चक्रतुः पश्यतां नृणां गजाविव जिगीषया ॥ ४६
हस्ताभ्यां वपुरुत्थाप्य चाणूरस्य हरिः स्वयम् ।
अतोलयद्देहभारं पुण्यभारं यथा विधिः ॥ ४७
चाणूरस्तं हरिं देवं करेणैकेन लीलया ।
उज्जहार महावीरो भूखण्डं नागराडिव ॥ ४८
ग्रीवायां किल चाणूरं भुजवेगेन माधवः ।
कट्यां चोद्धृत्य सहसा पातयामास भूतले ॥ ४९
मुष्टिकञ्च तथा युद्धे बलदेवो महाबलः ।
जानुदेशे समुत्थाप्य पातयामास भूतले ॥ ५०
हस्तैश्च जानुभिः पादैर्भुजोरुगलमुष्टिभिः ।
जघ्नतुः कृष्णचाणूरौ तथैव बलमुष्टिकौ ॥ ५१

श्रमवारि पतन् दृष्ट्वा श्रीमुखे रामकृष्णयोः ।
सानुकम्पास्तदा प्राहुर्गवाक्षस्था नृपस्त्रियः ॥ ५२

स्त्रिय ऊचुः

अहो अधर्मः सुमहत्सभायां
जातः पुरो राजनि वर्तमाने ।
क्व वज्रतुल्याङ्गवृतौ हि मल्लौ
क्व पुष्पतुल्यौ बत रामकृष्णौ ॥ ५३
अहो ह्यभाग्यं हि पुरौकसां नो
युद्धे तयोर्दर्शनमद्यजातम् ।
अहोऽतिधन्यं बत भूरिभाग्यं
वनौकसां रासरसेन जातम् ॥ ५४
अहो स्थिते राजनि दुष्टचित्ते
न कोऽपि वक्तुं क्षम एव सख्यः ।
तस्माद्धि नः पुण्यबलेन चेत् तौ
त्वरं मृधे वै जयतामरीन् स्वान् ॥ ५५

इति श्रीगर्गसंहितायां मथुराखण्डे
नारदबहुलाश्वसंवादे
सप्तमोऽध्यायः ॥७

नारद उवाच

आर्द्रचित्तं नन्दराजं वनितानां मनोरथम् ।
स्मृत्वा शत्रून् हन्तुकामश्चक्रे युद्धं बलाद्धरिः ॥ १
गृहीत्वा भुजदण्डाभ्यां चाणूरं गगने बलात् ।
चिक्षेप सहसा कृष्णो वातः पद्ममिवोद्धृतम् ॥ २
आकाशात् पतितः सोऽपि तारकेव ह्यधोमुखः ।
उत्थाय मुष्टिना कृष्णं ताडयामास वेगत. ॥ ३
तस्य मुष्टिप्रहारेण न चचाल परात्परः ।
सद्यो गृहीत्वा चाणूरं पातयामास वेगतः ॥ ४
भिन्नदन्तस्तु चाणूरः क्रोधयुक्तो मदोत्कटः ।
मुष्टिद्वयेन श्रीकृष्णं तताड हृदि मैथिल ॥ ५
गृहीत्वा करयोस्तं वै कराभ्यां भगवान् स्वयम् ।
कंसस्याग्रे भ्रामयित्वा सर्वेषां पश्यतां नृप ॥
पातयामास भूपृष्ठे कमण्डलुमिवार्भकः ॥ ६
श्रीकृष्णस्य प्रहारेण चाणूरो भिन्नमस्तकः ।
उद्वमन् रुधिरं राजन् सद्यो वै निधनं गतः ॥ ७
तथैव मुष्टिकं मल्ल मुष्टिभिर्युधि दुर्गमम् ।
नीत्वाङ्घ्रौ भ्रामयित्वा खे बलदेवो महाबलः ॥ ८
पातयामास भूपृष्ठे फणिनं गरुडो यथा ।
मुष्टिको निधनं प्राप्तः प्रोद्वमन् रुधिरं मुखात् ॥ ९
कूटं समागतं वीक्ष्य बलदेवो महाबलः ।
मुष्टिना पातयामास वज्रेणेन्द्रो यथा गिरिम् ॥ १०
प्राप्तं शलं नन्दसूनुर्लत्तया तं तताड ह ।
तीक्ष्णया तुण्डया राजन् कद्रुजं गरुडो यथा ॥ ११

गृहीत्वा तोशलं कृष्णो मध्यतः सविधार्य च ।
प्राक्षिपत् कंसमञ्चाग्रे विटपं सिन्धुरो यथा ॥ १२
एते निपातिता रङ्गे सद्यो वै निधन गताः ।
तेषां ज्योतींषि वैकुण्ठे विविशुः पश्यतां सताम् ॥ १३
एवं श्रीरामकृष्णाभ्यां मल्लेषु निहतेषु च ।
शेषाः प्रदुद्रुवुर्मल्ला भयार्ता जीवनेच्छया ॥ १४
श्रीदामादीन् वयस्यांश्च गोपानाकृष्य माधवः ।
तैः सार्द्धं युद्धमारेभे सर्वेषां पश्यतां सताम् ॥ १५
किरीटकुण्डलधरौ रामकृष्णौ सहार्भकैः ।
विहरन्तौ वीक्ष्य रङ्गे विसिस्मुः पुरवासिनः ॥ १६
कंसं विना सर्वमुखाज्जयशब्दो विनिर्गतः ।
साधु साध्विति वादोऽभून्नेदुर्दुन्दुभयस्ततः ॥ १७
स्वस्याजय वीक्ष्य कंसो महाक्रोधसमाकुलः ।
वर्जयित्वा तूर्यघोषान् प्राह प्रस्फुरिताधरः ॥ १८

कंस उवाच

दुर्बुद्धियुक्तौ वसुदेवनन्दनौ
प्रसह्य निःसारयताशु मत्पुरात् ।
हरन्तु सर्वं व्रजवासिनां धनं
बध्नीत नन्दं सहसातिदुर्मतिम् ॥ १९
अद्योग्रसेनस्य पितुः कुबुद्धेः
शौरेः शिरश्चाशु हि छिन्धि छिन्धि ।
कौ यत्र तत्रापि तथात्र वृष्णीन्
जातान् सुरांशान् किल सूदयध्वम् ॥ २०

नारद उवाच

एवं विकत्थमानस्य कंसस्य यदुनन्दनः ।
सहसोत्पत्य तं मञ्चमारुहत् क्रोधपूरितः ॥ २१

मृत्यु समागतं वीक्ष्य मञ्चादुत्थाय सत्वरम् ।
मदोद्धतो भर्त्सयंस्तं जगृहे सोऽसिचर्म्मणी ॥ २२
प्रग्रहीत् सहसा कंसं दोर्भ्यां चर्मासिसंयुतम् ।
यथा तुण्डविभागाभ्यां सविषं फणिनं विराट् ॥ २३
पतत्खड्गश्चलच्चर्मा भुजबन्धाद्बलाद्बली ।
विनिर्ययौ तार्क्ष्यतुण्डात् पुण्डरीको यथा फणी ॥ २४
मञ्चे तौ बलिनौ वेगान् मर्दयन्तौ परस्परम् ।
शैलश्रृङ्गे तथा सिंहौ शुशुभाते यथातथम् ॥ २५
उत्पतन्तं बलात् कंसं शतहस्तं महाम्बरे ।
अग्रहीच्चोत्पतन् कृष्णः श्येनं श्येनो यथाम्बरे ॥ २६
गृहीत्वा भुजदण्डाभ्यां प्रचण्डं दैत्यपुङ्गवम् ।
त्रैलोक्यबलधृग् देवो भ्रामयित्वा त्वितस्ततः ॥ २७
आकाशात् पातयामास मञ्चोपरि रुषान्वितः ।
भग्नदण्डोऽभवन्मञ्चस्तडित्पाते यथा द्रुमः ॥ २८
पतितोऽपि स वज्राङ्गः किञ्चिद्व्याकुलमानसः ।
सहसोत्थाय युयुधे श्रीकृष्णेन महात्मना ॥ २९
नीत्वा तं भुजदण्डाभ्यां मञ्चे क्षिप्त्वा पुनः प्रभुः ।
आरुह्य हृदयं तस्य मौलिं जग्राह माधवः ॥ ३०
सद्यः प्रगृह्य केशेषु रङ्गोपरि हरिः स्वयम् ।
मञ्चात्तं पातयामास शैलाद् गण्डशिलामिव ॥ ३१
तस्योपरिष्टात् श्रीकृष्ण सर्वाधारः सनातनः ।
निपपात स्वयं वेगादनन्तोऽनन्तविक्रमः ॥ ३२
इत्थं द्वयोर्निपातेन निम्नं भूखण्डमण्डलम् ।
स्थालीव सहसा राजंश्चकम्पे घटिकाद्वयम् ॥ ३३
सम्परेतं भोजराजं भूमौ तं विचकर्ष ह ।
यथा मृगेन्द्रो नागेन्द्रं सर्वेषां पश्यतां नृप ॥ ३४

हाहाकारस्तदैवासीद्धावतां भूभुजां नृप ।
वैरभावेन देवेशं भजन् कंसो महाबलः ।
जगाम तस्य सारूप्यं भृङ्गिणः कीटको यथा ॥ ३५
कंसं प्रपतितं दृष्ट्वा भ्रातरोऽष्टौ महाबलाः ।
सुनामसृष्टिन्यग्रोधतुष्टिमद्राष्ट्रपालकाः ॥ ३६
सुहुना कङ्कशङ्कुभ्यां क्रोधप्रस्फुरिताधराः ।
खड्गचर्मधरा योद्धुं कृष्णोपरि समाययुः ॥ ३७
वीक्ष्य तान् मुद्गरं नीत्वा रोहिणीनन्दनो बलः ।
आराच्चकार हुङ्कारं यथा सिंहो मृगान् प्रति ॥ ३८
हुङ्कारेणैव शस्त्राणि तेषां हस्तेभ्य आ भयात् ।
पेतुराम्रफलानीव दण्डघातैश्च मैथिल ॥ ३९
निःशस्त्रास्ते महावीरा मुष्टिभिः सर्वतो बलम् ।
तेडुः शैलं यथा नागा शुण्डादण्डैरितस्ततः ॥ ४०
सृष्टिं तथा सुनामानं मुद्गरेण बलोऽहनत् ।
न्यग्रोधं भुजवेगेन कङ्कं वामकरेण वै ॥ ४१
शङ्कुं सुहुं तुष्टिमन्तं वामपादेन माधवः ।
राष्ट्रपालं दक्षिणेन पादेनाभिजघान ह ॥ ४२
अष्टौ निपेतुः सहसा वृक्षा वातहता इव ।
तेषां ज्योतिर्भगवति लीनं जातं विदेहराट ॥ ४३
देवदुन्दुभयो नेदुर्जयध्वनिरभूत्तदा ।
सद्यो वै ववृषुर्देवाः पुष्पैर्नन्दनसम्भवैः ॥ ४४
विद्याधर्यश्च गन्धर्व्यो ननृतुर्हर्षविह्वलाः ।
विद्याधराश्च गन्धर्वाः किन्नरास्तद्यशो जगुः ॥ ४५
ब्रह्माद्या मुनयः सिद्धा विमानैर्द्रष्टुमागताः ।
तुष्टुवू रामकृष्णौ तौ वाग्भिः श्रुतिपरायणाः ॥ ४६

ताडयन्त्य उरो हस्तैरस्तिप्राप्त्यादयः स्त्रियः ।
विनिर्गतास्ता रुरुदुर्जातवैधव्यदुःखिताः ॥ ४७

स्त्रिय ऊचुः

हा नाथ हे यदुपते क्व गतोऽसि महाबल ।
त्रैलोक्यविजयी साक्षाद्देवानामपि दुर्जयः ॥ ४८
जातमात्राः स्वसुः पुत्रा निर्घृणेन त्वया हताः ।
अनिर्दशा निर्दशाश्च परेऽपि निहता बलात् ।
तेन पापेन घोरेण दशामेतादृशीं गतः ॥ ४९

नारद उवाच

एवमश्रुमुखीर्दीना आश्वास्य नृपयोषितः ।
विधाय यमुनातीरे चिताः श्रीखण्डसंयुताः ॥ ५०
हतानां कारयित्वासौ क्रियां वै पारलौकिकीम् ।
सर्वान् सम्बोधयामास भगवाँल्लोकभावनः ॥ ५१

इति श्रीगर्गसंहितायां मथुराखण्डे नारदबहुलाश्व-
संवादे कंसवधो नाम
अष्टमोऽध्यायः ॥ ८

नारद उवाच

अथ देवौ रामकृष्णौ देवकीवसुदेवयोः ।
समीपं जग्मतुः साक्षाद्वृष्णिभिः परिवारितौ ॥ १
स्वतस्तयोर्बन्धनानि ययुः शिथिलतां नृप ।
तौ वीक्ष्य गरुडे प्राप्ते नागपाशगुणा यथा ॥ २
स्वप्रभावविदौ वीक्ष्य पितरौ सबलो हरिः ।
सद्यस्ततान स्वां मायां जगन्मोहकरीं बलात् ॥ ३
रामकृष्णौ सुतौ ज्ञात्वा शौरिर्मोहसमाकुलः ।
देवक्या सहसोत्थाय सस्वजे चाश्रुपूरितः ॥ ४
तावाश्वास्य हरिः सद्यो वृष्णिभिः परिवारितः ।
मातामहं तूग्रसेनं चकार मथुराधिपम् ॥ ५
आहूय यादवान् कंसभयाद्देशान्तरं गतान् ।
प्रेम्णा निवासयामास सकुटुम्बान् यदोः पुरि ॥ ६
नन्दराजं गोपगणैः स्वगृहान् गन्तुमुद्यतम् ।
नत्वा तं सबलः प्राह मोहयन्निव मायया ॥ ७

अत्रैव वासं कुरु तात पुर्यां
गन्तुं यदीच्छा सहसोत्थिता स्यात् ।
पश्चादहं वै सबलो यदून् वा
विधाय पार्श्वे तव चागमिष्ये ॥ ८

नारद उवाच

एवं श्रीरामकृष्णाभ्यां नन्दराजः प्रपूजितः ।
आलिङ्ग्य शौरिं गोपालैर्ययौ प्रेमातुरौ व्रजम् ॥ ९
दत्तं श्रीकृष्णजन्मर्क्षे धेनूनां नियुतं पुरा ।
ब्राह्मणेभ्यो ददौ शौरिर्वस्त्रमालास्वलङ्कृतम् ॥ १०

शौरिर्गर्गं समाहूय श्रीकृष्णबलदेवयोः ।
यज्ञोपवीतं विधिवत् कारयामास धर्मवित् ॥ ११
रामकृष्णौ सर्वविद्याध्ययनं कर्तुमुद्यतौ ।
गुरोः सान्दीपनेः पार्श्वं जग्मतुर्जनवत् परौ ॥ १२
कृत्वा परां गुरोः सेवां लघुकालेन माधवौ ।
सर्वविद्यां जगृहतुः सर्वविद्याविदां वरौ ॥ १३
गुरवे दक्षिणां दातुमुद्यतौ तौ कृताञ्जली ।
मृतं पुत्रं दक्षिणायां ताभ्यां वव्रे गुरुर्द्विजः ॥ १४
रथमारुह्य तौ दान्तौ शातकुम्भपरिच्छदम् ।
प्रभासे चाब्धिनिकटं जग्मतुर्भीमविक्रमौ ॥ १५
सद्यः प्रकम्पितः सिन्धू रत्नोपायनमुत्तमम् ।
नीत्वा तच्चरणोपान्ते निपपात कृताञ्जलिः ॥ १६
तमाह भगवान् शीघ्रं पुत्रं देहि गुरोर्मम ।
प्रचण्डोर्मिघटाटोपैस्त्वया तद्ग्रहणं कृतम् ॥ १७

समुद्र उवाच

भगवन् देव देवेश न मया बालको हृतः ।
धृतः पञ्चजनेनासौ शङ्खरूपासुरेण वै ॥ १८
वसन् सदा मदुदरे बलिष्ठो दैत्यपुङ्गवः ।
जेतुं योग्यस्त्वया देव देवानां भयकारकः ॥ १९

नारद उवाच

तेनोक्तो भगवान् कृष्णो वासो बध्वा कटौ दृढम् ।
निपपात महावेगात् समुद्रे भीमनादिनि ॥ २०
श्रीकृष्णस्य निपातेन त्रिलोकीभारधारिणः ।
चकम्पेऽब्धिर्भृशं वज्रकूटेनेव विदेहराट् ॥ २१

ततः पञ्चजनो दैत्यो योद्धुं श्रीकृष्णसम्मुखे ।
आगतः सहसा वीरः शूलं चिक्षेप माधवे ॥ २२
हस्ते गृहीत्वा तच्छूलं तेनैवाभिजघान तम् ।
तद्घातेन प्रपतितो मूर्च्छितो वारिमण्डले ॥ २३
सहसोत्थाय देवेशं किञ्चिद्व्याकुलमानसः ।
मूर्ध्ना तताड पक्षीन्द्रं स्वफणेन फणी यथा ॥ २४
परिपूर्णतमः साक्षाच्छ्रीकृष्णो भगवान् हरिः ।
क्रुद्धो मूर्द्धनि वेगेन मुष्टिना तमताडयत् ॥ २५
कृष्णमुष्टिप्रहारेण सद्यो वै निधनं गतः ।
तज्ज्योतिः श्रीघनश्यामे लीनं जातं विदेहराट् ॥ २६
एवं हत्वा पञ्चजनं शङ्खं नीत्वा तदङ्गजम् ।
महार्णवान्निर्गतोऽसौ सहसा रथमागमत् ॥ २७
वायुवेगेन यानेन रामकृष्णौ मनोहरौ ।
जग्मतुः शमनस्यापि दीर्घां संयमिनीं पुरीम् ॥ २८
पाञ्चजन्यध्वनिर्लोकं प्रचण्डो मेघघोषवत् ।
पूरयामास यं श्रुत्वा चकम्पे ससभो यमः ॥ २९
चतुरशीतिलक्षेषु नरकेषु निपातिताः ।
यैर्यैः श्रुतो ध्वनिस्ते ते जग्मुर्मोक्षन्तु पापिनः ॥ ३०
यमः सद्यो बलिं नीत्वा श्रीकृष्णबलदेवयोः ।
पपात चरणोपान्ते धर्षितः सन् कृताञ्जलिः ॥ ३१

यम उवाच

हे हरे हे कृपासिन्धो राम राम महाबल ।
असङ्ख्यब्रह्माण्डपती परिपूर्णतमौ युवाम् ॥ ३२
देवौ पुराणौ पुरुषौ महान्तौ
सर्वेश्वरौ सर्वजगज्जनेशौ ।

अद्यैव सर्वोपरि वर्तमानौ
गिरा निजाज्ञां वदतं परेशौ ॥ ३३

भगवानुवाच

गुरुपुत्रं लोकपाल आनयस्व महामते ।
राज्यं कुरु यथान्यायं मदुक्तं मानयं क्वचित् ॥ ३४

नारद उवाच

तदैव तेनोपानीतं गुरुपुत्रं हरिः स्वयम् ।
गृहीत्वावन्तिकामेत्य ददौ श्रीगुरवे शिशुम् ॥ ३५
गुर्वाशिषा तौ संयुक्तौ नत्वा तं हि कृताञ्जली ।
रथमारुह्य मथुरामागतौ यदुपूजितौ ॥ ३६
एकदा सबलः कृष्णः सर्वकारणकारणः ।
पाण्डवान् संस्मरन् भक्तानक्रूरभवनं ययौ ॥ ३७
अक्रूरः सहसोत्थाय परिरभ्य मुदान्वितः ।
उपचारैः षोडशभिः पूजयित्वाथ तौ नृप ॥ ३८
कृताञ्जलिपुटः स्थित्वा जातः पूर्णमनोरथः ।
उवाचानन्दजनितां मुञ्चन् वाष्पकलां नृप ॥ ३९

अक्रूर उवाच

युवाभ्यां रामकृष्णाभ्यां ताभ्यां नित्यं नमोनमः ।
याभ्यां मार्गे यदुक्तं मे पूर्णं तच्च कृतं प्रभू ॥ ४०
लोकाभिरामौ जनभूषणोत्तमौ
चान्तर्बहिः सर्वजगत्प्रदीपकौ ।
गोविप्रसाधुश्रुतिधर्मदेवता-
रक्षार्थमद्यैव यदोः कुले गतौ ॥ ४१
कंसादिदैत्येन्द्रविनाशहेतवे
गोलोकलोकात् परिपूर्णतेजसौ ।

समागतौ भारतभूमिमण्डले
युवां परेशौ सततं नतोऽस्म्यहम् ॥ ४२

भगवानुवाच

त्वमार्य वृद्धो धृतिमानहं तव पुरः शिशुः ।
सन्तो न स्वात्मनः श्लाघां कुर्वन्ति हि महामते ॥ ४३
पाण्डवानां हि कुशलं द्रष्टुं गच्छ गजाह्वयम्
शीघ्रमागच्छ तान् दृष्ट्वा सर्वान् दानपते भवान् ॥ ४४

नारद उवाच

एवमुक्त्वा तदाक्रूरं भगवान् भक्तवत्सलः ।
सबलः शौरिभवनमाययौ सर्वकार्यकृत् ॥ ४५
कौरवेन्द्रपुरं गत्वाक्रूरो दृष्ट्वाथ पाण्डवान् ।
पुनरागत्य कृष्णाय वार्तां सर्वामवर्णयत् ॥ ४६

अक्रूर उवाच

विना युवां कोऽपि न पाण्डवानां
सहायकृत् कौरवदुःखहृत् कः ।
मृते च पाण्डौ भवतोः पदाब्जे
विलग्नचित्ता हि पृथात्मजा ये ॥ ४७

नारद उवाच

इति श्रुत्वाक्रूरमुखाच्छ्रीकृष्णो भगवान् हरिः ।
अर्द्धं राज्यं पाण्डवेभ्यः कौरवाणां बलाद् ददौ ॥ ४८
अथोक्तं वचनं स्मृत्वा तदोद्धवसमन्वितः ।
महामङ्गलसंयुक्तं कुब्जाया भवनं ययौ ॥ ४९
दृष्ट्वाराच्छ्रीहरिं प्राप्तं कुब्जा रूपवती त्वरम् ।
भक्त्या समर्हयामास पाद्याद्यैः प्राणवल्लभम् ॥ ५०

हेमरत्नखचितकुड्ये कुब्जाया भवनोत्तमे ।
बभौ हरी रूपवत्या वैकुण्ठे रमया यथा ॥ ५१
परिपूर्णतमः साक्षाच्छ्रीकृष्णो भगवान् स्वयम् ।
यस्याः पतिरभूद्राजन् अहो तस्यास्तपो महत् ॥ ५२
तत्र स्थित्वा हरिर्देवो दिनान्यष्टौ विदेहराट् ।
आययौ शौरिभवनं लीलामानुषविग्रहः ॥ ५३
इति श्रीकृष्णचरितं मथुरायां विदेहराट् ।
सर्वपापहरं पुण्यमायुर्वर्द्धनमुत्तमम् ॥ ५४
चतुःपदार्थदं नृणां श्रीकृष्णवशकारकम् ।
मया ते कथितं पृष्टं किं भूयः श्रोतुमिच्छसि ॥ ५५

इति श्रीगर्गसंहितायां मथुराखण्डे नारदबहुलाश्व-
संवादे यदुसौख्यं नाम
नवमोऽध्यायः ॥ ९

बहुलाश्व उवाच

श्रीकृष्णचरितं पुण्यं मया तव मुखाच्छ्रुतम् ।
पुनः श्रोतुं मनश्चो ग्रतृषितो वा जलं गतः ॥ १
कंसस्य जन्मकर्माणि त्वयोक्तानि श्रुतानि मे ।
केश्यादिदैत्यैर्देवर्षे पूर्वजन्मकृतं श्रुतम् ॥ २
कोऽयन्तु रजकः पूर्वमवधीद् यं हरिः कथम् ।
अहो यस्य महज्ज्योतिः कृष्णे लीनं बभूव ह ॥ ३

नारद उवाच

त्रेतायुगे त्वयोध्यायां रामराज्ये विदेहराट् ।
चाराणां शृण्वतां कश्चिद्रजको ह्यवदत् प्रियाम् ॥ ४
नाहं बिभर्मि त्वां दुष्टामसतीं परवेश्मगाम् ।
स्त्रीलोभी बिभृयात् सीतां रामो नाहं भजे पुनः ॥ ५
इति लोकाद्बहुमुखाद्वाक्यं श्रुत्वाथ राघवः ।
सीतां तत्याज सहसा वने लोकापवादतः ॥ ६
तस्मै दण्डं दातुमिच्छां न चक्रे राघवोत्तमः ।
मथुरायां द्वापरान्ते रजकः स बभूव ह ॥ ७
कुवाक्यदोषशान्त्यर्थं तं जघान हरिः स्वयम् ।
तदपि प्रददौ मोक्षं तस्मै श्रीकरुणानिधिः ॥ ८
दयालोः कृष्णचन्द्रस्य चरित्र परमाद्भुतम् ।
एतत्ते कथितं राजन् किं भूयः श्रोतुमिच्छसि ॥ ९

बहुलाश्व उवाच

पुरा वै वायकः कोऽयं नितरां मुनिसत्तम ।
यस्मै ददौ च सारूप्यं श्रीकृष्णो भगवान् हरिः ॥ १०

नारद उवाच

मिथिलानगरे पूर्वं वायको हरिभक्तिकृत् ।
श्रीरामोद्वाहसमये सीरध्वजनृपाज्ञया ॥ ११
रामलक्ष्मणवेषार्थं वासांसि रचयन् बुधः ।
लघुसूत्रैः परिचयन् कुशलो वस्त्रकर्मसु ॥ १२
कोटिकन्दर्पलावण्यौ सुन्दरौ रामलक्ष्मणौ ।
तौ वीक्ष्य वायको राजन् मोहितोऽभून्महामनाः ॥ १३
अहं स्वहस्तैर्वस्त्राणि तयोरङ्गेषु सर्वतः ।
परिधानं कारयामि चक्रे चेत्थं मनोरथम् ॥ १४
मनसापि वरं रामो ददौ तस्मा अशेषवित् ।
द्वापरान्ते भारते च भविष्यति मनोरथः ॥ १५
श्रीरामस्य वरात् सोऽयं मथुरायां बभूव ह ।
तयोर्वेषं कारयित्वा तत्सारूप्यं जगाम ह ॥ १६

बहुलाश्व उवाच

सुदाम्ना मालिना ब्रह्मन् किं कृतं सुकृतं वद ।
यद्गृह जग्मतुः साक्षाद्रामकृष्णौ मनोहरौ ॥ १७

नारद उवाच

राजराजवनं रम्यं नाम्ना चैत्ररथं शुभम् ।
तस्य वै पुष्पबटुको हेममालीति नामभाक् ॥ १८
विष्णुभक्तिरतः शान्तो दानी सत्सङ्गकृन्महान् ।
श्रीकृष्णदेवप्राप्त्यर्थं देवपूजां चकार ह ॥ १९
समाः पञ्च सहस्राणि पञ्चानाञ्च शतत्रयम् ।
नित्यं नीत्वा धूर्जटये पुरो धृत्वा ननाम ह ॥ २०
एकदा च प्रसन्नोऽभूत् त्र्यम्बकः करुणानिधिः ।
मालाकार महाबुद्धे वरं ब्रूहीत्युवाच ह ॥ २१

हेममाली तदा देवं नमस्कृत्य कृताञ्जलिः ।
प्रदक्षिणीकृत्य पुरः स्थित्वा प्राह नताननः ॥ २२

हेममाल्युवाच

परिपूर्णतमं कृष्णं क्वचिन्नो गृहमागतम् ।
पश्यामि दृग्भ्यां तं साक्षात्त्वद्वरेण भवेदिदम् ॥ २३

महादेव उवाच

द्वापरान्ते भारते च मथुरायां महामते ।
मनोरथस्ते सफलो भविष्यति न संशयः ॥ २४

नारद उवाच

महेश्वरवरेणासौ हेममाली महामनाः ।
मालाकारो द्वापरान्ते सुदामा स बभूव ह ॥ २५
तस्मादस्य गृहं साक्षाज्जग्मतू रामकेशवौ ।
शिववाक्यमृतं कर्तुं किं भूयः श्रोतुमिच्छसि ॥ २६

इति श्रीगर्गसंहितायां मथुराखण्डे नारदबहुलाश्व-
संवादे रजकवायकसुदामोपाख्यानं नाम
दशमोऽध्यायः ॥ १०

बहुलाश्व उवाच

सैरन्ध्र्या किं कृतं पूर्वं तपः परमदुर्घटम् ।
येन प्रसन्नः श्रीकृष्णो देवैरपि सुदुर्लभः ॥ १

नारद उवाच

पञ्चवट्यां स्थितं रामं कोटिकन्दर्पसन्निभम् ।
वीक्ष्य शूर्पणखा नाम राक्षसी मोहिता भृशम् ॥ २
निर्मोहं राघवं दृष्ट्वाथैकपत्नीव्रतस्थितम् ।
क्रोधात् सीतां भक्षयितुं धावती रावणस्वसा ॥ ३
खड्गेन शितधारेण लक्ष्मणो राघवानुजः ।
जहार तस्याः कर्णौ च नासां सद्यो रुषान्वितः ॥ ४
छिन्ननासा गता लङ्कां रावणाय निवेद्य तत् ।
भूयः पुष्करतीर्थे सा जगाम विमना भृशम् ॥ ५
तपश्चक्रे शूर्पणखा वर्षाणामयुतं जले
ध्यायन्ती त्र्यम्बकं देवं श्रीरामं वरमिच्छती ॥ ६
ततः प्रसन्नो भगवान् देवदेव उमापतिः ।
एत्य तत्पुष्करं तीर्थं वरं ब्रूहीत्युवाच ह ॥ ७

शूर्पणखोवाच

श्रीरामो मे वरो भूयाद्वरं देहि सतां प्रिय ।
त्वं देवदेव परमः सर्वासामाशिषां प्रभुः ॥ ८

शिव उवाच

अद्यैव सफलो न स्याद्वरस्ते शृणु राक्षसि ।
द्वापरान्ते माथुरे च भविष्यति न संशयः ॥ ९

नारद उवाच

सैव शूर्पणखा नाम राक्षसी कामरूपिणी ।
अभूच्छ्रीमथुरायान्तु कुब्जा नाम महामते ॥ १०
महादेववरेणापि श्रीकृष्णस्य प्रियाभवत् ।
इदं मया ते कथितं किं भूयः श्रोतुमिच्छसि ॥ ११

बहुलाश्व उवाच

कोऽयं कुवलयापीडः पूर्वजन्मनि नारद ।
कथं गजत्वमापन्नः श्रीकृष्णे लीनतां गतः ॥ १२

नारद उवाच

बलिपुत्रो महाकायो नाम्ना मन्दगतिर्बली ।
सर्वशस्त्रभृतां श्रेष्ठो लक्षनागसमो बली ॥ १३
एकदा निर्गतः सोऽपि रङ्गयात्रां जनेषु च ।
मत्तेभवज्जनान् वेगाद्भुजाभ्यां परिमर्दयन् ॥ १४
तद्बाहुवेगात् पतितः पथि वृद्धस्त्रितो मुनिः ।
क्रुद्धः शशाप तं मत्तं बलिष्ठं बलिनन्दनम् ॥ १५

त्रित उवाच

गजवत्त्वं मदोन्मत्तो भूजनान् परिमर्दयन् ।
विचरन् रङ्गयात्रायां त्वं गजो भव दुर्मते ॥ १६

नारद उवाच

एवं शप्तस्तदा दैत्यो नाम्ना मन्दगतिर्बली ।
पतत्कञ्चुकवद्देहो भ्रष्टतेजा बभूव ह ॥ १७
मुनेः प्रभाववित् सद्यो दैत्यो भूत्वा कृताञ्जलिः ।
नत्वा प्रदक्षिणीकृत्य त्रितं मुनिमुवाच ह ॥ १८

मन्दगतिरुवाच

हे मुने हे कृपासिन्धो त्वं योगीन्द्रो द्विजोत्तमः ।
गजत्वान्मे कदा मुक्तिर्भविष्यति वदाशु माम् ॥ १९
त्वादृशानां सतां माभूद्धेलनं मे क्वचिन्मुने ।
त्वादृशा मुनयो ब्रह्मन् समर्था वरशापयोः ॥ २०

नारद उवाच

एवं प्रसादितस्तेन त्रितो नाम महामुनिः ।
गतक्रोधोऽब्रवीद्दैत्यं कृपालुर्ब्राह्मणोत्तमः ॥ २१

त्रित उवाच

वचनं मे मृषा न स्यात्त्वद्भक्त्या हर्षितोऽस्म्यहम् ।
ते दास्यामि वरं दिव्यं देवानामपि दुर्लभम् ॥ २२
मा शोकं कुरु दैत्येन्द्र मथुरायां हरेः पुरि ।
श्रीकृष्णहस्तात्ते मुक्तिर्भविष्यति न संशयः ॥ २३

नारद उवाच

सोऽय मन्दगतिर्दैत्यो गजोऽभूद्विन्ध्यपर्वते ।
नाम्ना कुवलयापीडो नागायुतसमो बले ॥ २४
गृहीतो मागधेन्द्रेण बलान्नागजैर्वने ।
सोऽयं दत्तस्तु कंसाय पारिबर्हं विदेहराट् ॥ २५
त्रितवाक्यात्तस्य धाम श्रीकृष्णे लीनतां गतम् ।
इदं मया ते कथितं किं भूयः श्रोतुमिच्छसि ॥ २६

इति श्रीगर्गसंहितायां मथुराखण्डे नारदबहुलाश्व-
संवादे कुब्जाकुवलयापीडवर्णनं नाम
एकादशोऽध्यायः ॥ ११

बहुलाश्व उवाच

चाणूराद्याश्च ये मल्लास्ते के पूर्वमिहागताः ।
अहो श्रीकृष्णचन्द्रेण येषां युद्धं बभूव ह ॥ १

नारद उवाच

राजन् पुरामरावत्यामुतथ्योऽस्ति महामुनिः ।
तस्याभवन् पञ्चपुत्राः कामदेवसमप्रभाः ॥ २
हित्वा विद्यां चाध्ययनं जयन्तेन सहैव ते ।
गत्वा वने मल्लयुद्धं सदाशिक्षन् मदोद्धताः ॥ ३
ब्रह्मकर्मपरिभ्रष्टान् वेदाध्ययनवर्जितान् ।
रुषा प्राह सुतान् मत्तानुतथ्यो मुनिसत्तमः ॥ ४

उतथ्य उवाच

शमो दमस्तपः शौचं क्षान्तिरार्जवमेव च ।
ज्ञानं विज्ञानमास्तिक्यं ब्रह्मकर्म स्वभावजम् ॥ ५
शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनम् ।
दानमीश्वरभावश्च क्षात्रकर्म स्वभावजम् ॥ ६
कृषिगोरक्ष्यवाणिज्यं वैश्यकर्म स्वभावजम् ।
परिचर्यात्मकं कर्म शूद्रस्यापि स्वभावजम् ॥ ७
ब्रह्मकर्मपरित्यक्ता भवन्तो ब्रह्मणः सुताः ।
मल्लयुद्धं क्षात्रकर्म कथं कुरुत दुर्जनाः ॥ ८
तस्माद्भवन्तो भूयासुर्मल्ला वै भारताजिरे ।
असुराणां प्रसङ्गेन दुर्जना भवताशु हि ॥ ९

नारद उवाच

उतथ्यस्य सुतास्ते वै जाता मल्ला महीतले ।
श्रीकृष्णाङ्गस्पर्शमात्रात् परं मोक्षं ययुर्नृप ॥ १०
चाणूरो मुष्टिकः कूटः शलस्तोशल एव च ।
एषां चरित्रं कथितं किं भूयः श्रोतुमिच्छसि ॥ ११

बहुलाश्व उवाच

कसानुजा भ्रातरोऽष्टौ कङ्कन्यग्रोधकादयः ।
ते के पूर्वं वद मुने येऽपि मोक्षं परं गताः ॥ १२

नारद उवाच

अलकायां पुरा यक्षो देवयक्ष इति स्मृतः ।
ज्ञानी दानपरो मान्यः शिवभक्तो महाद्युति. ॥ १३
तस्य चाष्टौ सुता जाता देवकूटो महागिरिः ।
गण्डो दण्डः प्रचण्डश्च खण्डश्चण्ड. पृथुस्तथा ॥ १४
एकदा शिवपूजायां देवयक्षेण नोदिताः ।
सहस्र पुण्डरीकाणि चाहर्तुमरुणोदये ॥ १५
पुष्पाणि मानसान्नीत्वा शब्दितानि मधुव्रतैः ।
आघ्राय गन्धलोभेन ददुस्ते जनकाय वै ॥ १६
उच्छिष्टीकृतदोषेण शिवपूजातिरस्कृतेः ।
आसुरीं योनिमापन्ना मूढास्ते जन्मभिस्त्रिभिः ॥ १७
हस्ताभ्यां शंकराभ्याञ्च बलदेवस्य मैथिल ।
परं मोक्षं गतास्ते वै दोषान्मुक्ता विदेहराट् ॥ १८
कंसानुजानां व्याख्यानं पूर्वजन्मभवं नृप ।
इदं मया ते कथितं किं भूयः श्रोतुमिच्छसि ॥ १९

बहुलाश्व उवाच

कोऽयं पुरा पञ्चजनो दैत्यः शङ्खवपुर्धरः ।
तस्य शङ्खो बभौ ब्रह्मन् श्रीकृष्णकरपङ्कजे ॥ २०

नारद उवाच

पुरैवैतान्युपाङ्गानि चक्रादीनि विदेहराट् ।
त्रैलोक्यनाथस्य हरेर्बभूवुस्तेजसा स्वतः ॥ २१
तेषां शङ्खः पाञ्चजन्यः प्राप्तो राजन् महत् पदम् ।
पपौ तन्मुखलग्नोऽसौ श्रीकृष्णस्याधरामृतम् ॥ २२
अकरोच्चैकदा मानं मनसि प्राह शङ्खराट् ।
गृहीतोऽहं हि हरिणा राजहंससमद्युतिः ॥ २३
श्रीकृष्णो दक्षिणावर्त्तं दध्मौ मां विजये सति ।
यद् दुर्लभं चाब्धिपुत्र्याः श्रीकृष्णस्याधरामृतम् ॥ २४
तत्तस्मात् सर्वमुख्योऽस्मि पिबाम्यहमहर्निशम् ।
इति मानयुतं शङ्खं पाञ्चजन्यं विदेहराट् ॥ २५
शशाप लक्ष्मीस्तं क्रोधात्त्वं दैत्यो भव दुर्मते ।
सोऽयं पञ्चजनो नाम दैत्योऽभूत् सरितां पतौ ॥ २६
वैरभावेन देवेशं पुनः प्राप्तोदरेश्वरः ।
ज्योतिर्लीनन्तु देवेशे वपुर्यस्य करे बभौ ॥ २७
अहो भाग्यं विद्धि तस्य किं भूयः श्रोतुमिच्छसि ॥ २८

इति श्रीगर्गसंहितायां मथुराखण्डे नारदबहुलाश्वसंवादे-
चाणूरादिकंसभ्रातृपञ्चजनपूर्वाख्यानं नाम
द्वादशोऽध्यायः ॥ १२

बहुलाश्व उवाच

अग्रे चकार किं कार्यं मथुरायां यदूत्तमः ।
निवासयित्वा स्वज्ञातीन् वदैतन्मुनिसत्तम ॥ १

नारद उवाच

परिपूर्णतमः साक्षाद्भगवान् भक्तवत्सलः ।
सस्मार गोकुलं दीनं गोपीगोपालसङ्कुलम् ॥ २
एकदाहूय रहसि सखायं मुख्यमुद्धवम् ।
उवाच भगवान् देवः प्रेमगद्गदया गिरा ॥ ३

भगवानुवाच

गच्छ शीघ्रं व्रजं हे सखे सुन्दर
श्रीलताकुञ्जपुञ्जादिभिर्मण्डितम् ।
शैलकृष्णाप्रभाचारु वृन्दावनं
गोपगोपीगणैर्गोकुलं सङ्कुलम् ॥ ४
एकपत्रन्तु नन्दाय वै दीयतां
वा द्वितीयं यशोदाकरे चैव भोः ।
वा तृतीयं त्विदं राधिकायै सखे
तत्र गत्वा हि तन्मन्दिरं सुन्दरम् ॥ ५
वा चतुर्थं सखिभ्यः शुभं कौशलं
दीयतां पत्रमेवं पृथक् भो सखे ।
गोपिकानां शतेभ्यश्च यूथेभ्य उन्-
मोहितानाञ्च देयानि पत्राणि च ॥ ६
मे पिता नन्दराजो घृणी मन्मना
मे च माता यशोदा स्मरत्याशु माम् ।
वाक्यवृन्दैः शुभैर्नीतिवित् त्वं तयो
र्मे परां प्रीतिमाराद् द्वयोरावह ॥ ७

मत्प्रिया राधिका मद्वियोगातुरा
मन्यते मां विना खं जगन्मोहतः ।
मद्वियोगाधिमस्या मदुक्तैः पदै
र्मोचय त्वं भवान् दक्षिणो वाक्पथे ॥ ८
गोपबालाः सुदामादयो मत्प्रिया
मां सखाय विना तेऽपि मोहातुराः ।
देहि तेषां सुखं मन्त्रविच्छ्रीव्रजे
स्वल्पकालेन तत्रागमिष्याम्यहम् ॥ ९
गोपिका मद्वियोगाधिवेगातुरा
मन्मनस्काश्च मत्प्राप्तदेहासवः ।
या मदर्थे च सत्यक्तलोकाबला-
स्ताः कथं नात्र मन्त्रिन् बिभर्मि स्वतः ॥ १०
ता असूंस्त्यक्तुमत्रोद्यता उद्धव
याभिरद्यापि कृच्छ्रैर्धृताश्चासवः ।
मद्वियोगाधिमासां मदुक्तैः पदै
र्मोचय त्वं भवान् दक्षिणो वाक्पथे ॥ ११
येन पूर्वं व्रजादागतोऽहं सखे
तं रथं साश्वसूतं रणद्घण्टिकम् ।
मे च सारूप्यमद्यैव पीताम्बरं
वैजयन्तीसहस्रच्छदं पङ्कजम् ॥ १२
कुण्डले दिव्यरत्नप्रभामण्डिते
कोटिबालार्कदीप्तिं मणिं कौस्तुभम् ।
मे महानादिनीं चारुवंशीं शुभां
पुष्पयुक्तां च यष्टिं जगन्मोहिनीम् ॥ १३
चन्दनं सुन्दरं दिव्यगन्धावृतं
बर्हमल्लादिवेषं क्वणन्नूपुरम् ।

मौलिमेवं गृहाणाङ्गदे उद्धव
गच्छ गच्छाशु चाद्यैव मद्वाक्यतः ॥ १४

नारद उवाच

इत्युक्त उद्धवः शीघ्रं नमस्कृत्य कृताञ्जलिः ।
कृष्णं प्रदक्षिणीकृत्य रथारूढो व्रजं ययौ ॥ ५
कोटिशः कोटिशो गावो यत्र तत्र मनोहराः ।
श्वेतपर्वतसङ्काशा दिव्यभूषणभूषिताः ॥ १६
पयस्विन्यस्तरुण्यश्च शीलरूपगुणैर्युताः ।
सवत्साः पीतपुच्छाश्च व्रजन्त्यो भव्यमूर्तिकाः ॥ १७
घण्टामञ्जीरझङ्काराः किङ्किणीजालमण्डिताः ।
हेमश्रृङ्ग्यो हेमतुल्या हारमाला स्फुरत्प्रभाः ॥ १८
पाटला हरितास्ताम्राः पीताः श्यामा विचित्रिताः ।
धूम्राः कोकिलवर्णाश्च यत्र गावस्त्वनेकधा ॥ १९
समुद्रवद्दुग्धदाश्च तरुणीकरचिह्निताः ।
कुरङ्गवद्विलङ्घद्भिर्गोवत्सैर्मण्डिताः शुभाः ॥ २०
इतस्ततश्चलन्तश्च गोगणेषु महावृषाः ।
दीर्घकन्धरश्रृङ्गाढ्या यत्र धर्मधुरन्धराः ॥ २१
गोपाला वेत्रहस्ताश्च श्यामा वंशीधराः पराः
कृष्णलीलाः प्रगायन्तो रागैर्मदनमोहनैः ॥ २२
दूरात् तमागतं वीक्ष्य ज्ञात्वा कृष्णं व्रजार्भकाः ।
उचु परस्परं ते वै कृष्णदर्शनलालसाः ॥ २३

गोपा ऊचुः

नन्दसूनुः किलायाति सखायाऽयं न संशयः ।
मेघश्यामः पीतवासाः स्रग्वी कुण्डलमण्डितः ॥ २४

कौस्तुभी कुण्डली बिभ्रत् सहस्रदलपङ्कजम् ।
तदेव मुकुटं बिभ्रत् कोटिमार्तण्डसन्निभम् ॥ २५
त एवाश्वा रथः सोऽयं किङ्किणीजालमण्डितः ।
बलो नास्ति रथे चास्मिन् एकाकी नन्दनन्दनः ॥ २६

नारद उवाच

एवं वदन्तो गोपालाः श्रीदामाद्या विदेहराट् ।
कृष्णाकृतिं कृष्णसखमाययुः सर्वतो रथम् ॥ २७
कृष्णो नास्तीति वदतः कोऽयं साक्षात्तदाकृतिः ।
तान् नमस्कृत्यौपगविः परिरभ्यावदत् पथि ॥ २८

उद्धव उवाच

गृहाण पत्रं श्रीदामन् कृष्णदत्तं न संशयः ।
शोकं मा कुरु गोपालैः कुशल्यास्ते हरिः स्वयम् ॥ २९
यादवानां महत्कार्य्यं कृत्वाथ सबलः प्रभुः ।
ह्रस्वकालेन चात्रापि भगवानागमिष्यति ॥ ३०

नारद उवाच

पठित्वा तद्धस्तपत्रं श्रीदामाद्या व्रजार्भकाः ।
भृशमश्रूणि मुञ्चन्तः प्राहुर्गद्गदया गिरा ॥ ३१

गोपा ऊचुः

पान्थेति निर्मोहिनि नन्दसूनौ
तनुर्विभूतिश्च धनं बलञ्च ।
सबान्धवं कृष्णमृते व्रजो नः
शून्यं प्रजातं हि जगत् समस्तम् ॥ ३२
क्षणो युगत्वञ्च घटी महामते
प्रयाति मन्वन्तरतां व्रजौकसाम् ।

यामश्च कल्पश्च दिनं विना हरिं
वियोगदुःखैर्द्विपरार्धतां गतम् ॥ ३३
अहर्निशं तं नहि विस्मरामहे
दुष्टा घटी सा प्रययौ यया हि सः ।
मनोहरन् उद्धव नो वनौकसां
वयस्यभावेन सदा कृतागसाम् ॥ ३४

इति श्रीगर्गसंहितायां मथुराखण्डे नारदबहुलाश्व
संवादे उद्धवागमनं नाम
त्रयोदशोऽध्याय ॥ १३

नारद उवाच

एवं प्रेमपरान् गोपान् श्रीकृष्णविरहातुरान् ।
उवाच प्रेमसंयुक्त उद्धवो गतविष्मयः ।। १

उद्धव उवाच

अहं श्रीकृष्णदासोऽस्मि तत्प्रियस्तद्रहस्करः ।
भवतां कुशलं द्रष्टुं प्रेषितो हरिणा त्वरम ॥ २
पुरीं गत्वाथ हरये निवेद्य विरहन्तु वः ।
तं प्रसन्नं करिष्यामि तदङ्घ्रौ नेत्रवारिभिः ।। ३
नीत्वा हरिं हि भवतां समीपं हे व्रजौकसः ।
आगमिष्याम्यहं शीघ्रं शपथो न मृषा मम ।। ४
यूयं प्रसन्ना भवत मा शोकं कुरुताथ वै ।
अस्मिन् व्रजेऽपि गोपाला द्रक्ष्यथ श्रीपति हरिम् ।। ५

नारद उवाच

एवमाश्वास्य गोपालान् रथस्थो यदुनन्दनः ।
श्रीदामाद्यैश्च गोपालैः सहितो हर्षपूरितः ।
विवेश नन्दनगरं सूर्ये सिन्धुगते सति ।। ६
आगतं ह्युद्धवं श्रुत्वा नन्दराजो महामतिः ।
परिरभ्य मुदा शीघ्रं पूजयामास हर्षितः ।। ७
कशिपुस्थं स्थितं शान्तमुद्धवं कृतभोजनम् ।
कशिपुस्थो नन्दराजः प्राह गद्गदया गिरा ॥ ८

नन्द उवाच

कच्चित् सखा मे पुरि शूरसेन
आस्ते स्वपुत्रैः कुशली महामते ।

कसे मृते यादवपुङ्गवानां
जातं सखे सौख्यमतःपर भुवि ॥ ६
कच्चित् कदाचित् सबलो हि माधवः
स्मरत्यसौ वा जननी यशोमतीम् ।
गोपालगोवर्धनगोगणान् व्रजं
वृन्दावनं वा पुलिन तरङ्गिणीम् ॥ १०
हा दैव कस्मिन् समये स्वनन्दनं
बिम्बाधरं सुन्दरमम्बुजेक्षणम् ।
द्रक्ष्याम्यहं मन्दिरचत्वराजिरे
ऽर्भकैर्लुठन्त सबलं मुहुर्मुहुः ॥ ११
कुञ्जो निकुञ्जो यमुना महानदी
गोवर्द्धनोऽरण्यमिदं वनानि ।
गृहैर्लतावृक्षगवां गणैः सह
विना मुकुन्दं विषवत्त्विदं जगत् ॥ १२
धिग् जीवनं मे शयनञ्च भोजनं
कृष्णं विना पद्मदलायतेक्षणम् ।
चन्द्रं विना भूमितले चकोरव-
ज्जीवामि तस्यागमनाशया भृशम् ॥ १३
हर्तुं भुवो भारमतीव दैवतै.
सम्प्रार्थितं पूर्णतमं महात्मते ।
जातं सतां रक्षणतत्परं स्वयं
मन्ये हि कृष्णं सबलं परात्परम् ॥ १४

नारद उवाच

संस्मृत्य संस्मृत्य हरिं परेशं
बभूव तूष्णीं नवनन्दराजः ।

शिरो निधायाप्युपबर्हणे स्वे
ऽत्युत्कण्ठरोमाञ्चितविह्वलाङ्गः ॥ १५
श्रीनन्दनेत्राम्बुजवारिसन्ततीं
राजं तदा कृष्णसखस्य पश्यतः
शय्यां सवस्त्रामुपबर्हणान्तां
कृत्वार्द्रं तां प्राङ्गण आचचाल ॥ १६
श्रुत्वोद्धवं श्रीमथुरापुरागतं
कपाटमेत्याशु यशोमता सती ।
शृण्वन्त्यलं स्वस्य सुतस्य वर्णन
स्नेहस्रवत्सुस्तननेत्रपङ्कजा ॥ १७
विहाय लज्जां घृणया सुतस्य सा
पप्रच्छ सर्वं कुशलं तदोद्धवम् ।
आप्रोदय वस्त्रेण दृगश्रुसन्तति
स्थिते च नन्दे हरिभावविह्वले ॥ १८

यशोदोवाच

कच्चित् स्मरति मां कृष्णो नन्दराजमथापि वा ।
भ्रातरं नन्दराजस्य सन्नन्दं दर्शनोत्सुकम् ॥ १९
नन्दान् नवोपनन्दांश्च वृषभानून् व्रजेषु षट् ।
येषामारोहमास्थाय बालकेलिर्बलेन वै ॥ २०
कन्दुकक्रीडया रेमे सानन्दं नन्दनन्दनः ।
तान् गोपान् स्नेहसंयुक्तान् कदाचित् स्मरति स्वतः ॥ २१
एकोऽयं मे सुतः प्राप्तो न सुता बहवश्च मे
सोऽपि मां जननीं दीनां ययौ त्यक्त्वा दिगन्तरम् ॥ २२
अहो कष्टं स्नेहवतां दुर्निवारं महामते ।
किं करोमि विना पुत्रं कथं जीवामि मानद ॥ २३

प्रातर्मह्यं देहि दधि मातर्हैयङ्गवं नवम् ।
एवं वदन् स मधुरं हठञ्चक्रे सदा गृहे ।
मध्याह्ने स कथं कृष्णो भोजनं कर्तुमर्हति ॥ २४
ममात्मजोऽय श्रीकृष्णो जीवनं व्रजवासिनाम् ।
व्रजे धनं कुले दीपो मोहनो बाललीलया ॥ २५
लालनैः पालनैस्तस्य दिन मे क्षणवद् गतम् ।
तद्दिनं कल्पवज्जात विनाहो नन्दनन्दनम् ॥ २६
वत्सांश्चारयितुं कृष्णो ग्रामसीम्नि नदीतटे ।
न कारितोऽर्भकैः सार्द्धं स चाहो मथुरां गतः ॥ २७
हे मोहनेति दूरात् तं ह्यङ्के नीत्वाथ लालनम् ।
चकार नन्दराजोऽयं तं विना खिन्नतां गतः ॥ २८
अहो दाम्ना मया बद्धो निर्मोहिन्यैकदा शिशुः ।
भाण्डे भग्नीकृते दध्नः शोचामि चरितञ्च तत् ॥ २९

तत्प्राङ्गण सर्वसभा च मन्दिरं
द्वारञ्च वीथीव्रजहर्म्यपृष्ठ्यः ।
शून्यं समस्तं मम जीवन धिक्
विना मुकुन्दं विषवत्त्विदं जगत् ॥ ३०

नारद उवाच

यशोदानन्दयोर्वीक्ष्य परमं प्रेमलक्षणम् ।
उद्धवो नितरां राजन् विस्मितोऽभूद् गतस्मयः ॥ ३१

उद्धव उवाच

रोममात्रं मम तनौ जिह्वा चेज्जायते त्वहो ।
युवयोस्तदपि श्लाघां कर्तुं नाल महाप्रभू ॥ ३२
परिपूर्णतमे साक्षाच्छ्रीकृष्णे पुरुषोत्तमे ।
ईदृशी च कृता भक्तिर्युवाभ्यां प्रेमलक्षणा ॥ ३३

तीर्थाटनतपोदानसाङ्ख्ययोगैश्च दुर्लभा ।
सा स्वतो युवयोः प्राप्ता या भक्तिः प्रेमलक्षणा ॥ ३४
मा शोकं कुरु हे नन्द हे यशोदे व्रजेश्वरि ।
पत्रद्वयं गृहाणाशु कृष्णदत्तं न संशयः ॥ ३५
सहाग्रजो नन्दसूनुः कुशल्यास्ते यदोः पुरि ।
यादवानां महत्कार्यं कृत्वाथ सबलः प्रभुः ॥ ३६
ह्रस्वकालेन चात्रापि भगवानागमिष्यति ।
परिपूर्णतमं विद्धि श्रीकृष्णं नन्दनन्दनम् ॥ ३७
कंसादीनां वधार्थाय भक्तानां रक्षणाय च ।
ब्रह्मणा प्रार्थितः कृष्णोऽवततार गृहे तव ।
जातमात्रोऽद्भुतां लीलां चकार सबलो हरिः ॥ ३८
पूतनाप्राणहरणं शकटस्य निपातनम् ।
तृणावर्तनिपातश्च यमलार्जुनभञ्जनम् ॥ ३९
स्वमुखे च यशोदायै विश्वरूपस्य दर्शनम् ।
वृन्दावने च भगवान् गोवत्सांश्चारयन् प्रभुः ॥ ४०
वधं चकार गोपानां पश्यतां वकवत्सयोः ।
अघासुरस्य च वधो धेनुकस्य विमर्दनम् ॥ ४१
मर्दनं कालियस्यापि वह्निपानं चकार ह ।
प्रलम्बस्य वधं पश्चाद् बलदेवश्चकार ह ॥ ४२
गोवर्धनं समुत्पाट्य हस्तेनैकेन लीलया ।
युष्माकं पश्यतां बिभ्रत् पुष्करं गजराडिव ॥ ४३
चूडामणिं शङ्खचूडाज्जहार जगतां पतिः ।
अरिष्टस्य वधं श्रुत्वा केशिनं निजघान ह ॥ ४४
व्योमासुरं महादैत्यं मुष्टिना तं ममर्द ह ।
तथा वै मथुरायान्तु चक्रे चित्रं महामते ॥ ४५

विकथ्यमानं रजकं करेणाभिजघान तम् ।
प्रचण्डं कंसकोदण्डं मध्यतस्तद् बभञ्ज ह ।
इक्षुदण्डं यथा नागः सर्वेषां पश्यतां नृणाम् ॥ ४६
द्विपं कुवलयापीडं नागायुतसमं बले ।
शुण्डादण्डे सङ्गृहीत्वा पातयामास भूतले ॥ ४७
चाणूरं मुष्टिकं कूटं शलं तोशलमेव च ।
पातयामास भूपृष्ठे मल्लयुद्धेन माधवः ॥ ४८
कंस मदोत्कटं दैत्यं नागलक्षसमं बले ।
मञ्चाद् गृहीत्वा तं कृष्णो भ्रामयित्वा भुजौजसा ॥ ४९
पातयामास भूपृष्ठे कमण्डलुमिवार्भकः ।
इभोपरि यथा सिंहस्तस्योपरि पपात सः ॥ ५०
कंसानुजांश्च कङ्कादीन् बलदेवो महाबलः ।
ममर्द मुद्गरेणाशु मृगान् वै मृगराडिव ॥ ५१
गुरवे दक्षिणां दातुं समुत्पत्य महार्णवे ।
शङ्खरूपं पञ्चजनं निजघान हरिः स्वयम् ॥ ५२
अद्भुतानि चरित्राणि चैतानि श्रीहरिं विना ।
कः करोति महानन्द तस्मै श्रीहरये नमः ॥ ५३

इति श्रीगर्गसंहितायां मथुराखण्डे नारद बहुलाश्वसंवादे
नन्दराजोद्धवमेलनं नाम
चतुर्दशोऽध्यायः ॥ १४

नारद उवाच

एवं हि नन्दोद्धवयोर्हरेः कथयतोः कथाम् ।
व्यतीता क्षणवद् राजन् क्षणदा हर्षवर्द्धिनी ॥ १
ब्राह्मे मुहूर्त उत्थाय गोप्यः सर्वा गृहे गृहे ।
देहल्यङ्गणमालिप्य दीपांस्तत्र निरूप्य च ॥ २
प्रक्षाल्य हस्तपादौ च मथि नेत्रं निधाय च ।
ममन्थुः सर्वतो युक्ताः पिच्छिलानि दधीनि ताः ॥ ३
नेत्राकर्षचलद्धारभुजकङ्कणकिङ्किणीः ।
वेणीभ्यो विगलत् पुष्पाः स्फुरत्कुण्डलमण्डिताः ॥ ४
चन्द्रमुख्यः कञ्जनेत्राश्चित्रवस्त्रैर्मनोहराः ।
मङ्गलानि चरित्राणि श्रीकृष्णबलदेवयोः ॥ ५
गायन्त्यः प्रेमसंयुक्ता यत्र तत्र गृहे गृहे ।
घोषे घोषे शुभा गावो रम्भमाणा इतस्ततः ॥ ६
सर्वत्र गोपिकागीतं दधिशब्देन मिश्रितम् ।
वीथ्यां वीथ्यां ततः शृण्वन् विस्मितश्चोद्धवोऽब्रवीत् ॥ ७
अहो वै नन्दनगरे भक्तिर्नृत्यति यत्र च ।
एवं वदन् बहिर्ग्रामाद् ययौ स्नातुं नदीजले ॥ ८
अथ सूर्योदये जाते नन्दद्वारि रथं शुभम् ।
दृष्ट्वा विनिर्गता गोप्य ऊचुः सर्वाः परस्परम् ॥ ९

गोप्य ऊचुः

कस्यायमद्यात्र रथः समागतो
क्रूरोऽथवाक्रूर उतागतः पुनः ।
येनैव नीतो मथुरां महापुरीं
श्रीनन्दसूनुर्नवकञ्जलोचनः ॥ १०

कस्मिन् कुकाले जननी ससर्ज यं
दातुं सतां स्नेहवतां प्रतापनम् ।
कद्रूर्यथा नागचयं विषावृतं
हन्तुं वृथा लोकजनानितस्ततः ॥ ११
कंसार्थकृत् कंससखोऽतिनिर्घृणः
सोऽयं पुनः किं व्रजमण्डलं गतः ।
भर्तुर्मृतस्यापि हि पारलौकिकी
मस्माभिरद्यैव करिष्यति क्रियाम् ॥ १२

नारद उवाच

एवं वदन्त्यो व्रजगोपवध्वः
सन्ताड्य सूतञ्च मुखेऽङ्गुलिभ्याम् ।
पप्रच्छुरारात् गतबुद्धिमार्तं
त्वरं वदैतत् किल कस्य यानम् ॥ १३
घनप्रभं पद्मदलायतेक्षणं
कृष्णाकृतिं कोटिमनोजमोहनम् ।
पीताम्बरं षट्पदसङ्गसङ्कुलां
मालां दधानं नववैजयन्तीम् ॥ १४
स्फुरत्सहस्रच्छदपद्मपाणिं
वंशीधरं वेत्रकर मनोहरम् ।
बालार्ककोटिद्युतिमौलिमण्डनं
महामणिं कुण्डलमण्डिताननम् ॥ १५
गत्याकृतिश्रीतनुहाससुस्वरैः
श्रीकृष्णसारूप्यधरं तदोद्धवम् ।
विलोक्य सर्वा नृप विस्मितास्ततो
विज्ञाय गोविन्दसखं ययुः पुरः ॥ १६

ज्ञात्वाथ सन्देशहरं हरेः प्रभोः
सुवाक्यनीत्या परमादरेण तम् ।
गुप्तं हि प्रष्टुं कुशलं सतां पते
नीत्वोद्धवं ताः कदलीवनं गताः ॥ १७

यत्रैव राधा वृषभानुनन्दिनी
कृष्णातटे चारुनिकुञ्जमन्दिरे ।
समास्थिता तद्विरहातुरा भृशं
खं मन्यते सा तु जगद्धरिं विना ॥ १८

रम्भादलैश्चन्दनपङ्कसञ्चयं
स्फारास्फुरच्छीतलमेघमन्दिरम् ।
कृष्णाचलच्चारुतरङ्गशीकरं
स्वतः सुधारश्मिगलत्सुधाचयम् ॥ १९

एतादृशं यत् कदलीवनञ्च तद्
राधावियोगानलवर्चसा भृशम् ।
बभूव सर्वं सततं हि भस्मसात्
कृष्णागमाशात्मतनुं हि रक्षति ॥ २०

श्रुत्वोद्धवं कृष्णसखं समागतं
चकार राधा स्वसखीभिरादरम् ।
जलासनाद्यैर्मधुपर्कमङ्गलैः
श्रीकृष्ण कृष्णेति मुहुर्वदन्त्यलम् ॥ २१

राधां हि गोविन्दवियोगखिन्नां
कुह्वां यथा चन्द्रकलां तदोद्धवः ।
नतां कृशाङ्गीं कृतहस्तसम्पुटः
प्रदक्षिणीकृत्य जगाद हर्षितः ॥ २२

उद्धव उवाच

सदास्ति कृष्णः परिपूर्णदेवो
राधे सदा त्वं परिपूर्णदेवी ।
श्रीकृष्णचन्द्रः कृतनित्यलीलो
लीलावती त्वं कृतनित्यलीला ।। २३
कृष्णोऽस्ति भूमा त्वमसीन्दिरा सदा
ब्रह्मास्ति कृष्णस्त्वमसि स्वरा सदा ।
कृष्णः शिवस्त्वञ्च शिवा शिवार्था
विष्णुः प्रभुस्त्वं किल वैष्णवी परा ।। २४
कौमारसर्गी हरिरादिदेवता
त्वमेव हि ज्ञानमयी स्मृतिः शुभा ।
लयाम्भसा क्रीडनतत्परो हरि
र्यज्ञो वराहो वसुधा त्वमेव हि ।। २५
देवर्षिवर्यो मनसा हरिः स्वयं
त्वं तत्र साक्षान्निजहस्तवल्लकी ।
नारायणो धर्मसुतो नरेण हि
शान्तिस्तदा त्वं जनशान्तिकारिणी ।। २६
कृष्णस्तु साक्षात् कपिलो महाप्रभुः
सिद्धिस्त्वमेवासि च सिद्धसेविता ।
दत्तस्तु कृष्णोऽस्ति महामुनीश्वरो
राधे सदा ज्ञानमयी त्वमेव हि ।। २७
यज्ञो हरिस्त्वं किल दक्षिणा हरि
रुरुक्रमस्त्वं हि सदा जयन्त्यतः ।
पृथुर्यदा सर्वनृपेश्वरो हरि
रर्चिस्तदा त्वं नृपपट्टकामिनी ।। २८

शङ्खासुरं हन्तुमभूद्धरिर्यदा
मत्स्यावतारस्त्वमसि श्रुतिस्तदा ।
कूर्मो हरिर्मन्दरसिन्धुमन्थने
नेत्रीकृता त्वं शुभदा हि वासुकी ॥ २६
धन्वन्तरिश्चार्तिहरो हरिः पर
स्त्वमोषधी दिव्यसुधामयी शुभे ।
श्रीकृष्णचन्द्रस्तु बभूव मोहिनी
त्वं मोहिनी तत्र जगद्विमोहिनी ॥ ३०
हरिर्नृसिंहस्तु नृसिंहलीलया
लीला तदा त्वं निजभक्तवत्सला ।
बभूव कृष्णस्तु यदा हि वामनः
कीर्तिस्तदा त्वं निजलोककीर्तिता ॥ ३१
हरिर्यदा भार्गवरूपधृक् पुमान्
धारा कुठारस्य तदा त्वमेव हि ।
श्रीकृष्णचन्द्रो रघुवंशचन्द्रमा
यदा तदा त्वं जनकस्य नन्दिनी ॥ ३२
श्रीशार्ङ्गधन्वा मुनि बादरायणो
वेदान्तकृत् त्वं किल वेदलक्षणा ।
सङ्कर्षणो माधव एव वृष्णिषु
त्वं रेवती ब्रह्मभवं समार्पि ता ॥ ३३
बुद्धो यदा कौणपमोहकारको
बुद्धिस्तदा त्वं जनमोहकारिणी ।
कल्की यदा धर्मपतिर्भविष्यति
हरिस्तदा त्वं सुकृतिर्भविष्यसि ॥ ३४
श्रीकृष्णचन्द्रोऽस्ति हि चन्द्रमण्डले
राधे सदा चन्द्रमुखीति चन्द्रिका ।

श्रीकृष्णसूर्यो दिवि सूर्यमण्डले
सूर्यप्रभा त्वं परिधिप्रतिष्ठिता ॥ ३५
इन्द्रः सदास्ते किल यादवेन्द्र
स्तत्रैव राधे तु शची शचीश्वरी ।
हिरण्यरेता हि हरिः परेश्वरो
हेतिः सदा त्वं हि हिरण्मयी परा ॥ ३६
श्रीराजराजो हि विराजते हरि
विराजसे त्वन्तु निधौ निधीश्वरी ।
क्षीराब्धिरूपी तु हरिस्त्वमेव हि
तरङ्गितक्षौमसिता तरङ्गिणी ॥ ३७
बिभ्रद्वपुः सर्वपतिर्यदा यदा
तदा तदा त्वं विदितानुरूपिणी ।
जगन्मयो ब्रह्ममयो हरिः स्वयं
जगन्मयी ब्रह्ममयी त्वमेव हि ॥ ३८
अथैव सोऽयं व्रजराजनन्दनो
जातासि राधे वृषभानुनन्दिनी ।
आभ्यां कृता सत्त्वमयी प्रशान्तये
लीला चरित्रैर्ललितादिलीलया ॥ ३९
कृष्णः स्वयं ब्रह्म परं पुराणो
लीला तदिच्छा प्रकृतिस्त्वमेव ।
परस्परं सन्धितविग्रहाभ्यां
नमो युवाभ्यां हरिराधिकाभ्याम् ॥ ४०
गृहाण पत्रं निजनाथदत्तं
शोकं परं मा कुरु राधिके त्वम् ।
ह्रस्वेन कालेन विधाय कार्यं
तत्रागमिष्यामि तदुक्तवाक्यम् ॥ ४१

गृह्णीष्वमद्यैव शतानि कृष्ण-
दत्तानि पत्राणि सुमङ्गलानि ।
प्रत्यर्पितं यूथशतञ्च गोप्यः
कृष्णप्रियाणां व्रजसुन्दरीणाम् ॥ ४२

इति श्रीगर्गसंहितायां मथुराखण्डे नारदबहुलाश्व-
संवादे श्रीराधादर्शनं नाम
पञ्चदशोऽध्यायः ॥ १५

नारद उवाच

राधा पत्रं सङ्गृहीत्वा शिरो नेत्रे तथा हृदि ।
निधाय वाचयित्वा तत् स्मृत्वा तत् पादपङ्कजम् ॥ १
अतिप्रेमातुरा राजन् मोचयित्वाश्रुसन्ततिम् ।
मूर्च्छामाप परां राधा यादवस्य प्रपश्यतः ॥ २
कुङ्कुमागुरुपाटीरद्रवैः पुष्परसैश्च सा ।
अर्चिता चामरान्दोलैः पुनश्चैतन्यतां गता ॥ ३
वियोगसिन्धुसंमग्नां राधां कमललोचनाम् ।
वीक्ष्योद्धवस्तथा गोप्यो मुमुचुश्चाश्रुसन्ततिम् ॥ ४
तासामश्रुप्रवाहेण राजन् वृन्दावने वने ।
सद्यः कह्लारसंयुक्तो जातो लीलासरोवरः ॥ ५
दृष्ट्वा पीत्वा च तं स्नात्वा श्रुत्वा चेमां कथां नरः ।
कर्मबन्धविनिर्मुक्तः श्रीकृष्णं प्राप्नुयान्नृप ॥ ६
अथोद्धवमुखाच्छ्रुत्वा श्रीकृष्णागमनं पुनः ।
पप्रच्छुः कुशलं सर्वं श्रीकृष्णस्य महात्मनः ॥ ७

राधोवाच

आनन्ददं श्रीव्रजराजनन्दनं
द्रक्ष्यामि कस्मिन् समये घनप्रभम् ।
घनं मयूरीव समुत्सुका भृशं
चन्द्रं चकोरीव तदीक्षणोत्सुका ॥ ८
कस्मिन् कुकाले विरहो बभूव मे
येनैव कौ कल्पसमः क्षणः क्षणः ।
निशीथिनीयं द्विपरार्द्धहेलनं
करोति गोविन्दपदद्वयं विना ॥ ९

कश्चित् कदाचिद् व्रजमागमिष्यति
करोति किं तत्र हरिर्वदाशु मे ।
अद्यैव यत्नेन धृताः किलासवः
प्रसह्य निर्यान्ति मृषा गिरातुराः ॥ १०

दृष्ट्वा क्षणं त्वां म न हृच्च शीतलं
जातं प्रसन्नास्मि समागते त्वयि ।
यथा प्रसन्ना जनकात्मजा पुरा
लङ्कापुरं वायुसुते समागते ॥ ११

आशां विधाय निजमोहघनं विसृज्य
विस्मृत्य वाक्यगदितं मथुरां गतो यः ।
तस्यापि पत्रलिखितं शमृतं न मन्ये
तच्चानयस्व किल मन्त्रविदां वरिष्ठ ॥ १२

उद्धव उवाच

गत्वा पुरीं तव परं विरहं निवेद्य
थार्घं विधाय निजनेत्रजलेन राधे ।
नीत्वा हरिं तव पुरः पुनरागतोऽस्मि
मा शोकमद्य कुरु मे शपथस्त्वदङ्‍घ्रेः ॥ १३

नारद उवाच

अथ प्रसन्ना श्रीराधा चन्द्रकान्तौ मणी शुभौ ।
रासरङ्गे चन्द्रदत्तावुद्धवाय ददौ नृप ॥ १४
सहस्रदलपद्मे द्वे दत्ते चन्द्रमसा पुरा ।
उद्धवाय ददौ राधा प्रसन्ना भक्तवत्सला ॥ १५
छत्रं सिंहासनं दिव्यं चामरे द्वे मनोहरे ।
श्रीकृष्णमनसोद्भूते ददौ तस्मै हरिप्रिया ॥ १६

ऐश्वर्यं ज्ञानसम्पन्नं सर्वदेशिकदेशिकम् ।
कृष्णसंयोगकर्तृत्वं सदा तव भविष्यति ॥ १७
भक्तिं निर्गुणभावाढ्यां प्रेमलक्षणसंयुताम् ।
ज्ञानविज्ञानसहितं वैराग्यं सा ददौ पुनः ॥ १८
शङ्खचूडाच्च हरिणानीतं चूडामणिं शुभम् ।
चन्द्रानना ददौ तस्मै उद्धवाय विदेहराट् ॥ १९
तथा गोपीगणाः सर्वे भूषणानां चयं शुभम् ।
ददुः प्रसन्ना हे राजन् उद्धवाय महात्मने ॥ २०

नारद उवाच

श्रुत्वा वचश्चौपगवेः शुभार्थं
सुखं गतायां किल राधिकायाम् ।
ऊचुस्तमाराद् व्रजगोपवध्वः
सदः स्थितं कृष्णसखं पृथक् ताः ॥ २१

गोप्य ऊचुः

यच्च पत्रलिखितं वदाशु नः
किन्तु तच्च हरिणोक्तमद्भुतम् ।
त्वं परावरविदां हरेः सखा
मन्त्रवित्तम तदाकृतिर्महान् ॥ २२

उद्धव उवाच

यथा स्मरथ देवेशं तथा युष्मान् स्मरत्यसौ ।
अनुवेलं गोपवध्व. पश्यतो मे न संशयः ॥ २३
एकदा मां समाहूय स्मृत्वा युष्मान् रहस्करः ।
कथयामास सन्देशं चित्तस्थं नन्दनन्दनः ॥ २४

भगवानुवाच

गुणेषु सक्तं किल बन्धनाय
रक्तं मनः पुंसि च मुक्तये स्यात् ।
मनो द्वयोः कारणमाहुरारा
ज्जित्वाथ तत् कौ विचरेदसङ्गः ॥ २५
यदा स्वयं ब्रह्म परात्परं मा
मध्यात्मयोगेन विशारदेन ।
जानाति सर्वत्र गतं विवेकी
तदा विजह्यान्मनसः कषायम् ॥ २६
यावद्धनो मध्यगतस्तदु स्थितः
स्वरूपमर्कं नहि दृक् प्रपश्यति ॥
तावत् परात्मानमसौ प्रधानजै
र्गुणैस्तथा तेषु गतेषु पश्यति ॥ २७
स्थूलाच्च दूरेऽस्मि न तत्त्वतोऽङ्गना
स्तस्माद्धि योगं कुरुतात्र साधनम् ।
यत्साङ्ख्यभावैः किल गम्यते पदं
तद् योगभावैरपि गम्यते स्वतः ॥ २८

इति श्रीगर्गसंहितायां मथुराखण्डे नारदबहुलाश्व-
संवादे राधागोप्याश्वसनं नाम
षोडशोऽध्यायः ॥ १६

नारद उवाच

श्रुत्वा श्रीकृष्णसन्देशं प्रसन्ना गोपवल्लभाः।
अश्रुमुख्यो बाष्पकण्ठ्य ऊचुरौपगवि नृप ॥ १

गोलोकवासिन्य ऊचुः

विदेशं गतवान् कृष्णस्त्यक्त्वा पूर्वप्रियान् जनान्।
तदुपर्यलिखद् योगमहो निर्मोहता बलम् ॥ २

द्वारपालिका ऊचुः

चकोरे ग्लौः पङ्कजेऽर्को भ्रमरे पङ्कजं यथा।
चातके च घनः प्रीतिं न करोति कदाचन ॥ ३

शृङ्गारप्रकरा ऊचुः

चन्द्रमित्रश्चकोरोऽस्ति सख्यो वह्निकणः सदा।
विधात्रा यद् विलिखितं तन्न्यूनं न भवेदिह ॥ ४

शय्योपकारिका ऊचुः

व्याधोऽपि हत्वापि मृगान् स्मरति त्वरमातुरः।
कटाक्षैः स्वप्रियान् हत्वा निर्मोही न स्मरेदहो ॥ ५

पार्षदाख्या ऊचुः

जातं विरहजं दुःखं नान्यो वेत्ति कदाचन।
यथा कण्टकविद्धाङ्गव्यथां चाविद्धकण्टकः ॥ ६

वृन्दावनपालिका ऊचुः

अनिमित्तं प्रेमसौख्यमनिमित्तो हि वेत्ति तत्।
सनिमित्तो न जानाति रसं कर्मेन्द्रियं यथा ॥ ७

गावर्द्धनवासिन्य ऊचुः

पुरन्ध्रीप्रेमकृद् यो वै सैरन्ध्रीनायकोऽभवत् ।
शैलोकीभिस्तु किं तस्य बहुना कथितेन किम् ॥ ८

कुञ्जविधायिका ऊचुः

हा माधवीकुञ्जपुञ्जे गुञ्जन् मत्तमधुव्रते ।
स्वदृग् लक्ष्मीकृतो यो वै तस्येयं श्रूयते कथा ॥ ९

निकुञ्जवासिन्य ऊचुः

वृन्दावने मत्तमिलिन्दपुञ्जे
कलिन्दजातीर-कदम्बकुञ्जे ।
शनैश्चलन्त सबलं सगोपं
सगोधनं नन्दसुतं भजामः ॥ १०

जाह्नवीयूथ उवाच

कदा तथास्मत्समयो भविष्यति
यथा पुरन्ध्रीसमयः प्रदृश्यते ।
शोकं परं मा कुरुत व्रजाङ्गनाः
सदा न कस्यापि जयः पराजयः ॥ ११

यमुनायूथ उवाच

विधातुर्न दया किञ्चिद् युनक्ति वियुनक्ति यः ।
भूतानि सकलान्येव क्रीडनानि यथार्भकः ॥ १२

रमायूथ उवाच

कुब्जा पुरा यर्जुसमानविग्रहा
दासी त्विदानीन्तु कुलीनतां गता ।

कुरूपिणी रूपवती बभावहो
चतुर्दिनैर्दुन्दुभिनादकारिणी ॥ १३

मधुमाधव्य ऊचुः

दोषो न चास्त्युद्धव माधवस्य
रहः स्थिता प्राणपतिं गृहीत्वा ।
विधाय भोगं किल नो वियोगं
योगं ददौ योगिवरास्ति कुब्जा ॥ १४

विरजायूथ उवाच

सदा न कस्यापि भुजा प्रियांसे
सदा वसन्तो न सदा युवा स्यात् ।
इन्द्रो न राज्यं कुरुते सदायं
चतुर्दिनैर्मानमलं करोतु ॥ १५

ललितायूथ उवाच

रामाभिषेकं विनिवार्य मन्थरा
चकार विघ्नं किल कौशले पुरे ।
कुब्जैव सेयं मथुरापुरे गता
कुब्जेव किं किं न करोति गोपिकाः ॥ १६

विशाखायूथ उवाच

गोचारणायानुचरैर्व्रजन्तं
प्रबोधयन्तं स्वपुरं विरावैः ।
मत्तेभयानं हि विडम्बयन्तं
श्रीनन्दसूनुं नहि विस्मरामः ॥ १७

मायायूथ उवाच

सङ्कोचवीथीषु पटे प्रगृह्य
प्रसह्य दोर्भ्यां हृदये निधाय।
अन्योन्यमाकर्षणहर्षभीतिं
गृहान् हरिं तं हि कदा नयामः॥ १८

अष्टसख्य ऊचुः

वीक्ष्य नन्दसुतमङ्ग सुन्दरं
नेत्रमद्य न जगद्विपश्यति।
नन्दराजतनये पुरीं स्थिते
किं भविष्यति वदाशु नस्त्वरम्॥ १९

षोडशसख्य ऊचुः

वेणुनादमधुरध्वनिं वने
सन्निशम्य कुसुमेषुवर्द्धनम्।
श्रोत्रयुग्ममिह नः शृणोति नो
विश्वगीतमुत वा यशःपरम्॥ २०

द्वात्रिंशत्सख्य ऊचुः

प्रीत्या स्वमित्रं हि रिपुं नयेन
लुब्धं धनैश्च द्विजमादरेण।
गुरुं प्रणामै रसिकं रसेन
निर्मोहिनं केन वशीकरोति॥ २१

श्रुतिरूपा ऊचुः

यज्जागरादिषु भवेष्वपरं ह्यहेतु
र्हेतुः स्विदस्य विचरन्ति गुणाश्च येन।

नैतद्विशन्ति महदिन्द्रियदेवसङ्घा
स्तस्मै नमोऽग्निमिव विःसृतविस्फुलिङ्गाः ॥ २२

ऋषिरूपा ऊचुः

नैवेशितुं प्रभुरयं बलिनां बलीयान्
माया न शब्द उत नो विषयीकरोति ।
तद् ब्रह्म पूर्णममृतं परमं प्रशान्तं
शुद्धं परात्परतरं शरणं गताः स्मः ॥ २३

देवाङ्गना ऊचुः

अंशांशकांशककलाद्यवतारवृन्दै
रावेशपूर्णसहिताश्च परस्य यस्य ।
सर्गादयः किल भवन्ति तमेव कृष्णं
पूर्णात् परन्तु परिपूर्णतमं नताः स्मः ॥ २४

यज्ञसीता ऊचुः

श्रीमन्निकुञ्जलतिकाकुसुमाकरोऽयं
श्रीराधिकाहृदयकण्ठविभूषणोऽयम् ।
श्रीरासमण्डलपतिर्व्रजमण्डलेशो
ब्रह्माण्डमण्डलमहीपरिपालकोऽयम् ॥ २५

रमावैकुण्ठवासिन्य ऊचुः

यो गोपिकासकलयूथमलञ्चकार
वृन्दावनञ्च निजपादरजोभिरद्रिम् ।
यः सर्वलोकविभवाय बभूव भूमौ
तं भूरिलीलमुरगेन्द्रभुजं भजामः ॥ २६

श्वेतद्वीपसखीजना ऊचुः

यथा शिलीन्ध्रं शिशुरश्रमो गजः
स्वपुष्करेणैव च पुष्करं गिरिम् ।
धृत्वा बभौ श्रीव्रजराजनन्दनः
कृपाकरोऽसौ नहि विस्मृतः क्वचित् ॥ २७

ऊर्ध्ववैकुण्ठवासिन्य ऊचुः

श्यामवर्णमये नेत्रे जगच्छ्यामं विपश्यतः ।
न द्वैतं दृश्यते यासां ताभिः किं योगसेवनम् ॥ २८

अजितपदाश्रिता ऊचुः

स्नेहपाशो दृढोऽच्छिन्नो न च्छिन्नो हरिणा विना ।
छित्वा तं मथुरां प्रागान्नागपाशं यथा खगः ॥ २९

लोकाचलवासिन्य ऊचुः

कृष्णे लग्नं नेत्रयुग्मं धावद्दशदिशान्तरम् ।
अहो न लग्नं कुत्रापि पद्मलग्नो यथा ह्यलिः ॥ ३०

श्रीसख्य ऊचुः

कार्पण्येन यशो हन्ति क्रुधा गुणगणोदयम् ।
धर्मान्न व्यसनैर्लोकः कपटेनैव मित्रताम् ॥ ३१

मैथिला ऊचुः

धनं दत्त्वा तनुं रक्षेत्तनुं दत्त्वा त्रपां व्यधात् ।
धनं तनुं त्रपां दद्यान्मित्रकार्यार्थमेव हि ॥ ३२

कौशला ऊचुः

न कोऽपि जानाति वियोगजां दशां
जीवं विना वक्तुमलं न सापि हि ।

भूयादुरोबाणविभिन्नमारान्
माभूत् कदापि प्रियविप्रयोजनम् ॥ ३३

अयोध्यापुरवासिन्य ऊचुः

कृत्वा निराशां विनिधाय चाशां
जगाम चाशां मथुरापुरस्य ।
योगश्च तस्योपरि चालिखन्नो
निर्मोहिनां वृत्तमहो विचित्रम् ॥ ३४

पुलिन्दका ऊचुः

एनं वरं कर्तुमतीव विह्वलां
समागतां शूर्पणखां पुरा वने ।
यः कारयामास विरूपिणीं बलात्
सौमित्रिणा तेन तु वः कृपा कथम् ॥ ३५

नागेन्द्रकन्या ऊचुः

अथेच्छुतामेनमहो वरं हरिः
समागतां शूर्पनखां महावनम् ।
चकार सौमित्रिसखः कुरूपिणीं
अहो कृतं तस्य तया किमप्रियम् ॥ ३६

सुतलवासिन्य ऊचुः

भक्तं बलिं सत्यपरञ्च भूरिदं
नीत्वा बलिं यः कुपितो बबन्ध ह ।
अहो कथं तस्य करोति सेवनं
मायाबटोर्वामनरूपधारिणः ॥ ३७

जालन्धर्य ऊचुः

पुरातिकष्टं प्रगतेऽसुरोत्तमे
कायाधवे भक्तवरे ततो ह्ययम्।
भूत्वा नृसिंहः कृतवान् सहाय-
महो परा निष्ठुरता प्रदृश्यते॥ ३७

भूमिगोप्य ऊचुः

अहोऽतिनिर्मोहिजनस्य चित्रं
परं चरित्रं गदितुं न योग्यम्।
मुखेन चान्यद्धृदि भाव्यमन्यद्
देवो न जानाति कुतो मनुष्यः॥ ३८

इति श्रीगर्गसंहितायां मथुराखण्डे नारदबहुलाश्व-
संवादे श्रीकृष्णस्मरणे गोपीवाक्यं नाम
सप्तदशोऽध्यायः॥ १७

बर्हिष्मतीभवा ऊचुः

अहो लयाब्धौ कृपया हरिर्या-
मुद्धृत्य वाराहतनुर्महात्मा ।
तामन्वधावद्धृतशिञ्जिनीशरो
भूत्वा दयालुः पृथुरादिराजः ॥ १

लतागोप्य ऊचुः

स्वयं सुधां वा न विभज्य पूर्वं
धन्वन्तरिर्विश्वभिषङ्महात्मा ।
तदुद्बद्धवैरेषु सुरासुरेषु
भूत्वाथ योषित् प्रददौ कलिप्रियः ॥ २

समुद्रकन्या ऊचुः

नित्यं गृहशतं याति दात्री दुःखं सुखं जनान् ।
स्वीया कथं सुशीला च चञ्चलास्मिन् कथं स्थिता ॥ ३

अप्सरस ऊचुः

अस्य प्रीत्या कर्णनासे गते वै रावणस्वसुः ।
त्यजन्तु वार्ता तेनापि भवतीनां कृपा कृता ॥ ४

दिव्या ऊचुः

सर्वेश्वरो बलिं नीत्वा बलिं बध्वा दयापरः ।
अधो क्षिपन् मुक्तिनाथश्चित्रं तत्कथयाभवत् ॥ ५

अदिव्या ऊचुः

शतरूपायुतं शान्तं तपस्यन्तं मनुं पुरा ।
दैत्यैर्बाधां गतं पश्चाद् ररक्षासौ दयानिधिः ॥ ६

सत्त्ववृत्तय ऊचुः

पूर्वं कष्टगतं भक्तं ध्रुवं कायाधवञ्च वै ।
पश्चाद् ररक्ष कृपया न पूर्वं दीनवत्सलः ॥७

रजोवृत्तय ऊचुः

रुक्माङ्गदहरिश्चन्द्राम्बरीषाणां सतां हरिः ।
सत्यं परीक्षन् प्रददौ पुनर्भागवतीं श्रियम् ॥ ८

तमोवृत्तय ऊचुः

न तथा व्यथयति चेतः
सर्वास्तस्थानेऽपि नाम्न कुब्जायाः ।
उद्धव तदपह्नुतये
यथैव हरितालरसलेपः ॥ ९

वृन्दा येन च्छलं प्राप्ता छलिना बलिना पुरा ।
छलमय्या बालिन्याद्य कुब्जया छलितो ह्ययम् ॥ १०
कृपाणी ह्येकतो वक्रा घातयन्ती जनान् बहून् ।
किमु कुब्जा त्रिवक्रा च श्रीकृष्णेन त्रिभङ्गिना ॥ ११
पश्यन्तीनां कृष्णमार्गं नेत्रे दुःखं गते भृशम् ।
अवधिः पादविक्षेपं वामनस्य करोति हि ॥ १२
पीतत्वं त्वग्गता पादौ शैथिल्यं प्रगतौ च नः ।
मनो विभ्रमतां यातं माधवे माधवं विना ॥ १३
सपत्नीहारचिह्नाढ्यमागतं तमुषःक्षणे ।
हा दैव कस्मिन् समये द्रक्ष्यामो नन्दनन्दनम् ॥ १४

नारद उवाच

इति कृष्णं चिन्तयन्त्यो गोपिकाः प्रेमविह्वलाः ।
उत्कण्ठितास्ता रुरुदुर्मूर्च्छिता धरणीं गताः ॥ १५

पृथक् पृथक् समाश्वास्य वचोभिर्नयनैपुनः।
सम्बोध्य गोपिकाः सर्वाः प्राह राधां तदोद्धवः ॥ १६

उद्धव उवाच

परिपूर्णतमे कृष्णे वृषभानुवरात्मजे।
गन्तुमाज्ञां देहि मह्यं नमस्तुभ्यं व्रजेश्वरि ॥ १७
प्रतिपत्रं देहि शुभे श्रीकृष्णाय महात्मने।
तेन तञ्च प्रणम्याशु समानेष्ये तवान्तिकम् ॥ १८

नारद उवाच

अथ राधा लेखनीञ्च नीत्वा पात्र मषेस्त्वरम्।
समाचारं चिन्तयती तावदश्रूणि सुस्रुवुः ॥ १६
यद्यत् पत्रं समानीतं राधया लेखनीयुतम्।
तत्तदार्द्रीकृतं जातं नयनाम्बुजवारिभिः ॥ २०
अश्रुप्रवाह मुञ्चन्ती कृष्णदर्शनलालसाम्।
उद्धवो विस्मयन् प्राह राधां कमललोचनाम् ॥ २१

उद्धव उवाच

कथं लिखसि राधे त्वं कथं दुःखं करोषि हि।
सर्वां तस्मै वदिष्यामि व्यथां त्वल्लेखनं विना ॥ २२

नारद उवाच

इति श्रुत्वा वचस्तस्य राधया गतबाधया।
सर्वाभिर्गोपिकाभिश्च पूजितोऽभूत्तदोद्धवः ॥ २३
नत्वा प्रदक्षिणीकृत्य राधां रासेश्वरीं पराम्।
गोपीगणमनुज्ञाप्य नत्वा नत्वा पुनः पुनः ॥ २४
रथमारुह्य दिव्याभं रत्नभूषणभूषितः।
गतभृत्याभिमानोऽसौ सन्ध्यायां नन्दमाययौ ॥ २५

मार्तण्ड उदयं प्राप्ते नत्वा गोपीं यशोमतीम् ।
नन्दराजमनुज्ञाप्य नवनन्दांस्तदोद्धवः ॥ २६
वृषभानूपनन्दांश्च समनुज्ञाप्य लोकतः ।
तथा कृष्णसखीन् सर्वान् रथमारुह्य निर्गतः ॥ २७
दूरं तमनुगाः सर्वे गोपा गोपीगणास्तथा ।
सन्निवृत्त्याथ तान् स्नेहादुद्धवो मथुरां ययौ ॥ २८
एकान्ते चाक्षयवटे कृष्णातीरे मनोहरे ।
नत्वा कृष्णं परिक्रम्य प्रेमगद्गदया गिरा ।
प्राह स्रवन्नेत्रपद्म उद्धवो बुद्धिसत्तमः ॥ २९

उद्धव उवाच

किं देव कथनीयं मे भवतोऽशेषसाक्षिणः ।
विधत्स्व शं राधिकाया गोपीनां देहि दर्शनम् ॥ ३०
श्रीकृष्णं देवदेवेशं समानेष्ये तवान्तिकम् ।
इत्थं वाक्यञ्च मे भूतं रक्ष रक्ष कृपानिधे ॥ ३१

प्रह्लादरुक्माङ्गदयोः प्रतिज्ञां
बलेश्च खट्वाङ्गनृपस्य साक्षात् ।
यथाम्बरीषध्रुवयोस्तथा मे
कृताञ्च भक्तेश्वर रक्ष रक्ष ॥ ३२

इति श्रीगर्गसंहितायां मथुराखण्डे नारदबहुलाश्व-
संवादे गोपीवाक्ये उद्धवागमनं नाम
अष्टादशोऽध्यायः ॥ १८

नारद उवाच

इत्थं निशम्य भक्तस्य वचनं भक्तवत्सलः।
स्मृत्वा वाक्यं स्वकथितं गन्तु चक्रेऽच्युतो मतिम् ॥ १
बलदेवं स्थापयित्वा कार्यभारेषु सर्वतः।
हेमाढ्य किङ्किणीजाल चञ्चलाश्वनियोजितम् ॥ २
रथमारुह्य सूर्याभमुद्धवेन समन्वितः।
भक्तानां दर्शन दातुं प्रययौ नन्दगोकुलम् ॥ ३
गोवर्द्धनं गोकुलञ्च पश्यन् वृन्दावनं वनम्।
प्राप्तोऽभूत् पुलिने कृष्णः कृष्णातीरे मनोहरे ॥ ४
कोटिशः कोटिशो गावो दृष्ट्वा कृष्णं व्रजाधिपम्।
आधावन्त्यः सर्वतस्तं स्नेहस्नुतपयोधराः ॥ ५
उदास्य कर्णवालांश्च रम्भमाणाः सवत्सकाः।
मुखे कवलसंयुक्ता अश्रुमुख्यो गतव्यथाः ॥ ६
सरथं सारुणं साश्वं शरदर्क यथा घनाः।
रुरुधुस्तं रथं राजन् उद्धवस्य प्रपश्यतः ॥ ७
श्रीगोपालो हरिस्तासां वदन् नाम पृथक् पृथक्।
श्रीहस्तेन तदङ्गानि स्पृशन् हर्षं जगाम ह ॥ ८
तत्समीपे गवां वृन्दं गतं वीक्ष्य व्रजार्भकाः।
श्रीदामाद्या विस्मिताश्च दूरादूचुः परस्परम् ॥ ९

गोपा ऊचुः

रथं सकुम्भध्वजवायुवेग
सुकांस्यपत्रध्वनिप्रध्वनन्तम।
शताश्वयुक्त शतसूर्यशोभं
गावः कथं वा रुरुधुः सखायः ॥ १०

अन्यो नचास्मिन् हि गवां प्रहर्षणे
रायाति किन्तु व्रजराजनन्दनः ।
स्फुरन्ति चाङ्गानि हि दक्षिणानि नः
श्रीनीलकण्ठः प्रतनोति तोरणम् ॥ ११

नारद उवाच

इत्थं विचार्य मनसा गोपा. सर्वे समागताः ।
ददृशुर्माधवं मित्र गतं वस्तु यथा जनाः ॥ १२
अवप्लुत्य रथात् कृष्णः परिपूर्णतमः स्वयम् ।
उरो निधाय तान् सर्वान् दोर्भ्यां तत्प्रेमविह्वलः ॥ १३
मुञ्चन् नेत्राब्जवारीणि परिरेभे पृथक् पृथक् ।
अहो भक्तेश्च माहात्म्यं वक्तुं कोऽस्ति महीतले ॥ १४
ते सर्वे रुरुदुर्गोपा मुञ्चन्तोऽश्रूणि मैथिल ।
प्रवक्तुं न समर्थाः श्रीकृष्णविक्षेपविह्वलाः ॥ १५
परिपूर्णतमः साक्षाद्देवो मधुरया गिरा ।
आश्वासयामास नतान् प्रेमानन्दसमाकुलान् ॥ १६
उद्धवः प्रेषितो वक्तुं श्रीकृष्णेनार्भकैः सह ।
आगतं कथयामास श्रीकृष्णं नन्दपत्तने ॥ १७
श्रुत्वागतं नन्दसूनुं श्रीकृष्ण गोपवल्लभम् ।
आनेतुं निर्गताः सर्वे परिपूर्णमनोरथाः ॥ १८

भेरीमृदङ्गैः पटहैः कलस्वनै
रप्पूर्णकुम्भैर्द्विजवेदघोषणैः ।
गन्धाक्षतैर्मङ्गललाजमिश्रितैः
श्रीनन्दराजोऽभिययौ यशोदया ॥ १९
ततः पुरस्कृत्य मदोन्नतं गजं
सिन्दूरशुण्डाधृतहेमशृङ्खलम् ।

समाययौ श्रीवृषभानुमुख्यो
भान्वाकृतिस्तत्र कलावतीयुतः ॥ २०
नन्दोपनन्दा वृषभानवश्च
गोपाश्च वृद्धास्तरुणार्भकाश्च ।
स्रग्वेणुगुञ्जापरिपिच्छयुक्ता
विनिर्गताः पूर्णमनोरथास्ते ॥ २१
गायन्त आरान्नृप नन्दनन्दनं
नृत्यन्त आचालितपीतवाससः ।
वंशीधरा वेत्रविषाणपाणयः
प्रहर्षिता दर्शनलालसा भृशम् ॥ २२
सखीमुखेभ्यो हरिमागतं परं
निशम्य राधा शयनात् समुत्थिता ।
ताभ्यः स्वभूषाः प्रददौ प्रहर्षिता
प्रीत्या स्वगन्धं नवपद्मिनी यथा ॥ २३
द्वात्रिंशदष्टौ किल षोडश द्वे
यूथैर्युता मैथिल गोपिकानाम् ।
आरुह्य राधा शिबिकां मनोज्ञां
समाययौ श्रीधरदर्शनार्थम् ॥ २४
तथाहि गोप्यः किल कोटिशश्च
त्यक्त्वाथ सर्वं स्वगृहस्य कृत्यम् ।
व्यत्यस्तवस्त्राभरणा नृपेश
समाययुः प्रेमचलन्मनोज्ञाः ॥ २५
सर्वं व्रजं पादपगोमृगद्विजं
प्रेमातुरं वीक्ष्य समागतं किमु ।
श्रीनन्दराजं पितरञ्च मातरं
ननाम कृष्णः कृतमस्तकाञ्जलिः ॥ २६

श्रीनन्दराजस्तनयं चिरागतं
प्रगृह्य दोर्भ्यां हृदये निधाय तम् ।
संस्नापयामास सुनेत्रजैर्जलै
र्यशोदया प्राप्तमनोरथश्चिरात् ॥ २७
नन्दोपनन्दान् वृषभानुवृद्धान्
सर्वान् नमस्कृत्य च तत्कृताशीः ।
तथा वयस्यैश्च परस्परं वा
लघूंश्च हस्तग्रहणैः स्थितोऽभूत् ॥ २८
ततः समारुह्य रथं हरिः स्वयं
निधाय नन्दञ्च गजे यशोदया ।
नन्दोपनन्दैः सहितो गवां गणैः
श्रीनन्दराजस्य पुरं विवेश सः ॥ २९
तदैव देवाः किल पुष्पवर्ष
माचारलाजान् पुरगोपिकाश्च ।
प्रचक्रिरे तत्र जयेति मङ्गलं
शब्दं च गोपा गृहमागते हरौ ॥ ३०
धन्यः सखा ते परमुद्धवोऽय
मनेन साक्षात् किल दर्शितोऽत्र ।
त्वं जीवनं गोपजनस्य गोपा
ऊचुर्गिरा गद्गदयेदमार्ताः ॥ ३१
इदं मया ते कथितं नृपेश
पुनर्व्रजे ह्यागमन हरेश्च ।
किमिच्छसि श्रोतुमथो सुरासुरैः
परं चरित्रं शुभदं विचित्रम् ॥ ३२

इति श्रीगर्गसंहितायां मथुराखण्डे नारदबहुलाश्व-
संवादे श्रीकृष्णागमनोत्सवो नाम
एकोनविंशोऽध्यायः ॥ १९

बहुलाश्व उवाच

अग्रे चकार किं साक्षाद्भगवान् व्रजमण्डले ।
राधायै गोपिकाभ्यश्च कथं स्विद्दर्शनं ददौ ॥ १
गोपीमनोरथं कृत्वा मथुरामाजगाम ह ।
एतन्मे ब्रूहि विप्रेन्द्र त्वं परावरवित्तमः ॥ २

नारद उवाच

सन्ध्यायां राधयाहूतः श्रीकृष्णो भगवान् स्वयम् ।
एकान्ते शीतलं शश्वज्जगाम कदलीवनम् ॥ ३
स्फारास्फुरन्मेघगृहं रम्भाचन्दनचर्चितम् ।
कृष्णामरुत्सीकरञ्च सुधारश्मिगलत्सुधम् ॥ ४
एतादृशं वनं राधावियोगानलवर्चसा ।
भस्मीभूतं हि सततं कृष्णाशा तां हि रक्षति ॥ ५
तत्रैव सर्वे गोपीनां शतयूथाः समागताः ।
तस्यै निवेदनं चक्रुर्माधवागमनस्य हि ॥ ६
उत्थाय सहसा साक्षाद्वृषभानुवरात्मजा ।
आनेतुमाययौ कृष्णं सखीभिः परिवारिता ॥ ७
ददावासनपाद्यार्घानुपचारान् मनोहरान् ।
वदन्ती सादरं वाक्यं कुशलं कुशलाधिका ॥ ८
युवकन्दर्पकोटीनां माधुर्यहारिणं हरिम् ।
दृष्ट्वा राधा जहौ दुःखं ब्रह्म ज्ञात्वा गुणं यथा ॥ ९
प्रसन्ना तत्र शृङ्गारमकरोत् कीर्तिनन्दिनी ।
तया नोऽकारि शृङ्गारः पान्थे कृष्णे गते सति ॥ १०
न चन्दनञ्च ताम्बूलं भोजनञ्च सुधासमम् ।
न कृतं दिव्यशयनं हास्यं वा न कृतं क्वचित् ॥ ११

परिपूर्णतमं कृष्णं परिपूर्णतमप्रिया ।
आनन्दाश्रूणि मुञ्चन्ती प्राहगद्गदया गिरा ॥ १२

राधोवाच

कियद् दूरे यदुपुरीमागतः किं करोषि हि ।
किं वदेयं रहो दुःखं भवतोऽशेषसाक्षिणः ॥ १३
सौदासराजमहिषी दमयन्ती च मैथिली ।
नास्त्यत्र कां पुरस्कृत्य वदेयं विरह रिपुम् ॥ १४
मत्समानाश्च या गोप्यो गदितुं न क्षमाः क्वचित् ।
शरच्चन्द्रं चकोरीव मयूरीव घनं नवम् ।
श्रीवृन्दावनचन्द्रं त्वां घनश्यामं समुत्सहे ॥ १५
तव सख्योद्धवेनात्र धन्येन त्वं प्रदर्शितः ।
अन्यः कोऽपि व्रजे नास्ति यस्य प्रेम्णा त्वमागतः ॥ १६

नारद उवाच

एवं वदन्ती सततं रुदन्तीं
परां प्रियां वीक्ष्य घृणातुराङ्गः ।
आश्वासयामास नयेन सद्यः
प्रगृह्य दोर्भ्यां स्रवदम्बुनेत्रः ॥ १७

भगवानुवाच

मा शोकं कुरु राधे त्वं त्वत्प्रीत्याहं समागतः ।
आवयोर्भेदरहितं तेजश्चैकं द्विधा जनैः ॥ १८
यथा हि दुग्धधावल्ये तथावां सर्वदा शुभे ।
यत्राहं त्वं सदा तत्र विश्लेषो नहि चावयोः ॥ १९
पूर्णं ब्रह्म परश्चाहं तटस्था त्वं जगत्प्रसूः ।
विश्लेष आवयोर्मध्ये मृषाज्ञानेन पश्यसत् ॥ २०

यथाकाशस्थितो नित्य वायुः सर्वत्रगो महान् ।
तथा जलं सूक्ष्मरूपं तेजो व्याप्तं यथैधसि ॥ २१
अन्तर्बहिर्यथा पृथ्वी पृथग्भूता वरानने ।
तथा विकाररहितोऽमलर्वांस्तुगुणैरहम् ॥ २२
तथा त्वं पश्य मद्भावं सदानन्दो भवेत्ततः ।
अहं ममेति भावेन द्वितीयोऽस्ति वरानने ॥ २३

यावद्घनो मध्यगतस्तदुत्थितः
स्वरूपमर्कं नहि दृक् प्रपश्यति ।
तावत् परात्मानमसौ प्रधानजै
गुणैस्तथा तेषु गतेषु पश्यति ॥ २४
गुणेषु सक्त किल बन्धनाय
रक्त मनः पुंसि च मुक्तये स्यात् ।
मनो द्वयोः कारणमाहुरारा
जित्वाथ तत् कौ विचरेदसङ्गः ॥ २५
सर्वं हि भावं मनसः परात्परं
न ह्येकतो भामिनि जायते ततः ।
प्रेमैव कर्तव्यमतो मयि स्वतः
प्रेम्णा समानं भुवि नास्ति किञ्चित् ॥ २६

नारद उवाच

इति वाक्यं हरेः श्रुत्वा प्रसन्ना कीर्तिनन्दिनी ।
गोपिकाभिः समं कृष्णं पूजयामास माधवम् ॥ २७
अथ रात्र्यां हरिः साक्षात् कार्त्तिक्यां रासमण्डलम् ।
गत्वा ननाद मुरलीं गोपीभी राधया सह ॥ २८
यमुनानिकटे राजन् राधया राधिकापतिः ।
रामाभिः सुन्दरीभिश्च रासरङ्गे रराज ह ॥ २९

यावतीर्गोपिका रासे तावद्रूपधरो हरिः ।
रेमे वृन्दावने दिव्ये हरिर्वृन्दावनेश्वरः ॥ ३०
क्वणन्नूपुरमञ्जीरो वनमालाविराजितः ।
पीताम्बरः पद्महारी प्रभातार्ककिरीटधृक् ॥ ३१
विद्युल्लतास्फुरत्प्रोद्यद्धेमकुण्डलमण्डिता ।
वेत्रभृद् वादयन् वंशीं नटवेषो घनद्युतिः ॥ ३२
स्फुरत्कौस्तुभरत्नाढ्यः प्रचलत्स्निग्धकुन्तलः ।
रराज राधया रासे यथा रत्या रतीश्वरः ॥ ३३
शच्या शक्रो यथा स्वर्गे घनश्चञ्चलया यथा ।
वृन्दया वृन्दकारण्ये तथा वृन्दावनेश्वरः ॥ ३४
वृन्दावनञ्च पुलिनं वनान्युपवनानि च ।
पश्यन् गोपीगणैः सार्द्धं गिरिं गोवर्द्धनं ययौ ॥ ३५
गोपीनां शतयूथानां मानं वीक्ष्य व्रजेश्वरः ।
भगवान् राधया साकं तत्रैवान्तरधीयत ॥ ३६
अथ गोवर्द्धनाद्दूरे सुन्दरं योजनत्रयम् ।
श्रीखण्डगन्धसंयुक्तं स ययौ रोहिताचलम् ॥ ३७
लताकुञ्जनिकुञ्जांश्च पश्यन् जल्पन् तया सह ।
विचचार गिरौ रम्ये काञ्चनोलतिकालये ॥ ३८
तत्र देवसरो रम्यं बद्रिनाथेन निर्मितम् ।
पाठीनकूर्मनक्रादिहंससारससङ्कुलम् ॥ ३९
सहस्रदलपद्मैश्च मण्डितं तदितस्ततः ।
भ्रमरध्वनिसंयुक्तं पुंस्कोकिलरुतावृतम् ॥ ४०
विकसत्पद्मगन्धाढ्ये तत्तीरे मन्दमारुते ।
रमया राधया सार्द्धं माधवो निषसाद ह ॥ ४१
तत्तीरे प्रतपस्यन्तमृभुं नाम महामुनिम् ।
पदैकेन स्थितं शश्वच्छ्रीकृष्णध्यानतत्परम् ॥ ४२

षष्टिवर्षसहस्राणि षष्टिवर्षशतानि च ।
निरन्नं निर्जलं शान्तं श्रीकृष्णस्तं ददर्श ह ।। ४३

प्रच्छन्नं वीक्ष्य तं राधां हसन्तीं प्राह माधवः ।
माहात्म्यं कुरु भक्तोऽयं पश्य भक्तिं महामुनेः ।। ४४

हे ऋभो इति कृष्णेन प्रोक्तमुच्चैर्वचः शुभम् ।
न श्रुतं तेन किं श्रद्धा चरमं प्रापितेन वै ।। ४५

हरिस्तदा तद्धृदयाद् बभूवाशु तिरोहितः ।
ध्यानाद्गतं हरिं वीक्ष्य मुनीन्द्रश्चार्तिविस्मितः ।। ४६

नेत्रे उन्मील्य ददृशे श्रीकृष्णं राधयागतम् ।
घनं चञ्चलयेवाढ्यं रञ्जयन्तं दिशो दश ।। ४७

उत्थाय सद्यो हरिभक्तितत्परः
प्रदक्षिणीकृत्य हरिं सराधिकम् ।
प्रणम्य मूर्ध्ना निपपात पादयो
रुवाच कृष्णं बहुगद्गदाक्षरः ।। ४८

ऋभुरुवाच

नमः कृष्णाय कृष्णायै राधायै माधवाय च ।
परिपूर्णतमायै च परिपूर्णतमाय च ।। ४९

घनश्यामाय देवाय श्यामायै सततं नमः ।
रासेश्वराय सतत रासेश्वर्य्यै नमो नमः ।। ५०

गोलोकातीवलीलाय लीलावत्यै नमो नमः ।
असङ्ख्याण्डाधिदेव्यै चासङ्ख्याण्डनिधये नमः ।। ५१

भूभारहाराय भुवं गताभ्यां
मच्छान्तये चात्र समागताभ्याम् ।
परस्परं सन्धितविग्रहाभ्यां
नमो युवाभ्यां हरिराधिकाभ्याम् ।। ५२

नारद उवाच

इत्युक्त्वा कृष्णपादाब्जे प्रक्षरद्बाष्पलोचनः ।
प्रेमानन्दसमायुक्तो जहौ प्राणान् महामुनिः ॥ ५३
तदैव निर्गतं ज्योतिर्दशसूर्यसमप्रभम् ।
परिभ्रमन् दशदिशः श्रीकृष्णे लीनतां गतम् ॥ ५४
भक्तस्य भक्तिं श्रीकृष्णो वीक्ष्य वै प्रेमलक्षणाम् ।
आनन्दाश्रुकलां मुञ्चन् प्रेम्णा तं प्राजुहाव ह ॥५५
पुनः श्रीकृष्णपादाब्जात् कृष्णसारूप्यवान् मुनिः ।
निर्गतः कोटिकन्दर्पसन्निभोऽतिनतानन: ॥ ५६
दोर्भ्यां प्रगृह्य हृदये तं निधाय कृपाकरः ।
आश्वास्य कल्याणकरं करं दिव्यं दधार ह ॥ ५७

प्रदक्षिणीकृत्य हरिञ्च राधिकां
प्रणम्य चारुह्य रथं मनोहरम् ।
गोलोकलोकं प्रययावृभुर्मुनि
र्विरञ्जयन् मैथिल मण्डलं दिशाम् ॥ ५८
श्रीराधिका विस्मयमागता भृशं
दृष्ट्वा परां मुक्तिमृभोर्महामुनेः
आनन्दवारीणि विमुञ्चतो चिरं
जगाद कृष्णं वृषभानुनन्दिनी ॥ ५९

इति श्रीगर्गसंहितायां मथुराखण्डे नारदबहुलाश्व-
संवादे रासोत्सवे ऋभुमोक्षो नाम
विंशोऽध्यायः ॥ २०

राधोवाच

धन्योऽयं मुनिशार्दूलस्त्वद्भक्तः प्रेमवान् महान् ।
त्वत्सारूप्यं जगामासौ त्वमप्यश्रुमुखो यतः ॥ १
अस्य देहक्रियां कर्तुं योग्योऽसि वृजिनार्दन ।
तपसा चास्य देहोऽयं प्रस्फुरत्यमलाकृतिः ॥ २

नारद उवाच

वदन्त्यां तत्र राधायां तद्देहोऽप्यभवत् सरित् ।
वहती पापहन्त्री च दृश्यते रोहिते गिरौ ॥ ३
तद्देहस्यापि सरितं वीक्ष्य राधातिविस्मिता ।
नन्दराजात्मजं प्राह वृषभानुवरात्मजा ॥ ४

राधोवाच

कथं जलत्वमापन्नो देहोऽयं वै महामुनेः ।
एतन्मे संशयं देव छेत्तुमर्हस्यशेषवित् ॥ ५

भगवानुवाच

प्रेमलक्षणया भक्त्या संयुतोऽयं मुनीश्वरः ।
तस्मादस्य तु देहोऽयं रम्भोरु द्रवतां गतः ॥ ६
दृष्ट्वा त्वया मां वरदं हर्षितोऽभून्महामुनिः ।
जलत्वं प्राप तद्देहो यथाहं द्रवतां पुरा ॥ ७

राधोवाच

द्रवतां त्वं कथं प्राप्तो देवदेव दयानिधे ।
एतच्चित्रं हि मे जातं सर्वं त्वं वद विस्तरात् ॥ ८

भगवानुवाच

अत्रैवोदाहरन्तीममितिहासं पुरातनम् ।
यस्य श्रवणमात्रेण पापहानिः परं भवेत् ॥ ९

मन्नाभिपङ्कजाज्जातः पुरा ब्रह्मा प्रजापतिः ।
असृजत् प्रकृतिं शश्वत्तपसा मद्वरोजितः ॥ १०
उत्सङ्गान्नारदो जज्ञे ब्रह्मणः सृजतः शुभे ।
भक्त्युन्मत्तो मत्पदानि निजगौ पर्यटन् महीम् ॥ ११
एकदा नारदं प्राह देवो ब्रह्मा प्रजापतिः ।
प्रजाः सृज महाबुद्धे वृथा चङ्क्रमणं त्यज ॥ १२
नारदस्तद्वचः श्रुत्वा प्राहेदं ज्ञानतत्परः ।
न सृजामि पितः सृष्टिं शोकमोहादिकारिणीम् ॥ १३
करिष्यामि हरेर्भक्तिं तत्कीर्तनसमन्विताम् ।
त्वमपि सृष्टिरचनां त्यज दुःखातुरो भृशम् ॥ १४
क्रुद्धः शशाप तं ब्रह्मा प्राह प्रस्फुरिताधरः ।
सदा गानपरः कल्पं गन्धर्वो भव दुर्मते ॥ १५
एवं तच्छापतो राधे गन्धर्व उपबर्हणः ।
बभूव गन्धर्वपतिः कल्पमात्रं सुरालये ॥ १६
एकदा ब्रह्मणो लोके स्त्रीभिः परिवृतो गतः ।
सुन्दरीषु मनः कृत्वा जगौ तालविवर्जितम् ॥ १७
पुनर्ब्रह्मा तं शशाप त्वं शूद्रो भव दुर्मते ।
अथासौ ब्रह्मशापेन दासीपुत्रो बभूव ह ॥ १८
सत्सङ्गेन पुना राधे प्राप्तोऽभूद् ब्रह्मपुत्रताम् ।
भक्त्युन्मत्तो मत्पदानि निजगौ पर्यटन् महीम् ॥ १९
मुनीन्द्रो वैष्णवश्रेष्ठो मत्प्रियो ज्ञानभास्करः ।
परं भागवतः साक्षान्नारदो मे मनः सदा ॥ २०
एकदा नारदो लोकान् पश्यन् वै गानतत्परः ।
इलावृतं नाम खण्डं गतवान् सर्वतो गतिः ॥ २१
यत्र जम्बूनदी श्यामा जम्बूफलरसोद्भवा ।
तया जाम्बुनदं नाम सुवर्णं भवति प्रिये ॥ २२

तद्देशे वेदनगरं रत्नप्रासादनिर्मितम् ।
ददर्श नारदो योगी दिव्यनारीनरैर्युतम् ॥ २३

कांश्चिद्वै पादरहितान् विगुल्फान् जानुवर्जितान् ।
विजङ्घान् जघनव्यङ्गान् कृशोरून् कुब्जमध्यकान् ॥ २४

श्लथद्बाहूश्चलत्स्कन्धान् नताननविकन्धरान् ।
स्त्रीजनान् पुरुषांश्चासावङ्गभङ्गान् ददर्श ह ॥ २५

अहो किमेतच्चित्रं हि सर्वान् दृष्ट्वावदन्मुनिः ।
सर्वे यूयं पद्ममुखा दिव्यदेहाः शुभाम्बराः ॥ २६

किं देवा उपदेवा वा यूयं किं सिद्धसत्तमाः ।
वादित्रसहिताः सर्वे रम्यगानपरायणाः ॥ २७

अङ्गभङ्गाः कथं यूयं वदताशु ममैव हि ।
इत्युक्तास्तेन ते सर्वे प्रत्यूचुर्दीनमानसाः ॥ २८

रागा ऊचुः

महादुःखं मुने जातमस्माकं तनुषु स्वतः ।
तस्याग्रे कथनीयं वै दूरीकर्तुं च यः क्षमः ॥ २९

रागा वयं वेदपुरे वसामः सर्वदा मुने ।
अङ्गभङ्गा वयं जाताः कारणं शृणु मानद ॥ ३०

जातो हिरण्यगर्भस्य पुत्रो नारद नामभाक् ।
प्रेमोन्मत्तो विकालेन गायन् ध्रुवपदानि च ।
विचचार महीमेतां स्वेच्छया स महामुनिः ॥ ३१

विकालैस्तस्य गानैश्च विस्वरैस्तालवर्जितैः ।
विमानैश्च वयं सर्वे अङ्गभङ्गा बभूविम ॥ ३२

इति श्रुत्वाथ तद्वाक्यं नारदो विस्मितोऽभवत् ।
उवाच गतमानोऽसौ रागान् परिहसन्निव ॥ ३३

वराभयं पुस्तकवल्लकीयुतं
परं दधानां विमले करद्वये ।
नमाम्यहं त्वां शुभदां सरस्वतीं
जगन्मयीं ब्रह्ममयीं मनोहराम् ॥ ४३
तरङ्गितक्षौमसिताम्बरे परे
देहि स्वरज्ञानमतीवमङ्गले ।
येनाद्वितीयो हि भवेयमक्षरे
सर्वोपरि स्यां परागमण्डले ॥ ४४

भगवानुवाच

स्तोत्रं जाड्यापहं दिव्यं प्रातरुत्थाय यः पठेत् ।
नारदोक्तं सरस्वत्याः स विद्यावान् भवेदिह ॥ ४५
ततः प्रसन्ना वाग्देवी नारदाय महात्मने ।
देवदत्तां ददौ वीणां स्वरब्रह्मविभूषिताम् ॥ ४६
रागैश्च रागिणीभिश्च तत्पुत्रैश्च तथैव च ।
देशकालादिभेदैश्च तालमानस्वरैः सह ॥ ४७
षट्पञ्चाशत्कोटिभेदैरन्तर्भेदैरसङ्ख्यकैः ।
ग्रामैर्नृत्यैः सवादित्रैर्मूर्च्छनासहितैः शुभैः ॥ ४८
वैकुण्ठस्य पतेः साक्षात् प्रिया मुख्या सरस्वती ।
स्वरगम्यैः पदैः सिद्धैः पाठयामास नारदम् ॥ ४९
अद्वितीयं रागकरं कृत्वा तं रागमण्डले ।
वैकुण्ठं प्रययौ राधे वाग्देवी विष्णुवल्लभा ॥ ५०

इति श्रीगर्गसंहितायां मथुराखण्डे नारदबहुलाश्व-
संवादे नारदोपाख्यानं नाम
एकविंशोऽध्यायः ॥ २१

भगवानुवाच

कस्मै देयमिदं गुह्यं रागरूपं मनोहरम् ।
बुद्ध्या विचारयन्नित्थं गन्धर्वनगरं ययौ ॥ १

तुम्बुरुं नाम गन्धर्वं कृत्वा शिष्यं स नारदः ।
कलं जगौ मद् गुणांश्च वीणावाद्यपरायणः ॥ २

केषामग्रे गेयमिद रागरूपं मनोहरम् ।
श्रोतुं पात्रं विचिन्वन् स नारदः शक्रमाययौ ॥ ३

अनिवृत्तश्च तं दृष्ट्वा नारदो मुनिसत्तमः ।
सख्या तुम्बुरुणा सार्द्धं सूर्यलोकं जगाम ह ॥ ४

रथेन तं प्रधावन्तं सूर्यं वीक्ष्य महामुनिः ।
शिवपार्श्वं जगामाशु ततो देवर्षिसत्तमः ॥ ५

भूतेशं ज्ञानतत्त्वज्ञं ध्यानस्तिमितलोचनम् ।
वीक्ष्य तं नारदो राधे ब्रह्मलोकं जगाम ह ॥ ६

सृजन्तं सृष्टिरचनां व्यग्र वीक्ष्य विधिं मुनिः ।
वैकुण्ठं प्रययौ विष्णो. सर्वलोकनमस्कृतम् ॥ ७

भक्तार्थं कुत्र गच्छन्तं भक्तेशं भक्तवत्सलम् ।
वीक्ष्य तुम्बुरुणा सार्द्धं योगीन्द्रः प्रययौ ततः ॥ ८

योगीश्वराणां हि सतां त्रिलोक्यामन्तरं बहिः ।
गतिमाहुर्नाप्नुवन्ति कर्मभिर्वृषभानुजे ॥ ९

कोटिशो ह्यण्डनिचयान् समुल्लङ्घ्य मुनीश्वरः ।
गोलोकं परमं धाम प्रययौ प्रकृतेः परम् ॥ १०

समुत्तीर्याशु विरजां नदीं कल्लोलशालिनीम् ।
ययौ वृन्दावनं रम्यं भ्रमरध्वनिसङ्कुलम् ॥ ११

सदा वसन्तर्तुयुतं मरुतेजल्लतागृहम् ।
दृष्ट्वा गोवर्द्धनं शैलं मञ्जिकुञ्जं समाययौ ॥ १२
कौ युवां कुत आयातौ किं कार्यं वदतश्च नः ।
इत्थं सखीभिः सम्पृष्टावूचतुर्मुनितुम्बुरू ॥ १३
गायकौ कुशलौ रामा आवां वीणाकलध्वनिम् ।
परिपूर्णतमं साक्षाच्छ्रीकृष्णं राधिकापतिम् ॥ १४
कलं परं श्रावयितुमागतौ बन्दिनां वरौ ।
कथनीयमिदं वाक्यं श्रीकृष्णाय महात्मने ॥ १५
श्रुत्वा सख्यस्तथा मह्यं निवेद्याथ मदाज्ञया ।
आगत्याज्ञां ददुर्यातुं बन्दिभ्यां श्लक्ष्णया गिरा ॥ १६
मञ्जिकुञ्जाङ्गणे भ्राजत्कोट्यर्कज्योतिराकुले ।
खचित्कौस्तुभरत्नाढ्ये प्रचलच्चारुचामरे ॥ १७
लोलन्मुक्ताफलच्छत्रे सखीकोटिसमन्विते ।
महापद्मस्थितं साक्षात्त्वया मां तावपश्यताम् ॥ १८
नत्वा प्रदक्षिणीकृत्य तत्र स्थित्वा मदाज्ञया ।
स्तुत्वा मां मद्गुणान् वक्तुं तेनासावुपचक्रमे ॥ १९
आतोद्यं विनुदन् वीणां देवदत्तां स्वरामृतम् ।
कलं जगावद्वितीयं नारदः सहतुम्बुरुः ॥ २०
सन्तुष्टोऽहं शिरो धुन्वन् तेन संश्लाघ्य तत्स्वरम् ।
दत्त्वात्मानं प्रेमपरो जलत्वं गतवानहम् ॥ २१
यज्जलं मद्वपुर्जातं तद्वै ब्रह्मद्रवं विदुः ।
कोटिशः कोटिशोऽण्डानां राशयः संलुठन्ति हि ॥ २२
इन्द्रायनफलानीवानन्ते तस्मिन् जले शुभे ।
पृश्निगर्भमिदं राधे ब्रह्माण्डं मत्पदं स्फुटम् ॥ २३
भित्त्वा तच्चागतं साक्षादस्मिन् मन्वतरे शुभे ।
तत्स्वर्धुनीं विदुः पूर्वे श्रीगङ्गां पापहारिणीम् ॥ २४

दिवि मन्दाकिनी प्रोक्ता गङ्गा भागीरथी क्षितौ ।
अधो भोगवती प्रोक्ता त्रिधा त्रिपथगामिनी ।। २५
यत्स्नातुं गच्छतः पुंसः प्रणतस्य पदे पदे ।
राजसूयाश्वमेधानां फलमस्ति न दुर्लभम् ।। २६
गङ्गा गङ्गेति यो ब्रूयाद् योजनानां शतैरपि ।
मुच्यते सर्वपापेभ्यो विष्णुलोकं स गच्छति ।। २७
दृष्ट्वा जन्मशतं पाप पीत्वा जन्मशतद्वयम् ।
स्नात्वा जन्मसहस्रेण हन्ति गङ्गा कलौ युगे ।। २८
सफलं जन्म वै तेषां ये पश्यन्ति हि जाह्नवीम् ।
वृथा जन्म गतं तेषां ये न पश्यन्ति जाह्नवीम् ।। २९
यथाहं द्रवतां प्राप्तो विरजा त्वद्भयाद् यथा ।
प्रापुर्द्रवत्वं रम्भोरु विरजायाः सुता यथा ।। ३०
यथा कृष्णा नदी विष्णुर्वेणी देवः शिवो यथा ।
ब्रह्मा ककुद्मिनी गङ्गा गण्डकी च यथाप्सराः ।। ३१
तथा द्रवत्वं सम्प्राप्त ऋभुर्नाम्नाप्ययं मुनिः ।
प्रेमलक्षणया भक्त्या रम्भोर्वत्र न संशयः ।। ३२
यः शृणोति कथामेतां पवित्रां पापहारिणीम् ।
उल्लङ्घ्य सर्वलोकांश्च मल्लोकं याति मानवः ।। ३३

नारद उवाच

एवमुक्त्वा प्रियां राधामृभोराश्रमतो हरिः ।
राधया सहितो राजन् आययौ मालतीवनम् ।। ३४
गोपीनां विरहं ज्ञात्वा भगवान् भक्तवत्सलः ।
राधया प्रययौ कृष्णापुलिनं मङ्गलायनम् ।। ३५
तदा गोपीगणाः सर्वे गतमाना गतव्यथाः ।
जगृहुस्तं घनश्यामं सौदामिन्यो घनं यथा ।। ३६

वृन्दावने हरिः साक्षात् कृष्णातीरे मनोहरे ।
जगौ कलं गोपिकाभिर्वंशीवादनतत्परः ॥ ३७
भगवत्कलरागेण मूर्च्छिता गोपकन्यकाः ।
नद्यो वेगत्वरहिता अचरत्वं हि पक्षिणः ॥ ३८
मौनत्वं देवताः सर्वाः स्तम्भत्वं देवनायकाः ।
सजलत्वञ्च तरवो निद्रात्वं प्रगतं जगत् ॥ ३९
कृत्वा रासं राधिकाया गोपीनाञ्च मनोरथम् ।
ब्राह्मे मुहूर्ते भगवानाययौ नन्दमन्दिरम् ॥ ४०
राधिका गोपिकाभिश्च प्राप्तानन्दमनोरथा ।
वृषभानुवरस्यापि सुन्दरं मन्दिरं ययौ ॥ ४१

इति श्रीगर्गसंहितायां मथुराखण्डे नारदबहुलाश्व-
संवादे नारदोपाख्यानं नाम
द्वाविंशोऽध्यायः ॥ २२

नारद उवाच

श्रीकृष्णो भगवान् साक्षाद् व्रजे कति दिनानि च ।
स्थित्वा स्वदर्शनं दत्वा मथुरां गन्तुमुद्यतः ॥ १
नन्दांश्चोपनन्दांश्च वृषभानून् व्रजे च षट् ।
वृषभानुवरं चैव नन्दराजं व्रजेश्वरम् ॥ २
कलावतीं यशोदाञ्च गोपीर्गोपान् गवां गणान् ।
मिलित्वाश्वास्य ज्ञानञ्च दत्वानुज्ञाय माधवः ॥ ३
रथमारुह्य दिव्याभं चञ्चलाश्वनियोजितम् ।
मथुरां गन्तुकामोऽसौ निर्गतो नन्दगोकुलात् । ४
दूरं तमनुगाः सर्वे मोहिता व्रजवासिनः ।
न सेहिरे कष्टतरं विरहं माधवस्य हि ॥ ५
युगपद्दर्शनं विष्णोर्दुःसहं भूमिमण्डले ।
येषां नित्यं हि भवति तेषान्तु किमु वर्णनम् ॥ ६
वीक्षन्तः श्रीधरमुखं नेत्रैरनिर्मिषैर्नृप ।
सर्वे वै स्नेहसम्बन्धात्तमूचुः प्रेमविह्वलाः ॥ ७

गोपा ऊचुः

शीघ्रमागच्छ हे कृष्ण सर्वान् नो व्रजवासिनः ।
पाह्यस्मान् दर्शनं देहि देवेभ्यो ह्यमृतं यथा ॥ ८
त्वमेव सर्वदा देव यशोदानन्ददायकः ।
श्रीनन्दनन्दनस्त्वं वै जीवनं व्रजवासिनाम् ॥ ९
व्रजे धनं कुले दीपो मोहनो महतामपि ।
यथा निदाघदग्धस्य प्राप्त वै शीतलं जलम् ॥ १०
शीतार्तस्य यथा वह्निर्ज्वरार्तस्य यथौषधम् ।
मृतस्य मानवस्यापि पीयूषं मङ्गलं यथा ॥ ११

तथा व्रजस्य सर्वस्य जीवनं तव दर्शनम् ।
तस्मादत्र स्थितिं कुर्या बहुना कथितेन किम् ॥ १२
यन्नोऽस्ति किञ्चित् सुकृतमस्मिन् वा पूर्वजन्मनि ।
तत्फलेन सदा चेतो भूयात् त्वत्पादपङ्कजे ॥ १३
येषां चेतस्त्वत्पदाब्जे ते भक्तास्त्वत्प्रियाः सदा ।
भक्तार्थे सगुणोऽसि त्वं निगुणः प्रकृतेः परः ।
तव भक्तात् प्रियो नास्ति शिवो ब्रह्मा न चेन्दिरा ॥ १४
विसृज्य पारमेष्ठ्यादीन् निष्कामास्त्वां भजन्ति ये ।
नैरपेक्ष्यं सुखं शान्तं ते विदुर्युक्तचेतसः ॥ १५

नारद उवाच

एवमुक्त्वाथ ते सर्वे रुरुदुः प्रेमविह्वलाः ।
आनन्दाश्रूणि मुञ्चन्तः श्रीकृष्णस्य प्रपश्यतः ॥ १६
अश्रुपूर्णमुखः कृष्णो भगवान् भक्तवत्सलः ।
गोपानाह प्रसन्नात्मा नतान् विरहविह्वलान् ॥ १७

भगवानुवाच

मत्प्राणा मत्प्रिया यूयं सर्वे वै व्रजवासिनः ।
हृदयं मेऽस्ति युष्मासु देहोऽन्यत्र विलक्ष्यते ॥ १८
मासं प्रत्यागमिष्यामि युष्मान् द्रष्टुं वचो मम ।
मनसा नहि दूरेऽस्मि मनः सर्वस्य कारणम् ॥ १९
हे गोपा यदुभिर्योद्धुमागन्ता हि जरासुतः ।
यदूनान्तु सहायार्थं यामि माभूच्छुचश्च वः ॥ २०

नारद उवाच

एवमाश्वास्य तान् देवः संनिवृत्त्य पुनः पुनः ।
रथे द्वितीये संस्थाप्य नन्दराजं यशोदया ॥ २१
श्रीदामादीन् सखीन् नीत्वा भगवान् रथमास्थितः ।
सोद्धवो मथुरां प्रागात् सर्वकारणकारणः ॥ २२

यावद्रथश्चाश्वशतं सुवेगं
केतुस्त्रिवर्णः प्रचलत्पताकः ।
आलक्ष्यते वीररजश्च तावत्
स्थित्वान्य आजग्मुरत. सकाशम् ॥ २३

श्रीकृष्णचन्द्रस्य परं चरित्रं
नृणां महापापहरं विचित्रम् ।
शृणोति यो भक्तवर. पृथिव्यां
गोलोकलोकं स च याति सम्यक् ॥ २४

इति श्रीगर्गसंहितायां मथुराखण्डे नारदबहुलाश्व-
संवादे व्रजयात्रायां श्रीकृष्णागमनं नाम
त्रयोविंशोऽध्याय. ॥ २३

बहुलाश्व उवाच

गोपीनाञ्चैव गोपानां दत्त्वा स्वं दर्शनं परम् ।
मथुरायां किं चकार श्रीकृष्णो राम एव च ॥ १
चरित्रं परमं मिष्टं श्रीकृष्णबलदेवयोः ।
श्रुतं तव मुखाद् ब्रह्मन् पुनर्वक्तुं त्वमर्हसि ॥ २

नारद उवाच

अन्यच्चरित्रं शृणु तच्छ्रीकृष्णबलदेवयोः ।
सर्वपापहरं पुण्यं चतुर्वर्गफलप्रदम् ॥ ३
कोलेन पीडिता लोका कौशारवि-पुरान्नृप ।
मथुरामाययुः सर्वे सद्विजा दीनमानसाः ॥ ४
अश्वमाशुगमारुह्य रोहिणीनन्दनो बलः ।
स्वल्पैः पुरः सरैः सार्द्धं मृगयार्थी विनिर्गतः ॥ ५
तं तदाभ्यर्च्य विधिवत्तदङ्घ्र्योः पतिताः पथि ।
कृताञ्जलिपुटा ऊचुर्हर्षगद्गदया गिरा ॥ ६

प्रजा ऊचुः

राम राम महाबाहो देवदेव महाबल ।
कोलेन पीडिताः सर्वे आगताः शरणं वयम् ॥ ७
दैत्यः कंससखः कोलो जित्वा कौशारविं नृपम् ।
कौशाम्बेश्च पुरे राज्यं करोति स महाबलः ॥ ८
कौशारविस्तद्भयाद्धि गङ्गातीरं गतो नृपः ।
राज्यार्थं त्वत्पदाम्भोजं भजते सुजितेन्द्रियः ॥ ९
तत्सहायं कुरु विभो वयं यस्य प्रजाः शुभाः ।
पुत्रवत् पालितास्तेन महासौख्यसमन्विताः ॥ १०

कोलेनाद्यैव दुष्टेन पीडिताः सततं प्रभो ।
त्रैलोक्यविजयी वीरः कंसोऽपि निहतस्त्वया ॥ ११
कोले जीवति देवेन्द्र कंसोऽपि न मृतः स्मृतः ।
रक्षार्थं सगुणोऽसि त्वं भक्तानां प्रकृतेः परः ॥ १२

नारद उवाच

इति श्रुत्वा वचस्तेषां श्रीरामो भक्तवत्सलः ।
गङ्गायमुनायोर्मध्ये कौशाम्बीं नगरीं ययौ ॥ १३
योद्धुं समागतं रामं श्रुत्वा कोलोऽपि निर्गतः ।
अक्षौहिणीभिर्दशभिर्मण्डितश्चण्डविक्रमः ॥ १४
चञ्चलाश्वतरङ्गाढ्यां रथैर्भाश्वतिमिंगिलाम् ।
नदीमिवागतां सेनां प्रलयार्णवनादिनीम् ॥ १५
वीरावर्ताञ्च तां वीक्ष्य बध्वा सेतुं हलं बलः ।
आकृष्य तां तदग्रेण मुसलेनाहनद्दृढम् ॥१६
युगपत्तत्प्रहारेण वीरा अश्वा रथा गजाः ।
सर्वतः कोटिशः पेतुः पेशिताः फलवद्रणे ॥ १७
शेषाः प्रदुद्रुवुर्वीरा भयार्ता रणमण्डलात् ।
एकाकी युयुधे दैत्यः कोलो रामेण शस्त्रभृत् ॥ १८
गोमूत्रचयसिन्दूरकस्तूरीपत्रभृन्मुखम् ।
सुवर्णशृङ्खलायुक्तं प्रखचित्कटिबन्धनम् ॥ १९
स्रवन्मदं चतुर्दन्तं घण्टाटङ्कारभीषणम् ।
प्रोन्नतं दिग्गजमिव नदत्कालघनप्रभम् ॥ २०
शितमङ्कुशमादाय कोल आरुह्य कर्णतः ।
स्वगजं नोदयामास बलदेवाय दैत्यराट् ॥ २१
आगतं वीक्ष्य तं नागं मत्तं कोलेन नोदितम् ।
तताड मुसलेनासौ वज्रेणेन्द्रो यथा गिरिम् ॥ २२

मुसलस्य प्रहारेण विशीर्णोऽभून्महागजः ।
मृद्घटोऽनेकधैवाशु दण्डघातेन मैथिल ॥ २३
कोलः क्रोडमुखो दैत्यो रक्ताक्षः पतितो गजात् ।
शूलं चिक्षेप निशितं माधवाय महात्मने ॥ २४
मुसलेन तदा रामस्तच्छूलं शतधाच्छिनत् ।
काचपात्रं यथा बालो दण्डेन च विदेहराट् ॥ २५
सहस्रभारसंयुक्तां गदां गुर्वीं प्रगृह्य च ।
बलं तताड हृदये जगर्ज घनवत् खलः ॥ २६
तद्गदायाः प्रहारेण न चचाल यदूद्वहः ।
पश्यतां सर्वलोकानां स्रजाहत इव द्विपः ॥ २७
तमाकृष्य हलाग्रेण कोलं कज्जलवत्तनुम् ।
मुसलेनाहनन् मूर्ध्नि बलदेवो महाबलः ॥ २८
मुसलाहतमूर्द्धापि पतितो रणमण्डले ।
मुष्टिना तं घातयित्वा तत्रैवान्तरधीयत ॥ २९
चकार मायां मायावी दैतेयीमतिभीषणाम् ।
प्रलयप्रभवैर्मेघैर्महावातप्रणोदितैः ।
अन्धकारं प्रकुर्वद्भिरभूदाच्छादितं नभः ॥ ३०
जपापुष्पसमान् बिन्दूनजस्रं रुधिरस्य च ।
मोचयित्वाथ बीभत्सवर्षाश्चक्रुर्घना घनाः ॥ ३१
पूयमेदोऽतिविण्मूत्रसुरामांससमन्विताः ।
दृष्ट्वा ताभिश्च वर्षाभिर्हाहाकारो बभूव ह ॥ ३२
ज्ञात्वाथ तत्कृतां मायां बलदेवो महाप्रभुः ।
चिक्षेप मुसलं दीर्घं परसैन्यविदारणम् ॥ ३३
सर्वास्त्रघातकं स्वच्छमष्टधातुमयं दृढम् ।
शतयोजनविस्तीर्णं प्रलयाग्निसमप्रभम् ॥ ३४

बलास्त्रं मुसलं रेजे भ्रमद्दशदिगन्तरे।
विदारयद् घनान् व्योम्नि नीहारञ्च यथा रविः॥ ३५
तद्व्योम्नि प्रगतं दृष्ट्वा हलास्त्रञ्च स्वतः प्रभुः।
समुत्पत्याकृष्यबलान्मध्ये तां विददार ह॥ ३६
नाशं गतायां मायायां बलदेवो महाबलः।
गृहीत्वा भुजदण्डाभ्यां भुजदण्डे मदोत्कटम्॥ ३७
भ्रामयन् वाल इव तं प्रतूलं स इतस्ततः।
पातयामास भूपृष्ठे कमण्डलुमिवार्भकः॥ ३८
तस्य दैत्यस्य पातेन साब्धिशैलवनैः सह।
चकम्पे नाडिकामात्रं सर्वं भूखण्डमण्डलम्॥ ३९
भग्नदन्तश्चलन्नेत्रो मूर्च्छितो निधन ययौ।
कोलो नाम महादैत्यो वृत्रो वज्रहतो यथा॥ ४०
तदा जयजयारावो दिवि भूमौ बभूव ह।
देवदुन्दुभयो नेदुः पुष्पवर्षाः सुरैः कृताः॥ ४१
इत्थं कोलं घातयित्वा बलदेवोऽच्युताग्रजः।
दत्त्वाथ कौशारवये कौशाम्बीञ्च पुरीं ततः॥ ४२
स्नातुं भागीरथीं प्रागाद् गर्गाचार्यादिभिर्वृतः।
लोकानां सङ्ग्रहं कुर्वन् सर्वदोषक्षयाय च॥ ४३
स्नापयाञ्चक्रुरार्यास्ते गङ्गायां माधवं बलम्।
वेदमन्त्रैर्मङ्गलैश्च गर्गाचार्यादयो द्विजाः॥ ४४
लक्षं गजानां वैदेह स्यन्दनानां द्विलक्षकम्।
हयानाञ्च तथा कोटिं धेनूनामर्बुदं दश॥ ४५
शतार्बुदञ्च रत्नानां भारं जाम्बूनदावृतम्।
रामो दत्वा ब्राह्मणेभ्यो प्रययौ मथुरां पुरीम्॥ ४६
यत्र रामेण गङ्गायां कृतं स्नानं विदेहराट्।
तत्र तीर्थं महापुण्यं रामतीर्थं विदुर्बुधाः॥ ४७

कार्त्तिक्यां कार्त्तिके स्नात्वा रामतीर्थे तु जाह्नवीम् ।
हरिद्वाराच्छतगुणं पुण्य वै लभते जनः ॥ ४८

बहुलाश्व उवाच

कौशाम्बेश्च कियद्दूरं स्थले कस्मिन् महामुने ।
रामतीर्थं महापुण्यं मह्यं वक्तुं त्वमर्हसि ॥ ४९

नारद उवाच

कौशाम्बेश्च तदीशान्यां चतुर्योजनमेव च ।
वायव्यां सूकरक्षेत्राच्चतुर्योजनमास्थितम् ॥ ५०
कर्णक्षेत्राच्च षट्क्रोशैर्नलक्षेत्राच्च पञ्चभिः ।
आग्नेय्यां दिशि राजेन्द्र रामतीर्थं वदन्ति हि ॥ ५१
वृद्धदेवीसिद्धपीठाद्बिल्वकेशवनात् पुनः ।
पूर्वस्याञ्च त्रिभिः क्रोशै रामतीर्थं विदुर्बुधाः ॥ ५२
दृढाश्वो वङ्गजो राजा कुरूपं लोमशं मुनिम् ।
दृष्ट्वा जहास सतत तं शशाप महामुनिः ॥ ५३
विकरालः क्रोडमुखोऽसुरो भव महाखल ।
इत्थं स मुनिशापेन कालः क्रोडमुखोऽभवत् ॥ ५४
बलदेवप्रहारेण त्यक्त्वा स्वामासुरीं तनुम् ।
कोलो नाम महादैत्यः परं मोक्षं जगाम ह ॥ ५५
ततो रामो मन्त्रिभिश्च उद्धवादिभिरान्वतः ।
जह्नुतीर्थं जगामाशु यत्र दक्ष सुतेरभूत् ॥ ५६
गङ्गा ब्राह्मणमुख्यस्य जाह्नवी येन कथ्यते ।
दत्त्वा दानं द्विजातिभ्य ऊषू रात्रौ जनैः सह ॥ ५७
ततस्तत्पश्चिमे भागे पाण्डवानामतिप्रियम् ।
आहारस्थानकं प्राप्य रात्रौ वासं चकार ह ॥ ५८

तत्र दानं द्विजातिभ्यो दत्त्वा सद्गुणभोजनम् ।
ततो योजनमेकञ्च देवमाण्डूकसंज्ञकम् ॥ ५६
तपस्तप्तं महत्तेनानन्तदेवकृपाप्तये ।
तदर्थं स्वसमाजेन बलदेवो जगाम ह ॥ ६०
ऊर्ध्वास्यमेकपादस्थं ध्यानस्तिमितलोचनम् ।
स्वभक्तं हृदयस्थं स्वं मूर्तिदर्शनलोलुपम् ॥ ६१
तां जहार तदानन्तस्ततो बाह्ये ददर्श ह ।
स दृष्ट्वानन्तदेवस्य रूपं परमसुन्दरम् ॥ ६२
स्रग्व्येककुण्डलं गौरं तालाङ्करथसंयुतम् ।
स्तुत्वा परमया भक्त्या पपात चरणौ पुनः ॥ ६३
तस्य शीर्ष्णि करं दत्वा वरं ब्रूहीत्युवाच ह ।
यदि प्रसन्नो भगवाननुग्राह्योऽस्मि वा यदि ॥ ६४

माण्डूक उवाच

सर्वोत्तमां भागवतीं संहितां शुकवक्त्रतः ।
निर्गतां देहि मे स्वामिन् कलिदोषहरां पराम् ॥ ६५

बलदेव उवाच

उद्धवद्वारतः प्राप्तिर्भविष्यति तवानघ ।
श्रीमद्भागवती कीर्तिरधिकार्या कलौ युगे ॥ ६६

माण्डूक उवाच

कथं भगवता दत्ता मुख्या तस्याधिकारिता ।
कदा योगं मम स्वामिन् कुरु सन्देहभञ्जनम् ॥ ६७

बलदेव उवाच

कथयामि परं गोप्यं रहस्यं परमाद्भुतम् ।
अद्यापि मम सामीप्ये उद्धवोऽयं विराजते ॥ ६८

तद्दर्शन कुरु परमाचार्यसम्प्रदायकम् ।
अद्य तीर्थस्य यात्रायामुपदेशो न ते भवेत् ॥ ६९
यथोपदेष्टा भवति तेन ते कथयाम्यहम् ।
उद्धवः स्थापितः श्रीमदाचार्यैः संहितामयः ॥ ७०
नन्दादिव्रजवासीनां गोपीनां प्रीतये कृतः ।
स्वस्वरूपं परिकर यत्किञ्चिद्भगवत्तमम् ॥ ७१
सर्वस्वभावगुणकं कृष्णेन परमात्मना ।
उद्धवश्चैत्र स्वात्मानमेक एवाचरद्विभुः ॥ ७२
साक्षात्कारं चकारादौ न स्वीयमन्तरं क्वचित् ।
श्रीकृष्णमेव ते ज्ञात्वा पूजयामासुरादरात् ॥ ७३
वसन्तर्तुश्च ग्रीष्मोऽपि स चचार व्रजात्मकौ ।
शमयामास राधायाः शोकं तत्कुण्डपार्श्वजः ॥ ७४
सर्वं भूमण्डलं तत्र विचचार व्रजानुगै. ।
वियोगार्तिहरः प्रोक्तो गवां नन्दादिगोपिनाम् ॥ ७५
मन्त्राधिकारकुशलः सर्वः परिकराग्रणीः ।
अथान्तर्धानवेलायां भगवान् धर्मगुप् तनुः ॥ ७६
तस्मै स्व तेजसम्रपि दास्यते परमाद्भुतम् ।
मुद्राधिकारं सर्वत्र सर्वदैव विराजते ॥ ७७
अन्तर्धाने तु स्वस्थाने दत्ता तस्याधिकारिता ।
बदरीस्थं सपरिकरं धर्मजं बोधयिष्यति ॥ ७८
अर्जुनादिवियोगार्तिहारी सैव भविष्यति ।
वज्रनाभो यादवानां माथुरे सम्भविष्यति ॥ ७९
श्रीकृष्णस्य प्रपौत्रे च महाराज्ञीगणेषु च ।
वियोगार्तिहरश्चैव स्थाप्यते श्रीहरिः स्वयम् ॥ ८०
कौरवाणां कुले राजा परीक्षिदिति विश्रुतः ।
तस्य पुत्रोऽतितेजस्वी विख्यातो जनमेजयः ॥ ८१

पितुः शत्रुहरं यज्ञं करिष्यति न संशयः ।
तस्यापि सर्वसामग्री उद्धवद्वारतो भवेत् ॥ ८२
श्रीमद्भागवतं दिव्यं पुराणं वाचनं तदा ।
गौरान्वयस्य सम्प्राप्तिर्भविष्यति न संशयः ॥ ८३
श्रीमत्प्रसादो विप्रर्षेर्महाभागवतोत्तमात् ।
तद्द्वारा सर्पयज्ञस्य निवृत्तिः सम्भविष्यति ॥ ८४
यज्ञसंस्तारकर्तॄणां ब्राह्मणानाञ्च पूजनम् ।
स दास्यति महाराजा ग्रामाणां शतकं तदा ॥ ८५
ततस्त्वाचार्यवर्यस्य श्रीप्रसादस्य चाज्ञया ।
स गन्ता शूकरक्षेत्रं मासमेकं स्थितो भवेत् ॥ ८६
दत्त्वा दानान्यनेकानि गोमहीगजवाजिनः ।
रत्नं वासो ब्राह्मणेभ्यो भोजनञ्च यदृच्छया ॥ ८७
ततस्तस्मात् स्थलात् सोऽपि निवर्त्य गुरुणा सह ।
गङ्गातीरस्थलान् पश्यन् आगमिष्यति सद्व्रतः ॥ ८८
शयाननगरे संस्थां करिष्यति सहानुगः ।
श्रीगुरोराज्ञया तत्र सामग्रीसाधनैः सहः ॥ ८९
अश्वमेधं करोति स्म सर्वजेता भविष्यति ।
एकच्छत्रधरो भूत्वा श्रीगुरोः शरणं गतः ॥ ९०
ततो गङ्गातटे रम्ये पूर्वस्यां क्रोशपञ्चके ।
परमैकान्तरूपेण सेवनं तत्करिष्यति ॥ ९१
तत्र भागवती वार्ता भवरोगविनाशिनी ।
भविष्यति मुदा युक्ता समाजेषु सुधर्मिणाम् ।
तत्र भागवती वार्त्ता सेवनं स करिष्यति ॥ ९२
तत्र पूर्णसमाजेषु तेषां मध्ये भवानपि ।
शृणोषि भगवद्धर्मं गन्ता श्रीनिर्मलं पदम् ॥ ९३

तपस्तप्तं मदर्थं ते तस्मादेतत् प्रकाशितम् ।
एवमेवं वरं दत्वा गतो रामः सहानुगः ॥ ६४
शयाननंगराच्छुद्धादीशान्यां दिशि संस्थितम् ।
स्थानं गङ्गातटे रम्यं कण्टकादुत्तरे भवेत् ॥ ६५
पुष्पवत्या दक्षिणे तु क्रोशैकं विस्तरेण च ।
तत्र सङ्कर्षणो देवः स्थित्वा दानपरोऽभवत् ॥ ६६
घोटकान् दशसाहस्रं रथानां शतकं तथा ।
द्विपान् सहस्रं गाश्चैव दिक्सहस्रं ददौ मुदा ॥ ६७
तत्र सङ्कर्षणं देवं पूजयामासुरादरात् ।
देवाः समाययुः सर्वे ऋषयश्च तपोधनाः ॥ ६८
नमः कोलेशघाताय खरासुरविघातिने ।
हलायुध नमस्तेऽस्तु मुशलास्त्राय ते नमः ।
नमः सौन्दर्यरूपाय तालाङ्काय नमोनमः ॥ ६६
इति श्रुत्वा स्तुतिं तेषां सङ्कर्षण उवाच ह ।
वरं ब्रुवन्तु वः सर्वे भवतां यदभीप्सितम् ॥ १००

द्विजदेवा ऊचुः

यदा यदा वयं युक्ताः स्मरामो भवतः पदम् ।
सर्वबाधाविनिर्मुक्ता भवामः श्रीतवाज्ञया ॥ १०१

राम उवाच

यदा यदा मां स्मरथ तदाहं शरणागतान् ।
रक्षिताहं कलौ नूनमिति सत्यं वचो मम ॥१०२
अत्र स्थले वरं प्राप्तं पूजितं मुनिपुङ्गवैः ।
अतः सङ्कर्षणस्थानं भविष्यति कलौ युगे ॥ १०३
अस्यां स्नास्यन्ति गङ्गायां देवान् सम्पूजयन्ति ये ।
दास्यन्ति दानं विप्रेभ्यो भोजनं कारयन्ति ये ॥ १०४

विष्णुं सम्पूजयन्ति स्म सफलं जीवितं क्षितौ ।
ते यान्ति दैवतस्थानं कामी प्राप्नोति कामनाम् ॥ १०५
ततः परिवृतो रामः स्वां पुरीं सञ्जगाम ह ।
कोलरक्षो वध कृत्वा स्नात्वा विष्णुपदी जले ॥ १०६
रामस्य बलदेवस्य कथां यः शृणुयान्नरः ।
सर्वपापविनिर्मुक्तः स याति परमां गतिम् ॥ १०७

इति श्रीगर्गसंहितायां मथुराखण्डे नारदबहुलाश्व-
संवादे कोलदैत्यवधो नाम
चतुर्विंशोऽध्यायः ॥ २४

बहुलाश्व उवाच

कस्मादागते रामे यत्र तीर्थमिदं श्रुतम् ।
हो मधुपुरी धन्या यत्र सन्निहितश्च सः ॥ १
ुरायास्तु को देवः कः क्षत्ता कश्च रक्षति ।
श्चारः को मन्त्रिवरः कैर्भूमिस्तत्र सेविता ॥ २

नारद उवाच

रेपूर्णतमः साक्षाच्छ्रीकृष्णो भगवान् हरिः ।
ायं हि मथुरानाथः केशवः क्लेशनाशनः ॥ ३
ाक्षाद्भगवता प्राप्तः कपिलाय द्विजाय च ।
पिलः प्रददौ यं वै प्रसन्नः शतमन्यवे ॥ ४
त्वा देवान् राक्षसेन्द्रो रावणो लोकरावणः ।
स्तुत्वा पुष्पके स्थाप्य लङ्कायां तमपूजयत् ॥ ५
त्वा लङ्कां राघवेन्द्रस्तमानीय प्रयत्नतः ।
योध्यायाञ्च वाराहमर्चयामास मैथिल ॥ ६
ुत्वा रामञ्च शत्रुघ्नो यमानीय प्रयत्नतः ।
ुरायां महापुर्यां स्थापयित्वा ननाम ह ॥ ७
वितो माथुरैः सर्वैः सर्वेषाञ्च वरप्रदः ।
ाक्षात् कपिलवाराहः सोऽयं मन्त्रिवरः स्मृतः ॥ ८
त्ता श्रीमथुरायाश्च नाम्ना भूतेश्वरः शिवः ।
त्वा दण्डं पातकिने हरेर्धाम नयेत् पलम् ॥ ९
ण्डिका तु महाविद्या दुर्गा दुर्गतिनाशिनी ।
ाहारूढा सदा रक्षां मथुरायाः करोति हि ॥ १०
ारोऽहं मथुरायाश्च पश्यँल्लोकानितस्ततः ।
दामि वार्तां सर्वेषां श्रीकृष्णाय महात्मने ॥ ११

मध्ये वै मथुरादेवी शुभदा करुणामयी ।
बुभुक्षितेभ्यः सर्वेभ्यो ददात्यन्नं विदेहराट् ॥ १२
चतुर्भुजाः श्यामलाङ्गा व्रजन्ति प्राव्रजन्ति च ।
मथुरायां मृतं नेतुं विमानैः कृष्णपार्षदाः ॥ १३
श्रीकृष्णस्याङ्गसम्भूता मथुरा वै महापुरी ॥
यस्या दर्शनमात्रेण नरो याति कृतार्थताम् ॥ १४

पुरा विधिः श्रीमथुरामुपेत्य
तप्त्वा तपो वर्षशतं निरन्नः ।
जपन् हरिं ब्रह्म परं स्वयम्भूः
स्वायम्भुवं प्राप सुतं प्रवीणम् ॥ १५
भूतेश्वरो देववरः सतीपति
स्तप्त्वा तपो दिव्यशरन्मधोर्वने ।
कृष्णप्रसादान्नृपराज सत्वरं
तस्याः पुरे माथुरमण्डलस्य ॥ १६
कृष्णप्रसादादहमेव चारो
भ्रमन् सदा माथुरमण्डलस्य ।
तथाहि दुर्गा मथुरां प्रयाति
कृष्णप्रसादान्निवसन्ति लोकाः ॥ १७
तप्त्वा तपः शक्रपदञ्च शक्रः
सूर्यो मनुं नित्यनिधिं कुबेरः ।
पाशी च पाशं समवाप्य सम्यङ्
मधोर्वने विष्णुपदं ध्रुवश्च ॥ १८
तथाम्बरीषः समवाप मुक्तिं
सोमो क्षयं वा लवणाज्जयञ्च ।
रघुश्च सिद्धिं किल चित्रकेतु
स्तप्त्वा तपोऽत्रैव मधोर्वने च ॥ १९

तप्त्वा तपोऽत्रैव मधोर्वने शुभे
भूत्वा बलिष्ठश्च मधुर्महासुरः ।
श्रीमाधवे मासि च माधवेन
युयोध युद्धे मधुसूदनेन सः ॥ २०
सप्तर्षयः श्रीमथुरां समेत्य
तप्त्वा तपोऽत्रैव च योगसिद्धिम् ।
प्रापुः परे वा मुनयः समन्ताद्
गोकर्णवैश्योऽपि महानिधिञ्च ॥ २१
तप्त्वा तपोऽत्रैव मधोर्वने शुभे
विजित्य देवान् दिवि लोकरावणः ।
निधाय रक्षांसि विधाय मन्दिरं
प्रास्थाय लङ्कां विरराज रावणः ॥ २२
तप्त्वा तपोऽत्रैव मधोर्वने शुभे
गजाह्वयेशो मिथिलेश शन्तनुः ।
लेभे सुतं भीष्ममतीवसत्तमं
तप्त्वार्थवारांनिधिकर्णधारकम् ॥ २३

बहुलाश्व उवाच

मथुरायाश्च माहात्म्यं वद देवर्षिसत्तम ।
निवासे किं फलं प्रोक्तं मथुरायाः सतां नृणाम् ॥ २४

नारद उवाच

आदौ वराहो धरणीं निमग्नां
महावने प्रोज्झितवीचिशङ्के ।
स्वदंष्ट्रयोद्धृत्य करीव पद्मं
करेण माहात्म्यमिदं जगाद ॥ २५

ब्रुवन् जनो नाम फलं हरेर्लभे
च्छृण्वँल्लभेत् कृष्णकथाफलं नरः ।
स्पृशन् सतां स्पर्शनजं मधोः पुरि
जिघ्रंस्तुलस्यादलगन्धिजं फलम् ।। २६
पश्यन् हरेर्दर्शनजं फल स्वतो
भक्षंश्च नैवेद्यभव रमापतेः ।
कुर्वन् भुजाभ्यां हरिसेवया फलं
गच्छँल्लभेत्तीर्थफल पदे पदे ।। २७
राजेन्द्रहन्ता निजगोत्रघातक
स्त्रैलोक्यहन्तापि च कोटिजन्मसु ।
राजन् शृणु त्वं मथुरानिवासतो
योगीश्वराणां गतिमाप्नुयान्नरः ।। २८
पादौ च धिग् यौ न गतौ मधोर्वनं
दृशौ च धिग् ये न कदापि पश्यतः ।
कर्णौ च धिग् यौ शृणुतो न मैथिल
वाचं च धिग् या न करोत्यलं मनाक् ।। २६
त्रिसप्तकोटीनि वनानि यत्र
तीर्थानि वैदेह समास्थितानि ।
एकैकमेतेषु विमुक्तिदानि
वदामि साक्षान्मथुरां नमामि ।। ३०
गोलोकनाथः परिपूर्णदेवः
साक्षादसङ्ख्याण्डपतिः स्वयं हि ।
श्रीकृष्णचन्द्रोऽवततार यस्यां
तस्यै नमोऽन्यासु पुरीषु किंवा ।। ३१
यन्नाम पापं विनिहन्ति तत्क्षणं
भवन्त्यलं यां गृणतोऽपि मुक्तयः ।

वीथीषु वीथीषु च मुक्तिरस्या
स्तस्मादिमां श्रेष्ठतमां विदुर्बुधाः ॥ ३२
काश्यादिपुर्यो यदि सन्ति लोके
तासान्तु मध्ये मथुरैव धन्या ।
या जन्ममौञ्जीव्रतमृत्युदाहै
र्नृणां चतुर्धा विदधाति मुक्तिम् ॥ ३३
पुरीश्वरीं कृष्णपुरीं व्रजेश्वरीं
तीर्थेश्वरीं यज्ञतपोनिधीश्वरीम् ।
मोक्षप्रदां धर्मधुरं धरां परां
मधोर्वने श्रीमथुरां नमाम्यहम् ॥ ३४
शृण्वन्ति माहात्म्यमिदं मधोः पुरः
कृष्णैकचित्ता नियताश्च यत्र ये ।
व्रजन्ति ते तत्र परिक्रमाफलं
वैदेह राजेन्द्र नचात्र संशयः ॥ ३५
खण्डं त्विदं श्रीमथुरापुरस्य ये
शृण्वन्ति गायन्ति पठन्ति सर्वतः ।
इहैव तेषां हि समृद्धिसिद्धयो
भवन्ति वैदेह निसर्गतः सदा ॥ ३६
त्रिःसप्तकृत्वो बहु वैभवार्थिनः
शृण्वन्ति चैनं नियताश्च ये भृशम् ।
तेषां गृहद्वारमलङ्करोति हि
भृङ्गावली कुञ्जरकर्णताडिता ॥ ३७
विप्रोऽथ विद्वान् विजयी नृपात्मजो
वैश्यो निधीशो वृषलोऽपि निर्मलः ।
श्रुत्वेदमाराच्च मनोरथो भवेत्
स्त्रीणां जनानामतिदुर्लभोऽपि हि ॥ ३८

निष्कारणो भक्तियुतो महीतले
शृणोति चेदं हरिलग्नमानसः ।
विजित्य विघ्नान् प्रविजित्य नाकपान्
गोलोकधामप्रवरं प्रयाति सः ॥ ३६

इति श्रीगर्गसंहितायां मथुराखण्डे नारदबहुलाश्व-
संवादे मथुरामाहात्म्यं नाम
पंचविंशोऽध्यायः ॥ २५

इति पञ्चमो मथुराखण्डः सम्पूर्णः ।

गर्गसंहितायां मथुराखण्डे पाठान्तरादि प्रदर्शनम्

१।४ ०प्रोवाचमेवं० इति क० ख० ग० पु० ।

१।७ ०त्वद्बलोत्कटाः । इति मु० पु० ।

१।१२ ०नारदेन तु ॥ इति मु० पु० ।

१।१३ ०हून्यतां मल्ल० इति क० ख० ग० पु० ।

१।१४ ०महाहितौ ॥ इति ख० पु० ।
०समाहितौ ॥ इति ग० पु० ।

१।१५ श्लोकादौ असङ्गतं किञ्चित् लिखितं वर्त्तते ग० पु० ।

१।२२ ०बद्धं राज्य० इति मु० पु० ।

१।२३ ०महान् मित्रं० इति क० ख० ग० पु० ।

१।२४ ०शङ्कर एव च । इति मु० पु० ।

१।२६ एते सर्वां० इति मु० पु० ।

१।२७ ०करिष्यन्ति न० इति मु० पु० ।

१।२६ त्वया यदुपते रम्ये० इति ग० पु० ।

१।३० ०त्मनो नित्यहरेः प्रभावा० इति मु० पु० ।

०स्तिष्ठति कर्म० इति मु० पु० ।

२।१ ०महोत्कटः । इति मु० पु० ।
राजन् वृन्दावनं० इति मु० पु० ।
गत्वा वृन्दावनं० इति ग० पु० ।

२।३ ते वीक्ष्य० इति ग० पु० ।

२।४ ०पीताम्बर० इति मु० पु० ।

२।१० महीं विदारयन्० इति मु० पु० ।
०पादैरूपपात० इति ग० पु० ।

२।१५ नास्ति ग० मु० पु०

२।२१ ०दंष्ट्रोऽह० इति मु० पु०

२।२३ यच्छाया० इति क० ख० पु० ।

३।१ ०नृपस्य हि । इति क० पु० ।

३।६ इत्थं संचिन्तयन् इत्यनन्तरं ७म श्लोकोऽत्रैव लिखितोऽस्ति ग० पु० ।

३।८ ०तेषु प्लुतं चाश्रु० इति ख० पु० ।

३।१० ०स्तथाक्रूर:० इति ग० पु० ।

३।१२ तडिद्द्युद्वर्षा० इति मु० पु० ।
०द्गतोऽधस्तयो० इति मु० पु० ।

३।१३ तदाननं वाष्प० इति० मु० पु० ।

३।१६ नास्ति ग० पु० ।

३।२३ सर्वे तु गोरसं० इति मु० पु० ।

३।३२ ०ह्येवं न जानाति० इति क० ख० पु० ।

३।३३ नास्ति ग० पु० ।

४।१ एवं गदन्तीनां राजन्० इति क० ख० ग० पु० ।

४।२ यावतीर्योषितो० इति क० ख० ग० पु० ।
यावन्त्यो योषितो० इति मु० पु० ।

४।३ ०दृष्ट्वा राधा० इत्यनन्तरं ४र्थ श्लोकस्थं चातुरा नेत्रे उन्मील्य इत्यादिकं वर्त्तते ग० पु० ।

४।७ ०मा शोचं० इति क० ख० ग० पु० ।

४।१० ०मूर्च्छिता सुकम्प० इति मु० पु० ।

४।११ ०श्शृणुष्वतः । इति क० ख० ग० पु० ।
०प्राणपते च० इति क० ख० मु० पु० ।

४।१२ यदात्थ मे० इति मु० पु० ।
०वारं वदयामि वाक्पथम् । इति क० ख० मु० पु० ।

४।१३ श्लोकद्वितीयार्द्धं नास्ति ख० पु० ।

४।१५ मा शोचं कुरु० इति क० ख० ग० पु० ।
०वियोगान्ते दर्शनं० इति मु० पु० ।

४।१६ श्लोकद्वितीयार्द्धे-नागमिष्यसि नन्दसूनो दुःखाद्देहं त्यजाम्यहम् ॥ इति ग० पु० ।

४।१८ ०ते वियोगं० इति मु० पु० ।
०मया सत् ॥ इति क० ख० ग० पु० ।

४।१६ ०हेतुपटुं नटं० इति मु० पु० ।

४।३० नास्ति ग० पु० । कं सरथं घनाः ॥ इति तु २६ श्लोकान्ते लिखितमिति । २६ श्लोकोऽपि भ्रष्ट एव ।

४।३३ विहाय लज्जां लोकस्य इत्यनन्तरं सबलो भगवान् हरिः इत्यादि ३४ श्लोकः लिखितो वर्त्तते ग० पु० ।

४।३५ ०मा कुर्यास्तो व्रजौकसः ॥ इति क० ख० ग० पु० ।

४।३६ ०सरथं समा० इति क० ख० ग० पु० ।

५।१ ०माभ्यामसुरोपवनं० इति क० पु० ।

५।५ महालोक इत्यारभ्य अनन्तरश्लोकस्थः मार्त्तण्डज्योतिषां इत्यन्त. पाठः पतितः ग० पु० ।

५।६ ०मण्डल प्रभुम् । इति मु० पु० ।

५।८ ०तिहर्षितः ॥ इति मु० पु० ।

५।१० ०नन्दराजपुत्राय० इति ग० पु० ।

५।१५ रामकृष्णावित्यारभ्य अनन्तरश्लोकस्य वीक्ष्य नन्दं इत्यन्तः पाठः पतितः ख० पु० ।

गमिष्यामि इत्यनन्तरं परश्लोकस्थं प्रियं तवेति वर्त्तते ग० पु० ।

५।२० श्लोकोऽयं नास्ति ग० पु० ।

५।२१ ०निवेद्य तच्च कंसाय० इति ग० पु० ।

५।२३ ०भवता किल । इति पतितः ग० पु० ।

०महा० इत्यधिकः ग० पु० ।

५।२५ ०खचित्तटै. । इति ग० पु० ।

५।२८ ०पुरी गताः । इति ग० मु० पु० ।

५।२६ ०कुड्यात्तु का० इत्यनन्तरं पतित पाठः ग० पु० ।

५।३० एकं हलत्कुन्त० इति नास्ति ग० पु० ।

एकं चलत्कुन्त० इति मु० पु० ।

५।३१ ०बलिनं स्फुर० इति मु० पु० ।

०वलितस्फुर० इनि क० पु० ।

पद्मे करे० इति ख० पु० ।

०स्वां हृदि० इति ख० ग० मु० पु० ।

५।३२ ०विलोलयावीन० इति ख० पु० ।

५।३४ ०स्ताभिः किं० इति मु० पु० ।

५।३८ ०स्तान कौपीन० इति क० ख० ग० पु० ।

५।३६ ०वस्त्रहरानहम् ॥ इति मु० पु० ।

०वस्त्रहराम्यहम् ॥ इति ग० पु० ।

५।४१ ०कालं यथा घनाः ॥ इति क० ख० पुं० ।

५।४२ ०बालास्ते इत्यनन्तरं परश्लोकस्थं वासांसि रुचिराणि च इति वर्त्तते ग० पु० ।

५।४३ तद्धारणाविदो बाला० इति पतित. ग० पु० ।

०वासांसि रुचिराणि च। इति पूर्वश्लोकान्ते लिखितं ग० पु० ।

५।४४ ०तौ बालकः० इति मु० पु० ।

६।१ ०दाममालिनः॥ इति मु०पु०।

६।५ ०कारं मधुपध्वनिम्। इति मु० पु० ।

६।७ ०न्मत्स्वरूपमिहै० इति मु० पु० ।

६।११ मद्धस्तोत्थश्च० इति मु० पु० ।

६।१२ ०चाग्रतः । इति मु० पु० ।

६।१३ ०कर्त्तुमर्हसि। इति क० ख० ग० पु० ।

६।२१ एवं मुक्त्वो० इति ग० मु० पु० ।

६।२२ ०गन्धाढ्यैः० इति मु० पु० ।

०स्वासने स्थाप्य० इति मु० पु० ।

६।२३ ०स्मरतात् सदा ॥ इति मु० पु० ।

६।२५ कुमार पश्यै० इति मु० पु० ।

६।२६ नास्ति ख० पु० ।

६।२७ ०सप्ततालकैः । इति क० ख० ग० पु० ।

०व्रजान्तरम् ॥ इति क० ग० पु० ।

०व्रजाद् गृहम् ॥ इति ख० पु० ।

६।२८ ०मण्डले ॥ इति मु० पु० ।

६।३२ श्लोकमध्यपादद्वयं नास्ति ख० पु० ।

६।३३ श्लोकपूर्वार्द्ध नास्ति ख० पु० ।
०स्ताराराजंद्भू० इति मु० पु० ।
०स्तारा राजद्भू० इति ग० पु० ।
६।४० ०स्त्ररूपमद्भुतं० इति क० ख० ग० पु० ।
६।४१ ०माहर त्वरं० इति क० ख० ग० पु० ।
०मथुरां पुरं० इति मु० पु० ।
०समाविश ॥ इति क० ग० पु० ।
०समा दिशः ॥ इति ख० पु० ।
६।४२ ०निरीक्ष्यतीयमि० इति क० ख० ग० प० ।
६।४३ प्रपतन् परगवत् । इति क० ग० पु० ।
६।४४ ०ज्ञाभवल्लब्ध० इति मु० पु० ।
६।४५ नारद उवाच इति नास्ति मु० पु० ।

७।१ ०मुपागमत् ॥ इति मु० पु० ।
७।५ ०देशाग्रे० इति मु० पु० ।
७।८ ०र्युक्तैश्चाम० इति मु० पु० ।
७।६ ०द्रिश्टङ्ग० इति मु० पु० ।
७।१३ ०तस्मादेकस्मिन्० इति मु० पु० ।
०मञ्चमाश्रिताः ॥ इति क० ख० ग० पु० ।
७।१५ रङ्गमण्डलम् ॥ इति मु० पु० ।
७।२४ ०मथुराञ्च० इति क० ख० ग० पु० ।
श्लोकापरार्द्धं नास्ति ग० पु० ।
७।२५ श्लोकपूर्वार्द्धं नास्ति ग० पु० ।
श्लोकतृतीयपादोऽपि नास्ति ग० पु० ।
७।२७ ०रुरुभुस्तं० इति मु० पु० ।
७।३० ०दण्डं सङ्गृहीत्वा० इति क० ख० ग० पु० ।
७।३१ सतां प्रपश्यता० इति मु० पु० ।
स तेषां पश्यतां० इति क० ग० पु० ।
७।३२ ०महामात्यान्० इति क० ख० ग० पु० ।

अन्येष्वपि श्लोकेषु महा-
मात्यान् इत्येव दृश्यते क०
ख० ग० पु० ।

७।३६ ०कंसो ह्यबुधाविरा० इति क०
ख० ग० पु० ।

७।३७ ०देवं तदा० इति मु० पु० ।

७।३८ ०भयमाप चेतसि। इति मु०
पु० ।

०मानसाश्च० इति मु० पु० ।

७।४० ०यत्रैव साक्षा० इति क० ख०
ग० पु० ।

७।४६ ०नोदनञ्च भुजाभ्या० इति
मु० पु० ।

७।४८ ०भूखण्डे वाग० इति क०
ग० पु० ।

७।५० नास्ति क० ख० ग० पु० ।

७।५१ ०मुष्टीरोऽङ्गुलि० इति मु०
पु० ।

७।५२ श्रमवारियुते० इति मु० पु० ।

७।५३ नास्ति ग० पु० ।

७।५४ ०यन्नेत्रयोर्दर्शनं० इति क०
ख० ग० पु० ।

७।५५ ०पुण्यलवेन० इति कं० ग०
पु० ।

८।२ ०मिवोद्धतम् ॥ इति मु०
पु० ।

८।३ ०ह्यधोमुखः। इति क०
ग० पु० ।

८।४ ०भूतले ॥ इति मु० पु० ।

८।७ ०प्रचारेण चाणूरो० इति
मु० पु० ।

८।८ धृत्वाङ्घ्रौ० इति मु० पु० ।

८।९ ०निधनं प्राप० इति मु० पु० ।

८।१२ ०संविदार्य च। इति मु०
पु० ।

८।१३ श्लोकोत्तरार्द्धं नास्ति ग०
पु० ।

८।१४ नास्ति ग० पु० । अत्र केवलं
तेषां ज्योवनेच्छया । १४
इति लिखितमस्ति ।

८।१८ ०घोषं प्राह० इति मु० पु० ।

८।१९ हरन्त सर्वं० इति क० ख०
ग० पु० ।

८।२१ ०आरुह क्रोध० इति क० ग०
पु० ।

०आरुह्य क्रोध० इति मु०
पु० ।

८।२२ ०खड्गचर्मणी ॥ इति मु०
पु० ।

८।२३ अग्रहीत् सहसा० इति मु०
पु० ।

८।२७ ०बलद्दक् देवो० इति क० ख० ग० पु० ।

८।३६ ०हस्तेभ्य प्राभयात्। इति क० ग० पु० ।
०हस्तेभ्य हा भयात्। इति ख० पु० ।

८।४६ आनिर्दशा० इति मु० पु० ।
०श्चापरेऽपि० इति मु० पु० ।

८।५० ०प्राश्वास्य नृप० इति क० ग० पु० ।
०चित: श्रीखण्ड० इति क० ख० ग० पु० ।

६।२ ०शैथिल्यता० इति क० ख० ग० पु० ।
०गरुडं प्राप्तं० इति मु० पु० ।

६।६ ०निवारयामास० इति मु० पु० ।

६।८ ०मनसोत्थिता० इति क० ख० ग० पु० ।

६।१४ श्लोकापरार्द्धं नास्ति ग० पु० ।

६।१५ नास्ति ग० पु० ।

६।१६ नास्ति ग० पु० ।

६।१८ द्धत: पञ्चजने० इति मु० पु० ।

६।१६ ०भयदायक: ।। इति ख० पु० ।

६।२० ०भीमवादिनि ।। इति क० ख० ग० पु० ।

६।२२ श्लोकोत्तरार्द्धं नास्ति क० ग० पु० ।

६।२३ श्लोकपूर्वार्द्धं नास्ति क० ग० पु० ।

६।२५ ०तं तताड ह ।। इति मु० पु० ।

६।२६ ०तं श्रुत्वा० इति मु० पु० ।

६।३० ये ये श्रुत्वा० इति क० ख० ग० पु० ।
०ध्वनिं ते तु० इति क० ख० ग० पु० ।

६।३४ सत्यं कुरु० इति क० ख० ग० पु० ।
०यदुक्त मानयं० इति क० ख० ग० पु० ।

६।३६ ०सयतौ तौ नत्वा० इति मु० पु० ।

६।३७ ०कारणाकारक. । इति मु० पु० ।

९।३९ कृताञ्जलिः पुरः ०इति मु० पु० ।

उवाहानन्दजनितां परां वाष्प कलां० इति क० ख० ग० पु० ।

९।४३ सन्तोत स्त्वात्मनः श्लाघ्यं कुर्वन्ति ०इति क० ख० ग० पु० ।

९।४७ ०कौरवदुःखभोगिनाम्। इति मु० पु० ।

०भवतः पदाम्बुजे० इति मु० पु० ।

९।५४ श्लोकपूर्वोत्तरार्द्धे व्यत्ययेन वर्त्तेते क० ख० ग० पु० ।

१०।१ ०श्रोतुमनाश्चाद्य तृषितो० इति मु० पु० ।

१०।२ ०दैत्यवर्याणां० इति मु० पु० ।

१०।५ ०दुष्टामुशती० इति मु० पु० ।

०भजेत् पुनः ॥ इति क० ख० ग० पु० ।

१०।६ ०पवादित ॥ इति क० ग० पु० ।

१०।१२ ०रचयन् किल। इति मु० पु० ।

०परिचयन्० इति ख० मु० पु० ।

१०।१५ ०तस्मादशेष० इति ख० मु० पु० ।

१०।१६ ०बभूव सः। इति क० ग० पु० ।

१०।१९ ०मत्सङ्कु० इति क० ग० पु० ।

१०।२१ एकदातिप्रसन्नो० इति मु० पु० ।

१०।२५ ०सम्बभूवह॥ इति मु० पु० ।

११।५ ०विमता भृशम्॥ इति क० ग० पु० ।

११।६ ०शूर्पनखी० इति क० ख० ग० पु० ।

११।९ ०माथुगान्ते० इति क० ख० ग० पु० ।

११।१३ ०समो बले॥ इति ग० पु० ।

११।१४ ०मत्तोऽभवज्ज० इति ख० पु० ।

११।१६ ०विचरस्यङ्गयात्रायां० इति मु० पु० ।

१२।३ ०जय तेन सहैव० इति मु० पु०

०अयं तेन सहैव० इति ख०

१२।५ शमो दमस्तपः शौचमिति गीतास्थं श्लोकत्रयमुक्त्वा ब्रह्मकर्मपरित्यक्ता भवन्तो ब्रह्मणा सुताः ॥५ मल्लयुद्धं क्षात्रधर्मं कथ कुरुत दुर्जना ॥ ८ इति वर्त्तते क० ग० पु०।

१२।७ श्लोकान्ते उक्तं गीतास्थं श्लोकत्रयमुक्त्वा ब्रह्मकर्म इत्यादि वर्त्तते ख० पु०।

१२।१३ ०ज्ञानपरो० इति मु० पु०।
०शिवभक्त्या० इति मु० पु०।

१२।१४ गडो दण्डः० इति मु० पु०।
०खण्डोखऽण्डः० इति मु० पु०।

१२।१७ ०पूजातिरस्कृतात्। इति क० ख० ग० पु०।

१२।२० तस्य शङ्खौ० इति क० ग० मु० पु०।

१३।३ ०भक्तमुद्धवम्। इति मु० पु०।

१३।४ शैलकृष्णा० इति मु० पु०।
०गोपीगलै० इति० मु० पु०।

१३।५ ०यशोदाकरेणैव भोः। इति क० ख० ग० प०।

१३।६ ०सखिभ्यः शिशुभ्यः शुभं० इति मु० पु०।
०पृथक् च। इति मु० पु०।
गोपिकानां सुतेभ्य० इति मु० पु०।

१३।८ ०जगन्मोहिनी। इति मु० पु०।
०धिमासा मदुक्तैः० इति मु० पु०।

१३।९ गोपालाः सुदामा० इति मु० पु०।
०सुखं मित्रव० इति मु० पु०।
०ताः कथं० इति ख० पु०।
०बलात्ताः कथं० इति० क० ग० पु०।

१३।१२ ०गतोऽहं स तं रथं० इति मु० पु०।
०दूघशिटकं वै। इति मु० पु०।

१३।१६ ०यत्र यत्र० इति मु० पु०।

१३।१७ ०शीलरूपा० इति ख० पु०।
०शीलरूपा गणौ युताः। इति क० ग० पु०।

१३।१८ हेमतुल्या हेमशृङ्ग्यो० इति मु० पु० ।

१३।२० ०लङ्घद्गिरौ० इति० मु० पु० ।

०गोपगणेषु० इति० मु० पु० ।

१३।२५ ०मण्डलीविभ्रत्० इति मु० पु० ।

१३।३२ सर्वा धियः कृष्णामृते० इति मु० पु० ।

१३।३४ ०यया हि यः । इति क० ख० ग० मु० पु० ।

१४।६ ०मे परिशूरनन्दनः० इति क० ख० ग० पु० ।

१४।१५ ०बर्हणो सद्युत्कण्ठ० इति मु० पु० ।

१४।१८ ०हरिणीव विह्वले ॥ इति ख० पु० ।

१४।२० ०केलिर्वने वने ॥ इति मु० पु० ।

१४।२२ ०ययौ गत्वा दिगन्तरम् ॥ इति क० ग० पु० ।

१४।२६ ०चरितं परम् ॥ इति मु० पु० ।

१४।३० सत्प्राङ्गणा० इति क० ख० ग० पु० ।

०हारश्च वीथी० इति क० ख० ग० पु० ।

१४।३२ उद्धव उवाच इति नास्ति क० ग० पु० ।

१४।३४ ०शाश्वती युवयो० इति मु० पु० ।

१४।५० ०पपात ह ॥ इति मु० पु० ।

१५।३ ०मेथ्यां नेत्रं० इति मु० पु० ।

१५।४ ०चलद्धारभुज० इति मु० पु० ।

०कङ्कणाकङ्कणाः । इति ख० मु० पु० ।

१५।५ ०चित्रवर्णौ० इति मु० पु० ।

१५।६ ०यत्र यत्र० इति ख० मु० पु० ।

०रममाणा० इति० मु० पु० ।

१५।१६ ०स्फुरास्फुर० इति ख० मु० पु० ।

कृता चलचारु० इति क० ग० पु० ।

१५।२० श्लोकोत्तरार्द्धः पतितः ग० पु० ।

१५।२३ उद्धव उवाच इति नास्ति ग० पु० ।
श्लोकपूर्वार्द्धः पतितः ग० पु० ।
१५।२५ ०ज्ञानमिति स्मृतिः० इति क० ख० ग० पु० ।
१५।२६ ०वासुकौ ॥ इति क० ग० मु० पु० ।
१५।३२ श्लोकोत्तरार्द्धं नास्ति ग० पु० ।
१५।३३ नास्ति ग० पु० ।
०देवलक्षणा। इति मु० पु० ।
१५।३४ नास्ति ग० पु० ।
०त्वन्तु कृति० इति क० मु० पु० ।
१५।३५ ०परिविप्रतिष्ठिता ॥ इति मु० पु० ।
१५।३६ श्लोकोत्तरार्द्धे ०हिरण्मयी परा ॥ इत्येतन्मात्रं वर्त्तते ग० पु० ।
०सहा त्वं हि० इति मु० पु० ।
१५।३६ अद्यैव० इति मु० पु० ।
याम्यां० इति मु० पु० ।

१६।१ ०शिरो नेत्रं तथाच हृत् । इति क० ख० ग० पु० ।
१६।६ ०सस्नात्वा० इति मु० पु० ।
१६।६ श्लोकान्तिमः पादः नास्ति ख० पु० ।
१६।१० श्लोकस्याद्य पादः नास्ति ख० पु० ।
१६।११ नास्ति ग० पु० ।
०हृत्सुशीतलं० इति मु० पु० ।
१६।१२ ०मोहघनं० इति मु० पु० ।
१६।१७ नास्ति क० ख० ग० पु० ।
१६।२४ नास्ति ख० पु० ।
१६ २७ यावज्जयोमध्य० इति मु० पु० ।
०मध्यगतस्य० इति मु० पु० ।
०स्वकर्मरूपं० इति मु० पु० ।
श्लोकोत्तरार्द्धं नास्ति मु० पु० ।
०स्तथा तेषुमपश्य० इति ख० पु० ।
१६।२८ ०दूरेऽस्मि तत्त्वतो० इति क० ख० ग० पु० ।

१७।३ द्वारपालिका ऊचुरित्यादि श्लोकान्तं यावत् नास्ति ग० पु० ।
१७।४ शृङ्गारप्रकरेत्यादि श्लोकान्त यावत् नास्ति ग० पु० ।
१७।६ ०विद्वाङ्गो विद्वान् वा० इति मु० पु० ।
१७।८ शैलौकीभिस्तु० इति ख० पु० ।
१७।६ कुञ्जविधायिकेत्यादि श्लोकान्तं यावत् नास्ति ग० पु० ।
१७।१३ ०पुराद्यद्य समान० इति अस्पष्टं किञ्चित् लिखितं क० ख० ग० पु० ।
१७।१४ ०नचैत्रोद्भव० इति मु० पु० ।
०हरिं स्थिता० इति मु० पु० ।
०ललनावियोगे० इति मु० पु० ।
०योगिवर्गेण० इति मु० पु० ।
१७।२५ ०रासमण्डन० इति मु० पु० ।
१७।३१ ०क्रोधाद् गुण० इति मु० पु० ।
०क्रुद्धा गुण० इति ख० पु० ।
१७।३२ श्लोकोऽयं नास्ति ग० पु० ।
श्लोकादनन्तरं च कौशला ऊचूरित्यपि नास्ति ग० पु० ।
१७।३५ एवं वरं० इति मु० पु० ।
०कृपा कृता ।। इति क० ख० ग० पु० ।
श्लोकोऽयं नास्ति ग० पु० ।
१७।३६ नागेन्द्रकन्येत्यादि श्लोकान्तं यावत् नास्ति मु० पु० ।
अयञ्च १८।२ श्लोकात्परं वर्त्तते मु० पु० ।

१८।१ ०संजनीशरोभूत्वा० इति क० ख० ग० पु० ।
०मंजनीश्वरो भूत्वा० इति मु० पु० ।
१८।२ श्लोकात्परं१७।३६संख्यकः श्लोकः वर्त्तते मु० पु० ।
१८।४ नास्ति क० ख० ग० पु० ।
१८।५ सर्वेश्वरो बलिमित्यादि अदित्या ऊचुरित्यन्तं नास्ति क० ख० ग० पु० ।
१८।६ नास्ति ख० मु० पु० ।
१८।१० वृन्दावने छलं० इति क० ग० पु० ।

१८।१३ ०बिभ्रमतामग्रां० इति मु० पु० ।
०माधवं माधवं० इति क० ख० ग० पु ।
१८।१६ ०वचोभिर्नयनैर्गुणैः इति मु० पु० ।
०वचोनिर्णयनैपुनैः । इति ख० पु० ।
१८।२२ सर्वा० इति नास्ति क० ग० पु० ।
१८।२५ गतभीत्यभिमा० इति मु० पु० ।

१६।४ नास्ति ग० पु० ।
१६।५ कोटिशः कोटिशो गा० इति नास्ति ग० पु० ।
१६।१३ पुरो निधाय० इति मु० पु० ।
१६।१६ ०राजमिश्रितैः० इति मु० पु० ।
१६।२३ ०सुगन्धिं नव० इति मु० पु० ।
१६।२८ ०परस्पर वा बाहुंश्च हस्त० इति क० ख० ग० पु० ।
०स्मितोऽभूत ॥ इति क० ख० ग० पु० ।

२०।६ युवाकन्दर्प इति ख० पु० ।
२०।१० प्रसन्ना तस्य० इति ख० पु० ।
२०।१३ ०पुरीनागतः० इति क० ख० ग० पु० ।
२०।१५ ०समानाश्रयागोप्यो० इति मु० पु० ।
२०।१७ ०घृणानुराग. । इति मु० पु० ।
२०।१६ ०तथा वा सर्वदा० इति क० ख० ग० पु० ।
२०।२२ ०रहितोमल० इति मु० पु० ।
२०।२४ यावद्वने मध्य० इति मु० पु० ।
२०।३३ ०स्निग्धकण्डलः । इति मु० पु० ।
२०।३८ ०काञ्चनीलतिका० इति मु० पु० ।
२०।४० अमरध्वनि० इति क० ग० पु० ।
०स्तव्रतम् ॥ इति मु० पु० ।
२०।४४ पप्रच्छ वीक्ष्य० इति मु० पु० ।
२०।४७ ०येवाद्य रञ्जयन्तं० इति मु० पु० ।
२०।५५ ०त चाजुहाव० इति मु० पु० ।

२२।३२ ०क्ष्मभोर्वा नात्र० इति मु० पु० ।
श्लोकोत्तरार्द्धमारभ्य अध्याय समाप्तिं यावत् नास्ति ग० पु० ।
२२।४० ०रासं राधिकेशो गोपी-नाञ्च० इति क० ख० ग० पु० ।

२३।१ अध्यायादितः ११ श श्लोक-प्रथमपादं यावन्नास्ति ग०पु० ।
२३।८ पाहि सन्दर्शनं देहि० इति मु० पु० ।
२३।१३ यन्नास्ति किञ्चित्० इति क० ख० पु० ।
२३।१५ ०पारमेष्ठ्यादि निष्कामा० इति मु० पु० ।
२३।२० ०मागतो हि जरा० इति मु० पु० ।
०च्छुचा च वः ॥ इति मु० पु० ।

२४।१ ०दत्वा संदर्शनं० इति मु० पु० ।
२४।५ ०माशु समारुह्य० इति ख० पु० ।
२४।८ कौशारवेः पुरे० इति मु० पु० ।
२४।२६ मुष्टिघातं० इति मु० पु० ।
२४।२६ सभूत्याकृष्य च बला० इति मु० पु० ।
०मध्ये तां० इति मु० पु० ।
२४।४६ ग० पु० ५० श्लोक एव द्विर्लिखितः ।
२४।५० ०र्योजन मेव ॥ इति मु० पु० ।
२४।५२ वृद्धकेशी सिद्ध० इति मु० पु० ।
२४।५३ ०वङ्गराजोऽभूत्० इति मु० पु० ।
२४।५६ ०देवं गण्डक० इति मु० पु० ।
२४।६० ०त्तेन चान्तदेव० इति मु० पु० ।
२४।६१ ऊर्ध्वस्थमेक० इति क० ख० ग० पु० ।
ऊर्ध्वास्य मोक० इति मु० पु० ।
०हृदयस्थं स्वं० इति मु० पु० ।
२४।६२ ०जहारस्तदा० इति क० ख० पु० ।

०मूर्त्तिं परमसुन्दराम् ॥ इति क० ख० ग० पु० ।

२४।६४ माण्डूक उवाच इति नास्ति मु० पु० ।

२४।६६ ०कीर्त्ते राधिकायाः कलौ० इति मु० पु० ।

२४।६६ ०परमाचार्य० इति क० ख० ग० पु० ।

२४।७० यथोपदेशो० इति क० ग० पु० ।

०तथा ते कथया० इति ख० पु० ।

०संहितामयम् ॥ इति ख० पु० ।

२४।७२ उद्धवे चैव० इति क० ख० ग० पु० ।

०एव चरद् विभुः ॥ इति क० ख० ग० पु० ।

२४।७४ ०सुचचार० इति क० ख० ग० पु० ।

०पार्श्वतः ॥ इति क० ख० ग० पु० ।

२४।७७ मदाधिकारं सर्वत्र० इति क० ख० ग० पु० ।

२४।७८ बदरीस्थं सपरिकरं० इति मु० पु० ।

२४।८० श्रीकृष्णस्यैव पौत्रेपु० इति मु० पु० ।

२४।८२ ०शत्रुहणं० इति मु० पु० ।

२४।८४ ०प्रसादाद् विप्रर्षे० इति मु० पु० ।

तद्द्वारा सर्वयज्ञस्य० इति क० ख० ग० पु० ।

२४।८५ यज्ञसंस्कार० इति क० ख० ग० पु० ।

०महाराजो ग्रामाणा० इति मु० पु० ।

२४।८७ ०गो महागज० इति क० ग० मु० पु० ।

२४।८८ तत्तस्मात् तत्स्थलात्० इति मु० पु० ।

२४।८९ ०सामग्री साधनैः० इति मु० पु० ।

२४।९१ ०कान्तिरूपेण० इति मु० पु० ।

०भवरोगविनाशिनी ॥ इति क० ख० ग० पु० ।

२४।९२ श्लोकपूर्वार्द्धं व्यत्ययेन वर्त्तते क० ख० ग० पु० ।

'तत्र भागवती' इत्यादि नास्ति मु० पु० ।

२४।९४ तपस्तप्त मयाप्येतत्तस्या० इति क० ख० ग० पु० ।
एव देवं वर० इति मु० पु० ।
२४।९६ ०दानरतोऽभवत् ॥ इति मु० पु० ।
२४।९७ द्विपसहस्र'० इति मु० पु० ।
२४।१०० ०ब्रुवन्तु मां सर्वे० इति मु० पु० ।
२४।१०१ ०यदापद्रा युक्ता० इति मु० पु० ।
०भवाम च तवा० इति मु० पु० ।
२४।१०२ रक्षिता स्या कलौ० इति मु० पु० ।
२४।१०३ अत्र स्थले वरं नीतं० इति ख० पु० ।
अत्र स्थलं वरं नीतं० इति क० ग० पु० ।
२४।१०४ यस्यां स्नास्यन्ति० इति क० ख० ग० पु० ।
२४।१०६ ०विष्णुपदे जले ॥ इति क० ख० ग० पु० ।

२५।९ ०भक्त्यर्थान्मन्त्रतां व्रजेत् ॥ इति मु० पु० ।
२५।१० ०देवी दुर्गति० इति मु० पु० ।
२५।१६ ०न्नृपराज चत्वरं० इति क० ख० ग० पु० ।
२५।१७ ०श्रीकृष्णादास्यं प्रकरोति नूनम् ॥ इति मु० पु० ।
२५।१९ ०रामो त्वय० इति मु० पु० ।
२५।२१ प्रापुः पुरो वै० इति मु० पु० ।
२५।२२ ०मन्दिरमास्थाय० इति मु० पु० ।
२५।२३ ०कर्णाधारगम् ॥ इति क० ख० ग० पु० ।
२५।२६ ०तुलस्यामलगन्धज० इति मु० पु० ।
२५।२८ ०घातकी त्रैलोक्य० इति मु० पु० ।
२५।३० एकैकमेतेषु विमुक्तिय: ॥ इति वर्त्तते ग० पु० ।
२५।३१ नास्ति ग० पु० ।
२५।३२ ०भवन्त्यलं यां शृणुतेऽपि मुक्तय: ॥ इति क० ख० पु० ।
श्लोकपूर्वार्द्धः नास्ति ग० पु० ।
२५।३३ ०मौञ्जीव्रतमत्युदारै० इति मु० पु० ।

श्रीगणेशाय नमः ।

गर्गसंहिता

(द्वारकाखण्डः)

कृष्णाय वासुदेवाय देवकीनन्दनाय च ।
नन्दगोपकुमाराय गोविन्दाय नमो नमः ॥ १

बहुलाश्व उवाच

श्रुतं तव मुखाद् ब्रह्मन् मथुराखण्डमद्भुतम् ।
वद मां द्वारकाखण्डं श्रीकृष्णचरितामृतम् ॥ २
विवाहाः कति पुत्राश्च कति पौत्रा रमापतेः ।
सर्वं वद महाबुद्धे द्वारकावासकारणम् ॥ ३

नारद उवाच

अस्तिप्राप्ती महिष्यौ द्वे मृते कंसे महाबले ।
जरासन्धगृहं दुःखाज्जग्मतुर्मैथिलेश्वर ॥ ४
तन्मुखात् कंसमरणं श्रुत्वा क्रुद्धो जरासुतः ।
अयादवीं महीं कर्तुमुद्यतोऽभून्महाबलः ॥ ५
अक्षौहिणीभिर्विंशत्या तिसृभिश्चापि संवृतः ।
रम्यां मधुपुरीं राजन् आययौ बलवान्नृपः ॥ ६
भयातुरां पुरीं वीक्ष्य तत्सेनां सिन्धुनादिनीम् ।
सभायां भगवान् साक्षाद् बलदेवमुवाच ह ॥ ७
सर्वं चास्य बलं राम हन्तव्यं वै न संशयः ।
मागधस्तु न हन्तव्यो भूयः कर्ता बलोद्यमम् ॥ ८

जरासन्धनिमित्तेन भारं वै भूभुजां भुवः ।
सर्वश्चात्र हनिष्यामि करिष्यामि प्रियं सताम् ॥ ६
एवं वदति कृष्णे वै वैकुण्ठाच्च रथौ शुभौ ।
अभूतामागतौ राजन् सर्वेषां पश्यतां ह ॥ १०
समारुह्य रथौ सद्यो रामकृष्णौ महाबलौ ।
यादवानां बलैः सूक्ष्मैस्त्वरं निर्जग्मतुः पुरात् ॥ ११
यादवानां मागधानां पश्यद्भिर्दिविजैर्दिवि ।
बभूव तुमुलं युद्धमद्भुतं रोमहर्षणम् ॥ १२
अक्षौहिणीभिर्दशभी रथारूढो महाबलः ।
श्रीकृष्णस्य पुरः पूर्वं युयुधे मागधेश्वरः ॥ १३
पञ्चभिश्चाक्षौहिणीभिर्धार्तराष्ट्रः सुयोधनः ।
युयोध यादवैः सार्द्धं जरासन्धसहायकृत् ॥ १४
पञ्चभिश्च तथा राजन् विन्ध्यदेशाधिपो बली ।
तिसृभिश्च महायुद्धे वङ्गनाथो महाबलः ॥ १५
एवमन्येऽपि राजानो जरासन्धवशानुगाः ।
प्राणैः सहायं कुर्वन्तो जरासन्धस्य मैथिल ॥ १६
बाणान्धकारे सञ्जाते शत्रुसेनासमाकुले ।
टङ्कारं शार्ङ्गधनुषः शार्ङ्गधन्वा चकार ह ॥ १७
ननाद तेन ब्रह्माण्डं सप्तलोकैर्बिलैः सह ।
विचेलुर्दिग्गजास्तारा एजद्भूखण्डमण्डलम् ॥ १८
तदैव बधिरीभूत शत्रूणां सैन्यमण्डलम् ।
उत्पतन्तो हया युद्धाद् गजास्तु विमुखास्ततः ॥ १६
दुद्राव तद्बलं सर्वं टङ्काराद्भयविह्वलम् ।
प्रतीपमेत्य गव्यूतिः पुनस्तत्राजगाम ह ॥ २०
एवं शार्ङ्गं समुच्चार्य तडित्पिङ्गस्फुरत्प्रभम् ।
बाणौघैश्छादयामास जरासन्धबलं हरिः ॥ २१

चूर्णीभूता रथा राजन् बाणौघैः शार्ङ्गधन्वनः ।
चूर्णचक्रा निपेतुः क्वौ हतसूताश्च नायकाः ॥ २२
छिधाभूता गजा बाणैश्चलिता गजिभिः सह ।
साश्ववाहास्तथाश्वाश्च बाणैः संछिन्नकन्धराः ॥ २३
तथा वीरा महायुद्धे भिन्नोरश्छिन्नमस्तकाः ।
विशीर्णकवचाः पेतुर्बाणौघैश्छिन्न गाणयः ॥ २४
अधोमुखा ऊर्ध्वमुखाश्छिन्नदेहा नृपात्मजाः ।
रेजू रणाङ्गणे राजन् भाण्डव्यूहा इवाहताः ॥ २५
क्षणमात्रेण तद्युद्धे शतक्रोशविलम्बिता ।
आपगाभून्महादुर्गा रुधिरस्रावसम्भवा ॥ २६
द्वीपग्राहा उष्ट्रखरकबन्धाश्वादिकच्छपा ।
शिशुमाररथा केशशैवाला भुजसर्पिणी ॥ २७
करमीना मौलिरत्नहारकुण्डलशर्करा ।
शस्त्रशुक्तिश्छत्रशङ्खा चामरध्वजसैकता ॥ २८
रथाङ्गावर्तसंयुक्ता सेनाद्वयतटावृता ।
शतयोजनविस्तीर्णा बभौ वैतरणी यथा ॥ २९
प्रमथा भैरवा भूता वेताला योगिनीगणाः ।
अट्टहासं प्रकुर्वन्तो नृत्यन्तो रणमण्डले ॥ ३०
पिबन्तो रुधिरं शश्वत् कपालेन नृपेश्वर ।
हरस्य मुण्डमालार्थं जगृहुस्ते शिरांसि च ॥ ३१
सिंहारूढा भद्रकाली डाकिनी शतसंवृता ।
पिबन्ती रुधिरं चोष्णं साट्टहासं चकार ह ॥ ३२
विद्याधर्यस्त्वम्बरस्था गन्धर्व्योऽप्सरसस्तथा ।
क्षात्रधर्मस्थितान् वीरान् वव्रिरे देवरूपिणः ॥ ३३
गृहीत्वा तान् कलिरभूत्तासां पत्यर्थमम्बरे ।
ममानुरूपा ते नैव इति तद्गतचेतसाम् ॥ ३४

केचिद्वीरा धर्मपरा रणरङ्गान्न चालिताः ।
ययुर्विष्णुपदं दिव्यं भित्त्वा मार्तण्डमण्डलम् ॥ ३५
शेषं बलं समाकृष्य बलदेवो हलेन वै ।
मुशलेनाहनत् क्रुद्धस्त्रैलोक्यबलधारकः ॥ ३६
एवं सैन्ये क्षयं याते जरासन्धस्य सर्वतः ।
सुयोधनो विन्ध्यनाथो वङ्गनाथस्तथैव च ।
सर्वे विदुद्रुवुर्युद्धाद्भयभीता इतस्ततः ॥ ३७
जरासन्धो महावीर्यो नागायुतसमो बले ।
रथेनागतवान् राजन् बलदेवस्य सम्मुखे ॥ ३८
समाकृष्य हलाग्रेण जरासन्धरथं शुभम् ।
चूर्णयामास सहसा मुशलेन यदूत्तमः ॥ ३९
जरासन्धोऽपि विरथो हताश्वो हतसारथिः ।
जग्राह हलिनं दोर्भ्यां संत्यक्त्वा शस्त्रसंहतिम् ॥ ४०
तयोर्युद्धमभूद्घोर बाहुभ्यां रणमण्डले ।
पश्यतां दिवि देवानां नराणां भुवि मैथिल ॥ ४१
उरसा शिरसा चैव बाहुभ्यां पादयोः पृथक् ।
युयुधाते मल्लयुद्धे सिंहाविव महावने ॥ ४२
तयोः प्रयुद्ध्यतोः सर्वं क्षणं भूखण्डमण्डलम् ।
स्थालीव सहसा राजंश्चकम्पे घटिकाद्वयम् ॥ ४३
गृहीत्वा भुजदण्डाभ्यां जरासन्धं यदूत्तमः ।
भूपृष्ठे पातयामास कमण्डलुमिवार्भकः ॥ ४४
रामस्तदुपरि स्थित्वा हन्तुं शत्रुं जरासुतम् ।
जग्राह मुशलं घोरं क्रोधपूरितविग्रहः ॥ ४५
परिपूर्णतमेनाथ श्रीकृष्णेन महात्मना ।
निवारितस्तदैवाशु तं मुमोच यदूत्तमः ॥ ४६

तपसे कृतसङ्कल्पो व्रीडितोऽपि जरासुतः
निवारितो मन्त्रिमुख्यैर्मागधान् मागधो ययौ ॥ ४७
इत्थं जित्वा जरासन्धं माधवो मधुसूदनः ।
आयोधनगतं वित्तं सर्वं नीत्वा सवाहनम् ॥ ४८
यादवानग्रतः कृत्वा बलदेवसमन्वितः ।
उपगीयमानविजयः सूतमागधबन्दिभि ॥ ४९
शङ्खदुन्दुभिनादेन ब्रह्मघोषेण भूयसा ।
विवेश मथुरां साक्षात् परिपूर्णतमः स्वयम् ॥ ५०
समर्चितो मङ्गललाजपुष्पैः
पश्यन् पुरीं मङ्गलकुम्भयुक्ताम् ।
पीताम्बरः श्यामतनुः शुभाङ्गः
स्फुरत्किरीटाङ्गदकुण्डलप्रभः ॥ ५१
शार्ङ्गादिशस्त्रास्त्रधरो हसन्मुख
स्तालाङ्कयुक्तो गरुडध्वजः स्वयम् ।
उद्यद्विलोलाश्वरथः सुरार्चितः
समेत्य राजानमसौ बलिं ददौ ॥ ५२

इति श्रीगर्गसंहितायां द्वारकाखण्डे नारदबहुलाश्व-
संवादे जरासन्धपराजयो नाम
प्रथमोऽध्यायः ॥ १

नारद उवाच

पुनस्तत्र जरासन्धस्तावेत्याक्षौहिणीबलः ।
युयुधे यदुभिः शीघ्रं पुनः कृष्णपराजितः ॥ १
श्रीकृष्णतेजसा सर्वे यादवा वृद्धिमागताः ।
धनुर्गजादिभिः शश्वत् प्राप्तलुण्ठनसाहसाः ॥ २
प्राप्ते च साहसे राजन् विना युद्धं पुरैव हि ।
अर्भका जलहारिण्यश्चक्रुः शस्त्रापहारणम् ॥ ३
शत्रुद्रव्यं समाहर्त्तुं वीक्षन्तः क्रीतवाससः ।
नागरा माथुराः सर्वे परं हर्षमुपागताः ॥ ४
एवं सप्तदश कृत्वा क्षीणसैन्यो जरासुतः ।
अष्टादशमसंग्रामे आगन्तुं च मनोऽकरोत् ॥ ५
मया प्रणोदितः कालयवनो वै महाबलः ।
रुरोध मथुरां क्रुद्धो म्लेच्छकोटिसमावृतः ॥ ६
म्लेच्छानाञ्च बलं वीक्ष्य स्वपुरं भयविह्वलम् ।
भयश्चोभयतः प्राप्तं रामेणाचिन्तयद्धरिः ॥ ७
स्वज्ञातिबन्धुरक्षार्थं समुद्रे भीमनादिनि ।
चकार द्वारकां दुर्गामेकरात्रेण माधवः ॥ ८
यत्राष्टदिक्पालसिद्धिर्विश्वकर्मविनिर्मिता ।
सर्वा वैकुण्ठसम्पत्तिर्दृश्यते मोक्षकाङ्क्षिभिः ॥ ९
हरिः सर्वजनं तत्र नीत्वा योगेन मैथिल ।
पुराद्राममनुज्ञाप्य निर्गतोऽभून्निरायुधः ॥ १०
निरायुधं हरिं ज्ञात्वा मयोक्तैर्लक्षणैः खलः ।
निरायुधः स तं योद्धुं पदातिः स्वयमागतः ॥ ११

पराङ्मुखं प्राद्रवन्तं दुरापं योगिनामपि ।
जिघृक्षुस्तं चान्वधावत् सैनिकानां प्रपश्यताम् ॥ १२
हस्तप्राप्तं वपुस्तस्मै दर्शयन्निव माधवः ।
दूरं गतः श्यामलाद्रेः प्राविशत् कन्दरं त्वरम् ॥ १३
मुचुकुन्दो यत्र चास्ते मान्धातृतनयो महान् ।
असुरेभ्यः पुरा रक्षां देवानां यश्चकार ह ॥ १४
अहर्निशं न सुष्वाप देवसेवापरो नृप ।
तमूचुर्देवताः सर्वाः प्रसन्ना राजसत्तमम् ॥ १५
वरं वरय भो राजन् यत्ते मनसि वर्त्तते ।
नत्वा तान् प्राह राजेन्द्रः करोमि शयनं परम् ॥ १६
शयनान्ते हरेः साक्षाद्दर्शनं मे भवत्वलम् ।
यो मध्ये बोधयेन्मां वै शयानं चाप्यचेतनम् ॥ १७
स मया दृग्मात्रस्तु भस्मीभवतु तत्क्षणात् ।
तथास्तु चोक्तः सुष्वाप राजा कृतयुगे पुरा ॥ १८
तत्र प्रविष्टो यवनो मत्वा पीताम्बरञ्च तम् ।
तताड पादयोः क्रुद्धः पादेनाशु महाखलः ॥१९
मुचुकुन्दः समुत्थाय शनैरुन्मील्य चाक्षिणी ।
आशाः प्रपश्यंस्तं पार्श्वे स्थितं कालं ददर्श ह ॥ २०
स तावत्तस्य रुष्टस्य दृष्टिपातेन मैथिल ।
देहजेनाग्निना दग्धो भस्मसादभवत् क्षणात् ॥ २१
भस्मीभूते च यवने परिपूर्णतमः स्वयम् ।
स्वरूपं दर्शयामास मुचुकुन्दाय धीमते ॥ २२
कोटिसूर्यप्रतीकाशे ज्योतिषां मण्डले प्रभुम् ।
स्थितं स्फुरत्किरीटार्ककुण्डलाङ्गदनूपुरम् ॥ २३
श्रीवत्साङ्कं चतुर्बाहुं पद्माक्षं वनमालिनम् ।
कोटिकन्दर्पलावण्यं कालमेघसमप्रभम् ॥ २४

दृष्ट्वा राजा धर्षितोऽपि समुत्थाय कृताञ्जलिः ।
परिपूर्णतमं ज्ञात्वा भक्त्या तं प्रणनाम ह ॥ २५

मुचुकुन्द उवाच

कृष्णाय वासुदेवाय देवकीनन्दनाय च ।
नन्दगोपकुमाराय गोविन्दाय नमो नमः ॥ २६
नमः पङ्कजनाभाय नमः पङ्कजमालिने ।
नमः पङ्कजनेत्राय नमस्ते पङ्कजाङ्घ्रये ॥ २७
नमः कृष्णाय शुद्धाय ब्रह्मणे परमात्मने ।
प्रणतक्लेशनाशाय गोविन्दाय नमो नमः ॥ २८

नमोऽस्त्वनन्ताय सहस्रमूर्तये
सहस्रपादाक्षिशिरोरुबाहवे ।
सहस्रनाम्ने पुरुषाय शाश्वते
सहस्रकोटीयुगधारिणे नमः ॥ २९
हरे मत्समः पातकी नास्ति भूमौ
तथा त्वत्समो नास्ति पापापहारी ।
इति त्वञ्च मत्वा जगन्नाथ देव
यथेच्छा भवेत्ते तथा मां कुरु त्वम् ॥ ३०

नारद उवाच

एवं स्तुतो हरिः साक्षात् परमानन्दविग्रहः ।
ज्ञात्वा तं निर्गुणं भक्तं प्राह गम्भीरया गिरा ॥ ३१

भगवानुवाच

धन्यस्त्वं राजशार्दूल धन्या ते विमला मतिः ।
नैरपेक्ष्येण दिव्येन भक्तिभावेन पूरिता ॥ ३२
अद्यैव गच्छ मद्धाम बदर्याख्यं मदाश्रयः ।
तत्रैव तु तपस्तप्त्वा भूत्वा ब्राह्मणपुङ्गवः ॥ ३३

प्रेमलक्षणया भक्त्या मद्धाम प्रकृतेः परम् ।
प्राप्स्यसि त्वं महाराज यतो नावर्तते गतः ॥ ३४

नारद उवाच

इति श्रुत्वा हरिं नत्वा परिक्रम्य नताननः ।
निश्चक्राम गुहादुर्गाच्छ्रीकृष्णप्रेमविह्वलः ॥ ३५
द्वापरे क्षुल्लका मर्त्या तालवृक्षशतोच्छ्रितम् ।
दृष्ट्वा तं दुद्रुवुर्मार्गे भयभीता इतस्ततः ॥ ३६
मा भैष्टेत्यभयं यच्छन् जगाम दिशमुत्तराम् ।
एवं दत्त्वा वरं तस्मै मुचुकुन्दाय धीमते ॥ ३७
भगवान् पुनरावज्य मथुरां म्लेच्छवेष्टिताम् ।
हत्वा म्लेच्छबलं सर्वं तद्धनान्यच्छिनद्बलात् ॥ ३८
अथ राजा जरासन्धो योद्धुमभ्युदितः पुनः ।
आहूय मागधान् विप्रान् मुहूर्तादेशकारिणः ॥ ३९
प्राहेदं वासुदेवाख्यं जित्वा यद्यागतोऽस्म्यहम् ।
सर्वान् सम्पूजयिष्यामि सदा युष्मत्पदाश्रये ॥ ४०
कारागारेषु तावद् वै स्थिता भवत भो द्विजाः ।
पराजितोऽहं वा युष्मान् हनिष्यामि न संशयः ॥ ४१
एवमुक्त्वा द्विजान् राजन् जरासन्धो महाबलः ।
आजगामाशु मथुरां त्रयोविंशत्यनीकपः ॥ ४२
ब्रह्मवाक्यमृतं कर्तुं स्वप्रतिज्ञां विहाय च ।
मनुष्यचेष्टामापन्नौ स्वपुराद् भीतभीतवत् ॥ ४३
रामकृष्णौ परौ देवौ पद्भ्यां दुद्रुवतुर्द्रुतम् ।
पलायमानौ तौ वीक्ष्य मागधः प्रहसन् भृशम् ॥ ४४
अन्वधावद्रथानीकैर्ब्रह्मवाक्यमनुस्मरन् ।
दक्षिणाशां गतावित्थं प्रवर्षणगिरौ हरी ॥ ४५

यस्मिन्निलीनौ ज्ञात्वा तावेधोभिस्तं ददाह ह ।
भस्मीभूते वने जाते दह्यमानतटे गिरौ ॥ ४६

दृष्टौ त्र्योजनोत्तुङ्गात् समुत्पत्य सुरेश्वरौ ।
अलक्ष्यमाणावारभिर्द्वारकायां निपेततुः
योगीश्वराणां दुर्दर्शौ कथं भूनैत्रगोचरौ ॥ ४७

सोऽपि दग्धौ च तौ मत्वा मागधेन्द्रो महाबलः ।
मागधान् प्रययौ वीरो वादयन् जयदुन्दुभीन् ॥ ४८

ब्राह्मणान् पूजयामास भक्त्या परमया नृप ।
यस्य विप्रः सहायोऽस्ति कुतस्तस्य पराजयः ॥ ४९

इति श्रीगर्गसंहितायां द्वारकाखण्डे नारदबहुलाश्व-
संवादे द्वारकावासकथनं नाम
द्वितीयोऽध्यायः ॥ २

नारद उवाच

इत्थं मया ते कथितं द्वारकावासकारणम् ।
विवाहादिकथाः सर्वा वदिष्यामि परेशयोः ॥ १
पूर्वं श्रीबलदेवस्य विवाहं शृणु मैथिल ।
सर्वपापहरं पुण्यमायुर्वर्धनमुत्तमम् ॥ २
आनर्तो नाम राजाभूत् सूर्यवंशे महामनाः ।
यन्नाम्नानर्तदेशः स्यात् समुद्रे भीमनादिनि ॥ ३
रैवतो नाम तत्पुत्रश्चक्रवर्ती गुणाकरः ।
राज्यं चकार स पुरीं विनिर्माय कुशस्थलीम् ॥ ४
तस्य पुत्रशतं चासीद्रेवती नाम कन्यका ।
सर्वोत्तमं चिरञ्जीवं सुन्दरं वरमिच्छती ॥ ५
एकदा रथमास्थाय हेमरत्नविभूषितम् ।
आरोप्य स्वां दुहितरं रैवतः पर्यटन् भुवम् ॥६
प्राप्तो योगबलेनापि ब्रह्मलोकं शुभावहम् ।
कन्यावरं परिप्रष्टुं ब्रह्माणं प्रणनाम ह ॥ ७
गायन्त्यां पूर्वचित्याञ्च स्थितो लब्धक्षणः क्षणम् ।
एकचित्तं विधिं ज्ञात्वा स्वाभिप्रायं न्यवेदयत् ॥ ८

रैवत उवाच

परः पुराणो जगदङ्कुरोऽभूः
पूर्णः परात्मा परमेश्वरोऽसि ।
स्थितः सदा धामनि पारमेष्ठ्ये
सृजस्यलं पासि च हंससीदम् ॥ ९
वेदा मुखं धर्म उरस्तवैव
पृष्ठं ह्यधर्मस्तु मनुर्मनीषा ।

अङ्गानि देवा असुराश्च पादाः
सर्वा स्तुतिर्देव तनुस्तव स्यात् ।। १०
करोषि हस्तामलकञ्च विश्वं
नेतुं प्रभुः सारथिवद् गुणेषु ।
एकस्त्वमेकञ्च विधाय जालं
असिष्यसे सर्वमिवोर्णनाभिः ।। ११
महेन्द्रधिष्ण्यं तव वश्यमस्ति
किं सार्वभौमं किमु योगसिद्धिः ।
यः पारमेष्ठ्यश्च सदा स्थितोऽसि
तस्मै नमोऽनन्तगुणाय भूम्ने ।। १२
भवान् स्वयम्भूर्जगतां पितामहो
विधे सुरज्येष्ठ इति प्रभावतः ।
अस्या वरं सर्वगुणं चिरायुषं
वदाशु मां दिव्यमशेषदर्शनः ।। १३

नारद उवाच

एतच्छ्रुत्वा ततो ब्रह्मा स्वयम्भूः सर्वदर्शनः ।
रैवतं प्राह राजानं प्रहसन्निव मैथिल ।। १४

ब्रह्मोवाच

अत्र क्षणेन हे राजन् भुवि कालो महाबली ।
त्वरं व्यतीतस्त्रिनवचतुर्युगविकल्पितः ।। १५
न सन्ति मर्त्यलोके त्वत्पुत्राः पौत्राः सबान्धवाः ।
तत्पुत्रपौत्रनप्तॄणां गोत्राणि च न शृण्महे ।। १६
तद्गच्छ सर्वमुख्याय नररत्नाय शाश्वते ।
कन्यारत्नमिदं राजन् बलदेवाय देहि भोः ।। १७

परिपूर्णतमौ साक्षाद्गोलोकाधिपती प्रभू ।
भुवो भारावतारायावतीर्णौ बलकेशवौ ॥ १८
असङ्ख्यब्रह्माण्डपती वसुदेवात्मजौ हरी ।
द्वारकायां विराजेते यदुभिर्भक्तवत्सलौ ॥ १९

नारद उवाच

अथ श्रुत्वा विधिं नत्वा रैवतो नृपसत्तमः ।
आययौ द्वारकां भूयः समृद्धायं समृद्धिभिः ॥ २०
पारिबर्हं रथं दत्त्वा विश्वकर्मविनिर्मितम् ।
सहस्रहयसंयुक्तं दिव्ययोजनविस्तृतम् ॥ २१
दिव्याम्बराणि रत्नानि ब्रह्मदत्तानि मैथिल ।
दत्त्वा ययौ तपस्तप्तुं बदर्याख्यं शुभावहम् ॥ २२
तदा महोत्सवश्चासीद् यदुपुर्यां गृहे गृहे ।
सङ्कर्षणोऽथ भगवान् रेवत्या विरराज ह ॥ २३
बलदेवविवाहस्य कथां यः शृणुयान्नरः ।
सर्वपापविनिर्मुक्तः परां सिद्धिमवाप्नुयात् ॥ २४

इति श्रीगर्गसंहितायां द्वारकाखण्डे नारदबहुलाश्व-
संवादे बलदेवविवाहोत्सवो नाम
तृतीयोऽध्यायः ॥ ३

नारद उवाच

अथ श्रीकृष्णदेवस्य विवाहं शृणु मैथिल ।
सर्वपापहरं पुण्यं चतुर्वर्गफलप्रदम् ॥ १

भीष्मको नाम राजाभूद् विदर्भेषु प्रतापवान् ।
कुण्डिनाधिपतिः श्रीमान् सर्वधर्मविदां वरः ॥ २
रुक्मिणी तत्सुता जाता श्रियो मात्रातिसुन्दरी ।
कोटिचन्द्रप्रतीकाशा गुणभूषणभूषिता ॥ ३

एकदान्तःपुरे सा वै मन्मुखाच्छ्रीहरेर्गुणान् ।
परिपूर्णतमं तं वै सा मेने सदृशं पतिम् ॥ ४
तद्रूपं सगुणं श्रुत्वा मन्मुखात् प्रीतिवर्द्धनात् ।
सदृशीं श्रीहरिस्तां वै समुद्वोढुं मनो दधे ॥ ५

कृष्णभावविदा राज्ञा सर्वधर्मविदा भृशम् ।
भीष्मकेणैव कृष्णाय दातुं तां निश्चयः कृतः ॥ ६
युवराजस्ततो रुक्मी त निवार्य्य प्रयत्नतः ।
कृष्णशत्रुं महावीरं शिशुपालममन्यत ॥ ७

ततः खिन्नमना भैष्मी श्रीकृष्णाय महात्मने ।
दूत स्वं प्रेषयामास ब्राह्मण मिथिलेश्वर ॥ ८
स द्वारकां गतो दिव्यां श्रीकृष्णेन प्रपूजितः ।
भुक्तवांस्तत्र चासीनो विश्रान्तो मन्दिरे हरेः ॥ ९

अपृच्छत् कुशलं सर्वं श्रीकृष्णाय महात्मने ।
ब्राह्मणस्तदनुज्ञातस्तस्मै पत्रमवर्णयत् ॥ १०
स्वस्ति श्रीकारपञ्चाढ्ये नित्यानन्दमहोदधौ ।
श्रीमद्दिव्यगुणैः पूर्णे कोटिशो नतयो मम ॥ ११

श्रमत्रास्ति च तत्रास्तु ततस्त्वत्पत्रमागतम् ।
नारदोक्तेन वचसा ज्ञातोऽसि प्रकृते परः ॥ १२
सर्वं जानासि सर्वज्ञस्तथा वक्ष्ये वचो रहः ।
वीरभागन्तु मां विद्धि त्वं गृहाण महामते ॥ १३
मा चैद्यः प्रतिगृह्णीयाद् यथा सिंहबलिं मृगः ।
कथं त्वामुद्वहे दुर्गे स्थितामिति च तच्छृणु ॥ १४
पूर्वेद्युः कुलदेव्यास्तु यात्रास्ति ग्रामतो बहिः ।
आगमिष्याम्यहं यत्र तत्र मां त्वं गृहाण भोः ॥ १५

नारद उवाच

रुक्मिण्यास्तमभिप्रायं श्रुत्वा ब्राह्मणभाषितम् ।
रथः संयुज्यतामाशु दारुकं प्राह मानदः ॥ १६
पश्चिमायां तदा रात्रौ वैकुण्ठप्रभवं परम् ।
किङ्किणीजालसंयुक्तं हेमरत्नखचितप्रभम् ॥ १७
सदश्वैः शैब्यसुग्रीवमेघपुष्पबलाहकैः ।
नियोजितैर्दारुकेण चञ्चलैश्चारुचामरैः ॥ १८
युक्तं महारथं दिव्यं सहस्रादित्यवर्चसम् ।
आरुह्य सारथेः पृष्ठे धृत्वा श्रीपादपङ्कजम् ॥ १९
स्वहस्तेन द्विजं तस्मिन् समारोप्य रमापतिः ।
विदर्भान् प्रययौ राजन् श्रीकृष्णो भगवान् हरिः ॥ २०
कृष्णञ्चैकं गतं हर्तुं कन्यान्तु नृपमण्डलात् ।
कलिप्रशङ्कितो रामः श्रुत्वा भ्रातृसहायकृत् ॥ २१
नीत्वा यदुबलं सर्वं समर्थबलवाहनम् ।
विपक्षीयान्नृपान् जेतुं बलः पश्चाद्ययौ त्वरम् ॥ २२
कुण्डिनोपवनं प्राप्तः सद्विजः सरथो हरिः ।
सन्तस्थौ तिन्तिणीवृक्षे आस्तीर्याश्वपरिच्छदम् ॥ २३

दूरात् संदृश्यते तस्मात् कुण्डिनन्तु पुरं परम् ।
दीर्घदुर्गसमायुक्त सप्तयोजनवर्तुलम् ॥ २४
दुर्लङ्घ्या दुर्गमा यत्र परिखा जलपूरिता ।
धनुःशतं विस्तृतास्ति चातुर्मास्यनदीव सा ॥ २५
पञ्चाशद्धस्तमानेन दुर्गभित्तिस्तथोर्ध्वगा ।
यत्र रम्याणि हर्म्याणि स्फुरद्धेमशिखानि च ॥ २६
हेमकुम्भध्वजस्फूर्जत्तोरणानि विरेजिरे ।
पारावता मयूराश्च यत्र तत्र पतन्ति च ॥ २७
शिशुपालाय स्वां कन्यां दास्यन् राजा तु भीष्मकः ।
चक्रे विवाहसम्भारचयं मासद्वयात् परम् ॥ २८
गीतमङ्गलसंयुक्ते नारीभिर्भवनोत्तमे ।
रराज रुक्मिणी राजन् सिद्धिभिर्भूर्यथा भुवि ॥ २९
अथर्वविद् द्विजा भैष्मीं सुस्नातां रक्तवाससम् ।
चक्रुर्मन्त्रैस्तथा रक्षां बध्वा शान्तिं विधाय च ॥ ३०
हैमानां भारलक्षञ्च मुक्तानां द्विगुणं तथा ।
सहस्रभारं वस्त्राणां धेनूनामर्बुदानि षट् ॥ ३१
गजायुतं रथानाञ्च दशलक्ष मनोहरम् ।
दशकोटिं हयानाञ्च गुडादितिलपर्वतान् ॥ ३२
सहस्रं स्वर्णपात्राणां भूषणानां तथायुतम् ।
विप्रेभ्यः प्रददौ राजा भीष्मकोऽतिमहामनाः ॥ ३३
तथा वै दमघोषस्य शिशुपालाय वै द्विजाः ।
चक्रुः शान्ति परां पूर्वं विस्मृत्य वरदार्चनम् ॥ ३४
ब्राह्मणैर्मङ्गलस्नात पीतकञ्चुकशोभितम् ।
मुकुटोपरि विभ्राजत् पुष्पमौलिधर शुभम् ॥ ३५
हारकङ्कणकेयूरशिखामणिविभूषितम् ।
मङ्गलैर्गीतवादित्रैर्गन्धाक्षतविचर्चितम् ॥ ३६

आचारलाजैः सुवरं शिशुपालं विधाय च ।
आरोप्य करिणं प्रोच्चं दमघोषो विनिर्ययौ ॥ ३७
जरासन्धेन शाल्वेन दन्तवक्रेण धीमता ।
विदूरथेन पौण्ड्रेण पार्ष्णिग्राहेण मैथिल ॥ ३८
विकर्षन् महतीं सेनां दमघोषो महाबलः ।
दुन्दुभीन् नादयन् दीर्घानाययौ कुण्डिनं पुरम् ॥ ३६
मन्मुखाद् यदुदेवस्य श्रुत्वोद्योगं नृपाः परे ।
सहस्रशः समाजग्मुः शिशुपालसहायिनः ॥ ४०
भीष्मको ह्यग्रतो गत्वा सम्पूज्य विधिवन्नृपम् ।
काश्मीरकम्बलैर्दिव्यैरुर्णैः सामुद्रसम्भवैः ॥ ४१
मण्डितेषु च सर्वेषु मुक्तादामविलम्बिषु ।
सौगन्धिकैः पुष्परसैरार्द्रेषु शिबिरेषु च ॥ ४२
वाराङ्गनानृत्यलसन्मृदङ्गप्रध्वनत्सु च ।
निवेशयामास नृपैर्विदर्भाधिपतिर्महान् ॥ ४३

इति श्रीगर्गसहितायां द्वारकाखण्डे नारदबहुलाश्व-
संवादे कुण्डिनपुरयानं नाम
चतुर्थोऽध्यायः ॥ ४

नारद उवाच

ध्यायन्ती कृष्णपादाब्जं भैष्मी कमललोचना।
मोघां वा मनुते वार्तां मेघश्याममचिन्तयत्॥ १

रुक्मिण्युवाच

अहो त्रियामान्तरितो विवाहो
ममैव नागच्छति कृष्णचन्द्रः।
न वेद्मि किं कारणमत्र धात
नावर्ततेऽद्यापि च भूमिदेवः॥ २
यदूत्तमो देववरो ममैष
दृष्ट्वा हि किञ्चित् कलुषं विधातः।
कृतोद्यमो नूनमतीव हस्त-
ग्राहे न चागच्छति किं करोमि॥ ३
हा दुर्भगायाश्च न मे विधाता
न सानुकूलः किल चन्द्रमौलिः।
नचैकदन्तो विमुखा च गौरी
गावो हि विप्राश्च न सानुकूलाः॥ ४

नारद उवाच

भैष्मी एवं चिन्तयन्ती स्फटिकाट्टालभूमिषु।
परिभ्रमन्ती श्रीकृष्णं पश्यन्ती गृहशेखरात्॥ ५
तदैव तस्या वामाङ्गमस्फुरत् प्रियभाषणम्।
तेन प्रसन्ना श्रीभैष्मी कालज्ञा सर्वमङ्गला॥ ६
कृष्णप्रणोदितो विप्रः सद्यश्चागतवांस्तदा।
श्रीकृष्णागमनं तस्यै शनैः सर्वं शशंस ह॥ ७

ततः प्रसन्ना श्रीभैष्मी तदङ्घ्र्योः प्रणिपत्य सा ।
प्राह त्वद्दर्शतो विप्र न यास्यामि वचो मम ॥ ८
श्रुत्वागतौ रामकृष्णौ विवाहप्रेक्षणोत्सुकौ ।
भीष्मको निर्गतो नेतुं ब्राह्मणैस्तत्प्रभाववित् ॥ ६
भूरिशं मङ्गलपात्रेषु गन्धाक्षतयुतेषु च ।
वासो रत्नचयं धृत्वा गीतवादित्रमङ्गलैः ॥ १०
कोटिशो मधुपर्काणां कुम्भव्यूहान् विधाय च ।
पूजयित्वाथ विधिवद् रामकृष्णौ परेश्वरौ ॥ ११
अहो चास्मै न दत्तेयमिति खिन्नमनाः परम् ।
आनन्दने वने स्थाप्य नत्वा स्वगृहमाययौ ॥ १२

श्रुत्वागत श्रीवसुदेवनन्दनं
त्रैलोक्यलावण्यनिधिं परेश्वरम् ।
आगत्य नेत्राञ्जलिभिः पुरौकसः
पपुः परं तन्मुखपङ्कजामृतम् ॥ १३
अस्यैव भार्या भवितुं हि रुक्मिणी
योग्यास्ति नान्येत्यवदन् पुरौकसः ।
दत्वा स्वपुण्यानि विवाहहेतवे
श्रीकृष्णलावण्यकलानिबन्धकाः ॥ १४
कदापि साक्षाच्छ्वशुरस्य मन्दिरं
समागतं चैवमहो वयं जनाः ।
द्रक्ष्याम आरात् कृतकृत्यतां तदा
व्रजेम लोके बहुजीवितेन किम् ॥ १५
वदत्सु लोकेषु च भीष्मकन्यकाऽ
द्रिकन्यकापूजनहेतवे नृप ।
अन्त पुरात् सर्वसखीसमन्विता
विनिर्ययौ कृष्णगृहीतमानसा ॥ १६

भेरीमृदङ्गैर्बहुदुन्दुभिस्वनैः
सुगायकैर्वन्दिजनैश्च मागधैः ।
वाराङ्गनानृत्यमनोज्ञभावै-
र्जयेत्यभून्मङ्गलशब्द उच्चकैः ॥ १७
कोटीन्दुबिम्बद्युतिमादधानां
बालार्कताटङ्कधरां श्रियं ताम् ।
सितातपत्रव्यजनैः स्फुरद्भिः
सुचामरैः पार्श्वगणः सिषेवे ॥ १८
कोशाद्विनिष्कृस्य शितासिलक्ष
पदातयो वीरजना इतस्ततः ।
तथाश्वगावै रथिनो गजास्थिताः
समुद्यतास्त्रा जुगुपुर्विदूरतः ॥ १९
देवीगृहं प्राप्य सुचत्वरे स्थिता
शान्ता शुचिर्धौतकराङ्घ्रिपङ्कजा ।
गत्वा समीपं यतवाक् कृताञ्जलि-
र्भेजे भवानीं भवभीतिहारिणीम् ॥ २०
दुर्गे स्वसन्तानयुते शिवे शुभे
नमामि तुभ्यं सततं भवान्विते ।
भूयात् पतिर्मे भगवान् परेश्वरः
श्रीकृष्णचन्द्रः प्रकृतेः परः स्वयम् ॥ २१
एवं शुभे मा वद कृष्णनाम
चैद्यं समुद्दिश्य वरं गृहाण ।
इत्थं वदन्तीषु सखीषु भैष्मी
भूयो भवानी भवने जगाद ॥ २२
अजानतीयं तव चाम्ब बाला
तथा वदन्तीषु सखीषु भैष्मी ।

गन्धाक्षतैर्धूपविभूषणाद्यैः
स्रङ्‌माल्यदीपार्वालभोगवस्त्रैः ॥ २३
अपूपताम्बूलफलेक्षुभिश्च
भेजे भवानीं परया च भक्त्या ।
नत्वाथ तां वै बहुभूषणाद्यैः
सम्पूज्य सौभाग्यवती ननाम ॥ २४
सर्वाः स्त्रियस्ताः प्रददुर्वराणि
सुमङ्गलाशीर्वचनानि तस्यै ।
रूप सदा ते शतरूपया समं
शील सदा शैलसुतासमं प्रभौ ॥ २५
शुश्रूषणं भर्तुररुन्धतीसमं
क्षमा हि भूयाज्जनकात्मजासमा ॥ २६
सौभाग्यमेवं तव दक्षिणासमं
सुवैभवं भीष्मसुते शचीसमम् ।
सरस्वती ते च सरस्वतीसमा
भक्तिः पतौ स्याच्च सतां हरौ यथा ॥ २७

इति श्रीगर्गसंहितायां द्वारकाखण्डे नारदबहुलाश्व-
संवादे रुक्मिणीनिर्गमनं नाम
पञ्चमोऽध्यायः ॥ ५

नारद उवाच

इत्थं विप्रवधूनां सदाशीर्भिरभिनन्दिता ।
देवीं पुनर्विप्रवधूः प्रणनाम मुहुर्मुहुः ॥ १
त्यक्त्वा मौनव्रत भैष्मी गिरिजागृहतस्ततः ।
सहालिभिः सखीभिश्च निश्चक्राम शनैः शनैः २
कोटिचन्द्रप्रतीकाशां भैष्मीं कमललोचनाम ।
अकस्माद्ददृशुर्वीराः सुनिधिं निर्धना यथा ॥ ३
अश्वारूढाश्च रथिनो गजिनश्च पदातयः ।
समागता रक्षितास्ते मुमुहुर्वीक्ष्य रुक्मिणीम् ॥ ४
तदपाङ्गस्मितैस्तीव्रैर्बाणैः कामधनुश्च्युतैः ।
उज्झितास्त्रा निपेतुः कौ ह्यर्दिताः सैन्यकास्तदा ॥ ५
रथेन वायुवेगेन घण्टामञ्जीरनादिना ।
नैप्रेयसम्भवैरश्वैर्युतेनानिपताकिना ॥ ६
शीघ्रं स्वसैन्यसङ्घात् तत्सैन्य संविदारयन् ।
वायुर्यथा पद्मवनं हरिर्दारुकसारथिः ॥ ७
स्त्रीकदम्बकमेत्याशु पश्यतां द्विषतां प्रभुः ।
समारोप्य रथ भैष्मीं तार्क्ष्यपुत्रः सुधामिव ॥ ८
देवानां पश्यतां राजन् राजकन्यां जहार ह ।
दिव्यं शस्त्रोत्तमं शार्ङ्गं धनुष्टङ्कारयन् मुहु ॥ ६
ततो वेगेन महता स्वसैन्यं चागते हरौ ।
देवदुन्दुभयो नेदुर्यदुदुन्दुभयस्तदा ॥ १०
सिद्धाश्च सिद्धकन्याश्च श्रीकृष्णस्य रथोपरि ।
हर्षिता ववृषुर्देवाः पुष्पैर्नन्दनसम्भवैः ॥ ११

ततो ययौ जयारावैः शनै रामयुतो हरिः ।
शृगालसङ्घमध्याच्च केसरी भागद्द यथा ॥ १२
तदा कोलाहले जाते रुक्मिणीहरणे सति ।
बभूव रक्षकाणाञ्च शस्त्राशस्त्रि परस्परम् ॥ १३
जरासन्धवशाः सर्वे मानिनो नृपसत्तमाः ।
न सेहिरे स्वाभिभवं परं जातं यशःक्षयम् ॥ १४
अहो धिगस्मांस्तु यशो हृतं गोपैश्च धन्विनाम् ।
शृगालैरिव सिंहानामतः किं स्यात् पराजयः ॥ १५
एवमुक्त्वा क्रोधपरा जगृहुः शस्त्रसंहतिम् ।
विसृज्य क्रीडनाक्षादीन् दंशिताः सैन्यसंयुताः ॥ १६
अक्षौहिणीद्वयेनापि पौण्ड्रकः क्रोधपूरितः ।
अक्षौहिणीत्रयेणापि महावीरो विदूरथः ॥ १७
अक्षौहिणपञ्चयुतो दन्तवक्रोऽतिदारुणः ।
अक्षौहिणीत्रयेणाशु शाल्वो राजपुरेश्वरः ॥ १८
अक्षौहिणीभिर्दशभिर्जरासन्धो महाबलः ।
आययौ सम्मुखे योद्धुं यादवानां महात्मनाम ॥ १९
अन्येऽपि चैद्यपक्षीया योद्धुं श्रीकृष्णसम्मुखे ।
धनुष्टङ्कारवन्तस्ते समाजग्मुः सहस्रशः ॥ २०
प्रलयाब्धिसमं सैन्यं समालोक्य यदूत्तमाः ।
तर्तुमाजग्मुरारात्ते कृष्णकैवर्त्तपोतकाः ॥ २१
बभूव तुमुलं युद्धमद्भुत रोमहर्षणम् ।
सैन्ययोश्च स्वपरयोर्देवदानवयोर्यथा ॥ २२
रथिनो रथिभिस्तत्र पत्तिभिः सह पत्तयः ।
गजा गजैर्युयुधिरे तुरगाश्च तुरङ्गमैः ॥ २३
शस्त्रान्धकारे सञ्जाते रुक्मिणीं भयविह्वलाम् ।
विलोक्य भगवान् देवो मा भैष्टत्यभयं ददौ ॥ २४

बलदेवानुजो वीरो गदो धुन्वन् महद्धनुः ।
विवेश शत्रुसङ्कट्टं वनं वह्निरिव प्रभुः ॥ २५
गदबाणविभिन्नाङ्गा रथिनश्छिन्नकञ्चुकाः ।
हताश्वहतसूताश्च निपेतुर्भूमिमण्डले ॥ २६
पदातयश्छिन्नपदा गदबाणागतव्यथाः ।
निपेतुर्भूतले राजन् वृक्षा वातहता इव ॥ २७
अश्वारूढाः केऽपि वीरा गदबाणैर्विदारिताः ।
पेतू रणाङ्गणे साश्वा वृन्तं फलवन्नृप ॥ २८
गदबाणैर्भिन्नकुम्भा मध्ये मध्ये विदारिताः ।
विरेजुः पतिता भूमौ कूष्माण्डशकला इव ॥ २९
ततः पलायितं सैन्यं दृष्ट्वा शाल्वो महाबलः ।
गदं तताड गदया गदायुद्धविशारदः ॥ ३०
गदाविद्धो गदो धन्वी गदायुद्धप्रभाववित् ।
धनुर्युद्धन्तु सन्त्यज्य तत्काल मनसा त्वरम् ॥ ३१
परां व्यथां गतो युद्धे पतितोऽपि समुत्थितः ।
तदाग्रजेन या दत्ता तां गदां तु गदोऽग्रहीत् ॥ ३२
लक्षभारमयी गुर्वी दृढा कौमोदकी यथा ।
तया गदोऽहनच्छाल्वं वज्रेणेन्द्रो यथा गिरिम् ॥ ३३
गदाप्रहारमथिते शाल्वे निपतिते भुवि ।
पौण्ड्रकोऽथ जरासन्धो दन्तवक्त्रो विदूरथः ।
चत्वार आययुस्तत्र गदोपरि रुषान्विताः ॥ ३४
पौण्ड्रकोऽपि महावीरो गदस्य रथगं ध्वजम् ।
चिच्छेद दशभिर्बाणैः कुवाक्यैर्मित्रतामिव ॥ ३५
दन्तवक्रस्तु गदया गदस्यापि रथं शुभम् ।
चूर्णयामास राजेन्द्र दण्डेनेव सुमृद्घटम् ॥ ३६

तथाश्वांश्च जरासन्धः सारथिञ्च विदूरथः ।
पातयामास भूपृष्ठे शितैर्बाणैर्विदेहराट् ॥ ३७
ततो मुसलमादाय बलदेवस्त्वरं बली ।
विकराले मुखे भीमे दन्तवक्रमताडयत् ॥ ३८
ततो मुसलघातेन दन्तवक्रस्य युध्यतः ।
मुखे वक्रोऽपि यो दन्तः स तु भूमौ पपात ह ॥ ३९
तदा हसति दैत्यारौ रुक्मिणीसहिते हरौ ।
पौण्ड्रकञ्च जरासन्धं तथा दुष्ट विदूरथम् ।
जघान मुशलेनाशु बलदेवो रुषान्वितः ॥ ४०
त्रयोऽपि पतिता युद्धे मूर्च्छिताः क्षतजाप्लुताः ॥ ४१
सेनां समागतां सर्वां समाकृष्य हलेन वै ।
मुसलेनाहनत् क्रुद्धो बलदेवो महाबलः ॥ ४२
दशयोजनपर्यन्तं रथेभाश्वपदातयः ।
पेषिताश्चूर्णिता भूमौ शयाना धरणी गताः ॥ ४३
जरासन्धादयः सर्वे मृत्युशेषा नृपाः परे ।
पलायिताश्चैद्यमेत्य प्रोचुर्नष्टोत्सवं भृशम् ॥ ४४
भो भो पुरुषशार्दूल दौर्मनस्यमिद त्यज ।
किमेकेन विवाहेन भविता ते शतं भुवि ॥ ४५
अद्यैव द्वारकां गत्वा बध्वा रामं समाधवम्
अयादवीं करिष्यामः पृथ्वीं सागरमेखलाम् ॥ ४६
एवं सम्बोधितो मित्रैश्चैद्योऽगाच्चन्द्रकापुरम् ।
ययुः स्वं स्वं पुर सर्वे हतशेषा नृपास्ततः ॥ ४७

इति श्रीगर्गसहितायां द्वारकाखण्डे रुक्मिणी-
हरणे यदुविजयो नाम
षष्ठोऽध्यायः ॥ ६

नारद उवाच

रुक्मिण्या हरणं श्रुत्वा मित्राणाञ्च पराभवम् ।
प्रतिज्ञामकरोद्रुक्मी शृण्वतां सर्वभूभुजाम् ॥ १
अहत्वा समरे कृष्णमप्रत्यूह्य च रुक्मिणीम् ।
कुण्डिनं न प्रवेक्ष्यामि सत्यमेतद् ब्रवीमि वः ॥ २
इत्युक्त्वा कवचं दिव्यं घनमर्बुदनिर्मितम् ।
शिरस्त्राणं सिन्धुजञ्च संदधार महोद्भटः ॥ ३
सौवीरस्य धनुः शालिलाटजं चेषुधिद्वयम् ।
आदाय म्लेच्छदेशस्य खड्गं चर्म च कौटजम् ॥ ४
पेठरस्य महाशक्तिं गुर्जरराटभवां गदाम् ।
परिघं वङ्गजं धृत्वा हस्तत्राणञ्च कौङ्कणम् ॥ ५
बद्धगोधाङ्गुलित्राणः किरीटी रत्नकुण्डलः ।
रुक्माङ्गदस्तदा रुक्मी युद्धं कर्तुं मनो दधे ॥ ६
जैत्रं रथं समारुह्य चञ्चलाश्वनियोजितम् ।
पृष्ठतोऽन्वगमत् कृष्णं कर्षन्नक्षौहिणीद्वयम् ॥ ७
पुनः समागतां दृष्ट्वा सेनां रामो महाबलः ।
तया युयोध समरे यदुसेनासमन्वितः ॥ ८
तिष्ठ तिष्ठेति देवेशं विसृजन् परुषं वचः ।
सम्प्राप्नोति रथं रुक्मी धनुष्टङ्कारयन् मुहुः ॥ ९
त्वर मुञ्च स्वसारं मे यदि जीवितुमिच्छसि ।
न चेत्त्वां सबलं सद्यो नयामि यमसादनम् ॥ १०
ययातिशापसभ्रष्टो गोपालोच्छिष्टभुग भवान् ।
जरासन्धभयाद् भीतो यवनाग्रात् पलायितः ॥ ११

इत्युक्त्वेषुधितः कृष्य बाणं चापे निधाय सः ।
नियम्य कर्णपर्यन्तं निचखान हरेर्हृदि ॥ १२

तत्ताडितोऽपि भगवान् धनुर्ज्यां तस्य नादिनीम् ।
चिच्छेद सायकेनाशु गरुडः पन्नगीं यथा ॥ १३

निधाय शीघ्रं कोदण्डे शिञ्जिनीं स्वर्णभूषिताम् ।
रुक्मी तु दशभिर्बाणैः संजघान हरिं रणे ॥ १४

हरिरेकेन बाणेन शिञ्जिनीसहितं धनु ।
चिच्छेद रुक्मिणः सद्यो ज्ञानेनेवागुणामयम् ॥ १५

छिन्नधन्वाथ वैदर्भो महाशक्ति स्फुरत्प्रभाम् ।
प्राहरद्धरये शक्तिं विज्ञानाय यथा मुनिः ॥ १६

कृष्णोऽमोघेन बाणेन मध्यतस्तां द्विधाकरोत् ।
रुक्मी पुनः शतैर्बाणैः संतताड मृधे हरिम् ॥ १७

तताड गदया तां वै गदाधारी गदाग्रजः ।
द्विधाभूता महाशक्ती रुक्मिसूतं जघान ह ॥ १८

कौमोदकी गदा गुर्वी पतन्ती वेगधारिणी ।
तद्रथं चूर्णयामास साश्वं शैलं यथा पविः ॥ १६

प्राहरद्धरये सोऽपि गदां स्वां भीष्मकात्मजः ।
चक्रेण चूर्णयामास भगवानपि तां पुनः ॥ २०

परिघं वज्रजं नीत्वा रुक्मी रुक्माङ्गदो बली ।
जघान श्रीहरिं स्कन्धे जगर्ज घनवन्मृधे ॥ २१

तत्ताडितोऽपि भगवान् मालाहत इव द्विपः ।
तेनैव परिघेणापि तं जघान रणाङ्गणे ॥ २२

परिघाभिहतो रुक्मी किञ्चिद्व्याकुलमानसः ।
भर्त्सयन् माधवं ह्याजौ जग्राह खड्गचर्मणी ॥ २३

तत्खड्गचर्मणी छित्वा स्वखड्गं प्राहरद्धरिः ।
खड्गाग्रेण शिरस्त्राणं कञ्चुकं चिच्छिदे महत् ।। २४
हस्तत्राणेऽपि युगपदेते छिन्नीकृते मृधे ।
खड्गमुष्टिकरं दृष्ट्वा रुक्मिणं समुपस्थितम् ।। २५
गृहीत्वा भुजदण्डाभ्यां पातयित्वा महीतले ।
तस्योपरि हरिः स्थित्वा यथा सिंहो मृगोपरि ॥
शितधारं नन्दकाख्यं खड्गं जग्राह रोषतः ॥ २६
दृष्ट्वा भ्रातृवधोद्युक्तं रुक्मिणी भयविह्वला ।
पतित्वा पादयोर्भर्तुरुवाच करुणं सती ॥ २७

रुक्मिण्युवाच

अनन्त देवेश जगन्निवास
योगेश्वराचिन्त्य जगत्पते त्वम् ।
हन्तुं न योग्यः करुणासमुद्र
मद्भ्रातरं शालभुजं महाभुज ।। २८

नारद उवाच

परित्रासैजदङ्गां तां दुःखशुष्यन्मुखीं प्रियाम् ।
रुद्धकण्ठां सती वीक्ष्य न्यवर्त्तत हरिः स्वयम् ॥ २६
बध्वा तं कटिबन्धेन खड्गेन शितधारिणा ।
वपन श्मश्रुकेशानां चकारार्द्धमुखे हरिः ।। ३०
अक्षौहिणीद्वयं जित्वा रामः प्राप्तः ससैनिकः ।
बद्धं विरूपिणं दीनं रुक्मिणं तं ददर्श ह ॥ ३१
विमुच्य बद्धं सदयः प्राह निर्भर्त्सयन् हरिम् ।
असाध्विदं त्वया कृष्ण कृतं लोकजुगुप्सितम् ॥
हास्यं वै शालभद्राणां नहि वैतादृशं भवेत् ।। ३२

यस्याः सहोदरे मुख्ये विरूपे च त्वया कृते ।
किं वदिष्यति सापि त्वां भ्रातुर्वैरूप्यचिन्तया ।। ३३
मा शोकं कुरु कल्याणि स्वस्था भव शुचिस्मिते ॥ ३४
आर्यपुत्रि महाबुद्धे मा शोकं कुरु दुर्मनाः ।
सर्वं कालकृतं मन्ये प्रियमप्रियमेव वा ॥ ३५
वायोर्घनावलिरिव वशे यस्याखिलं जगत् ।
तं कालमीश्वरं विद्धि विष्णुं कलयतां प्रभुम् ।। ३६
अहं ममेति भावोऽयं जगतो बन्धकारणम् ।
ताभ्यां विरहितो भावो मोक्ष एव न संशयः ।। ३७
सुखदुःखप्रदो नान्यः पुरुषस्यात्मविभ्रमः ।
मित्रोदासीनरिपवः संसारतमसा कृताः ।। ३८
एवं रामेण देवेन बोधिता भीष्मकात्मजा ।
वैमनस्यं परित्यज्य रुक्मिणी च ययौ मुदम् ।। ३९
रुक्मी तु ताभ्यामुत्सृष्टो वितथात्ममनोरथः ।
स्मरन् विरूपकरणं तपसे स मनोऽदधत् ।। ४०
वारितो मन्त्रिमुख्यैश्च कुण्डिनं न गतः पुरः ।
चक्रे भोजकटं नाम निवासाय पुरं परम् ।। ४१
रुक्मिण्या सह गोविन्दः सरामो यदुभिर्वृतः ।
द्वारकां प्रययौ राजन् नादयन् जयदुन्दुभीन् ॥ ४२
जाते महोत्सवे पुर्यां रुक्मिणीं रुचिराननाम् ।
उपयेमे विधानेन मार्गशीर्षे हरिः स्वयम् ।। ४३

हरेर्विवाहे सति रुक्मिणीपतेः
श्रीरुक्मिणी भूषितरुक्ममन्दिरा ।
पुरन्दरस्यापि यथामरावती
द्वारावती पुण्यवती तथा बभौ ।। ४४

भैष्मीविवाहस्य कथां विचित्रां
शृणोति यः श्रावयते च भक्त्या ।
इहैव भक्तो विभवेन युक्तः
स एव मुक्तिं प्रति याति मुक्तः ॥ ४५

इति श्रीगर्गसंहितायां द्वारकाखण्डे नारदबहुलाश्व-
संवादे रुक्मिणीविवाहो नाम
सप्तमोऽध्यायः ॥ ७

नारद उवाच

अन्यासां कृष्णपत्नीनां मङ्गल शृणु मैथिल ।
सर्वपापहरं पुण्यमायुर्वर्द्धनमुत्तमम् ॥ १
सत्राजिताय सूर्येण दत्तः साक्षात् स्यमन्तकः ।
उग्रसेनाय स मणिः श्रीकृष्णेनाभियाचितः ॥ २
सत्राजितस्तं न ददौ द्रव्यलोभेन मैथिल ।
दिने दिने स्वर्णभारानष्टौ यः सृजति स्वतः ॥ ३
अथ प्रसेनस्तद्भ्राता मणिं कण्ठे निधाय सः ।
सैन्धवं हयमारुह्य मृगयां व्यचरद्वने ॥ ४
सिंहेन मारितः सोऽपि सिंहो जाम्बवता हतः ।
गृहीत्वा तं मणिं सद्यो जाम्बवान् स्वगुहां गतः ॥ ५
कृष्णेन निहतो भ्राता मणिग्रीवो वनं गतः ।
नायात. स सभामध्ये इति सत्राजितोऽब्रवीत् ॥ ६
भगवान् दुर्यशोलिप्तो नागरैस्तु वनं गतः ।
प्रसेनमश्वं सिंहञ्च हतं प्रेक्ष्य महामते ॥ ७
ऋक्षराजबिल गत्वा मणिं हर्तुं स्वयं हरिः ।
युद्ध कृत्वाष्टविंशाहमजयदृक्षनायकम् ॥ ८
तेन दत्ता जाम्बवती हरये कन्यका शुभा ।
मणिना सह राजेन्द्र द्वारकामाययौ हरिः ॥ ९
सत्राजिताय प्रददौ मणिं निर्लाञ्छनः प्रभुः ।
व्रीडितोऽवाङ्मुखो भीतो राजा सत्राजितो मणिम् ॥ १०
गृहीत्वापि पुनस्तस्मै श्रीकृष्णाय महात्मने ।
सत्यभामां सुतां प्रादाच्छान्त्यर्थं मैथिलेश्वर ॥ ११

पाण्डवानां सहायार्थमिन्द्रप्रस्थं गतो हरिः ।
तत्र वै वार्षिकान् मासानवात्सीद्बन्धुवत्सलः ॥ १२
एकदा रथमारुह्य हरिर्गाण्डीविना सह ।
सुतीरे यमुनातीरे मृगयार्थी विनिर्ययौ ॥ १३
तपश्चरन्ती कालिन्दी श्रीकृष्णं वरमिच्छती ।
दर्शिता पाण्डवेनापि तां गृहीत्वा जगाम ह ॥ १४
द्वारकामेत्य कालिन्दीं सूर्यकन्यां मनोहराम् ।
उपयेमे विधानेन वितन्वन् मङ्गलं परम् ॥ १५
आवन्त्यराजतनुजां मित्रविन्दां मनोहराम् ।
स्वयंवरे तां जहार भगवान् रुक्मिणीं यथा ॥ १६
नग्नजित्कन्यकां सत्यां दमित्वा सप्त गोवृषान् ।
पश्यतां सर्वलोकानामुपयेमे हरिः स्वयम् ॥ १७
कैकेयराजतनुजां भद्रां तु भगवान् हरिः ।
कालिन्दीमिव तां शश्वदुपयेमे विधानतः ॥ १८
बृहत्सेनसुतां राजँल्लक्ष्मणां लक्षणैर्युताम् ।
छित्वा मत्स्यमरीन् जित्वा जग्राह भगवान् हरिः ॥ १९
तथा षोडशसाहस्रं शतञ्च नृपकन्यकाः ।
भौमं हत्वा तन्निरोधादाहृताश्चारुदर्शनाः ॥ २०
तासां मुहूर्त एकस्मिन्नानागारेषु योषिताम् ।
सविधि जगृहे पाणीननुरूपः स्वमायया ॥ २१
एकैकशस्ताः कृष्णस्य पुत्रान् दश दशाबलाः ।
अजीजनन्न नवमान् पितुः सर्वात्मसम्पदा ॥ २२
रुक्मिण्यां भीष्मकन्यायां प्रद्युम्नः प्रथमोऽभवत् ।
कामदेवावतारोऽयं पितृवत् सर्वलक्षणः ॥ २३
शम्बरो निर्दयस्तोकं हत्वाब्धौ तं समाक्षिपत् ।
मत्स्योदरे गतः सोऽपि न ममार हरेः सुतः ॥ २४

मत्स्योदरान्निर्गतोऽसौ भार्यया परिपालित. ।
ज्ञात्वा शत्रुकृतां वार्तां स कार्ष्णी रूढयौवनः ॥ २५
हत्वा तं शम्बरं शत्रुं भार्ययाम्बरमायुतः ।
द्वारकामाययौ राजंश्चित्र कर्म च तस्य तत् ॥ २६
स रुक्मिणो दुहितरं हृत्वा भोजकटात् पुरात् ।
स्वयंवरस्थलाद् राजन्नुपयेमे महारथः ॥ २७
तस्मात् सुतोऽनिरुद्धोऽभून्नागायुतबलान्वितः ।
सुरज्येष्ठावतारोऽयं शारदेन्दीवरप्रभः ॥ २८
चतुर्व्यूहावतारस्य परिपूर्णतमस्य हि ।
एवं विचित्रं चरितं विवाहानां सुमङ्गलम् ॥ २९
सर्वपापहरं पुण्यमायुर्वर्द्धनमुत्तमम् ।
मया ते कथितं राजन् किं भूयः श्रोतुमिच्छसि ॥ ३०

इति श्रीगर्गसहितायां द्वारकाखण्डे नारदबहुलाश्व-
संवादे सर्वमहिष्युद्वाहो नाम
अष्टमोऽध्यायः ॥ ८

स एव विश्वं स्वकृतं सृजत्यत्ति च पाति च ।
स एव ब्रह्म परमं कालः कलयतां प्रभु ॥ ११
योऽन्तः प्रविश्य भूतानि भूतैरप्यखिलाश्रयः ।
स विष्णवाख्योऽधियज्ञोऽसौ परिपूर्णतमः स्वयम् १२
यद्भयाद्वाति वातोऽयं सूर्यस्तपति यद्भयात् ।
यद्भयाद्वर्षते देवो मृत्युश्चरति यद्भयात् ॥ १३
परिपूर्णतमं साक्षाच्छ्रीकृष्णं परमेश्वरम् ।
भज सर्वात्मना राजन् साहङ्कारं न चाचर ॥ १४

नारद उवाच

ज्ञानं प्राप्तोऽपि शर्यातिराक्षिप्तः पुत्रवाक्शरैः ।
आनर्त्तं स्वसुतं प्राह रुषा प्रस्फुरिताधरः ॥ १५

शर्यातिरुवाच

दूरं गच्छ असद्‌बुद्धे गुरुवद्भाषसे कथम् ।
यावद्‌भूतन्तु मे राज्यं तावत्त्वं मा महीं वस ॥ १६
यस्त्वयाराधितः कृष्णः सोऽपि सर्वसहायकृत् ।
न नवीनां किं मही ते भगवानेव दास्यति ॥ १७

नारद उवाच

इत्युक्तस्तु तदानर्त्तो राजानं प्राह मानदः ।
यत्र ते च महीराज्यं तत्र वासो न मे भवेत् ॥ १८
पित्रा निःसारितो राज्यादानर्त्तोऽब्धितटं गतः ।
बेलामेत्य तपस्तेपे वर्षाणामयुतं जले ॥ १९
प्रेमलक्षणया भक्त्या सन्तुष्टो भगवान् हरिः ।
तस्मै स्वं दर्शनं दत्त्वा वरं ब्रूहीत्युवाच ह ॥ २०
कृताञ्जलिपुटो भूत्वानर्त्त उत्थाय शीघ्रतः ।
ननाम कृष्णपादाब्जं रोमाञ्ची प्रेमविह्वलः ॥ २१

आनर्त्त उवाच

नमस्ते वासुदेवाय नमः सङ्कर्षणाय च ।
प्रद्युम्नायानिरुद्धाय सात्वतां पतये नमः ॥ २२
पित्रा निष्कासितो देव त्वामहं शरणं गतः ।
देहि मह्यं भूमिमन्यां यत्र वासो हि मे भवेत् ॥ २३
ध्रुवोऽपि यत्प्रसादेन ययौ सर्वोत्तमं पदम् ।
तस्मै नमो भगवते प्रणतक्लेशहारिणे ॥ २४

नारद उवाच

आनर्त्तमानतं दीनं भगवान् दीनवत्सलः ।
प्रसन्नः श्रीमुखेनाह मेघगम्भीरया गिरा ॥ २५

भगवानुवाच

अन्या न मेदिनी लोके किं कर्तव्यं मया नृप ।
स्ववचस्तद्व्रतं कर्तुं त्वद्भक्त्या परितोषितः ॥ २६
तस्माद् वै स्वस्य लोकस्य वैकुण्ठस्य परन्तपः ।
भूखण्डं योजनशतं ददामि विमलं शुभम् ॥ २७

नारद उवाच

इत्युक्त्वानर्त्तनृपतिं भगवान् भक्तवत्सलः ।
वैकुण्ठाच्च समुत्पाट्य भूखण्डं शतयोजनम् ॥ २८
चक्रं सुदर्शनं धृत्वा समुद्रे भीमनादिनि ।
दधार भगवान् देवस्तस्योपरि विदेहराट् ॥ २९
आनर्त्तो लक्षवर्षान्तं तत्र राज्यं चकार ह ।
पुत्रपौत्रसमायुक्तो भुञ्जन् वैकुण्ठसम्पदम् ॥ ३०
इदं श्रुत्वाथ शर्यातिः पिता वै विस्मितोऽभवत् ।
आनर्त्तो नाम देशोऽभूदानर्त्तस्य प्रसादतः ॥ ३१
रैवतस्तस्य पुत्रोऽभूच्छ्रीशैलस्य गिरेः सुतम् ।
समुत्पाट्य स्वहस्ताभ्यामानर्त्तेषु न्यपातयत् ॥ ३२

सोऽभूद्रैवतनाम्नापि रैवतो नाम पर्वतः ।
कुशस्थलीं विनिर्माय राज्यं कृत्वाथ रेवतः ॥ ३३
समादाय स्वकां कन्यां ब्रह्मलोकं जगाम ह ।
बलदेवविवाहेऽपि तत्कथा कथिता मया ।
तस्माद् द्वारावतीं पुण्यां मोक्षद्वारं विदुः सुराः ॥ ३४

इति श्रीगर्गसंहितायां द्वारकाखण्डे नारदबहुलाश्व-
संवादे द्वारकागमनकारणं नाम
नवमोऽध्यायः ॥ ९

नारद उवाच

इत्थं मया ते कथितं द्वारकागमकारणम् ।
सर्वपापहरं पुण्यं किं भूयः श्रोतुमिच्छसि ॥ १

बहुलाश्व उवाच

सर्वतीर्थमयी भूमिर्द्वारकानगरी शुभा ।
तत्र मुख्यानि तीर्थानि वद मां मुनिसत्तम ॥ २

नारद उवाच

आप्रभासात्तीर्थमयी मर्यादीकृत्य यज्ञियम् ।
भूमिर्मोक्षप्रदा राजन् द्वारका योजनैः शतम् ॥ ३
द्वारकां नगरीं दृष्ट्वा नरो नारायणो भवेत् ।
द्वारकायां मृतः कोऽपि गर्दभोऽपि चतुर्भुजः ॥ ४
पश्यन् शृण्वन् कथां तस्या द्वारकेति वदन् क्वचित् ।
दृष्ट्वा दद्यात्तृणं मृत्युं गतो याति परां गतिम् ॥ ५
एकदा रैवतं भक्तं प्रेमानन्दसमाकुलम् ।
प्रेक्ष्य स्वं दर्शनं दत्त्वा हरिरश्रुमुखोऽभवत् ॥ ६
तन्नेत्रबिन्दुसम्भूता गोमती सा महानदी ।
यस्या दर्शनमात्रेण ब्रह्महत्या प्रमुच्यते ॥ ७
गोमतीतीरजं पुण्यं रजो यो धारयेन्नरः ।
शतजन्मकृतात् पापान्मुच्यते नात्र संशयः ॥ ८
स्नानकाले गोमतीति वदत्यपि नरः क्वचित् ।
गोमत्यां स्नानजं पुण्यं लभते वै न संशयः ॥ ९
मकरस्थे रवौ माघे प्रयागे स्नानमाचरेत् ।
शताश्वमेधजं पुण्यं सम्प्राप्नोति विदेहराट् ॥ १०

तत्सहस्रगुणं पुण्यं गोमत्यां मकरे रवौ ।
गोमत्याश्चैव माहात्म्यं वक्तुं नालं चतुर्मुखः ॥ ११
गोमत्यां चक्रतीर्थेषु पाषाणनिचयाश्च ये ।
ते सर्वे चक्रतां यान्ति पूजनीयाः प्रयत्नतः ॥ १२
चक्रचिह्ने चक्रतीर्थे द्वादश्यां स्नानमाचरेत् ।
चक्रपाणिपदं याति पापानां भाजनोऽपि हि ॥ १३
कोटिजन्मकृतैः पापैः पतितो योऽपि पातकी
चक्रतीर्थस्य सोपानमेत्य मुक्तिं समाप्नुयात् ॥ १४

बहुलाश्व उवाच

गोमत्यां हि महानद्यां चक्रतीर्थं शुभार्थदम् ।
कथं जातं बहुमतं तन्मे ब्रूहि महामुने ॥ १५

नारद उवाच

अत्रैवोदाहरन्तीममितिहासं पुरातनम् ।
यस्य श्रवणमात्रेण पापहानिः परं भवेत् ॥ १६
अलकेशो राजराजो निधीशो धर्मभृत् प्रभुः ।
वैष्णवं यज्ञमारेभे कैलासोत्तरभूमिषु ॥ १७
तस्य यज्ञे स्वयं विष्णुरागतो वै स्वधामतः ।
ब्रह्मा शिवो जम्भभेदी वरुणो यादसां पतिः ॥ १८
वायुर्यमो रविः सोमः क्षितिः सर्वजनेश्वरी ।
गन्धर्वाप्सरसः सिद्धाः सर्वे तत्र समाययुः ॥ १९
देवर्षयः समाजग्मुस्तथा ब्रह्मर्षयो नृप ।
धनाध्यक्षोऽभवत्तस्य पुत्रस्तु नलकूबरः ॥ २०
रक्षायां वीरभद्रोऽभूत् सेवायाञ्च गजाननः ।
तथा मरुद्गणाः सर्वे परिवेषणकारिणः ॥ २१

बाहुलेयः सभापूजामकरोद्धर्मतत्परः।
घण्टानादः पार्श्वमौलिः कुबेरस्य तु मन्त्रिणौ।
सर्वशास्त्रविदां श्रेष्ठौ दानाध्यक्षौ बभूवतुः॥ २२
एवं हि विधिवद्यज्ञो बभूव परमोत्सवः॥ २३
अध्वरावभृथस्नातो राजराजो महामनाः।
परं भागञ्च देवेभ्यो विप्रेभ्यो दक्षिणामदात्॥ २४
एवं पूर्णेऽध्वरे मुख्ये तुष्टे देवर्षिसत्तमे।
आजगामाथ दुर्वासा दण्डी छत्री जटाधरः॥ २५
क्रोधी कृशः पादुकाङ्घ्रिर्दीर्घश्मश्रुः कृशोदरः।
दर्भासनसमित्पात्रः मृगचर्मधरः परः॥ २६
तमागतं समागम्य पूजयित्वा विधानतः।
भयभीतः परिक्रम्य कुबेरः प्रणनाम ह॥ २७
अद्य मे सफलं जन्म सफलं मन्दिरञ्च मे।
अद्य मे सफलो यज्ञो ब्रह्मंस्त्वय्यागते सति॥ २८
इत्थं सन्तोषितस्तेन दुर्वासा भगवान् मुनिः।
देवं मनुष्यधर्माणं प्राह प्रहसिताननः॥ २९
त्वं राजराजो धर्मात्मा दानी विप्रपरायणः।
कृतस्ते वैष्णवो यज्ञो विष्णुसन्तोषकारणः॥ ३०
न याचितो मया त्वं वै क्वापि वै श्रवण प्रभो।
अद्य वै याचनां कुर्वे ज्ञात्वा त्वां दानिसत्तमम्॥ ३१
मद्याच्ञां सफलीकुर्यास्तुभ्यं दास्यामि सद्वरम्।
नचेत्त्वां भस्मसात् कुर्वे शापेनातिभयेन वै॥ ३२
वर्तन्ते त्वद्गृहे सर्वे त्रैलोक्यनिधयो नव।
तान् मे प्रयच्छ भद्रं ते तदर्थं गतवानहम्॥ ३३

नारद उवाच

एतच्छ्रुत्वा राजराजो दानशील उदारधीः ।
ओमिति प्रतिगृह्णीष्व प्राह तं गुह्यकेश्वरः ॥ ३४
एवं निधीन् प्रदास्यन्तं दानाध्यक्षौ निधीश्वरम् ।
घण्टानादः पार्श्वमौलिरूचतुर्लोभमोहितौ ॥ ३५

द्वावूचतुः

एकोऽयं ब्राह्मणो लोभी निधिभिः किं करिष्यति ।
लक्षं दिव्यं देहि चास्मै वृत्तिं रक्ष तथोत्तराम् ॥ ३६

नारद उवाच

तद्वचः परुषं श्रुत्वा दुर्वासाः क्रोधविग्रहः ।
भ्रूभङ्गकुटिलीभूते रक्तनेत्रे चकार ह ॥ ३७
स्थालीव सर्वब्रह्माण्डं चचाल निमिषद्वयम् ।
प्रणतं धनदं वीक्ष्य ताभ्यां शापं महामुनिः ॥ ३८

मुनिरुवाच

घण्टानाद महादुष्ट पापबुद्धेऽतिलुब्धक ।
ग्राहवत्त्वं धनग्राही ग्राहो भव महाखल ॥ ३९
पार्श्वमौले पापबुद्धे धनलोभमदान्वितः ।
गजवत् प्रेरणां कुर्वंस्त्वं गजो भव दुर्मते ॥ ४०

नारद उवाच

ताभ्यां शापं मुनिर्दत्वा निधीन् नीत्वा कुबेरतः ।
वरं ददौ पुनस्तस्मै दुर्वासा दुर्लभं परम् ॥ ४१
अस्माद्दानाच्च द्विगुणा भवन्तु निधयो नव ।
इत्युक्त्वा सनिधिः प्रागादहो तेजीयसां बलम् ॥ ४२

इति श्रीगर्गसंहितायां द्वारकाखण्डे नारदबहुलाश्वसंवादे
गोमत्युपाख्याने चक्रतीर्थमाहात्म्यं नाम
दशमोऽध्यायः ॥ १०

नारद उवाच

कुबेरमन्त्रिणौ दीनौ विप्रशापविमोहितौ ।
तत्र साक्षात् स्वयं विष्णुः प्राह तौ शरणं गतौ ॥ १

भगवानुवाच

मदर्चासंयुते यज्ञे भवतां दुःखसंयुतौ ।
ब्राह्मणानां वचोऽहं वै दूरीकर्तुं न च क्षमः ॥ २
भवेतां ग्राहमातङ्गौ युद्धं हि युवयोर्यदा ।
तदा वै मत्प्रसादेन प्रकृतिं स्वां गमिष्यथः ॥ ३

नारद उवाच

इत्युक्तौ हरिणा तौ द्वौ राजराजस्य मन्त्रिणौ ।
बभूवतुर्ग्राहगजौ जातिस्मरणसंयुतौ । ४
घण्टानादोऽभवद्ग्राहो गोमत्याञ्च शतं समाः ।
विकरालो महाभीम. शतहस्तवपुर्धरः ॥ ५
पार्श्वमौलिर्गजेन्द्रोऽभूद्रैवतस्य गिरेर्वने ।
चतुर्दन्तः कज्जलाभः पृष्ठप्रोच्चो धनुःशतम् ॥ ६
वकुलैः कुरवै. कुन्दैर्बदरैर्वेत्रवेणुभिः ।
रम्भाभूर्जवटैर्युक्ते कोविदारासनार्जुनैः ॥ ७
मन्दारपाटलाशोकनूतचम्पकचन्दनैः ।
पनसोदुम्बराश्वत्थखर्जूरैर्बीजपूरकै. ॥ ८
प्रियालाम्रातकाम्रैश्च क्रमुकैः परिमण्डिते ।
रैवतस्य वने दीर्घे विचचार महागजः ॥ ९
एकदा माधवे मासि गजेन्द्रो गिरिगह्वरात् ।
स्नातुं तां गोमतीं गङ्गामाययौ सगणो नदन् ॥ १०

चिरं समवगाह्याप्सु शुण्डादण्डैरितस्ततः ।
करेणुकलभान् सर्वान् स्नापयामास नागराट् ॥ ११
महान् ग्राहोऽपि तत्रस्थो बलीयान् दैवनोदितः ।
अग्रहीच्चरणे नागं क्रोधपूरितविग्रहः ॥ १२
तेनैव तद्गृहे नीतो गजेन्द्रो बलदर्पितः ।
तमाकृष्य बहिः प्राप्तं पुनस्तेन विकर्षितः ॥ १३
करेणवश्च कलभास्तं तारयितुमक्षमाः ।
एवं तयोर्युध्यतोश्च कर्षतोऽन्तर्बहिर्मिथः ॥ १४
पञ्चाशत्पञ्चवर्षाणि व्यतियुः पश्यतां सताम् ।
एवं कश्मलमापन्नो गजो जातिस्मरो महान् ॥ १५
प्रेमलक्षणया भक्त्या हरिपादकृताश्रयः ।
सस्मार श्रीहरिं देवं मृत्युपाशवशं गतः ॥ १६

गजेन्द्र उवाच

श्रीकृष्ण कृष्णसख कृष्णवपुर्दधान
कृष्णाय ते प्रणतिरस्तु सुरेश विष्णो ।
पूर्ण प्रभो परमपावन पुण्यकीर्ते
मां पाहि पाहि परमेश्वर पापपाशात् ॥ १७

नारद उवाच

एवं ग्राहगृहीताङ्गं स्मरन्तञ्च हरिं हरिः ।
ज्ञात्वारुह्य खगं वेगादधावद् दीनवत्सलः ॥ १८
स्वयं खगात् समुत्तीर्य्य धावंश्चक्रं समाक्षिपत् ।
चक्रप्राप्तेः पूर्वमेव ग्राहस्यापि शिरो द्रुतम् ।
दैन्यं प्राप्ते धनमिव देहाद् भिन्नं बभूव ह ॥ १९
पश्चात् प्रपतितं चक्रं गोमत्याञ्च ह्रदे नदत् ।
पाषाणनिचयान् सर्वान् चक्राकारान् चकार ह ॥ २०

तन्नेमिसङ्घर्षभवं चक्रतीर्थं शुभावहम् ।
तच्चक्रदर्शनाद्राजन् ब्रह्महत्या प्रमुच्यते ॥ २१
ग्राहश्छिन्नशिरा भूत्वा पूर्वरूपं दधार ह ।
श्रीकृष्णानुग्रहाद्धस्ती दिव्यरूपो बभूव सः ॥ २२
परिक्रम्य हरिं नत्वा स्तुत्वा देव कृताञ्जलिः ।
कुबेरं मन्त्रिणौ तौ द्वौ जग्मतुः स्वपद पुनः ॥ २३
देवेषु पुष्पं वर्षत्सु जयध्वनिनदत्सु च ।
जगाम भगवान् साक्षात् स्वं धाम प्रकृतेः परम् ॥ २४
चक्रतीर्थकथामेनां यः शृणोति नरोत्तमः ।
चक्रतीर्थस्नानफलं संप्राप्नोति न संशयः ॥ २५
गजग्राहकथां पुण्यां यः शृणोति समाहितः ।
दुःस्वप्नं नश्यते तस्य सुस्वप्नं भवति ध्रुवम् ॥ २६
श्रीकृष्णस्य प्रसादेन याति विष्णो. परं पदम् ॥ २७

इति श्रीगर्गसंहितायां द्वारकाखण्डे नारदबहुलाश्वसंवादे
चक्रतीर्थोत्पत्तौ गजग्राहमोक्षो नाम
एकादशोऽध्यायः ॥ ११

नारद उवाच

शङ्खोद्धारे तीर्थमुख्ये स्वर्णदानं ददाति यः ।
स गच्छेद्वैष्णव लोकं सर्वोपद्रववर्जितम् ॥ १
श्रीकृष्णभक्तः शान्तात्मा त्रितो नाम महामुनिः ।
तीर्थयात्राप्रसङ्गेन प्राप्त आनर्तभूमिषु ॥ २
दृष्ट्वा शुभं सरः स्नात्वा हरेः पूजां चकार ह ।
तत्पूजायां महाशङ्खं पायसस्राविनं स्वतः ॥ ३
चोरयामास कक्षीवांस्तस्य शिष्योऽतिलोभतः ।
पूजाशङ्खं गतं वीक्ष्य क्रुद्धः प्राह त्रितो मुनिः ॥ ४
येन नीतस्तु मे शङ्खः स शङ्खो भवतु ध्रुवम् ।
तदैव शङ्खरूपोऽभूत् कक्षीवान् शापपीडितः ॥ ५
तत्पादयोर्निपतितः पाहि मामित्युवाच ह ।
शीघ्रं शान्तस्त्रितः प्राह दुर्मते किं कृतं त्व
स्तेयदोषाद्भुङ्क्ष्व पापं मद्वचो नो मृषा भवेत्
भज श्रीकृष्णपादाब्जं स ते मोक्षं करिष्यति ।
इत्युक्त्वाथ गते राजंस्त्रिते देवे महामुनौ ॥ ७
सरोवरे निपतितः कक्षीवान् शङ्खरूपधृक् ।
प्रवदन् कृष्ण कृष्णेति शतवर्षं स्थितोऽभवत् ॥ ८
परिपूर्णतमः साक्षाद्भगवान् भक्तवत्सलः ।
आगत्य सरसस्तीरं मा भैष्टेत्यभयं ददौ ॥ ९
तां मेघनादगम्भीरां गिरं श्रुत्वा जलेचरः ।
चुक्रोश पाहि पाहीति देवदेव जगत्पते ॥ १०
भुजगेन्द्रभोगरुचा भुजेन भगवान् प्रभुः ।
शङ्खं भक्तं गजमिव प्रोज्जहार दयापरः ॥ ११

तदैव दिव्यरूपोऽभूच्छङ्खरूप विहाय सः ।
कृताञ्जलिर्हरिं नत्वा स्तुतिं चक्रे तदार्द्रदृक् ॥ १२

कक्षीवानुवाच

वासुदेव नमस्तेऽस्तु गोविन्द पुरुषोत्तम ।
दीनवत्सल दीनेश द्वारकेश परेश्वर ॥ १३
ध्रुवे ध्रुवपदं दात्रे प्रह्लादस्यार्त्तिहारिणे ।
गजस्योद्धारिणे तुभ्यं बलेर्बलिविदे नमः ॥ १४
द्रौपदीचीरसन्तानकारिणे हरये नमः ।
गराग्निवनवासेभ्यः पाण्डवानां सहायिने ॥ १५
यादवत्राणकर्त्रे च शक्रादाभीररक्षिणे ।
गुरुमातृद्विजानाञ्च पुत्रदात्रे नमो नमः ॥ १६
जरासन्धनिरोधार्तनृपाणां मोक्षकारिणे ।
नृगस्योद्धारिणे साक्षात् सुदाम्नो दैन्यहारिणे ॥ १७
वासुदेवाय कृष्णाय नमः सङ्कर्षणाय च ।
प्रद्युम्नायानिरुद्धाय चतुर्व्यूहाय ते नमः ॥ १८

त्वमेव माता च पिता त्वमेव
त्वमेव बन्धुश्च सखा त्वमेव ।
त्वमेव विद्या द्रविणं त्वमेव
त्वमेव सर्वं मम देवदेव ॥ १९

नारद उवाच

एवं स्तुत्वा हरिं राजन् कक्षीवान् प्रेमपूरितः ।
विमानवरमास्थाय यादवानाञ्च पश्यताम् ॥ २०
विभ्राजयन् दशदिशः शतसूर्यसमप्रभः ।
जगाम वैष्णवं लोकं सर्वोपद्रववर्जितम् ॥ २१

शङ्खोद्धारः कृतो यस्मिन् हरिणा मैथिलेश्वर ।
तस्मात्तीर्थं महापुण्यं शङ्खोद्धारप्रथां गतम् ॥ २२
शङ्खोद्धारकथामेतां यः शृणोति नरोत्तमः ।
शङ्खोद्धारस्नानफल लभते वै न संशयः ॥ २३

इति श्रीगर्गसंहितायां द्वारकाखण्डे नारदबहुलाश्व-
सवादे शङ्खोद्धारमाहात्म्यं नाम
द्वादशोऽध्यायः ॥ १२

नारद उवाच

प्रभासस्यापि माहात्म्यं शृणु राजन् महामते ।
सर्वपापहरं पुण्यं तेजसां वर्द्धनं परम् ॥ १
गोदावर्यां गुरौ सिंहे हरक्षेत्रे च कुम्भगे ।
रविग्रहे कुरुक्षेत्रे काश्यां चन्द्रग्रहे तथा ॥ २
यत्पुण्य लभते राजन् स्नानतो दानतो नरः ।
तस्माच्छतगुणं पुण्यं प्रभासे च दिने दिने ॥ ३
यत्र स्नात्वा दक्षशापाद्गृहीतो यक्ष्मणोडुराट् ।
विमुक्तः किल्विषात् सद्यो भेजे भूयः कलोदयम् ॥ ४
महापुण्यतमा राजन् यत्र प्रत्यक्सरस्वती ।
तस्यां स्नात्वा नरः पापी साक्षाद् ब्रह्ममयो भवेत् ॥ ५
तत्तीरे वर्तते राजन्नाम्ना वै बोधिपिप्पलः ।
कृष्णेन यत्रोद्धवाय दत्तं भागवतं शुभम् ॥ ६
तं नत्वाभ्यर्च्य विधिवत् स्पृष्ट्वा श्रीबोधिपिप्पलम् ।
शृणोति यो भागवतं पुराणं ब्रह्मसम्मितम् ॥ ७
श्लोकार्धं श्लोकपादं वा मौनी नियतमानसः ।
तस्य पाणौ भवेद्राजन् वैष्णवं परमं पदम् ॥ ८
प्रौष्ठपद्यां पूर्णिमायां हेमसिंहसमन्वितम् ।
ददाति यो भागवतं स याति परमां गतिम् ॥ ९
पुराणं न श्रुतं यैस्तु श्रीमद्भागवतं क्वचित् ।
तेषां वृथा जन्मगतं नराणां भूमिवासिनाम् ॥ १०

यैर्न श्रुतं भागवतं पुराणं
नाराधितो यैः पुरुषः पुराणः ।
हुतं मुखे नैव धरामराणां
तेषां वृथा जन्म गतं नराणाम् ॥ ११

द्वारावत्यां तीर्थराजं गोमतीसिन्धुसङ्गमम् ।
यत्र स्नात्वा नरो याति वैकुण्ठ विमलं पदम् ।। १२
शताश्वमेधजं पुण्यं गङ्गासागरसङ्गमे ।
तत्सहस्रगुणं प्रोक्तं गोमतीसिन्धुसङ्गमे ।। १३
अत्रैवोदाहरन्तीममितिहासं पुरातनम् ।
यस्य श्रवणमात्रेण पापपाशात् प्रमुच्यते ।। १४
आसीद् गजाह्वये वैश्यो राजमार्गपतिः परः ।
महागौरवसंयुक्तो निधीशो धनदो यथा ।। १५
वेश्याप्रसङ्गनिरतो विटगोष्ठीविशारदः ।
द्यूतक्रीडनकासक्तो लोभमोहमदान्वितः ।। १६
मृषावादी महादुष्टः कुकर्मनिरतः सदा ।
ब्राह्मणेभ्यो न पितृभ्यो न देवेभ्यो धनं ददौ ।। १७
हरेः कथां प्रेक्ष्य दूराद्दूरं वै निर्ययौ त्वरम् ।
पित्रोः सेवापि न कृता न पुत्रेभ्यो धनं ददौ ।। १८
त्यक्त्वा भार्यां प्रसन्नोऽभूद्धनाढ्यो दुर्मतिः खलः ।
वेश्याप्रसङ्गात्तस्यापि धनार्धं प्रक्षयं गतम् ।। १६
अर्धन्तु तस्करैर्नीतं किञ्चित् पृथ्व्यां गतं स्वतः ।
पुण्येन वर्द्धते लक्ष्मीः पापेन क्षीयते ध्रुवम् ।। २०
एवं स निर्धनो जातो वेश्यासक्तो महाखलः ।
तस्मिन् गजाह्वये रम्ये चौरकर्म चकार ह ।। २१
चौर्यकर्म प्रकुर्वन्तं बध्वा तं दामभिर्नृपः ।
देशान्निःसारयामास शन्तनुर्नृपतीश्वरः ।। २२
वनेऽपि निवसन् सोऽपि जीवहिंसां चकार ह ।
समा द्वादश तद्राज्ये न ववर्ष यदा घनः ।। २३
पश्चिमान्तु दिशं प्रागाद् वैश्यो दुर्भिक्षपीडितः ।
वने वै मारितः सोऽपि सिंहेन तलघाततः ।। २४

तदैव यमदूतास्तं बध्वा पाशैरधोमुखम् ।
कशाघातैस्ताडयन्तो निन्युर्मार्गे यमस्य च ॥ २५
अथ कश्चिन्महागृध्रो मांसं तस्य भुजस्य च ।
गृहीत्वा खं गतः सद्यः खादश्चञ्चुपुटेन तम् ॥ २६
निरामिषाः खगाश्चान्ये सामिषं जघ्नुरातुराः ।
एवं कोलाहले जाते कङ्कचिल्लादिभिः कृते ॥ २७
न जहौ मुखतो मांसं पश्चिमाशां जगाम ह ।
तत्समेनापि गृध्रेण तीक्ष्णतुण्डेन ताडितात् ॥ २८
तन्मुखात् प्रापतन् मांसं गोमतीसिन्धुसङ्गमे ।
तीर्थप्लुते तस्य मांसे वैश्योऽयं पातकी महान् ॥ २९
तेषां पाशचयं छित्त्वा भूत्वा देवश्चतुर्भुजः ।
पश्यतां यमदूतानां विमानमधिरुह्य सः ॥ ३०
विराजयन् दिशः सर्वाः परं धाम हरेर्ययौ ॥ ३१
गोमतीसिन्धुसङ्गस्य माहात्म्यं शृणुते नरः ।
सर्वपापविनिर्मुक्तो विष्णुलोकं प्रयाति सः ॥ ३२

इति श्रीगर्गसंहितायां द्वारकाखण्डे नारदबहुलाश्व-
संवादे प्रभाससरस्वतीबोधपिप्पलगोमती-
सिन्धुसङ्गममाहात्म्यं नाम
त्रयोदशोऽध्यायः ॥ १३

नारद उवाच

द्वारावत्याः समुद्रस्य माहात्म्यं शृणु मानद ।
सर्वपापहरं पुण्यं तत्स्नानं फलदं स्मृतम् ॥ १
माधव्यां पौर्णमास्यां यो व्रती स्नात्वा नदीपतिम् ।
नत्वा सम्पूज्य विधिवद्रत्नदानं करोति च ॥ २
तस्य देहे त्रयो देवा निवसन्ति महीपते ।
यस्य दर्शनमात्रेण नरो याति कृतार्थताम् ॥ ३
तद्देहस्पर्शनात् सद्यो ब्रह्महत्या प्रमुच्यते ।
यत्र यत्र गतः सोऽपि तत्र तत्र च भूः शुभा ॥ ४
दृष्ट्वा तञ्च मृतः पापी जगद्वधकरोऽपि हि ।
छिनत्ति पापपटलं परं मोक्षं प्रयाति हि ॥ ५
रैवतस्याथ शैलस्य माहात्म्यं शृणु मानद ।
सर्वपापहरं पुण्यं भुक्तिमुक्तिप्रदायकम् ॥ ६
गौतमस्य सुतो धीमान् मेधावी नाम वैष्णवः ।
विन्ध्याचले तपस्तेपे वर्षाणामयुतं शतम् ॥ ७
तं द्रष्टुमागतः साक्षादपान्तरतमो मुनिः ।
नोच्चचालासनात् सोऽपि मेधावी तपसोत्कटः ॥ ८
अपान्तरतमस्तं वै शशाप क्रोधपूरितः ।
सतामभक्त पापात्मन् स्वतपोबलगर्वितः ॥ ९
शैलवत्ते स्थितिश्चात्र त्वं शैलो भव दुर्मते ।
इत्युक्त्वाथ गते साक्षादपान्तरतमे मुनौ ॥ १०
मेधावी शैलतां प्राप्तः श्रीशैलस्य सुतोऽभवत् ।
जातिस्मरो महाबुद्धिर्विष्णुभक्तिप्रभावतः ॥ ११

एकदा मन्मुखाच्छ्रुत्वा माहात्म्यं द्वारकापुरः ।
तत्र वासोऽपि मे भूयात्तेन मोक्षं व्रजाम्यहम् ॥ १२
कथं मे गमनं तस्यामिति बुद्ध्या विचारयन् ।
मां प्राह सोऽपि राजानं रैवतं गच्छ सत्वरम् ॥ १३
वद मत्प्रार्थनामुक्तां त्वं महादीनवत्सलः ।
सोऽयं महाबलो राजा प्रसन्नो यदि वा भवेत् ॥ १४
तेन नीतस्य मे वासो भविष्यति हरेः पुरि ।
इति श्रुत्वा मया विष्णुभक्तानां शान्तिकारिणा ॥ १५
रैवतायाशु कथित तेनोक्तं परमं वचः ।
स प्रसन्नः प्राह राजन् अत्र कोऽपि न पर्वतः ॥ १६
तत्स्थापनां करिष्यामि समुत्पाट्य भुजाबलात् ।
समुन्नीय द्वारकायां प्रतिज्ञामकरोदिमाम् ॥ १७
एकस्मिंस्तं चोरयितुं प्रयाते नृपसत्तमे ।
तत्पूर्वस्मादहं प्राप्तः श्रीशैलस्य पुरे नृप ॥ १८
कलिप्रियेणापि मया श्रीशैलाय महात्मने ।
कथितः सर्ववृत्तान्तो नृपचौर्यसमन्वितः ॥ १९
श्रीशैलः पुत्रं मोहेन निर्भर्त्स्यैश्च क यासि हि ।
सुमेरुं गिरिराजञ्च हिमवन्तं नगेश्वरम् ॥ २०
श्रीशैलः प्राह धर्मात्मा पुत्रस्नेहसमाकुलः ।
एको दैवेन दत्तोऽयं न पुत्रा बहवश्च मे ॥ २१
तं हर्तुमागते राज्ञि रैवते वै महाबले ।
विदेशं याति पुत्रो मे तेन राज्ञा महात्मना ॥ २२
पुत्रस्नेहाभिभूतोऽहं युवयोः शरणं गतः ।
जित्वा तं रैवतं शीघ्रं पुत्रं मां दातुमर्हथः ॥ २३
जातेश्च कारणात्तौ द्वौ सुमेरुश्च हिमाचलः ।
शैललक्षैः परिवृतौ योद्धुमाजग्मतुर्द्रुतम् ॥ २४

ततो भुजाभ्यामुत्पाट्य हनुमानिव तं गिरिम् ।
ऊर्ध्वं कृत्वा बलाद्राजा यदा गन्तुं मनोदधे ॥ २५
तदैव चागतान् वीक्ष्य गिरीन् शस्त्रास्त्रधारिणः ।
अट्टहासं चकारोच्चैस्तडित्पातमिवात्मनः ॥ २६
ननाद तेन ब्रह्माण्डं सप्तलोकैर्बिलैः सह ।
तदैव तेषां शस्त्राणि हस्तेभ्यो न्यपतन् स्वतः ॥ २७
निःशस्त्रास्ते यदा शैलाः कुर्वन्तः प्रध्वनिं मुहुः ।
गच्छन्त सगिरिं तेऽमुष्टिभिर्जानुभिः पथि ॥ २८
यथासुरा हनूमन्तमनुयाता महाबलम् ।
तैस्ताडितोऽपि न जहौ गिरिं राजा कराग्रतः ॥ २९
मन्मुखाच्छ्रीहरिः श्रुत्वा शैलोद्योगं नृपोपरि ।
सद्यो भक्तसहायार्थं भगवान् भक्तवत्सलः ॥ ३०
आगत्याकाशमार्गेऽपि दत्त्वा तेजः स्वकं परम् ।
मा भैष्टेत्यभयं दत्त्वा त्वरमन्तरधीयत ॥ ३१
गते हरौ भगवति भगवत्तेजसान्वितः ।
एकहस्ते गिरिं धृत्वा मुष्टिना वज्रपातिना ॥ ३२
सुमेरुं संतताडाशु वज्रीव बलवत्तरः ।
तस्य मुष्टिप्रहारेण मेरुर्विह्वलतां गतः ॥ ३३
हिमवन्त बाहुवेगात् पातयित्वा महीतले ।
ममर्द पद्भ्यां चान्यांश्च विन्ध्यादीन् रणदुर्मदः ॥ ३४
विन्ध्यादयश्च ते सर्वे पादघातेन मर्दिताः ।
भयभीता रणं त्यक्त्वा दुद्रुवुस्ते दिशो दश ॥ ३५
एवं जित्वा शैलसङ्घं तं शैलं शैलसन्निभः ।
रैवतोऽपि जयारावैरानर्त्तेषु न्यपातयत् ॥ ३६
सोऽभूद्रैवतनामापि राजन् रैवतकोऽचलः ।
हरिभक्तः शैलमुख्यो द्वारावत्यां विराजते ॥ ३७

तस्य दर्शनमात्रेण ब्रह्महत्या प्रमुच्यते ।
स्पर्शनाच्छतयज्ञानां फलमाप्नोति मानवः ॥ ३८
यात्रां कृत्वापि यस्यापि परिक्रम्य नताननः ।
भोजनं ब्राह्मणे दत्त्वा याति विष्णोः परं पदम् ॥ ३९

इति श्रीगर्गसंहितायां द्वारकाखण्डे नारदबहुलाश्व-
संवादे रत्नाकररैवतकाचलमाहात्म्यं नाम
चतुर्दशोऽध्यायः ॥ १४

नारद उवाच

तस्मिन् गिरौ यज्ञतीर्थं रैवतेन कृतं पुरा।
यत्र कृत्वा यज्ञमेकं कोटियज्ञफलं लभेत् ॥ १
कपिटङ्क नाम तीर्थं कपिपातसमुद्भवम्।
गिरौ रैवतके राजन् सर्वपापप्रणाशनम् ॥ २
भौमासुरसखो दुष्टो द्विविदो नाम वानरः।
मारितो यत्र रामेण मुष्टिना वज्रपातिना ॥ ३
सद्यो मुक्तिं गतः सोऽपि सतां हेलनवानपि।
तत्र स्नातु सदा देवा आगच्छन्ति नरेश्वर ॥ ४
कलिङ्कस्य यात्रायां कोटिगोदानजं फलम्।
एतच्च द्विगुणं पुण्यं दण्डकाख्ये वने शुभे ॥ ५
तस्माच्चतुर्गुणं पुण्यं सैन्धवाख्ये महावने।
जम्बुमार्गे पञ्चगुणं पुण्यं प्राप्नोति मानवः ॥ ६
तस्माद्दशगुणं पुण्यं पुष्कराख्ये वने स्मृतम्।
तस्माद्दशगुणं पुण्यमुत्पलावर्तयात्रया ॥ ७
तस्माच्च नैमिषारण्ये पुण्यं दशगुणं स्मृतम्।
तस्माच्छतगुणं पुण्यं कपिटङ्क विदेहराट् ॥ ८
नृगकूपं द्वारकायां तीर्थानां तीर्थमुत्तमम्।
यस्य दर्शनमात्रेण विप्रवध्यात् प्रमुच्यते ॥ ९
अज्ञानाद् ब्राह्मणस्यापि गां ददौ ब्राह्मणाय सः।
तेन पापेन कूपे वै कृकलासवपुर्धरः ॥ १०
नृगोऽपि दानिनां श्रेष्ठः पतितोऽथ चतुर्युगम्।
श्रीकृष्णेन तदुद्धारः कृतो वै पश्यतां सताम् ॥ ११

तद्दिनान्नृगकूपस्तु तीर्थीभूतो महीपते ।
कार्तिके पूर्णिमायान्तु तस्मिन् स्नानं समाचरेत् ॥ १२
कोटिजन्मकृतात् पापान्मुच्यते नात्र संशयः ।
एकं यत्रापि गोदानं करोति विधिवन्नरः ॥ १३
कोटिगोदानजं पुण्यं लभते वै न संशयः ।
गोपीभूमेश्च माहात्म्यं शृणु पापहरं परम् ॥ १४
यस्य श्रवणमात्रेण कर्मबन्धात् प्रमुच्यते ।
गोपीनां यत्र वासोऽभूत्तेन गोपीभुवः स्मृताः ॥ १५
गोप्यङ्गरागसम्भूतं गोपीचन्दनमुत्तमम् ।
गोपीचन्दनलिप्ताङ्गो गङ्गास्नानफलं लभेत् ॥ १६
महानदीनां स्नानस्य पुण्यं तस्य दिने दिने ।
गोपीचन्दनमुद्राभिर्मुद्रितो यः सदा भवेत् ॥ १७
अश्वमेधसहस्राणि राजसूयशतानि च ।
सर्वाणि तीर्थदानानि व्रतानि च तथैव च ।
कृतानि तेन नित्यं वै स कृतार्थो न संशयः ॥ १८
गङ्गामृद्द्विगुणं पुण्यं चित्रकूटरजः स्मृतम् ।
तस्माद्दशगुणं पुण्यं रजः पञ्चवटीभवम् ॥ १९
तस्माच्छतगुणं पुण्यं गोपीचन्दनकं रजः ।
गोपीचन्दनकं विद्धि वृन्दावनरजः समम् ॥ २०
गोपीचन्दनलिप्ताङ्गो यदि पापशतैर्युतः ।
तं नेतुं न यमः शक्तो यमदूतः कुतः पुनः ॥ २१
नित्यं करोति यः पापी गोपीचन्दनधारणम् ।
स प्रयाति हरेर्धाम गोलोकं प्रकृतेः परम् ॥ २२
सिन्धुदेशस्य राजाभूद्दीर्घबाहुरिति श्रुतः ।
अन्यायवर्ती दुष्टात्मा वेश्यासङ्गरतः सदा ॥ २३

तेन वै भारते वर्षे ब्रह्महत्याशतं कृतम् ।
दशगर्भवतीहत्या कृता तेन दुरात्मना ॥ २४
मृगयायान्तु बाणौघैः कपिलागोवधः कृतः ।
सैन्धवं हयमारुह्य मृगयार्थी गतोऽभवत् ॥ २५
एकदा राज्यलोभेन मन्त्री क्रुद्धो महाखलम् ।
जघानारण्यदेशे तं तीक्ष्णधारेण चासिना ॥ २६
भूतले पतितं मृत्युं गत वीक्ष्य यमानुगाः ।
बध्वा यमपुरीं निन्युर्हर्षयन्तः परस्परम् ॥ २७
सम्मुखेऽवस्थितं वीक्ष्य पापिनं यमराड् बली ।
चित्रगुप्तं प्राह तूर्णं का योग्या यातनास्य वै ॥ २८

चित्रगुप्त उवाच

चतुरशीतिलक्षेषु नरकेषु निपात्यताम् ।
निःसन्देहं महाराज यावच्चन्द्रदिवाकरौ ॥ २९
अनेन भारते वर्षे क्षणं न सुकृत कृतम् ।
प्रजापीडा बहुकृता वेश्यासङ्गः कृतोऽनिशम् ॥ ३०
अनेन धनलोभेन ब्रह्महत्याशतं कृतम् ।
दशगर्भवतीघातः कपिलागोवध. कृतः ॥ ३१
तथा वन्मृगाणाञ्च कृता हत्याः सहस्रशः ।
तस्मादयं महापापी देवताद्विजनिन्दकः ॥ ३२

नारद उवाच

तदा यमाज्ञया दूता नीत्वा तं पापरूपिणम् ।
सहस्रयोजनायामे तप्ततैले महाखले ॥ ३३
स्फुरदग्न्युच्छलत्फेने कुम्भीपाके न्यपातयन् ।
प्रलयाग्निसमो वह्निः सद्यः शीतलतां गतः ॥ ३४

वैदेह तन्निपतनात् प्रह्लादक्षेपणाद् यथा ।
तदैव चित्रमाचख्युर्यमदूता महात्मने ॥ ३५

अनेन सुकृतं भूमौ क्षणं न कृतं क्वचित् ।
चित्रगुप्तेन सततं धर्मराजो व्यचिन्तयत् ॥ ३६

सभायामागतं व्यासं सम्पूज्य विधिवन्नृप ।
नत्वा पप्रच्छ धर्मात्मा धर्मराजो महामतिः ॥ ३७

यम उवाच

अनेन पापिना पूर्वं न कृतं सुकृतं क्वचित् ।
स्फुरदग्न्युच्छलत्फेने कुम्भीपाके महाखले ॥ ३८

अस्य क्षरणतो वह्निः सद्यः शीतलतां गतः ।
इति सन्देहतश्चेतः खिद्यते मे न संशयः ॥ ३९

व्यास उवाच

सूक्ष्मा गतिर्महाराज विदिता पापपुण्ययोः ।
तथा ब्रह्मगतिः प्राज्ञैः सर्वशास्त्रविदां वरैः ॥ ४०

दैवयोगादस्य पुण्यं प्राप्तं वै स्वयमर्थवत् ।
येन पुण्येन शुद्धोऽसौ तच्छृणु त्वं महामते ॥ ४१

कस्यापि हस्ततो यत्र पतितं द्वारकारजः ।
तत्रैवायं मृतः पापी शुद्धोऽभूत्तत्प्रभावतः ॥ ४२

गोपीचन्दनलिप्ताङ्गो नरो नारायणो भवेत् ।
तस्य संदर्शनात् सद्यो ब्रह्महत्या प्रमुच्यते ॥ ४३

नारद उवाच

इति श्रुत्वा धर्मराजस्तमानीय विशेषतः ।
विमाने कामगे स्थाप्य वैकुण्ठं प्रकृतेः परम् ॥ ४४

प्रेषयामास सहसा गोपीचन्दनकीर्त्तिवित् ।
एवं ते कथितं राजन् गोपीचन्दनकं यशः ॥ ४५
गोपीचन्दनमाहात्म्यं यः शृणोति नरोत्तमः ।
स याति परमं धाम श्रीकृष्णस्य महात्मनः ॥ ४६

इति श्रीगर्गसंहितायां द्वारकाखण्डे नारदबहुलाश्व-
संवादे कपिटङ्कनृगगोपीभूमिमाहात्म्यं नाम
पञ्चदशोऽध्यायः ॥ १५

नारद उवाच

सिद्धाश्रमस्य माहात्म्यं शृणु राजन् महामते ।
यस्य स्मरणमात्रेण सर्वपापैः प्रमुच्यते ॥ १

यत्स्पर्शनाद्धरेः साक्षान्न वियोगो भवेत् क्वचित् ।
तच्च सिद्धाश्रमं नाम वदन्तीह पुराविदः ॥ २

दर्शनाद् यस्य सालोक्यं सामीप्यं स्पर्शनात्तथा ।
सारूप्यं स्नानतो याति सायुज्यं तन्निवासतः ॥ ३

तत्तीर्थस्यापि माहात्म्यं श्रुत्वा चन्द्राननामुखात् ।
राधा स्नातुं मनश्चक्रे कृष्णविश्लेषविह्वला ॥ ४

श्रीसिद्धाश्रमयात्रायां सूर्यपर्वणि माधवे ।
राधा गन्तुं मनश्चक्रे उत्थाय कदलीवनात् ॥ ५
गोपीनां शतयूथेन सर्वगोपगणैः सह ।
शतवर्षे व्यतीते तु श्रीदाम्नः शापकारणात् ॥ ६
श्रीराधा शिविकारूढा छत्रचामरवीजिता ।
आनर्त्तेषु महातीर्थं ययौ सिद्धाश्रमं सती ॥ ७
तत्रैव भगवान् साक्षाद् यादवैः परिमण्डितः ।
स्त्रीणां षोडशसाहस्रैर्यात्रार्थं चाययौ नृप ॥ ८
बलिष्ठा ये च गोपालाः कोटिशः शस्त्रपाणयः ।
सिद्धाश्रमं ते जुगुपुः सर्वतो राधिकाज्ञया ॥ ९
शतयूथास्तथा गोप्यो वेत्रहस्ता महाबलाः ।
सिद्धाश्रमे च विधिवत् स्नान्तीं राधां सिषेविरे ॥ १०
द्वारकावासिनां तेषां स्थितानां स्नानमिच्छताम् ।
शस्त्रवेत्रैस्ताडितानां विविशुर्भगवत्स्त्रियः ॥ ११

केयं स्नातीति पप्रच्छुर्यस्या वैभवमद्भुतम् ।
यद्गौरवात् त्रसन्तीह सर्वयादवपुङ्गवाः ॥ १२
अहो कस्य प्रिया चेयं का नाम्नी कुत्र वासिनी ।
त्वं सर्वज्ञो हि भगवान् वद नो देवकीसुत ॥ १३

भगवानुवाच

वृषभानुसुता साक्षाद्राधेयं कीर्तिनन्दिनी ।
व्रजेश्वरी मद्दयिता गोपिकाधीश्वरी वरा ॥ १४
स्नातुं सिद्धाश्रमं प्राप्ता व्रजाद् गोपीगणैः सह ।
यद्गौरवात् त्रसन्त्येते तस्या वैभवमद्भुतम् ॥ १५
श्रीकृष्णस्य वचः श्रुत्वा सत्यभामाथ मानिनी ।
शनैः प्राह सपत्नीनां रूपयौवनगर्विता ॥ १६
किं नु राधा रूपवती नाहं रूपवती किमु ।
बहुभिर्याचिता पूर्वं रूपौदार्यगुणान्विता ॥ १७
मद्रूपकारणात् सख्यः शतधन्वा मृतोऽभवत् ।
अक्रूरः कृतवर्मा च पुरात्तौ द्वौ पलायितौ ॥ १८
दिने दिने स्वर्णभारानष्टौ स सृजति स्वतः ।
दुर्भिक्षमार्यरिष्टानि सर्वाधिव्याधयोऽशुभाः ॥ १९
न सन्ति मायिनस्तत्र यत्रास्तेऽभ्यर्चितो मणिः ।
मत्पित्रा पारिबर्हेऽपि दत्तः साक्षात् स्यमन्तकः ॥ २०
तेन जातं मद्गृहेऽपि सर्वं वैभवमद्भुतम् ।
प्रेम्णा परेण श्रीकृष्णगरुडोपरिगामिनी ॥ २१
भौमासुरमहायुद्धं दृष्टं प्राग्ज्योतिषं पुरम् ।
ममापि कृपया यूयं तत्पुराच्च समागताः ॥ २२
प्राप्ताः श्रीकृष्णपत्नीत्वं सर्वा एव न संशयः ।
मद्गौरवाच्च शक्राय छत्रं दत्तमनेन वै ॥ २३

कुण्डले देवमात्रे च दत्ते वै मत्प्रियेच्छया।
ऐरावतभवा नागा भौमासुरसमृद्धयः ॥ २४
मदिच्छया समानीताः श्रीकृष्णेन महात्मना।
मत्कारणान्महावैरं शक्रेऽपि कृतवान् हरिः ॥ २५
मद्द्वारे वर्तते नित्यं वृक्षेन्द्रः पारिजातकः।
पातिव्रत्येनैव मया श्रीकृष्णोऽयं वशीकृतः ॥ २६
सर्वोपस्करसंयुक्तो नारदाय समर्पितः।
मत्समानं न कस्यास्तु गौरवं वैभवं तथा ॥ २७
रूपौदार्यं न कस्यास्तु राधायाः किमु वर्णनम्।
यद्रूपोपरि चैद्याद्या अनेन युयुधुर्युधि ॥ २८
हे सुभ्रू रुक्मिणी सा त्वं कथं रूपवती नहि।
सा गोपकन्यका सख्यो यूयं वै राजकन्यकाः।
धन्या मान्याश्च सर्वा वै यूय मानवतीवराः ॥ २९
एवन्तु सत्यभामायां वदन्त्यां मैथिलेश्वर।
भूत्वा मानवतीः सर्वा रुक्मिण्याद्याः स्त्रियो वराः ॥ ३०
कुलकौशलशीलार्थरूपयौवनगर्विताः।
श्रीकृष्णं मानदं प्राहुरष्टपट्टमहास्त्रियः ॥ ३१

राज्ञ्य ऊचुः

श्रुतं तव मुखात् पूर्वं राधारूपं परं स्मृतम्।
यस्यां रक्तः सदा त्वं वै त्वयि रक्ता च या सदा ॥ ३२
तां राधां द्रष्टुमिच्छामस्त्वत्प्रियां व्रजवासिनीम्।
त्वद्वियोगेन संखिन्नां स्नातुं चात्र समागताम् ॥ ३३

नारद उवाच

तथास्तु चोक्त्वा श्रीकृष्णः पट्टस्त्रीपरिवेष्टितः।
षोडशस्त्रीसहस्राढ्यो द्रष्टुं राधां जगाम ह ॥ ३४

श्रीहेमशिबिरे रम्ये पताकाध्वजमण्डिते ।
चन्द्रमण्डलशोभाढ्ये वितानतनिते शुभे ॥ ३५
मुक्ताजवनिका यत्र यत्रोपस्तरणं शुभम् ।
मालतीमकरन्दाढ्यं सर्वतो गन्धसङ्कुलम् ॥ ३६
तेन भृङ्गावली चक्रे कलं कोलाहलं परम् ।
तत्र राधा पट्टराज्ञी श्रीकृष्णहृतमानसा ॥ ३७
हंसाभैर्व्यजनैर्दिव्यैर्वीज्यमाना सखीजनैः ।
छत्रदोलाधरैस्तत्र व्रजद्भिस्ताभितस्ततः ॥ ३८
बालार्ककुण्डलधरा विद्युद्धारमनोहरा ।
कोटिचन्द्रप्रतीकाशा तन्वी कोमलविग्रहा ॥ ३९
आगुल्फमग्नक्षितिजपुष्पभूमिं मनोहराम् ।
शनैः शनैः पादपद्मं धारयन्त्यतिकोमलम् ॥ ४०
दूरात् तां राधिकां प्रेक्ष्य कृष्णपत्न्यः सहस्रशः ।
जग्मुर्मूर्च्छां महाराज तद्रूपेणातिमोहिताः ॥ ४१
तत्तेजसा हतरुचः सूर्यात् तारागणा यथा ।
गतरूपाभिमानास्ता ऊचुः सर्वाः परस्परम् ॥ ४२
अहो एतादृशं रूपं त्रिलोक्यां नहि चाद्भुतम् ।
श्रुतं यथा तथा दृष्टमद्वितीयं मनोहरम् ॥ ४३
एवं वदन्त्यस्तां प्राप्ताः श्रीकृष्णस्य पुरःसराः ।
गोपीनां राजपुत्रीणां नेत्राणि परिरेभिरे ।
परमानन्दसञ्जातप्रेमोद्रेकाः पुनः पुनः ॥ ४४

इति श्रीगर्गसंहितायां द्वारकाखण्डे नारदबहुलाश्वसंवादे
सिद्धाश्रममाहात्म्ये राधारूपदर्शनं नाम
षोडशोऽध्यायः ॥ १६

नारद उवाच

श्रीकृष्णमागतं वीक्ष्य पट्टराज्ञीसमन्वितम् ।
तदा जयजयारावं चक्रुर्गोप्योऽतिहर्षिताः ॥ १
सहसा श्रीहरिं राधा परिक्रम्य कृताञ्जलिः ।
पद्माभाभ्यान्तु नेत्राभ्यामानन्दाश्रूणि मुञ्चती ॥ २
स्यमन्तकखचित्पादं चिन्तामणिखचित्तरम् ।
पद्मरागलसन्मध्यं चन्द्रमण्डलवर्तुलम् ॥ ३
कौस्तुभैः प्रखचित्पृष्ठं कुम्भमण्डलमण्डितम् ।
दत्त्वा सिंहासनं तस्मै प्राह प्रहसिताननः ॥ ४
अद्य मे सफलं जन्म अद्य मे सफलं तपः ।
अद्य मे सफलो धर्मो हरे त्वय्यागते सति ॥ ५
धन्यं सिद्धाश्रमस्नानं सफलीभूतमद्भुतम् ।
मयापि न कृता भक्तिस्तव भक्तसहायिनः ॥ ६
बहुधश्च सहाया मे त्वया देव कृता भुवि ।
कंसोऽपि लोकविजयी येन भीतो बभूव ह ॥ ७
स मारितो मद्धनाच्छङ्खचूडस्त्वया हरे ।
मत्प्रेम्णापि त्वया देव वैभवं दर्शितं व्रजे ॥ ८
शक्रस्य मानभङ्गोऽपि कृतो देव त्वया बलात् ।
मत्कारणाद् व्रजं रक्षन् धृत्वा गोवर्द्धनाचलम् ॥ ९
यथेच्छालिङ्गितो रासे गोपीभिस्त्वं वशीकृतः ।
इदं ते चरितं देव नरलोकविडम्बनम् ॥ १०

नारद उवाच

एवं वदन्ती सा राधा त्वरं चन्द्राननाज्ञया ।
सादरेण हरेः पत्नीर्वीक्ष्य ता गौरवं ददौ ॥ ११

भैष्मीं जाम्बवतीं भामां सत्यां भद्राञ्च लक्ष्मणाम् ।
कालिन्दीं मित्रविन्दाञ्च मिलित्वा सा परस्परम् ॥ १२
षोडशस्त्रीसहस्रञ्च रोहिणीमुखमेव च ।
प्रेमानन्दमयी दोर्भ्यां परिरेभे मुदान्विता ॥ १३

राधोवाच

चन्द्रो यथैको बहवश्चकोराः
सूर्यो यथैको बहवो दृशः स्युः ।
श्रीकृष्णचन्द्रो भगवांस्तथैको
भक्ता भगिन्यो बहवो वयञ्च ॥ १४
पद्मप्रभावं मधुपो यथा हि
रत्नप्रभावं किल तत्परीक्षकः ।
विद्याप्रभावञ्च यथा हि विद्वान्
काव्यप्रभावञ्च यथा कवीन्द्रः ॥ १५
यथा सहस्रेषु जनेषु सत्सु
रसप्रभावं रसिकस्तथा हि ।
जानाति तत्त्वेन नरेन्द्रपुत्र्यः
कृष्णप्रभावं भुवि कृष्णभक्तः ॥ १६

नारद उवाच

राधावाक्यं तदा श्रुत्वा रुक्मिणी भीष्मनन्दिनी ।
सपत्नीसहिता प्राह राधां कमललोचनाम् ॥ १७

रुक्मिण्युवाच

धन्यासि राधे वृषभानुपुत्रि
त्वद्भक्तिभावेन वशीकृतोऽयम् ।
वदत्यलं यस्य कथां त्रिलोकी
स एव वार्तां वदति त्वदीयाम् ॥ १८

श्रुतं यथा ते हरिभावलक्षणं
तथा हि दृष्टं नहि चित्रमेव हि ।
गच्छाशु चास्मच्छिबिराणि यत्र हि
त्वां नेतुमत्रागतवत्य आदृताः ॥ १९

नारद उवाच

एवमुक्त्वा भीष्मसुता राधां कीर्तिसुतां तदा ।
समानीय स्वशिबिरे सादरेण महात्मना ॥ २०
शिबिरे सर्वतोभद्रे पद्मकिञ्जल्कवासिते ।
हैमे शिरीषमृदुले पर्यङ्के सोपबर्हणे ॥ २१
सुखं निवासयामास वासःस्त्रङ्मण्डनादिभिः ।
सम्पूज्य विधिवद्रात्रौ सपत्नीसहिता सती ॥ २२
गोपीनां शतयूथश्च सम्पूज्य च पृथक् पृथक् ।
वार्तालापान् बहुविधान् कृत्वा कृष्णप्रियास्ततः ॥ २३
शाययित्वाथ तां जग्मुः स्वं स्वं वै शिबिरं मुदा ॥ २४
कृष्णपार्श्वं गता भैष्मी दृष्ट्वा जाग्रदुपस्थितम् ।
कथं न शेषे भो स्वामिन् इति कृष्णमुवाच ह ॥ २५
रुक्मिणीवचनं श्रुत्वा भगवान् वृजिनार्दनः ।
तूष्णीं भूत्वा क्षणं राजन् प्राह प्रहसिताननः ॥ २६

भगवानुवाच

प्रत्युद्गमप्रश्रयणैराश्वासेन व्रजेश्वरी ।
अर्चिता हि त्वया सुभ्रूः प्रसन्ना साभवत् परम् ॥ २७
सा च नित्यं हि पिबति शयनादौ पयः शुभम् ।
पयःपानं तु न कृतमद्य सुभ्रूस्तया किल ॥ २८
तेन निद्रा नयनयोर्न जातास्या महामते ।
तस्मान्ममापि प्रस्वापो न जातो भीष्मकन्यके ॥ २९

नारद उवाच

इति श्रुत्वा त्वरं भैष्मी सपत्नीभिः समन्विता ।
नीत्वा दुग्ध तत्समीपं प्रययौ परमादरात् ॥ ३०

उष्णं दुग्धं सितायुक्तं कचोले हैमने कृतम् ।
अपाययत् परं प्रीत्या राधां भीष्मकनन्दिनी ॥ ३१

एवमभ्यर्च्य विधिवद्दत्त्वा ताम्बूलवीटिकाम् ।
सत्यभामादिभिः शश्वत् सपत्नीभिः समन्विता ॥ ३२

आगत्य कृष्णसामीप्यं वदन्ती स्वकृतं शुभम् ।
भेजे श्रीरुक्मिणी साक्षाच्छ्रीकृष्णपदपङ्कजम् ॥ ३३

संलालयन्ती सततं कोमलैः करपल्लवैः ।
कृष्णपादतलोच्छालान् वीक्ष्य सा विस्मिताभवत् ॥ ३४

उच्छालकाः कथं जातास्तव पादतले प्रभो ।
अद्यैव भूता भगवन्न वेद्म्यत्र हि कारणम् ॥ ३५

षोडश स्त्रीसहस्राणां शृण्वन्तीनां हरिः स्वयम् ।
राधाभक्तिप्रकाशार्थं स हसन् प्राह रुक्मिणीम् ॥ ३६

भगवानुवाच

श्रीराधिकाया हृदयारविन्दे
पादारविन्दं हि विराजते मे ।
अहर्निशं प्रश्रयपाशबद्धं
लवं लवार्द्धं न चलत्यतीव ॥ ३७

अद्योष्णदुग्धप्रतिपानतोऽङ्घ्रा
वुच्छालकास्तेन ममोच्छलन्ति ।
मन्दोष्णमेवं नहि दत्तमस्यै
युष्माभिरुष्णन्तु पयः प्रदत्तम् ॥ ३८

नारद उवाच

श्रीकृष्णस्य वचः श्रुत्वा रुक्मिण्याद्याः स्त्रियो वराः ।
प्रेक्षमाणा विसृज्याथ विसिष्मुः सर्वतो नृप ॥ ३९

श्रीराधायाः परा प्रीतिर्माधवे मधुसूदने ।
तत्समाना नचैकैषा अद्वितीया महीतले ॥ ४०

इति श्रीगर्गसंहितायां द्वारकाखण्डे नारदबहुलाश्वसंवादे
सिद्धाश्रमे राधाकृष्णसमागमोराधाप्रेमप्रकाशो नाम
सप्तदशोऽध्यायः ॥ १७

नारद उवाच

श्रीराधायां परां प्रीतिं ज्ञात्वा गोपीगणेषु च ।
ऊचुर्हरिं राजपुत्र्यस्तद्रासप्रेक्षणोत्सुकाः ॥ १

पट्टराज्य ऊचुः

धन्या गोप्यस्तु ते भक्ताः प्रेमलक्षणसंयुताः ।
याः प्राप्ता रासरङ्गे वै तासां किं वर्ण्यते तपः ॥ २
वृन्दावने कृतो रासो विधिना येन माधव ।
तं विधिं द्रष्टुमिच्छामो यदि त्वं मन्यसे प्रभो ॥ ३
त्वञ्चात्रैव तथा राधा गोप्यः सर्वा व्रजाङ्गनाः ।
वयञ्चात्रैव देवेश रासो योग्यो भवेदिह ॥ ४
पूर्णं कुरु जगन्नाथ अस्माकन्तु मनोरथम् ।
कुतो मनोरथोऽन्योऽपि रासक्रीडां विना हरे ॥ ५
इति तासां वचः श्रुत्वा भगवान् प्रहसन्निव ।
प्राह ताः प्रेमसंयुक्तो गीर्भिः सम्मोहयन्निव ॥ ६

भगवानुवाच

रासेश्वर्यास्तु राधाया मनश्चेद्रन्तुमङ्गनाः ।
तदा रासो भवेदत्र भवतीभिस्तु पृच्छ्यताम् ॥ ७
इति श्रुत्वा वचस्तस्य रुक्मिण्याद्या नृपात्मजाः ।
राधामेत्य परं प्रेम्णा प्राहुः प्रहसिताननाः ॥ ८

राज्य ऊचुः

रम्भोरु चन्द्रवदने व्रजसुन्दरीशे
रासेश्वरि प्रियतमे सखि शीलरूपे ।
राधे सुकीर्ति कुलकीर्तिकरे शुभाङ्गे
त्वां प्रष्टुमागतवतीः सकला वयं स्म ॥ ९

रासेश्वरोऽपि किल चात्र रसप्रदायी
रासेश्वरी त्वमपि गोपवराङ्गनाश्च।
एवं वयं स्म इति सर्वविधौ रसार्थे
रासं कुरु प्रियतमेन तथा प्रियं नः॥ १०

राधोवाच

रासेश्वरस्य परमस्य सतां कृपालो
रन्तु मनो यदि भवेत्तु तदात्र रासः।
शुश्रूषया परमया परया च भक्त्या
सम्पूज्य तं किल वशीकुरुत प्रियं तम्॥ ११

नारद उवाच

राधाया वचनं श्रुत्वा श्रीकृष्णोक्तं तथावदन्।
तथास्तु चोक्त्वा सा राधा प्रसन्नाभून्महामनाः॥ १२
माधवे पूर्णिमायान्तु पुण्ये सिद्धाश्रमे शुभे।
प्रदोषकाले चन्द्राभे रासारम्भो बभूव ह॥ १३
रासेश्वरस्य रासार्थे रासेश्वर्या समन्वितः।
रराज रासे रसिको यथा रत्या रतीश्वरः॥ १४
यावत्यो गोपिकाः सर्वा यावत्यो राजकन्यकाः।
तावद्रूपधरो रेजे एकः कृष्णो द्वयोर्द्वयोः॥ १५
तालवेणुमृदङ्गानां कलकण्ठैः सखीजनैः।
कलनूपुरकाञ्चीनां मिश्रशब्दो महानभूत्॥ १६
कोटिकन्दर्पलावण्यः स्रग्वी कुण्डलमण्डितः।
पीताम्बरधरो राजन् किरीटकटकाङ्गदः॥ १७
रासेश्वर्या समं गायन् रासे रासेश्वरः स्वयम्।
स्त्रीगणैः सहितो राजंश्चन्द्रस्तारागणैर्यथा॥ १८
एवं सर्वा निशा राजन् क्षणवद्रासमण्डले।
व्यतीताभून्महाराज महानन्दमयी शुभा॥ १९

श्रीरासमण्डलं दृष्ट्वा रुक्मिण्याद्या स्त्रियो वराः ।
जग्मुस्ताः परमानन्दं सर्वाः पूर्णमनोरथाः ॥ २०
परिपूर्णतमं साक्षाच्छ्रीकृष्णं पुरुषोत्तमम् ।
रासान्ते रुक्मिणीमुख्याः प्राहुः प्रेमपरायणाः ॥ २१

राज्ञ्य ऊचुः

दृष्ट्वा त्वद्रूपमाधुर्यं रासरङ्गे मनोहरे ।
गतं मनो नः स्वानन्दं ब्रह्मानन्दं यथा मुनिः ॥ २२
एतादृशोऽपि रासोऽन्यो न भूतो न भविष्यति ।
शतयूथस्तु गोपीनामत्र माधव वर्तते ॥ २३
पत्न्यः षोडशसाहस्रं सखीभिः सहिता वयम् ।
सखीकोटियुताश्चात्र अष्ट पट्टमहास्त्रियः ॥ २४
वृन्दावनेऽपि नैतादृक् भूतो वा माधवेश्वर ।

नारद उवाच

एवं कृताभिमानानां राज्ञीनां प्रहसन् हरिः ।
प्राहेदं पृच्छ्यतां राधा भवतीभिः परस्परम् ॥ २५
सत्यभामादिकाः सर्वाः पृच्छन्ति राधिकां वराम् ।
किञ्चिद्धसन्ती मनसि प्राह राधा परं वचः ॥ २६

राधोवाच

ननु रासः परश्चात्र बहुस्त्रीगणसङ्कुलः ।
पूर्वरासममो न स्याद्यस्तु वृन्दावनेऽभवत् ॥ २७
क्व चात्र वृन्दारण्य तद्दिव्यद्रुमलताकुलम् ।
प्रेमभारानतलतं मधुमत्तमधुव्रतम् ॥ २८
पुष्पव्यूहान् वहन्ती या यथोष्णिङ्मुद्रिता शुभा ।
हंसपद्मसमाकीर्णा क्व चात्र यमुना नदी ॥ २९

एवं सिद्धाश्रमे रासं कृत्वा श्रीराधिकेश्वरः ।
नीत्वा गोपीगणान् सर्वान् राधया सहितो हरिः ॥ ४२
सभार्यो भगवान् साक्षाद् द्वारकां प्रविवेश ह ।
कारयामास राधायै मन्दिराणि पराणि च ॥ ४३
निवासयित्वा सुसुखं सर्वास्ताश्च व्रजौकसः ।
इत्थं सिद्धाश्रमकथा मया ते कथिता नृप ॥ ४४
सर्वपापहरा पुण्या सर्वेषाञ्चैव मोक्षदा ॥ ४५

इति श्रीगर्गसंहितायां द्वारकाखण्डे नारदबहुलाश्व-
संवादे सिद्धाश्रमे रासोत्सवो नाम
अष्टादशोऽध्यायः ॥ १८

नारद उवाच

द्वारावतीमण्डलन्तु शतयोजनविस्तृतम् ।
तस्य प्रदक्षिणा सर्वा योजनानां चतुःशतम् ॥ १
तन्मध्ये कृष्णरचितं दुर्गं द्वादशयोजनम् ।
द्वितीयश्च बहिर्दुर्गं नवत्या च तदुत्तरैः ।
क्रोशैः सङ्कृतं राजन् श्रीकृष्णेन महात्मना ॥ २
तृतीयश्च तथा दुर्गं द्व्यूनैश्च द्विशतैर्नृप ।
क्रोशैः सङ्कृतं राजन् रत्नप्रासादसंयुतम् ॥ ३
तेषामन्तरदुर्गोऽपि श्रीकृष्णस्य महात्मनः ।
मन्दिराणि विचित्राणि नवलक्षाणि सन्ति हि ॥ ४
तत्र राधामन्दिरस्य द्वारे लीलासरोवरम् ।
सर्वतीर्थोत्तमं राजन् गोलोकाच्च समागतम् ॥ ५
यस्मिन् स्नात्वा नरः पापी व्रती भूत्वा समाहितः ।
अष्टम्यां हेमदानञ्च दत्वा नत्वा विधानतः ॥ ६
कोटिजन्मकृतैः पापैर्मुच्यते नात्र संशयः ।
प्राणान्ते त नरं नेतुं गोलोकाच्च महारथः ॥ ७
सहस्रादित्यसङ्काश आगच्छति न संशयः ।
दशकन्दर्पलावण्यो रत्नकुण्डलमण्डितः ॥ ८
स्रग्वी पीताम्बरः श्यामः सहस्रार्कस्फुरद्द्युतिः ।
सहस्रपार्षदैर्युक्तश्चामरान्दोलराजितः ॥ ९
जयध्वनिसमायुक्तो वेणुदुन्दुभिनादितः ।
भूत्वैवं रथमास्थाय गोलोकं यात्यसंशयम् ॥ १०
अथ तीर्थानि चान्यानि शृणु राजन् महामते ।
शतोत्तराणि तत्रैव सहस्राणि च षोडश ॥ ११

अष्टभिः सहितान्येव पत्नीनां भवनानि च ।
तानि प्रदक्षिणीकृत्य नत्वा नत्वा पृथक् पृथक् ॥ १२
ज्ञानतीर्थे समाप्लुत्य स्पृशेद्यः पारिजातकम् ।
तस्य ज्ञानञ्च वैराग्यं भक्तिर्भवति तत्क्षणम् ॥ १३
श्रीकृष्णो हृदये तस्य वसेद्धृष्टमनाः सदा ।
समृद्धिसिद्धयः सर्वास्तं भजन्ति निसर्गतः ॥ १४
स मुक्तः स कृतार्थः स्याद्यः पश्येद्धरिमन्दिरम् ।
तत्समो वैष्णवो नास्ति तीर्थञ्च तत्समं नहि ॥ १५
पञ्चयोजनविस्तीर्णाद्भगवन्मन्दिरात्ततः ।
धनुःशते कृष्णकुण्डः कृष्णतेजःसमुद्भवः ॥ १६
यं स्नात्वा कुष्ठतो मुक्तः साम्बो जाम्बवतीसुतः ।
तस्य दर्शनमात्रेण सर्वपापैः प्रमुच्यते ॥ १७
तस्मादष्टादशपदे पूर्वस्यां दिशि मैथिल ।
सर्वतीर्थोत्तमं पुण्यं बलभद्रसरो महत् ॥ १८
पृथ्वीप्रदक्षिणां कृत्वा बलदेवो महाबलः ।
यज्ञं यत्र विनिर्माय रेवत्या विरराज ह ॥ १९
तत्र स्नात्वा नरः सद्यो मुच्यते सर्वपातकात् ।
पृथ्वीप्रदक्षिणायाश्च फलं तस्य न दुर्लभम् ॥ २०
भगवन् मन्दिराद् राजन् सहस्रं धनुरग्रतः ।
दक्षिणस्यां महातीर्थं गणनाथस्य वर्तते ॥ २१
अनिर्देशे गते राजन् प्रद्युम्ने स्वसुते तदा ।
गणेशपूजनं यत्र कारयामास रुक्मिणी ॥ २२
यत्र स्नात्वा हेमदानं यो ददाति नृपेश्वर ।
पुत्रप्राप्तिर्भवेत्तस्य वंशस्तस्य विवर्धते ॥ २३
भगवन्मन्दिराद् राजन् दिग्विभागे च पश्चिमे ।
धनुषि द्विशते चास्ते दानतीर्थं परं शुभम् ॥ २४

तत्र श्रीकृष्णचन्द्रस्य नित्यं दानं करोति यः ।
तत्र स्नात्वा नरो राजन् द्विपलं काञ्चनं तथा ॥ २५
चतुर्गुणन्तु रजत पट्टाम्बरशतं तथा ।
तथा सहस्रमौल्यानि नवरत्नानि यानि च ॥ २६
यो ददाति नरश्रेष्ठस्तस्य पुण्यफलं शृणु ।
अश्वमेधसहस्राणि राजसूयशतानि च ॥ २७
दानतीर्थस्य पुण्यस्य कलां नार्हन्ति षोडशीम् ।
बद्रिकाश्रमयात्रायां यत्फलं लभते नरः ॥ २८
तस्माच्छतगुणं पुण्यं दानतीर्थे परात्मनः ।
सैन्धवारण्ययात्रायां मेषस्थे च दिवाकरे ॥ २९
उत्पलावर्त्तयात्रायां वृषस्थे भास्करे सति ।
स्नानं दानं लक्षगुणं भवतीह न संशयः ॥ ३०
तस्मात् कोटिगुण पुण्यं दानतीर्थे विदेहराट् ।
मासमेकञ्च यः स्नानं दानतीर्थे करोति हि ॥ ३१
तस्य जातञ्च यत्पुण्यं चित्रगुप्तो न वेत्ति तत् ।
तस्य तीर्थस्य माहात्म्यं वक्तुं नालं चतुर्मुखः ॥ ३२
सर्वेषां चैव दानानामश्वदानं परं स्मृतम् ।
अश्वदानाद् गजस्यापि गजदानाद् रथस्यच च ॥ ३३
रथदानात् परं राजन् भूमिदानं विशिष्यते ।
भूमिदानादन्नदानं महादानं प्रकथ्यते ॥ ३४
अन्नदानसमं दानं न भूतं न भविष्यति ।
देवर्षिपितृभूतानां तृप्तिरन्नेन जायते ॥ ३५
दानतीर्थे ह्यन्नदानं य करोति महामनाः ।
ऋणत्रयं विमुच्याथ याति विष्णोः परं पदम् ॥ ३६
दशैव मातृके पक्षे राजेन्द्र दश पैतृके ।
प्रियाया दशपक्षे तु पुरुषानुद्धरेन्नरः ॥ ३७

चतुर्भुजा दिव्यरूपा नागारिकृतकेतनाः ।
स्रग्विणः पीतवस्त्रास्ते प्रयान्ति हरिमन्दिरम् ॥ ३८
भगवन्मन्दिराद् राजन्नुत्तरस्यां दिशि श्रुतम् ।
क्रोशार्द्धे नृपशार्दूल मायातीर्थं मनोहरम् ॥ ३९
विराजते यत्र नित्यं दुर्गा दुर्गतिनाशिनी ।
सिंहारूढा भद्रकाली चण्डमुण्डविनाशिनी ॥ ४०
स्यमन्तकं समाहर्तुमृक्षराजबिलं गते ।
पुत्रे च देवकी देवी पूजयामास सत्फलैः ॥ ४१
तदाजगाम प्रियया सर्माणर्भगवान् हरिः ।
तद्दिनात्तत् प्रसिद्धं स्यान्मायातीर्थं फलप्रदम् ॥ ४२
मायातीर्थे च यः स्नात्वा मायां सम्पूज्य मानवः ।
सर्वां मनोरथप्राप्तिं प्राप्नुयान्नात्र संशयः ॥ ४३

इति श्रीगर्गसंहितायां द्वारकाखण्डे नारदबहुलाश्व-
संवादे प्रथमदुर्गे लीलासरोवरहरिमन्दिरस्नान-
तीर्थकृष्णकुण्डबलभद्रसरोगणेशतीर्थ-
दानस्थलमायातीर्थमाहात्म्यं नाम
एकोनविंशोऽध्यायः ॥१९

नारद उवाच

द्वितीयस्यापि दुर्गस्य पूर्वद्वारे विदेहराट् ।
इन्द्रतीर्थं महापुण्यं कामदं सिद्धिदायकम् ॥ १

तत्र स्नात्वा नरो राजन्निन्द्रलोकं प्रयाति हि ।
इहैव चन्द्रसादृश्य वैभवं प्राप्यते नरैः ॥ २

तथा वै दक्षिणे द्वारे सूर्यकुण्डोऽभिधीयते ।
तत्र सत्राजितेनापि पूजितोऽभूत् स्यमन्तकः ॥ ३

तत्र स्नात्वा पद्मरागं यो ददाति नृपेश्वर ।
सूर्यप्रभविमानेन सूर्यलोकं प्रयाति हि ॥ ४

तथैव पश्चिमे द्वारे ब्रह्मतीर्थं विशिष्यते ।
तत्र स्नात्वा नरो राजन् स्वर्णपात्रे च पायसम् ॥ ५

यो ददाति महाबुद्धिस्तस्य पुण्यफल शृणु ।
ब्रह्महा पितृहा गोघ्नो मातृहाचार्यहाघवान् ॥ ६

इन्द्रलोके पद धृत्वा बिभ्रद् ब्रह्ममयं वपुः ।
चन्द्राभेन विमानेन याति ब्रह्मपदं स च ॥ ७

तथा वै उत्तरे द्वारे क्षत्रं स्यान्नैललोहितम् ।
यत्र साक्षान्महादेवो राजते नीललोहित. ॥ ८

देवता मुनयः सर्वे तथा सप्तर्षयः परे ।
वसन्ति यत्र वैदेह तथा सर्वे मरुद्गणाः ॥ ९

नीललोहितलिङ्गन्तु यत्र संपूज्य यत्नतः ।
ऐश्वर्यमतुलं लेभे रावणो लोकरावणः ॥ १०

कैलासस्यापि यात्रायां यत्फलं लभते नृप ।
तस्माच्छतगुणं पुण्यं नीललोहितदर्शनात् ॥ ११

नीललोहितकुण्डे वै स्नातो यस्त्रिदिनं नरः ।
स याति शिवलोकाख्यं पापायुतयुतोऽपि हि ॥ १२
सप्तसामुद्रकं नाम तीर्थं यत्र विराजते ।
तत्र स्नात्वा नरः पापी पापसङ्घैः प्रमुच्यते ॥ १३
सप्तानाञ्च समुद्राणां स्नानपुण्यं लभेत् त्वरम् ।
विष्णुर्विरिञ्चो गिरिश इन्द्रो वायुर्यमो रविः ॥ १४
पर्जन्यो धनदः सोमः क्षितिरग्निरपांपतिः ।
तत्पार्श्वेषु सदा ह्येते तिष्ठन्ति मनुजेश्वर ॥ १५
सप्तकोटीनि तीर्थानि ब्रह्माण्डे यानि कानि च ।
सर्वाणि तत्र तिष्ठन्ति सप्तसामुद्रके नृप ॥ १६
तत्र स्नात्वा नरः पश्चात् कृत्वा सर्वपरिक्रमम् ।
प्राप्नोति द्वारकायाश्च यात्रायाः सकलं फलम् ॥ १७
सप्तसामुद्रकमृते न यात्रा फलदा स्मृता ।
सप्तसामुद्रकं तीर्थं विष्णुरूपं विदुः सुराः ॥ १८

इति श्रीगर्गसंहितायां द्वारकाखण्डे नारदबहुलाश्व-
संवादे द्वितीयदुर्गे इन्द्रतीर्थसूर्यकुण्डब्रह्मतीर्थ-
नैललोहितसप्तसामुद्रकमाहात्म्यं नाम
विंशोऽध्यायः ॥ २०

नारद उवाच

तृतीयस्यापि दुर्गस्य पूर्वद्वारे महाबलः ।
रक्षत्यहर्निशं राजन् हनूमानञ्जनीसुतः ।। १
तं प्रेक्ष्य भगवद्भक्तं हनूमन्तं महाबलम् ।
जायते भगवद्भक्तो हनूमानिव मानवः ॥ २
तथा वै दक्षिणद्वारं चक्रं नाम सुदर्शनम् ।
रक्षत्यहर्निशं राजन् श्रीकृष्णगतमानसम् ।। ३
तस्य दर्शनमात्रेण भवेद्भक्तो हरेः परः ।
भक्तस्यापि सदा रक्षां करोति हि सुदर्शनम् ।। ४
तथा वै पश्चिमं द्वार जाम्बवानृक्षराड् बली ।
तृतीयद्वारदुर्गस्य पश्चिमद्वारमाश्रितः ।
रक्षत्यहर्निशं राजन् भगवद्भक्तिसंयुतः ।। ५
तं प्रेक्ष्य भगवद्भक्तं जाम्बवन्तं महाबलम् ।
चिरंजीवी हरेर्भक्तो भवतीह च मानवः ।। ६
तथा वै चोत्तरं द्वारं विष्वक्सेनो महाबलः ।
रक्षत्यहर्निशं राजन् श्रीकृष्णहृदयो महान् ।। ७
तस्य स्मरणमात्रेण नरो याति कृतार्थताम् ।
शृणु राजन् बहिर्दुर्गात्तीर्थं पिण्डारकं स्मृतम् ।। ८
पिण्डारकस्य माहात्म्यं शृणुताद् राजसत्तम ।
यस्य स्मरणमात्रेण महापापात् प्रमुच्यते ॥ ९
अर्थसिद्धिरिव द्वारे रैवताद्रिसमुद्रयोः ।
मध्ये पिण्डारकक्षेत्रं तीर्थानां तीर्थमुत्तमम् ।। १०
क्रतुराजं राजसूयं यदुराजो महाबलः ।
चकार यत्र वैदेह परिपूर्णतमाज्ञया ।। ११

सर्वाणि यत्र तीर्थानि समाहूतानि सर्वतः ।
निवासं चक्रिरे राजन् उग्रसेनक्रतूत्तमे ॥ १२
तेन पिण्डारकं नाम सर्वतीर्थस्य पिण्डतः ।
तत्र स्नात्वा नरः सद्यो राजसूयफलं लभेत् ॥ १३
यत्रैव त्रिदिनं स्नात्वा व्रती भूत्वा समाहितः ।
ब्राह्मणेभ्यः स्वर्णदानं दत्त्वा यः प्रणतो भवेत् ॥ १४
इहैव नरदेवः स्यात् स महात्मा न संशयः ।
नित्यं शृणोति सततं बन्दिवाग्भिर्यशः स्वयम् ॥ १५
सुवर्णरत्नवस्त्राद्यैः सुचन्द्रवदनैः परैः ।
स्त्रीसङ्घैः सेवितो नित्यं हृष्टपुष्टो महाबलः ॥ १६
अहोरात्रं प्रताड्यन्ते द्वारि दुन्दुभयो घनैः ।
करीन्द्राणाञ्च चीत्कारैरश्वह्रेषैः समन्वितम् ॥ १७
विराजते राजसङ्घैः प्रेक्षयन् प्राङ्गणाजिरम् ।
रत्नप्रासादनिचयं ध्वजमण्डलमण्डितम् ॥ १८
मत्तकुञ्जरकर्णाभ्यां ताडिता भृङ्गमण्डली ।
अलङ्करोति तद्द्वारं मण्डितं मण्डलेश्वरैः ॥ १९
पिण्डारकस्नानमृते कथं राजा भवेदिह ।
अन्ते मोक्षं कथं याति नरः पापयुतोऽपि हि ॥ २०

पिण्डारकस्नानमृते न वर्म
पिण्डारकस्नानमृते न कर्म ।
पिण्डारकस्नानमृते न धर्मः
पिण्डारकस्नानमृते न शर्म ॥ २१
पिण्डारकस्नानमृते वियोगी
पिण्डारकस्नानकरस्तु योगी ।
पिण्डारकस्नानकरः सुभोगी
पिण्डारकस्नानकरो न रोगी ॥ २२

द्वारावतीं माधवमासमध्ये
प्रदक्षिणीकृत्य नमस्करोति ।
सर्वा इहामुत्र च सिद्धयोऽपि
वैदेह तत्पाणितले भवन्ति ॥ २३

तीर्थाप्लुतोऽधःशयनः शुचिश्च
मौनी व्रती वा यवभोजनेन ।
आरभ्य चैत्रीं किल पौर्णमासीं
यो माधवीमेत्य करोति यात्राम् ॥ २४

तत्पुण्यसङ्ख्यां गदितुं न शक्त
श्चतुर्मुखो वेदमयो विधाता ।
यो मेघधारां गणयेत् कदाचित्
कालेन पुण्यानि न कृष्णपुर्याः ॥ २५

यथा तिथीनां हरिवासरश्च
यथा हि शेषः फणिनां फणीन्द्रः ।
यथा गरुत्मान् दिवि पक्षिणाञ्च
यथा पुराणेषु हि भारतञ्च ॥ २६

यथा हि देवेषु च देवदेवः
श्रीवासुदेवो यदुदेवदेवः ।
तथा पुरीक्षेत्रसमस्तमध्ये
द्वारावती पुण्यवती प्रशस्ता ॥ २७

अहोऽतिधन्या यदुमण्डलीभि-
र्विराजते भूमितले मनोहरा ।
वैकुण्ठलीलाधिकृता कुशस्थली
यथा तडिद्भिर्जलदावलिर्दिवि ॥ २८

यत्रैव साक्षात् पुरुषः परेश्वरो
धृत्वा चतुर्व्यूहमलं विराजते ।
यस्तूग्रसेनाय ददौ नृपेशतां
कृष्णाय तस्मै हरये नमो नमः ॥ २९

यदा स्वलोकं भगवान् गमिष्यति
सम्प्लावयिष्यत्यथ तां तदार्णवः ।
वैदेह दिव्य हरिमन्दिरं विना
तस्मिन् निवासं भगवान् करिष्यति ॥ ३०

शृण्वन्ति तत्रैव कलौ जना ध्वनि
कृष्णोक्तमित्थं सततं दिने दिने ।
भवेदविद्यो यदि वा सविद्यो
यो ब्राह्मणो वै स तु मामकी तनुः ॥ ३१

भूत्वाथ विप्रोऽब्धितटादगाधं
गत्वा गृहीत्वा प्रतिमां परस्य ।
कृत्वा प्रतिष्ठाञ्च विधाय शौरिजं
करिष्यते स्थापनमर्क एषः ॥ ३२

श्रीद्वारकानाथमिति स्वरूपं
पश्यन्ति ये भक्तजनाः कलौ युगे ।
गच्छन्ति ते विष्णुपदं नृदेव
योगीश्वराणामपि दुर्लभं यत् ॥ ३३

इदं मया ते कथितं नृदेव
माहात्म्यमेतत् किल कृष्णपुर्याः ।
शृणोति यः श्रावयते च भक्त्या
श्रीद्वारकावासफलं लभेत् सः ॥ ३४

श्रीद्वारकाया नृप खण्डमेतन्
मया तवाग्रे कथितं सुपुण्यम् ।
कीर्तिं कुलं भक्तिमतीवमुक्तिं
ददाति राज्यञ्च सदैव शृण्वताम् ॥ ३५

इति श्रीगर्गसंहितायां द्वारकाखण्डे नारदबहुलाश्व-
संवादे तृतीयदुर्गे पिण्डारकमाहात्म्यं नाम
एकविंशोऽध्यायः ॥ २१

नारद उवाच

श्रीकृष्णस्य सखा कश्चित् सुदामा नाम ब्राह्मणः ।
स उवास स्वपुर्य्यान्तु सत्या च भार्ययावृतः ॥ १
विरक्तो धनहीनश्च वेदवेदाङ्गपारगः ।
समानशीलया पत्न्या चक्रे वृत्तिमयाचिताम् ॥ २
स कदाचित् प्रियां प्राह सीदमानां दरिद्रतः ।
श्रीकृष्णो द्वारकानाथो मित्रं मम पतिव्रते ॥ ३
मया तेनापि पठिता विद्या सान्दीपनेर्गृहे ।
पुनर्न दृष्टः श्रीकृष्णो भोजवृष्ण्यन्धकेश्वरः ॥ ४
त्रैलोक्यनाथो भगवान् दुःखहा दीनवत्सलः ।
इति श्रुत्वा वचस्तस्य शुष्कवक्त्रा पतिव्रता ॥ ५
जीर्णवस्त्रधरा दीना पतिं प्राह बुभुक्षिता ।
यदि ब्रह्मन् ननु हरिः सखा ते कमलापतिः ॥ ६
बुभुक्षितः कथं भूतो जीर्णकर्पटधारणः ।
द्वारकायां जना गत्वा दृष्ट्वा साक्षाच्छ्रियः पतिम् ।
धनयुक्ताः समायान्ति तस्मात्त्वं गन्तुमर्हसि ॥ ७

सुदामोवाच

सर्वेषां शिक्षकोऽहं त्वं तस्मै शिक्षां प्रदास्यसि ।
विप्रस्य विदुषो भिक्षा धनं प्रकथितं प्रिये ॥ ८

प्रियोवाच

सखा तु श्रीपतिर्यस्य नातिदूरे प्रवर्तते ।
तमुपेहि स ते दुःखं दारिद्र्यं नाशयिष्यति ॥ ९

गता अवस्था मम ते दुःखदारिद्र्यभुञ्जतोः ।
दातुः कृपानिधेः कान्त मित्रतायाश्च किं फलम् ॥ १०

सुदामोवाच

विधिना लिखितं भाग्यं तत्तथैव भविष्यति ।
यातायातेन किं भद्रे हरेर्ध्यानं करोम्यहम् ॥ ११
यद्द्वारि देशे राजानो देवगन्धर्वकिन्नराः ।
आज्ञां विना न यास्यन्ति दीनस्य मम का कथा ॥ १२

प्रियोवाच

विनाज्ञां नैव यास्यन्ति देवगन्धर्वकिन्नराः ।
अन्तर्यामी हरिः शीघ्रं दूतैस्त्वामाह्वयिष्यति ॥ १३

विप्र उवाच

दयालुरीदृशः कृष्णो परन्तु शृणु भामिनि ।
विपत्तिकाले मित्रस्य न गच्छेद् गृहमुत्तमम् ॥ १४
कथन्तु याचनां कुर्वे चिरादृदृष्ट्वा स्वकं प्रियम् ।
निर्लोभात्तु भवेत् प्रीतिर्याचनात्तु गमिष्यति ॥ १५

प्रियोवाच

दुःखदारिद्र्यहरणं श्रीहरेर्दर्शनं कुरु ।
याचना नैव कर्तव्या स तेऽर्थं बहु दास्यति ।
एवन्तु प्रियया विप्रो बहुधैवं प्रभाषितः ॥ १६
अयं हि परमो लाभः कृत्वा मित्रस्य दर्शनम् ।
उपायनन्तु किं दास्ये लज्जितोऽहं दरिद्रत. ॥ १७
इत्युक्त्वा सा गता शीघ्रं परगेहं तदा सती ।
तण्डुलांश्चतुरो मुष्टीन् याचित्वा स्वगृहं ययौ ॥ १८
जीर्णकर्पटखण्डे च बध्वा तान् पतये ददौ ॥ १९

ततो गृहीत्वा पृथुकांश्च तण्डुलान्
कुचैलधारी मलिनश्च दुर्बलः ।
जगाम कृष्णस्य पुरीं शनैः शनै
ब्र ह्मण्यदेवं मनसा च सस्मरन् ॥ २०
सोत्तीर्य सिन्धुमुडुपेन ददर्श तत्र
श्रीद्वारकां हरिपुरीं कनकैर्विचित्राम् ।
श्रेणीसभाविविधदुर्गगृहैः पताकैः
शृङ्गाटकैरतिबलैर्यदुभिश्च गुप्ताम् ॥ २१
दृष्ट्वा कृष्णपुरीं विप्रो जनानापृछ्य श्रीहरेः ।
श्रीमन्दिरन्तु कुत्रास्ते सर्वे वदत साम्प्रतम् ॥ २२
इति श्रुत्वा माधवस्य भवनानाञ्च रक्षकाः ।
ऊचुस्ते वर्तते कृष्णः सर्वेषु मन्दिरेषु च ॥ २३
इत्युपश्रुत्य सदनं प्रविश्यैकतमं द्विजः ।
ब्रह्मानन्दं गतः कृष्णं पर्यङ्कस्थं विलोक्य च ॥ २४
सखायमागतं ज्ञात्वा सहसोत्थाय माधवः ।
दोर्भ्यां मिलित्वा चान्योन्यं प्रेम्णा ह्यश्रुकलाकुलः ॥ २५
स्वर्णपात्रेण तस्यापि पादौ प्रक्षाल्य तज्जलम् ।
गृहीत्वा शिरसा तं तु पर्यङ्क उपवेश्य च ॥ २६
अर्चनं कृतवान् गन्धचन्दनागुरुकुङ्कुमैः ।
पक्वान्नैर्धूपदीपैश्च मधुपर्कैर्विधानतः ॥ २७
पश्चादावेद्य ताम्बूलं गाञ्च स्वागतमब्रवीत् ।
वृद्धं कुचैलं मलिनं दुर्बल श्वेतमूर्द्धजम् ॥ २८
मित्रविन्दा पर्यचरद्व्यजनेन स्मितान्विता ।
श्रीकृष्णस्य प्रियाः सर्वा विस्मिता जहसुस्तदा ॥ २९
ऊचुः परस्परं नार्यः प्रेक्ष्य विप्रं समर्चितम् ।
भिक्षुणा ह्यवधूतेन किमनेन कृतं तपः ॥ ३०

येन त्रैलोक्यनाथेन सत्कृतश्चाग्रजो यथा ।
एतस्मिन्नन्तरे तौ द्वौ कथयाञ्चक्रतुः कथाः ।
पूर्वा गुरुकुले जाता हस्तौ गृह्य परस्परम् ॥ ३१

कृष्ण उवाच

शृणु ब्रह्मन् प्रपठिता सर्वविद्या त्वया मया ।
गुरवे दक्षिणां दत्त्वा पुनस्त्वं नैव दृश्यसे ॥ ३२
अहन्तु द्वारकां यातो जरासन्धभयात् सखे ।
कुत्र स्थले तव विभो निवासो वद मे खलु ॥ ३३
कदाचिदिन्धनार्थे वै गुरुदारैः प्रणोदिताः ।
विद्यार्थिनो वयं सर्वे वनं जग्मुर्भयङ्करम् ॥ ३४
विपत्तिरभवत्तत्र वातवर्षभयङ्करी ।
रविरस्तं गतो रात्र्यामन्धकारोऽभवन्महान् ॥ ३५
सर्वं जलमयं जातं स्थलं नैव तु दृश्यते ।
वयं परस्परं सर्वे गृहीतकरपङ्कजाः ॥ ३६
विद्युत्प्रकाशे पश्यन्तो दिक्षु सर्वासु बभ्रमुः ।
ततः सूर्योदये जाते गुरुः सान्दीपनिर्महान् ॥ ३७
जले शिष्यांश्च शीतार्तान् वनं गत्वा ददर्श ह
जलात् सर्वान् स्थले कृत्वा गुरुरश्रुपरिप्लुतः ॥ ३८
उवाच बालका यूयमस्मदाज्ञापरायणाः ।
प्रेष्ठस्तु प्राणिनामात्मा तमनादृत्य मत्पराः ॥ ३९
तस्माद्भवद्भ्यः सन्तुष्टो वरं दास्यामि दुर्लभम् ।
भवतां चापि सर्वत्र पूर्णाः सन्तु मनोरथाः ॥ ४०
वेदशास्त्रपुराणानि कण्ठस्थानि भवन्ति हि ।
तस्माद्गुरोश्च कृपया पूर्णोऽहं सर्वसौख्यतः ॥ ४१

सुदामोवाच

देवदेव गुरुस्त्व तु कोटिब्रह्माण्डनायकः ।
श्रीपतेस्तस्य गुरुषु वासोऽत्यन्तविडम्बनम् ॥ ४२
ततः सुदामा विप्रस्तु कृष्णाय परमात्मने ।
पृथुकांस्तण्डुलान् राजन्नप्रायच्छदवाङ्मुखः ॥ ४३
सर्वात्मा भगवांस्तस्य ज्ञात्वागमनकारणम् ।
नायं विप्रस्तु श्रीकामो मुक्त्यर्थे मां तु सेवते ॥ ४४
भार्या पतिव्रता दुःखाद्धनाशां चास्य कुर्वती ।
तस्माद्धनं कथं दास्ये अदात्रोश्च तयोरहम् ॥ ४५
इति ब्रुवन् पुनर्ज्ञात्वा हेतोर्मम स तण्डुलान् ।
प्रगृह्य गतवानत्र लज्जया नैव दास्यति ॥ ४६
तस्मात्तु याचनां कुर्वे विदित्वैवं वचोऽब्रवीत् ॥ ४७

कृष्ण उवाच

गृहान् मदर्थे भवता किमानीतमुपायनम् ।
अण्वप्युपाहृतं यच्च भक्त्या भूरि भविष्यति ॥ ४८
पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति ।
तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः ॥ ४९
इत्थमाभाष्य भगवानदातुश्च द्विजन्मनः ।
चीरखण्डात्तण्डुलांश्च जहार किमिदं स्वयम् ॥ ५०
एतत्त्वयोपनीतं मे सखे परमप्रीणनम् ।
विश्वं मां तर्पयिष्यन्ति ब्रह्मन्नेते च तण्डुलाः ॥ ५१
ईदृशा गोकुले भुक्ताः श्रेष्ठाः पृथुकतण्डुलाः ।
मात्रा यशोदया दत्ताः पुनस्तान्नैव दृष्टवान् ॥ ५२
इत्येकमुष्टिं जग्ध्वा च भूमिजां सम्पदं ददौ ।
द्वितीयां जग्धुमारेभे दातुं पातालसम्पदाम् ॥ ५३

तावद्वक्षस्थलाच्छीघ्रं जगृहे श्रीः करं हरेः।
अपराधाद्विना नाथ कथं मां त्यक्तुमिच्छसि॥ ५४
एतावतालं श्रीकृष्ण शक्रतुल्यो द्विजो भवेत्।
द्विजेन निर्धनेनापि न ज्ञातं तद्रहस्यकम्॥ ५५
सम्पूर्णञ्च धन प्राप्तं स्वगृहे विष्णुमायया।
उषित्वा रजनीमेकां भुक्त्वा पीत्वा सुखं गतः॥ ५६
श्वो भूते स्वगृहान् गन्तुं कृष्णं नत्वा मनो दधे।
स चाज्ञप्तो भगवता वन्दितः परिरम्भितः॥ ५७
याचना न कृता येन व्रीडितः स्वगृहान् ययौ।
ब्रह्मण्यता मया दृष्टा विप्रदेवस्य श्रीपतेः॥ ५८
अहं दरिद्रः कृष्णस्य बाहुभ्यां परिरम्भितः।
प्रियाजुष्टे च पर्यङ्के भ्रातेव स्थापितो द्विजः॥ ५९
वीजितो व्यजनेनापि रुक्मिण्या सत्यभामया।
निर्द्धनस्तु धनं लब्ध्वा श्रीपतिं नैव संस्मरेत्॥ ६०
इत्थं करुणया मह्यं धनं कृष्णो न दत्तवान्।
इत्थं विचारयन् गच्छन् संस्मरन् ब्राह्मणीं रुषा॥ ६१
गृहाण धनकोटिञ्च गृहं गत्वा ब्रवीम्यहम्।
ब्रह्मण्यदेवो दाता च श्रीकृष्णोऽय मया श्रुतः॥ ६२
प्रत्यक्षदृष्टः कृपणो गर्वितो धनपूरितः।
शापं दास्ये कथं मित्रे धनलोभादहं वृथा॥ ६३
यादृशी मे कृता प्रीतिस्तादृशीं प्रापयिष्यति।
पितरावस्य कंसेन कारागारे कृतौ पुरा॥ ६४
कृष्णस्तु नन्दसदने परगेहे च वर्द्धितः।
स दास्यति कथं द्रव्यं धनयुक्तोऽपि निर्धनः॥ ६५
रत्नैः प्रपूरितान् गेहान दृष्ट्वा वाञ्छां न कारयेत्।
ललाटे लिखितं यद्यत्तन्न्यूनं भविष्यति॥ ६६

इति सङ्कथयन् विप्रो निजपुर्यन्तके गतः ।
सुवर्णदुर्गसंयुक्तां कपाटध्वजमण्डिताम् ।। ६७
तोरणैः कलशैश्चित्रैः प्रासादैः सुजनैर्वृताम् ।
द्वारकामिव शोभाढ्यां सर्वरत्नैः प्रपूरिताम् ।। ६८
दृष्ट्वा विप्रस्तु किमिदं कस्य स्थानमिति ब्रुवन् ।
रथ्यां रथ्यां भ्रमन्तं तं प्रत्यगृह्णन् स्त्रियो नराः ॥ ६९
नागच्छन्त द्विजं दृष्ट्वा किङ्कर्यः किङ्करास्तथा ।
स्वामिन्यै कथयामासुः श्रुत्वा सा विस्मयं गता ।। ७०
भर्तारमागतं श्रुत्वा पत्नी सम्भ्रमसंयुता ।
निश्चक्रामालयात्तूर्णं साक्षाच्छ्रीरिव रूपिणी ॥ ७१
ब्राह्मणी शिबिकारूढा दासीदासगणैर्वृता ।
भ्रमन्तमग्रहीद्विप्रं दर्शयित्वा स्वकं मुखम् ।। ७२

दृष्ट्वा स्फुरन्तीं तरुणीञ्च भार्यां
स्वर्णाम्बरै रत्नविभूषणाढ्याम् ।
यथेन्दिरारूपवतीं विमाने
मुदान्वितः कृष्णकृपाञ्च मेने ।। ७३

निजगेहं तया युक्तः श्रीकृष्णभवनोपमम् ।
भोजनैर्द्रव्यरत्नैश्च पर्यङ्कव्यजनासनैः ।। ७४
वितानैः स्वर्णपात्रैश्च तोरणैः समलङ्कृतम् ।
दृष्ट्वा कृष्णस्य कृपया सुदामा तरुणोऽभवत् ॥ ७५
बुभुजेऽलम्पटो विप्रः समृद्धिं स्वामहैतुकीम् ।
मनसाजाययात्यद्यज्ञानवैराग्यभक्तितः ॥ ७६॥
चकार तर्कणां विप्रः कुतो मम समृद्धयः ।
दत्ता ब्रह्मण्यदेवेन देवानामपि दुर्लभाः ।। ७७
ईदृशीं सम्पदं दत्त्वा नावोचत् किमपि स्वयम् ।
मम तण्डुलमुष्टिञ्च प्रीत्या प्रत्यग्रहीद्धरिः ॥ ७८

तस्य सख्यञ्च दास्यञ्च भूयान्मे जन्मजन्मनि ।
तत्पदाम्बुरुहध्यानात् तरिष्येऽहं भवार्णवम् ॥ ७९

विचिन्त्य चेत्थं मनसा सुदामा
पत्न्यावृतः कृष्णपदारविन्दे ।
मनश्च कृत्वा धनमेव विप्रान्
दत्त्वा हरेर्धाम परं जगाम ॥ ८०

एतच्छ्रीकृष्णदेवस्य चरितं शृणुयान्नरः ।
दारिद्र्यान्मुच्यते शीघ्रं भक्तो भगवतो भवेत् ॥ ८१

श्रीद्वारकाया नृप खण्डमेत-
न्मया तवाग्रे कथितं सुपुण्यम् ।
कीर्तिं कुलं भक्तिमतीवमुक्तिं
ददाति राज्यञ्च सदैव शृण्वताम् ॥ ८२

इति श्रीगर्गसंहितायां द्वारकाखण्डे नारदबहुलाश्व-
संवादे सुदामविप्रोपाख्यानवर्णनं नाम
द्वाविंशोऽध्यायः ॥ २२

इति श्रीगर्गसंहितायां षष्ठं द्वारकाखण्डं समाप्तम् ।

गर्गसंहितायां द्वारकाखण्डे पाठान्तरादिप्रदर्शनम् ।

०पश्यताञ्च तौ ॥ इति मु० पु० ।

०समं लोकैर्विलै.० इति क० पु० ।

०राजद्भूखण्ड० इति ग० मु० पु० ।

०टङ्कारोद्भयविह्वलम् । इति ग० मु० पु० ।

०स्फुरत्प्रभुः । इति क० पु० ।

घूर्णीभूता रथा० इति क० पु० ।

०श्छिन्नसंशयाः ॥ इति मु० पु० ।

द्विपग्रहाचोष्ट्र० इति मु० पु० ।

०शैवालभुज० इति मु० पु० ।

करमीनमौलि० इति मु० पु० ।

०शुक्तीच्छत्रशङ्खा० इति मु० पु० ।

रथाङ्गात्रत० इति मु० पु० ।

०सेनाद्वीपितटा० इति क० ख० ग० पु० ।

१।३१ रहस्यमुण्डमाला० इति मु० पु० ।

१।३३ विद्याधर्यश्च स्वर्गस्था० इति मु० पु० ।

१।३४ ममानुरूपावेमे च० इति मु० पु० ।

१।४१ पश्यतामिति देवा०इति क० पु० ।

१।४२ ०महाबलौ ॥ इति मु० पु० ।

१।४३ तयोश्च युद्ध्यतोः सर्वं क्षुण्णां० इति मु० पु० ।

१।४८ ०नीत्वा सुखावहम् ॥ इति मु० पु० ।

२।१ ०स्तावत्यक्षौहि० इति क० ख० ग० पु० ।

२।३ ०शत्रूपहारिणाम् ॥ इति क० पु० ।

०शत्रूपहारणाम् ॥ इति ख० पु० ।

०शांत्रूपहारण ॥ इति ग० पु० ।

२।४ ०द्रव्यञ्च संहर्त्तुं वीचन्तः० इति मु० पु० ।

२।७ ०स्वपुरे भयविह्वले० इति क० ख० ग० पु० ।

२।८ ०द्वारकादुर्गामेक० इति क० ग० पु० ।
०द्वारकादुर्गमेक० इति ख० पु० ।

२।१३ ०कन्दरं त्वरम् ॥ इति मु० पु० ।

२।१४ ०पुरी हृत्वा देवानां० इति क० पु० ।

२।१५ ०दैवताः सर्वे० इति क० ख० ग० पु० ।

२।१७ ०शयानस्याप्यचेतसः ॥ इति क० ख० ग० पु० ।
०प्यचेतनः ॥ इति मु० पु० ।

२।१८ ०कृतयुगे युगे ॥ इति क० ख० ग० पु० ।

२।१९ ०पीताम्बराच्युतम् । इति मु० पु० ।
तताड यवनः० इति मु० पु० ।

२।२० असावपश्यंस्ततपा०इति क० पु० ।

२।२१ ०दृष्टस्य दृष्टिपातेन० इति क० पु० ।

२।३० ०पापप्रहारी । इति । क०ख० ग० पु० ।

२।३२ श्लोकापरार्द्धं नास्ति क० पु० ।

२।३३ नास्ति क० पु० ।

२।३५ इत्थं स्तुत्वा हरिं० इति मु० पु० ।

२।३८ ०पुनरावृत्य मथुरां० इति क० पु० ।
०पुनरागत्य मथुरा० इतिग० पु० ।
श्लोकापरार्द्धं अग्रिमश्लोक-पूर्वार्द्धादनन्तरं वर्त्तते क० पु० ।

२।४० ०गतोह्ययम् । इति मु० पु० ।

२।४१ ०यावद्वै स्थिता० इति ग० मु० पु० ।
०भवत मे द्विजाः । इति ख० पु० ।

२।४२ ०राजा जरासन्धो० इति मु० पु० ।

२।४६ ०तटाद् गिरेः ॥ इति मु० पु० ।

२।४७ अन्तिम पादद्वयं नास्ति मु० पु० ।

३।४ ०स पुरा विनिर्माय० इति क० पु० ।

३।६ ०महीम् ॥ इति क० ख० ग० पु० ।

३।८ ०सोऽभिप्रायं न्यवे० इति क० पु० ।

३।१० ०उरस्तथैव० इति मु० पु० ।
०पृष्ठो ह्यधर्मज्ञ० इति क० ख० ग० पु० ।

३।११ ०सारथिवद् गणेषु । इति मु० पु० ।

३।१३ ०प्रभावताम् । इति मु० पु० ।
अस्यै वरं० इति क० ख० ग० पु० ।

३।१६ ०द्वारिकायां० इति क० ख० पु० ।

३।२० ०समृद्धां तां समृद्धिभिः ॥ इति मु० पु० ।

३।२१ पारिभद्रे रथं० इति मु० पु० ।

३।२३ ०यदुपुर्यां गृहे० इति मु० पु० ।
०द्वारवत्यां विराजते ॥ इति ख० पु० ।

४।४ ०तमं वै सा मेने च सदृशं० इति क० ख० ग० पु० ।

४।५ ईदृशी श्रीहरि० इति० क० पु० ।

४।६ ०कृष्णस्य दातुं० इति क० पु० ।
०दातुं सा निश्चये कृता ॥ ख० ग० पु० ।

४।७ कृष्णशत्रुर्महावीर० इति मु० पु० ।

४।१० पृच्छते कुशल० इति क० ख० ग० पु० ।
०तस्मै सर्वमवर्णयत् ॥ इति मु० पु० ।

४।१२ शमत्रास्तु० इति मु० पु० ।

४।१४ ०मुद्वहेद् दुर्गे स्थिता० इति क० ख० पु० ।

४।१५ ०मां तु गृहाण० इति क० ग० पु० ।

४।१६ रुक्मिण्या समभिप्रायं ०इति क० ख० ग० पु० ।

४।२३ ०चिञ्चिणीवृक्षे० इति क० ख० ग० पु० ।

४।२५ ०चातुर्मास्या नदी यथा ॥ इति क० ख० ग० पु० ।

४।२७ त्तोलकानि विरेजिरे । इति ग० मु० पु० ।

४।२८ ०सम्भारसञ्चयं रत्नमण्डपे ॥ इति मु० पु० ।

४।३० अथ विद्वज्जना भैष्मीं० इति क० ग० पु० ।

अथ विद्वद्द्विजा० इति मु० पु० ।

०रत्नावन्धं० इति क० ख० ग० पु० ।

४।३४ ०पूर्वं रत्नावन्धनरूपिणीम् ॥ इति मु० पु० ।

४।३५ ०मौलिर्मनोहरम् ॥ इति क० ख० पु० ।

०मौलिहर शुभम् ॥ इति ग० पु० ।

४।३६ ०विवर्जितम् ॥ इति क० पु०

४।४० ०श्रुत्वा घोरं० इति क० पु० ।

४।४१ भीष्मको ह्यग्रतो० इति क० पु० ।

०ह्यगतो कृत्वा० इति ख० पु० ।

०दिव्यैर्मृगैः सामुद्र० इति क० पु० ।

०दिव्यारुणैः सामुद्र० इति मु० पु० ।

४।४३ ०मृदङ्गेषु ध्वनत्सु च । इति मु० पु० ।

५ १ मेवं वा लभते वार्त्तां० इति क० पु० ।

मेघ वा लभते वार्त्ता० इति ख० ग० पु० ।

५।४ ०न देवदेवो भगवांश्चन्द्र-मौलि । इति क० ख० ग० पु० ।

५।५ एवं विचिन्तयन्ती सा भैष्मी गेहाट्टभूमिषु । इति मु० पु० ।

५।६ ०मस्फुरत् प्रतिभाषणम् । इति मु० पु० ।

५।७ श्रीकृष्णागमनं० इति क० मु० पु० ।

५।१५ ०मन्दिरं सम्प्रागतं० इति मु० पु० ।

५।१६ ०सितासिलत्तं० इति मु० पु० ।

५।२० देवीमठं० इति मु० पु० ।

५।२१ ०सततं भवानि ते । इति क० मु० पु० ।

५।२३ ०वदती विलासं तदा वद-न्तीषु० इति क० ख० ग० पु० ।

६।२ त्यक्त्वा मुनिव्रतं० इति क० ख० ग० पु० ।

सहाराभिः सखोभिश्च० इति क० ख० ग० पु० ।

६।५ तदपाङ्गमिषैः० इति क० ख० ग० पु० ।

६।६ नैश्रेयसम्भवैः० इति मु० पु० ।

६।१५ ०स्मान् स्वयशो हृत० इति क० ख० ग० पु० ।

६।२१ ०जग्मुरेते वै कृष्णा० इति ख० पु० ।

६।२४ ०मामैरित्यभय० इति मु० पु० ।

६।२६ ०शिछन्नकम्बुकाः । इति क० ख० पु० ।

६।३१ कदाचिद् वै गदो० इति ख० पु० ।

०युद्ध स तत्याज तत् किलान् मनसा० इति ख० पु० ।

०युद्ध स तत्याज तत् कलावान् मनसा० इति क० पु० ।

६।३२ गदाग्रजेन० इति क० ख० ग० पु० ।

६।३३ ०मयी गुर्वी याश्च कौमोदकी यथा । इति क० ख० ग० पु० ।

६।३५ ०प्रहारव्यथिते० इति क० ख० पु० ।

६।३५ ०रथगां ध्वजाम् । इति क० ख० ग० पु० ।

६।३६ ०दण्डेन च यथा घटम् ।। इति ख० पु० ।

६।३६ ०दन्तवक्त्रस्य मध्यतः । इति मु० पु० ।

६।४१ ०मूर्च्छिताश्चा क्षताप्लुताः।। इति मु० प० ।

६।४६ ०द्वारका हत्वा० इति क० ख० ग० पु० ।

०रामं सत्रान्धवम् । इति क० पु० ।

६।४७ ०चन्द्रिकापुरम् । इति क० ख० ग० पु० ।

७।३ ०घनमम्बुदनिर्मितम् । इति क० पु० ।

०मदोद्धटः।। इति ख० पु० ।

७।५ पेटरस्य० इति क० ग० पु० ।

मेरटस्य० इति ख० पु० ।

७।११ ०गोपान्नोच्छिष्ट० इति ख० पु० ।

०च्छिष्टभुक् भवत् । इति क० ग० पु० ।

७।१२ ०पुधिमाकृष्य बाणा० इति क० ख० ग० पु० ।

अत्र च क० पु० इषुधि-शब्दस्य पार्श्वटिप्पण्या 'ज्या' इति लिखित वर्त्तते।

७।१३ सन्ताडितोऽपि० इति मु० पु०।

७।१५ श्लोकोऽयं ७।१७ श्लोकादनन्तर दृश्यते क० ख० ग० पु०।

०ज्ञानेनैव गुणामयम्॥ इति क० पु०।

०ज्ञानेनैव गुणामयम्॥ इति ख० ग० पु०।

७।१६ अयञ्च तत्रैव दृश्यते क० ख० ग० पु०।

७।१७ ०मध्यनस्तद् द्विधा० इति क० ख० ग० पु०।

०पुनः शितैर्बाणैः० इति मु० पु०।

०द्धरयेच्चोक्ति० इति क० ग० पु०।

७।१८ ०रुक्मसूतं० इति ख० पु०।

०रुक्मेः सूतं० इति ग० मु० पु०।

७।२१ ०जगर्ज च नदन् मृधे॥ इति क० ग० पु०।

०जगर्ज गजवन्मृधे॥ इति ख० पु०।

७।२२ सन्ताडितोऽपि० इति मु० पु०।

०परिघेणापि संजघान० इति मु० पु०।

७।२४ तन्खड्ग चर्मणा० इति क० ख० ग० पु०।

चर्मणा इति सहार्थे तृतीया इति ख० पु० पार्श्वटिप्पण्याम्।

०स्त्राण. कञ्चुकश्च हतो महान्॥ इति क० ख० ग० पु०।

७।२५ ०त्राणोऽपि युग० इति क० ख० ग० पु०।

०देते छिन्नाः कृता मृधे। इति क० ख० ग० पु०।

७।२७ ०भ्रातृवध खड्गं रुक्मिणी० इति क० ख० ग० पु०।

७।२६ पश्चिात्मैर्विलपती० इति मु० पु०।

७।३२ ०वैशालिभद्राणां जहि चैतादृश० इति मु० पु०।

७।३५ आर्यपुत्र महाबुद्धे० इति ख० मु० पु०।

७।३६ ०भीष्मकात्मज०। इति ख० मु० पु०।

७।४५ इहैव भुक्त्वा विभवेन मुक्ति० इति क० ख० ग० पु० ।

८।६ नागत स० इति क० ख० ग० पु० ।

८।१७ अगजित कन्यकां० इति क० पु० ।

८।१६ ०मत्स्य पगान् जित्वा० इति ख० पु० ।

८।२१ सविधं जगृहे पाणीन् नाना-रूपः० इति मु० पु० ।

८।२४ शम्बरो निर्देश तोकं० इति क० ग० पु० ।

शम्बरो निर्देश तोक० इति ख० पु० ।

०त समापतन् । इति क० ग० पु० ।

८।२६ ०भार्ययाम्बरयायुतः । इति क ख० ग० पु० ।

८।२७ स्वयंवरस्थले० इति मु० पु० ।

६।८ पितुर्वचः समा० इति मु० पु० ।

६।६ ०राजन् बलिष्ठो भगवान् विभुः ।। इति मु० पु० ।

६।१२ स विश्वाख्यो० इति मु० पु० ।

६।१३ श्लोकोत्तरार्द्धं नास्ति क० ख० ग० पु ।

६।१४ ०राजन्नाहङ्कारं समाचर ।। इति क० पु० ।

०राजन् माहङ्कारं समाचर ।। इति ख० ग० पु० ।

६।१७ नवीना किं मही ते वै भगवानेत्र० इति क० ख० ग० पु० ।

६।१६ ०राज्ञाप्यानर्त्तोऽब्धि० इति मु० पु० ।

६।२४ भुवोऽपि० इति मु० पु० ।

६।२६ कर्त्तुं मद्भक्त्या० इति क० ख० ग० पु० ।

६।२७ तस्माद् दैवस्य० इति मु० पु० ।

९।३० ०समायुक्तो राजन् वैकुण्ठ० इति मु० पु० ।

०समायुक्तो व्रजन्० इति क० पु० ।

६।३१ ०प्रशासत. ।। इति क० ख० ग० पु० ।

६।३२ ०न्ययोजयत् ॥ इति ख० पु० ।

१०।२ ग० पु० श्लोकान्तरांशयोजनेन पाठः प्रभ्रष्टः ।

१०।३ ०कृत्य पुण्यदा। इति मु० पु०।
ख० पु० यज्ञियम् इत्यस्य पार्श्वटिप्पया रैवतयज्ञस्थानम् इति दृश्यते।
१०।४ श्लोकोत्तरार्द्धं नास्ति ग० पु०।
१०।५ श्लोकपूर्वार्द्धं नास्ति ग० पु०।
१०।८ ०रजांसि धारयेन्नरः। इति क० ख० ग० पु०।
०कृत पाप मुच्यते० इति क० ख० ग० पु०।
१०।१४ ०मुक्ति समारुहेत्॥ इति क० ख० ग० पु०।
१०।१७ ०कैलासोत्तमभूमिषु॥ इति मु० पु०।
१०।२१ ०भद्रोऽभूत्सत्सेवायां गजा० इति मु० पु०।
१०।३० कृतं ते वैष्णवं० इत्यादि क० ग० पु०।
१०।३१ ०ज्ञानिसत्तमम्॥ इति क० ग० पु०।
१०।३७ तद्वच्च परमं ०इति क० ख० ग० पु०।
१०।३९ घण्टानाद महाधृष्ट० इति क० पु०।

०धनग्राहो भव मूढ महाखल॥ इति ख० पु०।

११।३ भवता ग्राह० इति मु० पु०।
भवत ग्राह० इति क० पु०।
भवेत्तं ग्राह० इति ख० ग० पु०।
११।५ नास्ति क० ख० ग० पु०।
११।६ ०पृष्ठग्राच्यो० इति मु० पु०।
११।९ प्रियाला प्रीतका० इति मु० पु०।
प्रयाला प्रातका० इति ग० पु०।
११।११ ०गाह्याशु शुण्डा० इति क० ख० ग० पु०।
११।१२ ०बली दैवेन नोदित.। इति क० पु०।
११।१३ तेनैव तद्वते नीतो० इति क० पु०।
येनैव तद्वने० इति० ख० ग० पु०।
११।१४ ०कपतोर्हि वहि० इति ख० ग० पु०।
११।१७ ०कृष्णाय ते विशदधिष्ण्य सुरेश० इति क० ख० ग० पु०।

११।१६ ०धावन् नक्रं समा० इति क० पु० ।
०शिरोऽद्भुतम् ॥ इति मु० पु० ।
०पूर्वमेव तत्याज तं गजं द्रुतम् ॥ इति क० पु० ।
११।२७ नास्ति क० ग० मु० पु० ।

१२।३ ०शङ्खं सुन्दरैलक्षणैर्वृतम् ॥ इति मु० पु० ।
१२।५ ०शङ्खाख्यो भवतु० इति क० ग० पु० ।
१२।६ ०मामैरित्यभयं० इति मु० पु० ।
१२।१२ ०तदा च सः ॥ इति मु० पु० ।
१२।१५ ०चीरसंत्राणा० इति क० ख० ग० पु० ।
विषाग्निवन० इति क० पु० ।

१३।२ ०हरिक्षेत्रे० इति क० ख० ग० पु० ।
१३।६ ०भूतं भागवतं० इति ख० ग० पु० ।
१३।१४ ०पापतापात्० इति मु० पु० ।
१३।१६ ०भार्या स भिन्नोऽभू० इति मु० पु० ।
१३।२१ ०वेश्यारक्तो० इति क० ख० ग० पु० ।
१३।२३ ०द्वादशसाहस्रं० इति क० ख० ग० मु० पु० ।
परं ख० पु० पार्श्वटिप्पण्यां 'तद्राज्ये' इति साहस्रं इत्यस्य स्थाने वर्त्तते ।
१३।२७ ०जग्मुरातुराः । इति मु० पु० ।
०शङ्खचिह्नादिभिः कृते । मु० पु० ।
०शङ्खचिह्नादिभिः० इति ख० ग० पु० ।
१३।३० तेषां पाशान् स्वयं० इति मु० पु० ।

१४।४ ०तत्र तनुः शुभा ॥ इति मु० पु० ।
१४।६ यत्त्वमभक्त० इति क० पु० ।
०पापात्मंस्तपोबलविगर्वितः ॥ इति मु० पु० ।
१४।१२ श्लोकोत्तरार्द्धं नास्ति मु० पु० ।
१४।१३ श्लोकपूर्वार्द्धं नास्ति मु० पु० ।

प्रोवाच सोऽपि राजान० इति मु० पु० ।

१४।१५ ०भक्तानां स्वान्तकारिणा ॥ इति क० पु० ।

१४।१६ ०कथित तथोक्तं० इति मु० पु० ।

१४।१८ एतस्मिन्स्तं० इति मु० पु० ।

एकस्मिन स चोर० इति क० पु० ।

०सचोरयितुं० इति ग० पु० ।

१४।१९ कलहप्रियेणा० इति क० ख० ग० पु० ।

१४।२० श्रीशैलपुत्रं० इति मु० पु० ।

१४।२२ विदेशे याति० इति क० ख० ग० पु० ।

१४।२८ ०सगिरिं जग्मु० इति मु० पु० ।

१४।२९ ०गिरिराजं कराग्रत: ॥ इति क० ख० ग० पु० ।

१४।३१ ०वज्रघातिना ॥ इति ग० मु० पु० ।

०वज्रपाणिना ॥ इति क० पु० ।

१४।३२ ०वत्राच बलवत्तरः । इति क० पु० ।

१५।२ ०कपितोयात्समु० इति क० पु० ।

०कपितोयसमु० इति ख० पु० ।

०कपिपानात्समु० इति ग० पु० ।

१५।३ ०वज्रघातिना ॥ इति क० ख० ग० पु० ।

१५।४ सद्यो मूर्च्छां गत:० इति क० ख० ग० पु० ।

१५।५ कपिटङ्कस्य यात्राया० इति ख० पु० ।

१५।१३ एक पात्राय गोदानं० इति क० ख० ग० पु० ।

१५।१८ श्लोकोत्तरार्द्धं नास्ति ग० पु० ।

१५।१९ गङ्गाया द्विगुणं० इति ख० पु० ।

श्लोकपूर्वार्द्धं नास्ति ग० पु० ।

१५ २४ तेनैव भारते० इति क० ख० ग० पु० ।

१५।३२ ०कृत्वा हत्या सहस्रशः । इति क० ख० ग० पु० ।

१५।३३ तदेवमाज्ञया० इति मु० पु० ।

१५।३४ स्फुरदत्युच्छलत्फे० इति मु० पु० ।

१५।३८ स्फुरदत्युच्छलत्फे० इति मु० पु० ।

१५।३९ अस्याक्षेपणातो० इति क० ख० ग० पु० ।

१५।४० यथा ब्रह्मगतिः० इति क० ख० ग० पु० ।

१५।४२ ०पतिता द्वारकामृद् । इति मु० पु० ।
ख० पु० मूलेऽपि तथैव दृश्यते ।

१५।४३ एतस्य दर्शनात् सद्यो० इति मु० पु० ।

१६।१ श्लोकोत्तरार्द्धं नास्ति ख० पु० ।

१६।४ ०कृष्णविक्षेपविह्वला ।। इति क० ग० मु० पु० ।

१६।९ सिद्धाश्रमं तेऽपि जग्मु० इति क० ख० ग० पु० ।

१६।११ ०र्विमिस्स्युर्भगवत्स्त्रियः ।। इति क० ख० ग० पु० ।

१६।१३ ०का नाम कुत्र० इति मु० पु० ।
त्वं सर्वतो हि भगवन्० इति ख० पु० ।

१६।१७ किन्तु राधा० इति क० ख० ग० पु० ।
०गुणार्पिता ।। इति ख० पु० ।
०गुणार्चिता ।। इति क० मु० पु० ।

१६।१९ ०सर्पादिव्याध० इति मु० पु० ।

१६।२३ ०समा एव न० इति मु० पु० ।

१६।२८ ०कि सुवर्णनम् । इति क० ग० पु० ।
०किं युवर्णनम् । इति ख० पु० ।

१६।३० ०मानयुताः सर्वा० इति मु० पु० ।
कुलकौशल्य० इति क० ख० ग० पु० ।

१६।३४ ०परः स्त्रीपरिवेष्टितः । इति क० पु० ।

१६।३६ ०परितस्तरणं शुभम् । इति क० ग० पु० ।
०वस्त्रैरास्तरणं शुभम् । इति मु० पु० ।
०गन्धिसङ्कुलम् ।। इति क० ग० मु० पु० ।

१६।३८ छत्रान्दोलधरैः० इति क० ख० पु० ।
०वृजद्भिस्तामितस्तत ।। इति क० ख० पु० ।

१६।३६ ०विद्युद्दाममनोहरा। इति मु० पु०।

१६।४० अङ्गुल्यग्रैः शोभनैः स्वैः पुष्पभूमि० इति मु० पु०।

१६।४२ ०सूर्यस्तारागणास्तथा। इति क० पु०।

०सूर्यात्तारागणास्तथा। इति ख० पु०।

०सूर्यतारागणास्तथा। इति ग० पु०।

१६।४४ ०वदन्त्यस्ना. प्राप्ताः याः श्रीकृष्णपुरःसराः। इति क० ख० ग० पु०।

श्लोकान्तिमपादद्वयं नास्ति क० ग० मु० पु०।

१७।७ ०सहायान्मे त्वया देव हता भुवि। इति मु० पु०।

०सहाया हि० इति ख० पु०।

१७।६ ०धृतो गोवर्द्धनाचलः॥ इति ख० पु०।

१७।१४ ०भक्ता भवत्यो बह्वो० इति क० ख० पु०।

ख० पु० पार्श्वटिप्पण्यां भगिन्यो इति वर्त्तते।

१७।१५ ०रत्नप्रभाव किमु तत्पगीर्चान्। इति क० ख० ग० पु०।

१७।१६ आगच्छ चास्मच्छिविरा० इति ख० पु०।

१७।२० ०राधा कीर्त्तिमतीं० इति क० ख० ग० पु०।

१७।२४ स्वापयित्वाथ ता० इति मु० पु०।

१७।२७ प्रत्युद्गमप्रस्त्रवणौ० इति मु० पु०।

०प्रश्रवणौ.० इति ख० ग० पु०।

१७।३० ०श्रुत्वा परं मैष्मी० इति मु० पु०।

१७।३२ ०ताम्बूलवीटकम्। इति मु० पु०।

१७।३३ ०स्वकृतं शुभा। इति क० ग० पु०।

१७।३६ ०प्रसन्नः प्राह० इति मु० पु०।

१७।३८ ०स्ते मम प्रोच्छ० इति मु० पु०।

१७।३६ प्रेम्णा पादं विमृज्याथ० इति मु० पु०।

१७।४० ०नवैकैणामद्वितीया० इति क० ख० ग० पु०।

१८।१ ०गोपीगणस्य च। इति क० ख० ग० पु०।

१८।२ ०ते भक्त्या० इति मु० पु०।

१८।४ ०तथा गोप्यः सर्वा वै वृजिनार्दन। इति क० ख० ग० पु०।

१८।५ पूर्णीकुरु० इति मु० पु०।

१८।६ राधेऽद्य कीर्त्ति० इति क० ग० पु०।

१८।१० ०कुरु प्रियतमे च० इति मु० पु०।

०प्रियतमेऽद्य० इति ग० पु०।

१८।११ ०प्रियेष्टाः।। इति मु० पु०।

०प्रियंस्ताः।। इति ख० पु०।

०प्रियस्ता।। इति ग० पु०।

१८।१८ ०स्त्रीगणैश्छादितो राजन्० इति ख० पु०।

१८।२२ गतं मानो नः० इति क० ख० पु०।

०महामुनिः।। इति ग० पु०।

१८।२५ प्राहैवं पृच्छ्यता० इति क० ग० पु०।

१८।२६ ०पृच्छन्ति ता मनोहराम्। इति मु० पु०।

०राधिका पराम्। इति ख० पु०।

१८।३२ ०गोवर्द्धनाचलः। इति क० ख० ग० पु०।

१८।३३ ०वायुनाचितसैकते। इति ग० मु० पु०।

०वायुनाचित्तसैकते। इति ख० पु०।

१८।३७ ०कापाङ्गदो रसः। इति क० ख० ग० पु०।

१९।१ श्लोकोत्तरार्द्धं नास्ति ग० पु०।

१९।२ श्लोकाद्यपादद्वयं नास्ति ग० पु०।

०नवत्या च षडुत्तरैः। इति ख० पु० पार्श्वटिप्पण्याम्।

१९।३ नास्ति ग० पु०।

०ऊनैश्च द्विशतैर्नृप। इति क० पु०।

१९।४ ०श्रीकृष्णस्य महात्मनः इत्येतन्मात्रमेव श्लोकपूर्वार्द्धे वर्त्तते ग० पु०।

१९।६ सहर्षः पार्षदै० इति मु० पु०।

१९।१३ ज्ञानतीर्थे समाहृत्य० इति ख० पु०।

१९।१७ ०कुष्ठतामुक्तः० इति क० ख० ग० पु०।

१६।२५ ०श्रीकृष्णचन्द्रस्तु० इति क० ख० ग० पु० ।

१६।२८ श्लोकान्तिमः पादः नास्ति ख० पु० ।

१६।२६ नास्ति ख० पु० ।

०वृषस्थे भास्करे सति ।। इति क० ग० पु० ।

१६।३० श्लोकाद्यः पादः नास्ति ख० पु० ।

श्लोकपूर्वार्द्धं नास्ति क० ग० पु० ।

१६।४० ०दुर्गार्त्तिनाशिनी । इति मु० पु० ।

१६।४२ तद्विलात् तत् प्रसिद्धं० इति मु० पु० ।

तद्व्यक्ता तत् प्रसिद्धं० इति ख० ग० पु० ।

२०।१ इदं तीर्थं महापुण्यं कामदं तीर्थदायकम् ।। इति क० पु० ।

इदं तीर्थं० इति ग० पु० ।

२०।२ ०प्राप्यते नरः ।। इति क० ख० ग० पु० ।

२०।३ तदा वै० इति मु० पु० ।

०कुण्डो विधीयते । इति क० ख० ग० पु० ।

यत्र मत्रा० इति मु० पु० ।

२०।५ तथा वै पश्चिमे० इति मु० पु० ।

ब्रह्मतीर्थं इत्यादिस्तस्य पुण्यं इत्यन्तो भागः नास्ति ग० पु० ।

०स्वर्णपात्रेण० इति मु० पु० ।

२०।१७ ०कृत्वा सर्वपरिग्रहम् । इति क० ख० ग० पु० ।

२१।१ ०त्रिंशं द्वारं हनू० इति ख० पु० ।

२१।४ ०मात्रेण स भवेद् भक्तिसंयुतः । इति क० ख० ग० पु० ।

श्लोकोत्तरार्द्धं नास्ति क० ख० ग० पु० ।

२१।५ जाम्बवान् नाम ऋक्षराट् । इति क० पु० ।

श्लोकप्रथमद्वितीयचरणौ न स्तः ख० ग० पु० ।

श्लोकतृतीयचतुर्थचरणौ न स्तः क० ग० मु० पु० ।

श्लोकपञ्चमषष्ठचरणौ न स्तः क० ख० ग० पु० ।

२१।१५ ०स महात्मा० इत्यादि श्लोकान्त नास्ति ग० पु० ।

२१।१६ श्लोकपूर्वार्द्धं नास्ति ग० पु० ।

स्त्रीसङ्ग:० इति मु० पु० ।

२१।१७ ०रश्चिह्नैपै समन्वितम् । इति क० ख० ग० पु० ।

०रश्चिह्नैषै: ० इत्यस्य पार्श्व-टिप्पण्या 'हयह्नैषै' इति वर्त्तते ख० पु० ।

२१।१८ ०राजसङ्घै:० इति मु० पु० ।

०राजसङ्घे ० इति ख० पु० ।

२१।२० ०कथं राज्य० इति मु० पु० ।

नास्ति ग० पु० ।

२१।२१ श्लोकप्रथमपाद: नास्ति ग० पु० ।

२१।२४ तीर्थैस्तुतोऽध ० इति क० पु० ।

तीर्थायुतोऽध ० इति ग० पु० ।

२१।२५ ०न शक्यश्चतुर्मुखो० इति क० ख० ग० मु० पु० ।

२१।३१ ०ब्राह्मणो वैष्णव मामकी० इति क० पु० ।

२१।३२ ०विधाय सार्धं० इति मु० पु० ।

इत:परं मु० पु० द्वाविंशोऽध्याय: दृश्यते । परं क० ख० ग० पुस्तके तदभाव एव वर्त्तत इति द्रष्टव्यम् ।